In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला – 138

आचार्य कालूरि हनुमन्तरावकविना अनूदितम्

॥ षेक्स्पियरनाटकत्रयम् ॥

(मेक्बेत्, हेम्लेट्, एन्टोनि-क्लियोपेट्रा च)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डॉ. के. वरलक्ष्मीः

सहाचार्या (संशोधनम्),उपनिदेशिका

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी ग्रन्थमाला – 138
In Public domain, Digitization Muthulakshmi Research Academy

आचार्य काळूरि हनुमन्तरावकविना अनूदितम्

॥ षेक्स्पियरनाटकत्रयम् ॥

(मेक्बेत्, हेम्लेट्, एन्टोनि-क्लियोपेट्रा च)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा के वरलक्ष्मीः

सहाचार्या(संशोधनम्), उपनिदेशिका

संस्कृत अकादमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamālā - 138

Three Dramas
of
William Shakespeare

Translated by
Prof. Kaluri Hanumantha Rao

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

DTP
P. Vijaya Prasad
9951069321

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Three Dramas
of
William Shakespeare

ISBN – 978-81-975732-6-2

© Sanskrit Academy

Year	:	2024
Pages	:	68+362
Copies	:	300
Price	:	350

Sanskrit Academy Granthamālā - 138
In Public domain. Digitization Muthulakshmi Research Academy

Three Dramas
of
William Shakespeare

(Macbeth, Hamlet, Antony and Cleopatra)

Translated by
Prof. Kaluri Hanumantha Rao
Retd. Professor, College of Technology
Osmania University, HYD

Chief-Editor
Prof. K. Neelakantham
Director

Editor
Dr. K Varalakshmi
Associate Professor (Research), Dy. Director

Sanskrit Academy
Adarsha Sanskrit Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University, Hyderabad – 500 007
2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Granthamālā - 138

Three Dramas
of
William Shakespeare

Translated by

Prof. Kaluri Hanumantha Rao

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

DTP
P. Vijaya Prasad
9951069321

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Three Dramas
of
William Shakespeare

ISBN – 978-81-975732-6-2

© Sanskrit Academy

Year : 2024
Pages : 68+362
Copies : 300
Price : 350

Sanskrit Academy Granthamala - 158
In Public domain. Digitization: Muthulakshmi Research Academy

Three Dramas
of
William Shakespeare
(Macbeth, Hamlet, Antony and Cleopatra)

Translated by
Prof. Kaluri Hanumantha Rao
Retd. Professor, College of Technology
Osmania University, HYD

Chief-Editor
Prof. K. Neelakantham
Director

Editor
Dr. K Varalakshmi
Associate Professor (Research), Dy. Director

Sanskrit Academy
Adarsha Sanskrit Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University, Hyderabad – 500 007
2024

Sanskrit Academy Granthamālā - 138
In Public domain. Digitization Muthulakshmi Research Academy

Three Dramas
of
William Shakespeare

Translated by
Prof. Kaluri Hanumantha Rao

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

DTP
P. Vijaya Prasad
9951069321

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Three Dramas
of
William Shakespeare

ISBN – 978-81-975732-6-2

© Sanskrit Academy

Year	:	2024
Pages	:	68+362
Copies	:	300
Price	:	350

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

ओम् श्री गुरुभ्यो नमः

॥ श्री शङ्करभगवत्पादाः विजयन्ते ॥

अगणितगुणौघसिन्धुं नाटकविद्या प्रकाशिता येन।
तमजमनादिमनन्तं गौरीकान्तं नमस्यामः॥

(नाटकलक्षणरत्नकोशात्)

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।
आहार्यं चन्द्रतारादि तं नुमः सात्विकं शिवम्॥ (सङ्गीतरत्नाकरः)

केन्द्रीयसंस्कृतविश्वविद्यालयेन आदर्शसंस्कृतशोधसंस्थात्वेन मानिता संस्कृतपरिषदियम् अस्याः संस्थापनसमयादारभ्य विविधेषु शास्त्रेषु लोकविश्रुतानां निदेशकानाम् आध्वर्यवे अनेकान् ग्रन्थान् मुद्रापयामास। मुद्रापितेषु तेषु पण्डितजनानुमोदिताः व्याकरण-वेदान्त-साहित्यादिशास्त्रग्रन्थाः, श्रव्यकाव्यानि, दृश्यकाव्यानि च वर्तन्ते। अपि च प्राचीनैः वामन-जयादित्य-नागेशभट्टादिभिः विरचिताः शास्त्रग्रन्थाः, महाकवेः कालिदासस्य रूपकाणि, क्षेमेन्द्र-जगन्नाथ-नीलकण्ठदीक्षितादीनां लघुकाव्यानि, आधुनिकैः सन्निधानं सूर्यनारायण शास्त्री, चिट्टिगूडूरु वरदाचार्यः, श्रीभाष्यं विजयसारथिः, पेन्ना मधुसूदनः इत्यदिभिः कविपण्डितैः रचितानि काव्यानि विद्यन्ते। एवञ्चैतेषु श्री श्रीनिवास रामानुजचार्याणां हा हा हू हूः, ईश्वरन् कुट्टि महाशयस्य **पञ्चतन्त्रम्**, सूर्यनारायणशास्त्रिणां **आन्ध्रकाव्यकथाः**, श्रीभाष्यं विजयसारथिकवेः **गीताञ्जलिः**, नारायणदासस्य **रुबायत् गीतानि**, श्री वरदाचार्याणां **आन्ध्रशतकानि**, इत्यादयः इतराभ्यः भाषाभ्यः संस्कृतेनानूदिताः सहृदयहृदयाह्लादकाः ग्रन्थाः अपि विद्यन्ते। इदानीं श्रीमद्वाल्मीकिरामायणम्, महाभारतम् इत्यनयोः विमर्शनात्मकसप्रमाणसंशोधनेन मुद्रापयितुः, अनेकग्रन्थरचयितुः, निरन्तरं संस्कृतवाङ्मयसेवातत्परस्य आचार्यस्य **श्री कालूरि हनुमन्तराववर्यस्य** संस्कृतेनानूदितं **षेक्स् पियर** महाशयस्य रूपकत्रयं, **(मेक्बेत्, हेम्लेट् एन्टोनिः क्लियोपेट्रा)** चेति मुद्रापयामः।

In Public domain. Digitization Muthulakshmi Research Academy

अनुवादस्य स्वरूपम् -

प्रपञ्चवाङ्मये भाषासु सर्वास्वपि प्रायः अनुवादपद्धतिः अनुकरण-पद्धतिश्च दृश्येते। राजशेखरः काव्यमीमांसायां द्वादशाध्याये कविप्रभेदेषु अनुकरणरीतिमप्यबोधयत्। तत्र सः प्रतिबिम्बाकार, आलेख्याकार, देहान्तर-तुल्यसंवादरूपेण अनुकरण/अनुवाद काव्यानि च दृश्यन्ते इति तेषां लक्षणानि, उदाहरणानि च कानिचनादर्शयत्। एवञ्च आनन्दवर्धनः ध्वन्यालोके, हेमचन्द्रः काव्यानुशासने अन्ये च लाक्षणिकाः केचन अनुकरणकवितामुद्दिश्य सङ्क्षेपेण प्रणिजगदुः। आधुनिकः लाक्षणिकः रेवाप्रसाद द्विवेदी स्वकाव्यालङ्कार-कारिकायाम् अनुकरण-अनुवादकवीनां लक्षणानि प्रास्तौत्।

भगवान् पाणिनिः **अनुकरणं चानिति परम्** (1-4-62), **अनुवादे चरणानाम्** (2-4-3) इत्यादिसूत्रेषु अनुकरण-अनुवादशब्दावुदाजहार। तत्र "खाङ्कृत्य" इत्युदाहरणेन पाणिनिः अनुकरणशब्दः ध्वन्यनुकरणार्थमेवोपा-युनगिव दृश्यते। किन्तु "अनुकरणम् = सदृशीकरणम्, व्याकरणमते तद्द्विविधम्, यत्र अर्थरहितस्य केवलशब्दस्य सदृशकरणं तत् शब्दानुकरणम्, यत्र अर्थविशिष्टस्य सदृशकरणम् तदर्थानुकरणम्" इति शब्दकल्पद्रुमो विवृणोति। "अनुकरणम् = सदृशक्रियादिकरणं, तच्च गुणक्रियावयवादिभिः सदृशीकरणम्, अनुक्रियते अनेनेत्यर्थे करणे ल्युट् प्रत्ययः" इति वाचस्पत्यं भणति। अनेन प्रायः इत्थं वक्तुं शक्यते यत् पूर्वान् कवितल्लजान् अनुकृत्य अनुसृत्य वा तैरेव शब्दैः भाषान्तरेण कवयितुं कृतयत्नः, अथवा पूर्वैर्वर्णितान् अंशान् यथातथं स्वीकृत्य ततोऽपि किञ्चिद्विशेषेण तद्भावम् अन्यया भाषया प्रकटीकर्तुं कृतो यत्न एव "अनुकरणम्" इति।

अनुवादस्तु शब्दानुवादः अर्थानुवादः इति द्विविध इति कथयन्ति पण्डिताः। **अनुवादे चरणानाम्** (2-4-3) इति पाणिनेः सूत्रस्य काशिकाकारः "प्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनम् अनुवादः" इति व्याचख्यौ। सिद्धान्तकौमुद्यां बालमनोरमाकारोऽपि "अवगतार्थस्य प्रतिपादने" इत्येव

अवोचत्। आङ्ग्लव्याख्याकारः यस् सि वसु पण्डित एवमवादीत् - "The word 'anuvāda' means repetition by way of explanation, illustration or corroboration; that is to say, when a speaker demonstrates for some special purposes, a preposition which had already been demonstrated before, that is called '*anuvāda*'. Another meaning of the word is 'the recitation of the *charanas* as already learnt as distinguished from learning them the first time" इति। पूर्वकविभिः प्रोक्तं भावम् अनुसृत्य तादृशैरेव पदैः तत्समानमेव भावं प्रकटीकर्तुं कृतो यत्न एव अनुवाद इति विबुधानामभिप्रायः।

लोके सहस्रशः अनुवादकवयः अवर्तन्त वर्तन्ते च। मूलग्रन्थस्य भाषाम् अजानन्तः एव भाषान्तरीकृतस्यानुवादस्य सहायेन पुनरनुवादं स्वमातृभाषया वा अन्यया भाषया वा नैकेषां ग्रन्थानाम् अनुवादम् अकार्षुः पण्डिताः कुर्वन्ति च। तादृशाः अनुवादग्रन्थाः यद्यप्यानन्दयन्ति सहृदयान् तथापि मूलग्रन्थकर्तुः भावानाः तेषूचितरीत्या नोपस्थाप्यन्ते इति विमर्शकानाम् अभिप्रायः। अन्यत्र मूलग्रन्थस्थभाषायाम् अखण्डम् आधिपत्यम् ऊढ्वा तं ग्रन्थं भाषान्तरेणानुवादं कृतवन्तः केचन कविपण्डिताः। एते साहित्यशास्त्रीयैः लक्षणैः, गुणैस्सर्वैस्समलङ्कृता भूत्वा सहृदयहृदयान् आह्लादयन्ति, मूलग्रन्थस्य भाषायाः अनुवादग्रन्तस्य भाषायाः साहित्यस्य च अध्ययनाय प्रोत्साहयन्ति संशोधनाय प्रेरयन्ति। षेक्स् पियर् महाकवेः अनेकानि दृश्यानि श्रव्यानि च भारतीयभाषासु नैकासु अनूदितवन्तः अधीतविद्याः काव्यनिर्माणकुशलाः भारतीयविद्वांसः। तत्र संस्कृतभाषायामपि नाट्यशास्त्र-नाट्यदर्पण-नाटक-लक्षणरत्नकोशादिग्रन्थेषु, दशरूपकादिरूपकलक्षणग्रन्थेषु च प्रवीणाः अनेके संस्कृतविद्वांसः कृष्णमाचार्यः, अनन्तत्रिपाठी शर्मा, सुखमय मुखोपाध्यायः, देवप्रसाद् द्विवेदी इत्यादयः षेक्स् पियर् महाकवेः काव्यानि संस्कृतेन अनूद्य पण्डितानां प्रशंसाम् अलभन्त। एनमेव पन्थानम् अनुसृत्य, संस्कृतं, तेलुगु,

In Public domain. Digitization Muthulakshmi Research Academy

हिन्दी, आङ्ग्लादिभाषासु साहित्ये अन्येषु च शास्त्रेषु कृतभूरिपरिश्रमाः आचार्याः काल्ूरि हनुमन्त राववर्याः षेक्स् पियर् महाशयस्य **मेक्बेत्, हेम्लेट्, एन्टोनिः क्लियोपेट्रा** इत्याख्यानि त्रीणि रूपकाणि रूपकलक्षणानुसारं सुमधुरया संस्कृतभाषया अनूदितवान्।

आचार्याः काल्ूरि हनुमन्त राववर्याः -

आचार्यः काल्ूरि हनुमन्त राव महाशयः 1931 तमे वर्षे सेप्टम्बर् मासस्य विंशति दिनाङ्के स्वजनिम् अलभत। श्री काल्ूरि व्यासमूर्तिः श्रीमती रमणम्मा इत्याख्ययोः पुण्यदम्पत्योः पुत्रोऽयं महानुभावः। आन्ध्रदेशस्य विजयनगरम् एतेषां वासस्थानम् आसीत्। एतेषां पितृपादाः श्री व्यासमूर्तिमहाशयाः आन्ध्रदेशे पुराणप्रवचनेषु लब्धप्रतिष्ठाः[1]। हनुमन्तराव महाशयानां विद्याभ्यासः बाल्ये विजयनगरे ततश्च विशाखपत्तने समभवत्। ततश्च आन्ध्रविश्वविद्यालये विद्याम् अभ्यस्य 1954 तमे वर्षे बि फार्मसी, 1955 तमे वर्षे यम् फार्मसी उपाधिम् अगमत्।

विद्याभ्यासानन्तरम् आदौ आन्ध्रविश्वविद्यालयस्य फार्मसीशास्त्र-विभागे ततश्च औषधीयशास्त्रसम्बन्धिप्रयोगशालासु च शास्त्रज्ञरूपेण कार्यं निरुह्य 1966 तमे वर्षे सुधीरयं उस्मानिया विश्वविद्यालयस्य वैज्ञानिकमहा-विद्यालये (College of Technology) सहायक आचार्यपदं प्राप्तवान्। फार्मसीशास्त्रे 'Studies in Phase Transfer Catalysis' इति विषये संशोधनं कृत्वा पिहेच्.डि उपाधिम् अगात् । Pharmaceutical Technology इत्याख्ये कृतभूरिपरिश्रमोऽयं विबुधः नैकेषां शोधच्छात्राणां

---

[1] मम पिता श्रीमान् व्यासमूर्तिः सर्वदा रामायण-महाभारतविवेचननिमग्न आसीत्। चरमक्षणे सीतारामलक्ष्मणानां वनगमनं जल्पन् व्यसुरभवत्। आ बाल्यात् रामायण-महाभारतयोः ममाभिरुचिस्तस्यैव प्रभावेण समुत्पन्ना समेधिता च। तस्मै कृतज्ञतां निवेदयितुं वाचो न प्रभवन्तीति नमस्कारशतमेव समर्पयामि। (श्री कालुरि वर्यस्य श्रीमद्वाल्मीकिरामायणम् -सरलगद्यात्मकम्-प्रस्तावना-पृष्टसंख्या-3)

कृते स्वस्वपरिशोधनांशेषु शास्त्रं बोधयामास। अपि च 1991 तमे वर्षे तस्मात् विभागात् निवृत्तिं प्राप्य निरन्तरं संस्कृतवाङ्मयस्य सेवां कुर्वन् अस्ति।

यद्यपि आबाल्यात् वैज्ञानिकशास्त्रम् अभ्यास्थत् अयं धीमणिः, स्वयमेव भारतीयवाङ्मयाध्ययने तत्रापि आङ्ग्लेन सह संस्कृतवाङ्मये तेलुगुवाङ्मये अभिरुचिं वर्धयामास । निरन्तराध्ययनतत्परोऽयं विपश्चित् संस्कृतभाषायां तेलुगुभाषायाञ्च व्याकरणशास्त्रे भाषाशास्त्रे, इतिहासवाङ्मये, पुराणवाङ्मये, काव्यवाङ्मये च प्रावीण्यम् अध्यगच्छत्। 1950 तमे वर्षे एव तेलुगुभाषायां संक्षिप्तकथालेखनम् आरेभे। ततः 1967 वर्षादारभ्य संस्कृतेनापि कथाः रचयित्वा सहृदयानां प्रशंसापात्रम् अभवत्। कविपण्डितस्यास्य रचनासु निबन्धाः, रूपकाणि, साहित्यविमर्शः, संक्षिप्तकथाः, पद्यकाव्यानि, श्रीमद्वाल्मीकिरामायण-महाभारतयोः विमर्शनात्मकसंशोधितप्रतयः अनेके वर्तन्ते।

हनुमन्तराववर्यस्य रचनाः-

संस्कृतरचनाः-

I. **पद्यकाव्यानि**

1. कालूरिहनुमन्तरावकाव्यसङ्ग्रहः

II. **गद्यकाव्यानि-**

2. वाल्मीकिरामायणम् सरलगद्यम् – बालकाण्डम्, अयोध्याकाण्डम्
3. वाल्मीकिरामायणम् सरलगद्यम् – अरण्यकाण्डम्, किष्किन्धाकाण्डम्

III. **कथाकाव्यानि-**

4. नातिचरामि अन्याश्च कथाः
5. द्रौपदी – महाभारतानुसारेण भावितं द्रौपतीचरतम्।

In Public Domain. Digitization Muthulakshmi Research Academy

IV. दृश्यकाव्यानि-

6. सीताहरणम् अन्याश्च नाटकानि
7. षेकस्पियरनाटकत्रयम् (मेक्बेतः हेम्लेटः एण्टोनि क्लियोपेट्रा च)

V. विमर्शनात्मकानिबन्धाः

8. साहितीजगती (निबन्धसङ्ग्रहः)
9. सीताग्निप्रवेशः अन्ये च निबन्धाः
10. रामायणमहाभारतसारविवेकः
11. तमसो मा ज्योतिर्गमय

VI. व्याख्यानानि-

12. वाल्मीकिरामायणम् – बालयुद्धकाण्डानि संस्कृतविवरणसमेतम्
13. महाभारतम् – आदिपर्व सभापर्व संस्कृतविवरणसमेतम्
14. महाभारतम् – विराटपर्व संस्कृतविवरणसमेतम्
15. महाभारतम् –उद्योगपर्व स्त्रीपर्व संस्कृतविवरणसमेतम्
16. भल्लटशतकम् – लघुव्याख्यासमेतम्

VII. कोशग्रन्थः-

17. केचन शब्दर्थाः

VIII. तेलुगु ग्रन्थाः –

कथाः-

18. मनोविहङ्गाः अन्याश्च कथाः
19. नातिचरामि अन्याश्च कथाः

काव्यानि

20. नलचरितम्
21. मेवाड् राजवंशचरितम्
22. काव्यसङ्ग्रहः
23. सुभाषितमञ्जरी

नाटकानि

24. पाण्डवविजयम्
25. नाटकरत्नावली
26. सीताहरणम्
27. अमरान्धकविसम्मेलनम्
28. त्रीणि षेक्स्पियर् नाटकानि

विमर्शः

29. साहितीजगती
30. रामायणसमालोचनम् अन्याश्च रचनाः
31. रामायणमहाभारतयोः सन्देहाः समाधानानि च
32. सीता अग्निप्रवेशः अन्ये च निबन्धाः

व्याकरणम्

32. तत्समशब्दसिद्धिः

वाल्मीकिरामायणपरिप्रश्ने सीताहरणनाटकस्य परिशीलनम् इत्यंशमुद्दिश्य तिरुपतिस्थ संस्कृतविश्वविद्यालये, कालूरि हनुमन्तराव् रचनलु-**परिशीलनम्** इत्यंशमुद्दिश्य आन्ध्रविश्वविद्यालये च द्वौ शोधच्छात्रौ संशोधनं कृत्वा विद्यावारिधि-उपाधिम् अलभेताम्।

काव्येषु नाटकं रम्यम्

नाटकानां स्वारस्यसौन्दर्यास्वादनरताः 'काव्येषु नाटकं रम्यं" नाटकान्तं साहित्यं" नाट्यवेदः' इत्यादिभिः वाग्भिः रूपकाणां वैशिष्ट्यं प्राशंसत विपश्चिदः। यतो हि कविः नाटके बोद्धव्यम् अर्थं प्रत्यक्षं दृश्यमानमिव सामाजिकानां चित्तेषु मनोहररूपेण उपस्थापयति। अभिनयादिप्रदर्शनात् वेषाभूषाद्यलङ्करणात् आङ्गिकवाचिकाद्यभिनयसंमिश्रणात् न केवलं सचेतसामेव रसास्वादः चित्ताह्लादश्च, अपि तु आबालवृद्धानां, शिक्षितानाम्,

In Public domain. Digitization Muthulakshmi Research Academy

अशिक्षितानां सर्वेषाञ्चानन्दावाप्तिः मनोरञ्जनं च कल्पयति कविस्तत्र। आचार्येण भरतमुनिना उक्तानुसारं धर्मनिष्ठानां कृते धार्मिकी चर्चा, विषयिणां कृते विषयोपभोगः, अज्ञानां कृते ज्ञानोपदेशः, सुधियां कृते ज्ञानवर्धनम्, दुर्विनीतानां कृते निग्रहः, शूराणां मानिनां च कृते उत्साहः, दुःखार्दितानां स्थैर्यम् एवं यस्य यद्विषयिका अभिरुचिः तत्र तद्विषयिकीं सामग्रीं परिकल्पयति दृश्यकाव्यरचनानिपुणः कविः[2]। अत एव नाटकानां कृते दृश्यमिति व्यवहारः कृतः स्यात्। परं श्रव्यकाव्येभ्यः अध्ययनशालिनः पठितारः ज्ञातम् अर्थं पुनः पुनः पठित्वा चर्वित्वा हृदयेषु आनन्दं लभन्ते। नाटकेभ्यस्तु सर्वम् अर्थजातं दृश्यमिव सुखं सरसं चावगत्य नितरां मोदन्ते। अनेनैव हेतुना दृश्यकाव्यस्य नाटकस्य करणं रसिकानाम् आह्लादजननम्, उत्तमं साधनं भवति कवितायाः निकषोपलायमानं सत् व्यञ्जयन्ति कवेर्माहात्म्यं कौशलञ्च। अत एव हेतोः कवित्वस्य उत्तमं पर्यवसानं नाटकरचनं भवतीति, साहित्यस्य च चरमं स्थानं नाटकं भवतीति कृत्वा **नाटकान्तं हि साहित्यम्** इति जगदुः साहित्यविपश्चिदः। अनेनावगम्यते रूपकरचनाकलायाः महत्त्वम्। भरतमुनेः नाट्यशास्त्रेण सह संस्कृतसाहित्यशास्त्रग्रन्थेषु कृतधीः, भास-कालिदास-भवभूत्यादिभिः रचितेषु प्रसिद्धेषु रुपकेषु कृतभूरिपरिश्रमः, विमर्शकाग्रणीः, नैकग्रन्थरचयिता प्रसिद्धाङ्ग्ल-तेलुगुरूपकेषु सर्वेषु पारङ्गतः बहुभाषाकोविदः, कविपुङ्गवः आचार्यः काल्रूरि हनुमन्त राव् महाशयः अद्भुतरीत्या षेक्स् पियर् रूपकत्रयस्य अनुवादम् अकार्षीत्। पूर्वतनाः षेक्स् पियर् महाशयस्य रूपकाणां संस्कृतानुवादकाः तत्रस्थपात्राणां नामान्यपि परिवर्त्य संस्कृतीकृत्य कथामपि

---

[2] धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्।
निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया।।
क्लीबानां धार्ष्ट्यजननम् उत्साहः शूरमानिनाम्।
अबुधानां विबोधश्च वैदुष्यं विदुषामपि।।
ईश्वराणां विलासश्च स्थैर्यं दुःखार्दितस्य च।
अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम्।। (नाट्यशास्त्रम् 1-109,110, 111)

घटनानुकूलं संक्षिप्तीकृत्य भारतीयतानुकूलं कुत्रचित् परिवर्तनं कृत्वा अनुवादं चक्रुः। अत्र हनुमन्तराव् महाशयः पात्राणाम् आङ्ग्लनामानि यथातथं स्वीकृत्य **मेक्बेतः, एण्टोनिः, क्लियोपेट्रा** इत्यादिना उपायुङ्क्त। रूपकाणां परिचयः, षेक्स् पियरस्य महत्त्वं, श्रीमतः हनुमन्तराव वर्यस्य अनुवादशैली, तस्य भाषा, वर्णनाकौशलम् इत्याद्यंशाः सर्वेऽपि अस्माकम् उपनिदेशिका डा. के. वरलक्ष्मीः स्वसम्पादकीयवाक्येषु विपुलतया परामृष्टवतीति कृत्वा अत्र नोल्लिखामि। किन्तु अनुवादरूपकत्रयमेतत् सहृदयानां संस्कृतज्ञानां चेतांसि रञ्जयिष्यति। अपि च

मृदुललितपदाढ्यं गूढशब्दार्थहीनं
जनपदसुखबोध्यं मुक्तिमन्नृत्ययोज्यम्।
बहुरसकृतमार्गं सन्धिसन्धानयुक्तं
भवति च शुभकाव्यं नाटकं प्रेक्षकाणाम्।।

(नाट्यशास्त्रम् – 17)

इति नाट्यशास्त्रोक्तरूपकलक्षणस्य उदाहरणात्मकं भवति एतद्रूपकत्रयमित्यत्र न सन्देहः।

कार्तज्ञ्यम्

रूपकत्रयसहितं ग्रन्थम् अमुं संस्कृत अकाडमी पक्षतः प्रकाशयितुम् अङ्गीकृतवद्भ्यः विद्वत्तल्लजेभ्यः आचार्येभ्यः काल्रूरि हनुमन्त राव् महाशयेभ्यः विनम्रपूर्वकं धन्यवादान् वितरामि।

एतस्य रूपकत्रयस्य अध्ययनं कृत्वा षेक्स् पियर् महाकवेः रूपकैस्सह तुलनात्मकरीत्या श्रद्धया संशोध्य, उभयोरपि विशेषान् विपुलरूपेण व्यलिखत् स्वप्राक्कथने अस्माकम् उपनिदेशिका डा. के. वरलक्ष्मीः। अस्मिन् विषये तस्याः श्रद्धा सर्वथा अभिनन्दनीया। ग्रन्थानाम् अध्ययने परिशीलने

In Public domain. Digitization Muthulakshmi Research Academy

सम्पादने इयं कुशला, अपि च स्वस्मै दत्तं कार्यं जागरूकतया साधयति सा। तस्यै मम शुभाभिनन्दनानि।

ग्रन्थस्यास्य सम्पादने निरन्तरं सहकृतवद्भ्यः संशोधनपटुभ्यः डा. के. वि. सूर्यप्रकाशः, डा. जोशी सन्तोष कुमारः, जोशी भरद्वाजः इत्येतेभ्यः शुभाभिनन्दनानि।

एतादृशानां विशिष्टग्रन्थानां संशोधने सम्पादने च सस्नेहम् अस्मान् सर्वथा प्रेरयन्ति केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतिवर्याः आचार्याः श्रीनिवास वरखेडि महाशयाः, कुलसचिवाः आचार्याः गायत्रीमुरलीकृष्णवर्याः। तेभ्यः प्रणामाञ्जलिं वितरामि। अपि च उस्मानिया विश्वविद्यालयस्य (प्रभारी) कुलपतिवर्याः श्रीमन्तः दानकिशोर् (IAS) महोदयाः, कुलसचिवाः आचार्याः पि. लक्ष्मीनारायणमहोदयाः संस्कृतपरिषदम् अध्ययने परिशोधने च सर्वथा प्रोत्साहयन्ति। एवमेव केन्द्रीय संस्कृतविश्वविद्यालये आदर्शसंस्थानां विभागस्य निदेशकाः आचार्याः मधुकेश्वर् भट् महाशयाः। एतेभ्यः सर्वेभ्यः विद्वद्भ्यः धन्यवादान् वितरामि।

ग्रन्थस्यास्य मुद्रणं Karshak Art Printers, Vidyanagar, Hyderabad समुचितरीत्या कृतवन्तः। तेभ्यः संस्कृत अकाडमी धन्यवादान् प्रकटयति।

बुधजनविधेयः
आचार्यः के. नीलकण्ठः
निदेशकः

In Public domain. Digitization Muthulakshmi Research Academy

भूमिका

आङ्ग्लभाषाकविर्नाटककारश्च षेक्स्पियरः सुप्रसिद्धः । तस्य महाकवेः त्रीणि नाटकानि संस्कृतभाषया अनूदितानि पाठकेषु समर्प्यन्ते । एतदर्थमिमे ग्रन्था मया उपयुक्ताः ।

1. Shakespeare's 1. Macbeth, 2. Hamlet, 3. Antony and Cleopatra, w. Turner, S. Chand And Company Ltd., Delhi, 1999. एषु ग्रन्थेषु वामपत्रेषु षेक्स्पियरस्य रचना भवन्ति दक्षिणपत्रेषु तेषामाधुनिकाङ्ग्लभाषानुवादा भवन्ति । नाटकानन्तरं व्याख्या भवन्ति । षेक्स्पियरस्येङ्ग्लीषभाषा तत्कालभाषा आधुनिकेङ्ग्लीषभाषाया बहुधा भिद्यते । कदाचिदर्था अन्या भाषाविधानं चान्यत् । आधुनिकेङ्ग्लीषभाषया अनुवादं व्याख्यानं च विना तस्य भाषा प्रायेण दुर्बोधा भवति ।

2. No Fear Shakespeare. Spark publication. Macbeth 2003 Hamlet 2003, Antony and Cleopatra, 2006

एषु ग्रन्थेषु वामपत्रेषु षेस्पियरस्य रचना दक्षिणपत्रेषु तेषामाधुनिकेङ्ग्लीषभाषानुवादा भवन्ति ।

3. Folger Shakespeare Library, New York. Macbeth 1992 Hamlet 1992, Antony and cleopatra 1999.

एषु ग्रन्थेषु दक्षिणपत्रेषु षेक्स्पियरस्य रचना यथास्थिता भवन्ति वामपत्रेषु केचन विशेषशब्दार्था विवरणानि च भवन्ति । अन्ते केचन विशेषाः सन्ति ।

4. The Works of William Shakespeare. Edited by William George Clark and William Aldiswrite Macmilan And Co Limited. London 1926.

अस्मिन् ग्रन्थे केवलं मूलमेव भवति ।

मया क्वचित् क्वचित् सङ्क्षेपाः कृताः । तत्र तत्र कानिचन परिवर्तनानि कृतानि। इमानि स्वल्पानि । प्रायेण नाटकानि मूलानुसारेणानूदितानि ।

© Public domain. Digitization Muthulakshmi Research Academy

त्रीण्यपि विषादनाटकानि गृहीतानि । गम्भीरेष्वपि नाटकप्रसङ्गेषु षेक्स्पियरस्तत्र तत्र हास्यमकरोत् पार्षदरञ्जनार्थम् । तादृशानि स्थितिगाम्भीर्यभञ्जकानि हास्यानि मया प्रायेणापनीतानि लघूकृतानि वा । रचनायां मया तत्र तत्र विसन्धिः कृतो येन सौलभ्यं भवेत् । षेक्स्पियरस्य रचना प्रायेण blank verse नाम्ना मात्राच्छन्दसा प्रचलति । मया तु गद्येन रचना कृता । यत्र तेनान्त्यप्रास(rhyme) पद्यानि रचितानि तत्र मया च श्लोकाः कृताः ।

नाटकेषु क्वचित् क्वचित् स्वगतं भवति । यन्नाटकव्यक्तेर्मनसि प्रवर्तते तन्नटेन श्रोतृश्राव्यवाग्भिः सूच्यते । किं च क्वचिदपि (aside) जनान्तिकं भवति । इदमसहजम् । तथापि इङ्ग्लीषे संस्कृते चास्ति । तस्मान्मया चोपयुक्तम् । अन्ते लघुव्याख्या रचिता।

नाटकेषु भूतानि भवन्ति । यथा संस्कृतसाहित्ये शापा वराश्च भवन्ति तथा षेक्स्पियरनाटकेषु भूतानि भवन्ति तैः कथा प्रचाल्यते ।

मेक्बेतः हेम्लेटः एन्टोनिश्च मूलतः सुजना आसन् । तथापि मेक्बेतो दुराशया हेम्लेटः कार्यं प्रति अनिश्चयेन एन्टोनिः स्त्रीसक्त्या च नष्टाः । एतानि नाटकानि सर्वथा दोषरहितानि पूर्णरूपेण गुणसम्पन्नानीति न। मेक्बेतनाटकं प्रायेण डाकिनीवशं प्रवर्तते। हेम्लेटे प्रवृत्तिरल्पा भाषणमधिकं च। एन्टोनिः प्रायेण क्लियोपेट्रां न विश्वसिति। तथापि एषु नाटकेषु बहवो गुणाः सन्ति। त्रिषु च नाटकेषु सर्वे पुण्यं पापं च जानन्ति पापाद् बिभ्यति स्वर्गनरकौ विश्वसन्ति। तथापि तेषां प्रवर्तनं तथा अभवत्।

इत्थं भवदीयः

आचार्यः कालूरि हनुमन्तरावः

8790339043

C/o. K.V. Vyasamurthy

986699419

Email. vedavyas@gmail.com

सम्पादकीयम्

अनुवादो विद्या वा परिणतिदृष्ट्या कलाऽपि मन्तव्यः।
अक्षुण्णः किल महिमा सम्प्रति विश्वेऽस्य वर्तते नूनम्।।

(अनुवादशास्त्रम् 1)

यथा अष्टादशविद्याः चतुष्षष्टिकलाश्च संस्कृतसाहित्ये विराजन्ते तथैव अनुवादोऽपि विद्या वा कला वा भवतीति आधुनिकविदुषां राधावल्लभत्रिपाठि-वर्याणामभिप्रायः।

अनुवादस्य स्वरूपम् - अनूवादकृतिः मूलकृतेः पुनः सृष्टिः प्रतिरूपं अथवा बिम्बभूता वा स्यात्।

अनुवादः पुनः सृष्टिः कस्याश्चित् कृतिनः कृते।
स मूलरचनायाः स्यात् प्रतिरूपं नवं क्वचित्।।

बिम्बभूताऽथवा तस्मिन् रचना प्रतिबिम्बति।
आभासोऽपि तथा तस्याः अनुवादे प्रजायते।।

अनुवादप्रक्रिया - अनुवादप्रक्रियायाः क्लिष्टतां सानुभवं परामृशति **प्रवासी** (A Transcreation of Gold smith's Traveler) **चैत्यविलापकाव्ययोः** (A Transcreation of Thomas Gray's Elegy) कर्त्ता वाचस्पतिः गुण्डेरावः हरकारे महाशयः।

"अस्मिन् महीमण्डले सर्वासु दिक्षु लब्धसत्ताकानां नानोपवर्तनानां शैत्यौष्ण्यादिप्राकृतधर्मलक्षणा भौतिकी परिस्थितिर्यथा मिथो भिद्यते तथैव भिन्नरुचिर्हि लोकः इति न्यायात् प्रतिदेशं जनानामाचारविचारात्मिका स्वस्वा-वश्यकौपयिकतत्त्वनिमित्ता सामाजिकराजकीयव्यवस्था अपि भिन्ना एव। अयमेव नियमो निसर्गतो भिन्नरुचीनां जनानां महाकवीनामतिसूक्ष्मविचार-सन्ततेर्मनोज्ञविलासेष्वपि प्रसजति। सन्ति च विचित्रप्रतिभाशालिनः स्फूर्तिमन्तः कवयस्तत्र तत्र। अलङ्कुर्वन्ति च देशान् स्वजनुषा सुललितपद-

In Public domain, Digitization Muthulakshmi Research Academy

विन्यासचतुरा विलक्षणभावप्रदर्शका विचित्रशय्यारीतिशैलीपटवः अपूर्व-सम्प्रदायप्रवर्तकाः शुद्धमनस्काः शारदोपासकाः। अत एव सिद्धं कविसमयोऽपि प्रतिदेशं भिन्न इति। तस्मादन्यदेशीयविलक्षणव्यङ्ग्यरसालङ्कारादयः भारत-साहित्यसम्प्रदायप्रवृत्तकविसमयाप्रसिद्धिमात्रेण न कदापि अनादरणीयाः। आङ्गलकविसमयः भारतसाहित्यसाम्प्रदायादतीव भिन्नोऽपि विच्छित्तिविशेष-शालित्वादभिनवरुचिजनकत्वादस्मदीयकाव्यरसास्वादनिरन्तरतृप्तात्मनामसंशयं भङ्ग्यन्तरेण रुच्यन्तरमेव जनयिष्यति। श्रूयते चास्मत्सम्प्रदाये मलयानिलस्य मन्दगामित्वमाङ्ग्लकाव्येषु त्वस्य क्षेपिष्ठत्वम्। इदमपि तदुपक्रान्तविषय-विशेषप्रतिपादनेन रसविशेषमेव पोषयतीत्यनुपदं स्पष्टीभविष्यति। पाश्चात्यै-र्गुणग्रहणनिपुणैर्गीर्वाणसारस्वतभाषान्तरीकरणेन स्वकीयानन्यसाधारण-रसिकत्वं यथा प्रकटीकृतं न तथाद्याप्यस्माभिर्देशान्तरकविसमयः तुलनात्मक-दृष्ट्या विमर्शितः[3]।"

पैशाचीप्राकृतभाषायाः रूपान्तरस्य कथासरित्सागरस्य कर्त्ता सोमदेवः रूपान्तरयोजनामित्थं विशदयति।

यथामूलं तथैवैतन्न मनागप्यतिक्रमः।
ग्रन्थविस्तरसङ्क्षेपमात्रं भाषा न भिद्यते।।

औचित्यान्वयरक्षा च यथाशक्ति विधीयते।
कथारसविघातेन काव्यांशस्य च योजना।।
वैदग्ध्यख्यातिलोभाय मम नैवायमुपक्रमः।

राजशेखरमतमनुसृत्य मूलरचनाकर्तुः कारयित्री प्रतिभा यथा आवश्यकी तथा सहृदयहृदयस्य अनुवादकस्य कारयित्री प्रतिभा भावयित्री प्रतिभा चेति उभे अपि इष्येते। मूलरचनां पठित्वा भावमवगत्य मूलानुसारी अनुवादो विधेयः। समुचितपदानि चिनुयात्। मूलरचनायाः प्रत्येकं पदस्य

---

[3] (ब्रह्मश्री वाचस्पतिगुण्डेरावहरकारे वर्येण विरचितं खण्डकाव्यम् प्रवासी चैत्यविलापकाव्यम् इत्यस्मात् ग्रन्थात् उद्धृतम् पृ.सं. 15)

अनुवादकस्य भाषायां भवेयुर्बहवः पर्यायाः। तेषु कतमो मूलरचनाया आशयं व्यनक्तीति स विचारयेदिति अनुवादकर्ममर्माणि विशदयति त्रिपाठिवर्यः।

आधानोद्धरणे यावद् यावद् दोलायते मनः।
तावदेवानुवादस्य प्रक्रिया शिथिलायते।।

यत्नतः प्रत्यभिज्ञेयं मूलग्रन्थे पदम् पदम्।
पदे पदेऽन्यथा स्याद्वै स्खलनं तु मुहुर्मुहुः।।

मूलभाषापदानां च ज्ञात्वा मर्म यथाविधि।
स्वभाषायां च भवेत् तेषां पर्याया अपि कीदृशाः।

पदस्य स्थापिते स्थैर्येऽनुवादो याति पूर्णताम्।
परिपूर्णेऽनुवादे स्यान्ननु सिद्धा सरस्वती।।

अनुवादस्य समस्याः - एकस्याः भाषायाः आभाणकाः सूक्तयः लोकोक्तयः उक्तिप्रकाराः अन्यभाषया अनुवदितुं न शक्यन्ते। संस्कृतिः कविसमयः इत्यादिविषयाः भिद्यन्ते। अनुवादेन कवेरभिप्रायाः लुप्यन्ते। मूलरचनायाः विशिष्टपदानां रचयितुः आशयस्य वा प्रकटीकरणक्षमाणि पदानि अनुवादे कदाचित् नैव लभ्यन्ते।

संस्कृतनाटकवाङ्मयस्य अनुवादाः- संस्कृते इतरभाषाणां साहित्यस्यानुवादपरम्परा मुगलशासने आङ्ग्लशासने च सविशेषं पुष्टिं प्रयातेति अनुवादवाङ्मयपरिशीलनेन ज्ञायते। आङ्ग्लादिपाश्चात्यविद्वत्तल्लजाः सन्तोऽपि अत्यन्तविरुद्धधर्मगतिरूढाचारदेशकालावस्थाः गीर्वाणवाङ्मये आदरं प्रकटयन्तो स्वस्वभाषासु वेदवेदाङ्गदर्शनशास्त्राणि काव्यनाटकादीनि च अनूदितवन्तः। उपपञ्चाशत् संस्कृतनाटकानि आङ्ग्लभाषया अनूदितानि। विलियम जोन्साभिधः 1789 तमे वर्षे ऐदम्प्राथम्येन शाकुन्तलस्य आङ्ग्लानुवादं चकार। होरेस हेमन विल्सनाख्यः मृच्छकटिकं विक्रमोर्वशीयम् उत्तररामचरितं मालतीमाधवं मुद्राराक्षसं रत्नावलीं मालविकाग्निमित्रं नागानन्दं स्वप्नवासवदत्तञ्च आङ्ग्लभाषया अनूदितवान्।

In Public domain, Digitization Muthulakshmi Research Academy

जे टेलरमहाशयः प्रबोधचन्द्रोदयं ई बी कॉवेलाख्यः विक्रमोर्वशीयं मोनियर् विलियम्साभिधः शाकुन्तलं जॉन् पिकफोईः महावीरचरितं चार्ल्स हेनरी टॉनी उत्तररामचरितं मालविकाग्निमित्रं पामरबॉयडाख्यः नागानन्दञ्च अनूदितवन्तः। सन्ति नैके अन्येऽपि कवयः ये स्वभाषाभिः गीर्वाणवाङ्मयम् अनूदितवन्तः।

षेक्स्पियरनाटकानां संस्कृतानुवादाः- अनुवादशास्त्रकृत् प्राचार्यः राधावल्लभत्रिपाठिवर्यः स्वग्रन्थे अनुवादशास्त्रे स्वविचारान् प्रकटयति यत् 'अपारं क्षेत्रं वर्तते अनुवादशास्त्रस्य अनुवादकर्मणश्च। बहु तत्र करणीयमवशिष्यते। संस्कृते अनुवादाः संस्कृताच्चेतरभाषास्वनुवादाः यावन्त इष्यन्ते तावतां सहस्रांशमपि नैतावता साधितम्। हिन्द्याङ्ग्लीप्रभृतिभाषाणां यद्विज्ञानसाहित्यं काव्यादि वा तस्य अत्यल्पमेव संस्कृतानुवादे अवतीर्णम्।'

षेक्स्पियरस्य परिचयः - षेक्स्पियरः लोकविश्रुतः कविः नाटककारश्च। तस्य जन्मस्थानमस्ति 'Stratford-upon-Avon, Warwickshire, England'. क्रिस्ताब्दे 1564 तमे वर्षे एप्रिलमासे षड्विंशे दिनाङ्के जातः क्रिस्ताब्दे 1616 तमे वर्षे एप्रिलमासे त्रयोविंशे दिनाङ्के च दिवङ्गतः। 154 सोन्नक्षाख्याः 38 नाटकानि च षेक्सिपियरस्य कृतय इति कथ्यन्ते।

षेक्सिपियरस्य कृतिपरिच्चयः - हास्यरसभरितानि ऐतिहासिकानि करुणरसभरितानि चेति त्रिविधानि सप्तत्रिंशत्सङ्ख्याकानि नाटकानि षेक्सिपियरकविना विरचितानि। सोन्नक्षाख्यानि काव्यान्यपि तेन विरचितानि। कृतिविवरणं प्रस्तूयते।

हास्यरसभरितानि नाटकानि

1. All's well That Ends Well
2. As You Like It
3. The Comedy of Errors
4. Love's Labours Lost
5. Measure for Measure

In Public domain. Digitization Muthulakshmi Research Academy

6. The Merry Wives of Windsor
7. The Merchant of Venice
8. A Midsummer Night's Dream
9. Much Ado About Nothing
10. Pericles, Prince of Tyre
11. Taming of the Shrew
12. The Tempest
13. Troilus And Cressida
14. Twelfth Night
15. Two Gentlemen of Verona
16. Winter's Tale

ऐतिहासिकानि नाटकानि

17. Henry IV, part 1
18. Henry IV, part 2
19. Henry V
20. Henry VI, part 1
21. Henry VI part 2
22. Henry VI, part 3
23. Henry VIII
24. King John
25. Richard II
26. Richard III

करुणरसभरितानि अथवा विषादान्तानि नाटकानि-

27. Antony and Cleopatra
28. Coriolanus
29. Cymbeline
30. Hamlet
31. Julius Caesar
32. King Lear
33. Macbeth
34. Othello
35. Romeo and Juliet

In Public domain. Digitization: Muthulakshmi Research Academy

36. Timon of Athens
37. Titus Andronicus

पद्यकृतयः

1. The Sonnets
2. A Lover's Complaint
3. The Rape of Lucrece
4. Venus and Adonis
5. Funeral Elegy by W.S.

षेक्स्पियरस्य वाङ्मयं प्रायः सर्वासु प्रसिद्धासु विश्वभाषासु अनूदितम्। संस्कृतकवयोऽपि संस्कृतेन षेक्स्पियरस्य वाङ्मयं आविष्कृतवन्तः।

संस्कृतानुवादाः

संस्कृतवाङ्मयपरिशीलनेन ज्ञायते यत् षेक्स्पियरस्य Hamlet, Midsummer Night's Dream, Merchant of Venice, As you like it, Romeo and Juliet, 19 नाटकानां गद्यानुवादस्य संस्कृतानुवादश्च उपलभ्यते। शोधप्रबन्धाः शोधलेखाश्च अस्मिन् विषये आविष्कृताः। संस्कृतानुवादकृतीनां शोधप्रबन्धलेखानाञ्च विवरणमत्र प्रस्तूयते।

1. हेम्लेट् इत्याख्यं नाटकं **'दीनार्कराजकुमारहेमलेखम्'** इति नाम्ना **श्रीसुखमयमुखोपाध्यायेन** समनूदितम्। (Sanskrit translation of Shakespear's play Hamlet Sukhamoy Mukhopadhyay 1971 , Motilal Banarsidas publishers Pvt. Ltd.)

2. **महाकविश्रीसेक्षपीवरविरचितम् वासन्तिकास्वप्नम् आर्. कृष्ण-माचार्येण** अनूदितम्। (Vasantika Swapnam Sanskrit translation of Shakespeare's Midsummer Night's Dream by R. Krishnamacharya, Vidyamudraksarasala, Kumbhakona1892)

3. **वेनिससार्थवाहः अनन्तत्रिपाठिशर्मणा** अनूदितम्। (Merchant of Venice 1969)

4. **यथा ते रोचते** इति रचना **अनन्तत्रिपाठिशर्मणा** अनूदितम्। (As you like it –1969)

In Public domain. Digitization Muthulakshmi Research Academy

5. यूथिका इति रचना रेवाप्रसादद्विवेदिना अनूदिता। (**Romeo & Juliet** 1978)

6. चन्द्रसेनः दुर्गदेशस्य युवराजः इति रचना अनूदिता (A free Sanskrit Adaptation of Shakespeare's Hamlet) (**Hamlet - SD Joshi & Vighnahari Deo** 1980)

7. शेक्सपियरनाटककथावली मेडेपल्युपनामकवेङ्कटरमणाचार्येण अनूदिता। (Tales from Shakespear (in Sanskrit) prose narrations of 19 of Shakespeare's plays 450 pp Madras V Ramaswamy Sastrulu & sons, 1933)

1. झञ्झावातः - The Tempest
2. अनुह्लादचरितम् - Hamlet
3. विनिशापुरीवणिक् – Merchant of Venice
4. सिंहबलचरितम् - Cymbeline
5. सुपर्वचरितम् - Macbeth
6. सुखान्तं सर्वं सुखम् – All's Well that Ends Well
7. चण्डीदमनम् – Taming of the Shrew
8. कृतप्रतिकृतिः – Measure for Measure
9. द्वादशी रात्रिः – Twelfth Night
10. रूपसाम्यभ्रान्तिः – Comedy of Errors
11. शीतर्तुकथा – Winter's Tale
12. शून्ये विषये बहुश्रमः – Much Ado about Nothing
13. यथेच्छसि – As You Like it
14. विरोचननगरे सुजनद्वयम् – Two Gentlemen of Verona
15. वसन्तनिशास्वप्नम् – A Midsummer Night's Dream
16. परकालचरितम् – Story of Pericles
17. उत्तालचरितम् – Story of Othello
18. वासन्तीमकरन्दम् – Romeo and Juliet

In Public domain. Digitization Muthulakshmi Research Academy

19. धर्मवर्मचरितम् – King Lear

8. **पण्डित लक्ष्मण शास्त्री तैलंगः** त्रीणि नाटकानि अनूदितवान्। (लक्ष्मणशास्त्री तैलङ्गकृतसिन्धुवादवृत्तम्, शारदासंस्कृतसंस्थान, वाराणसी, 2003)

- **'मर्चेण्ट आफ वेनिस' नाटकं 'वेतस्वती-सार्थवाहः'** इति नाम्ना अनूदितवान्।

अगलद्बिन्दुमात्रासृगर्धशाटकमात्रकम्।
अन्यूनानतिरिक्तं भोस्त्वया मांसं विकृत्यताम्।।
प्रमाणमत्र एतस्मिन्नुपन्यस्तं न लोहितम्।
मांसस्य केवलमतोऽधिकारस्तेऽवकर्तने।।
असृजो बिन्दुमात्रं चेत् पातयिष्यसि तत् स्मर
सकला तव सम्पत्तिः सद्यो राजस्वतामियात्।।

वेतस्वती सार्थवाहः 135-137)

- शेक्स्पियरस्य अन्यत् नाटकं **'हैमलेट' 'हेमन्तकुमारः'** इति नाम्ना अनूदितवान्।

मद्बन्धुरेव पापात्मा मां राज्येन प्रियासुभिः।
भार्यया प्रीतिमात्रेण त्वया चासौ व्ययोजयत्।।
अयि हेमन्त सत्यं त्वमात्मजोऽसि ममाश्रयः।
वैरनिर्यातनविधौ मा स्म भूः शिथिलोद्यमः[4]।।

- **भीमप्रभञ्जनः** (The Tempest)
- **शिशिरकथा च** (Winter's Tales)

काश्यां प्रवर्तितायां अमरभारती पत्रिकायां श्लोकबद्धाः एताः रचनाः संस्कृतगिरा प्राकाश्यं नीताः।

---

[4] हेमन्तुकुमारः- काशी की पाण्डित्यपरम्परा, बलदेव उपाध्याय, विश्वविद्यालय प्रकाशन वाराणसी, 1983

9. शेक्सपीयरस्य Othello नाटकस्य गद्यरूपान्तरणं चकार राजराजवर्मा।

9. Comedy of Errors इति नाटकस्य गद्यानुवादः भ्रान्तिविलासमिति नाम्ना श्रीशैलदीक्षितेन विहितम्। (अर्वाचीन संस्कृतसाहित्यकारों की वैश्विकदृष्टि, कौशल कुमार तिवारी, Journal of G.N.Jha K.S.V. Vol.LXIV (1-4)2008)

10. कादम्बरीतिरुमलाचार्येण शेक्स्पीयरस्य Comedy of Errors इति नाटकं भ्रान्तिविलासः इति नाम्ना गद्ये कथाकथनरीत्या प्रस्तुतमिति अनुवादशास्त्रे विवरणमस्ति।

11. शोधप्रबन्धाः – द्वौ शोधप्रबन्धौ अन्तर्जाले दृष्टिगौचरौ। विवरणमत्र प्रस्तूयते।

- **The Indian Response to Hamlet, A study of Hamlet in Sanskrit Poetics** – Sangeeta Mohanty 2010 (thesis), Department of Sanskrit, Calcutta University
- **A study of the poetry of kalidasa and Shakespeare WSRT Sakuntala & Hamlet with Dinarka Rajakumara Hemalekha** – Sukhamoy Mukherjee 1975 (thesis), University of Basel, Switzerland

12. शोधलेखः **Interpreting Shakespeare through Sanskrit Dramaturgy**, V.C. Srivastava, 2011,

13. शोधलेखः Raghavan, V. **Shakespeare in Sanskrit**, Indian Literature, Vol. 7 no.1, 1964, pp. 109-14.

षेक्स्पियरनाटकत्रयम्

'काव्यं तु जायते जातु कस्यचित्प्रतिभावतः' इत्युक्तदृष्ट्या प्रतिभासम्पन्ना भवन्ति विरलविरलाः। विद्वत्तल्लजस्य काल्लूरि हनुमन्तरावस्य काव्यकलायां निसर्गत एव निरर्गला प्रतिभा व्यद्योतत। अप्रयासमेव हनुमन्तरावमहोदयस्य लेखनी सरसमधुरया शैल्या गद्यपद्यमयीं

In Public domain. Digitization Muthulakshmi Research Academy

कृतिमाविष्कर्तुं क्षमते। अनुवादरचनाकर्मण्यपि श्लाघनीय अस्ति एतदीयः अभियोगः। आङ्ग्लभाषायां संस्कृतभाषायाञ्च लब्धवैदुष्योऽसौ हनूमन्तरावमहाभागः षेक्स्पियरनाटकत्रयं संस्कृतेन आविष्कृत्य विस्मयास्पदं परमोत्कर्षावहं भारतीवैभवं प्रतिष्ठापितवान्।

यज्ञेन तपसा कर्म चानुवादस्य स्यात् समम्।। इत्युक्तिमनुसृत्य विद्यार्णवपारङ्गतः लोकाभिनन्दनीयः काल्लूरि हनुमन्तरावववर्यः तपसा पुण्यपरिपाकेन षेक्स्पियरनाटकत्रितयं संस्कृतेन अनूद्य मूलरचनाम् उपकरोति। संस्कृतवाङ्मयं पुष्णाति विशेषयति च। संस्कृतभारती अद्यापि अविच्छिन्नधारेव प्रवहतीति निरूपयति।

Hamlet इत्याख्यं नाटकं अन्यैरपि अनूदितम्। **Macbeth** नाटकं गद्यरूपेण सङ्क्षिप्ततया सुपर्वचरितम् इति नाम्ना मेडेपल्युपनामकवेङ्कट-रमणाचार्येण अनूदितम्। **Antony and Cleopatra** नाटकस्य संस्कृतानुवादः मया परिशीलिते संस्कृतवाङ्मये कुत्रापि न दृष्टिगोचरः। दशरूपकानुसारं धीरोदात्तधीरोद्धतधीरललितधीरशान्ताश्चेति चतुर्विधनायकाः सन्ति। **प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्र नायकः** इति भारतीयनाट्यशास्त्र-परम्परानुसारं नाटके नायकः धीरोदात्तो भवेत्। तथैव वीरः श्रृङ्गारो वा प्रधानरसो भवेत्।

एको रसोऽङ्गी कर्त्तव्यो वीरः श्रृङ्गार एव वा।
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम्।। (द.रू.3)

पितृभक्तिपरायणः हेम्लेटः धीरोदात्तः नायकः। नाटकस्यान्तिमघट्टो वीररसभरितोऽस्ति। हेम्लेटः पितृघातकं शत्रुं हत्वा वीरमरणमवाप। हेम्लेटस्य पितृभक्तिः मातृभक्तिः ज्येष्ठस्य हेम्लेटस्य पुत्रवात्सल्यं नायिकानायकयोः ओफीलियाहेम्लेटयोः अव्याजम् अमरञ्च प्रेम इत्यादयः गुणाः हेम्लेटनाटकस्य संस्कृतविद्वल्लोकप्रियतायाः हेतुः स्यात्। अत एव हेम्लेटनाटकस्य संस्कृतानुवादाः अधिकसङ्ख्याकाः सन्तीति ऊहितुं शक्यते।

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतनाटके नायकः मेक्बेतः अधिकारलोलुपः धीरोद्धतः जातः। एन्टोनिः क्लियोपेट्रा च इति नाटके यद्यपि एन्टोनिः धीरोदात्तः तथापि स्त्रीलोलुपः। मेक्बेतः राज्याधिकारं प्राप्तुं राजानं हन्ति। तदनु प्राप्तस्य राज्याधिकारस्य संरक्षणाय मित्राणि अधिकारिणः अन्यांश्च हन्ति। मेक्बेतः परान्नाशयति। तदनु स्वकर्मफलेन स्वयमपि नश्यति। एन्टोनिः यद्यपि युद्धवीरः तथापि स्त्रिया वशं गतः अविवेकी सन् यद्धरङ्गात् पलाय्य अनुचितं कर्म आचर्य स्वयं नश्यति परान्नाशयति। एतैः कारणैरेव एतयोः द्वयोः नाटकयोः अनुवादे संस्कृतविद्वद्भिः वैमुख्यं प्रदर्शितमिति मन्ये।

अनुवादशैली

मेक्बेतः हेम्लेटः एन्टोनिः क्लियोपेट्रा चेति त्रीणि आङ्ग्लनाटकानि संस्कृतेन अनूद्य काल्रूरि हनुमन्तराववर्यः संस्कृतलोकं निस्तुलम् उपकृतवानिति कथने नास्ति अतिशयोक्तिः। आङ्ग्लनाटकसाहित्यस्य विशिष्य षेक्स्पियरनाटकत्रयस्य पूर्णः परिचयः षेक्स्पियरनाटकत्रयमिति अनुवादकृतिना नूनं सिध्यति। नायकपात्रेषु केचन उत्तमाः गुणास्सन्ति। केचन अवराः गुणास्सन्तीति भूमिकायां हनुमन्तराववर्यः पात्रविश्लेषणं करोति। तथापि त्रीण्यपि नाटकानि सहृदयहृदयान् रञ्जयन्तीति कथने नास्ति संशयलेशः।

भूमिकायां विपश्चिदयं काल्रूरि हनुमन्तरावमहोदयः अनुवादार्थम् उपयुक्तानां ग्रन्थानां विविरणं प्रास्तौत्। 'षेक्स्पियरस्येङ्गलीषभाषा तत्कालभाषा आधुनिकेङ्ग्लीषभाषाया बहुधा भिद्यते। आधुनिकेङ्ग्लीषभाषया अनुवादं व्याख्यानं च विना तस्य भाषा प्रायेण दुर्बोधा भवति। मूलानुसारेणैव त्रीणि नाटकानि संस्कृतेन अनूदितानीति निवेदयति अनूवादरचयिता हनुमन्तराव-महोदयः। केवलं स्थितिगाम्भीर्यभञ्जकानि हास्यानि अपनीतानि अथवा लघूकृतानीति अनुवादकः निवेदयति।

In Public domain. Digitization Muthulakshmi Research Academy

हम्लेटः इत्यस्य संज्ञापदस्य स्थाने हेमलेखः इति हेमन्तकुमार इति वा शब्दाः प्रयुक्ताः अन्यैः अनुवादकैः। अस्मिंश्च भाषान्तरीकरणे मूलस्थपात्रस्थलदेशनदीनगादिविशेषनामभ्यः संस्कृतेन साजात्यद्योतनाय केवलं संस्कृतविभक्तिप्रत्यायाः विहिताः। यथा हेम्लेटः क्लियोपेट्रा एन्टोनिः इत्यादयः प्रयोगाः। ततोऽप्यधिकं परिवर्त्तनं न कृतम्।

भावपूर्णः शाब्दिकोऽनुवादः

कोशव्याकरणादिदृष्ट्या षेक्स्पियरस्य नाटकत्रयं संस्कृतभाषायां प्रतिपदं प्रतिवाक्यं यथावत् आविष्कृतम्। मूलकृतेः प्रामाणिकताया रक्षणे सक्षमो वर्ततेऽयम् अनुवादः। छात्राणां सुखबोधाय सहृदयहृदयानां पाठकानां मनोरञ्जनाय च समर्थोऽस्ति भावपूर्णोऽयं शाब्दिकानुवादः।

अनुवादस्य प्रयोजनानि

ग्रहीतृभाषायाः शब्दसम्पदभिवर्धते। उक्तिवैचित्री विवर्धते। भिन्नदेशाचारव्यवहारसंस्कृत्यादीनां ज्ञानं सहृदयः प्राप्नोति। विश्वस्य वैविध्यम् अवगम्यते। विश्वसंस्कृतिः निर्मीयते। विश्वं भवत्येकनीडमिति एकसूत्रतापि सिध्यति।

समृद्धिश्च द्वितीयाया भाषाया अपि जायते।
शब्दानां नूतनानां च प्रौढोक्तीनां तथैव च।।
आधानेन व्यवहारेण भावानामपि संसारो नवीनश्चावतार्यते।
संवेदना विभिन्नाश्च जायन्ते गोचरीकृताः।।

कदाचित् विलुप्तेषु मूलभाषागतग्रन्थेषु अनुवादग्रन्थाः विलुप्तमूलग्रन्थोद्धरणे महदुपकुर्वन्ति। विश्वे सौहार्दभावना परिव्याप्ता भवति।

विश्वसंस्कृतिनिर्माणं संवादश्च परस्परम्।
नानाभाषासु काव्येषु समाजेषु जनेष्वपि।।
नानाराष्ट्रसमाजानां ज्ञानं सौहार्दभावना।
व्यक्तेर्मुक्तिः समाजस्य मुक्तिर्विश्वस्य चापि वै।।

विलुप्तानां क्वचिन्मूलग्रन्थानां कालभेदतः।
तथा च पुनरुद्धारो विशेषज्ञैः प्रयत्नतः।।
अनुवादेन साध्येत सर्वमेतत् प्रयोजनम्।।

प्रयोजनं विना मन्दोऽपि न प्रवर्त्तत इति सूक्तिमनुसृत्य षेक्स्पियर-नाटकत्रयस्य संस्कृतेन आविष्कृतवता कविप्रतिभाजुषा काल्लूरि हनुमन्तराव-महोदयेन भारतीयमनीषाया परमोत्कृष्टता स्थापितास्ति। पुष्पसदृशी षेक्स्पिय-राङ्ग्लकृतिः परिमलसदृशी खलु विदुषः काल्लूरिहनुमन्तरावस्य अनुवादकृतिः।

मूलं काव्यं पुष्पं परिमलसदृशा भवन्त्यनुवादाश्च।
साहित्यस्योद्याने रसिकभ्रमराः सदा तृप्ताः।।
महिमानं ते प्रापुस्त्वनुवादैः किल च कालिदासाद्याः।
विश्वव्याप्तां कीर्तिं राष्ट्रे पुनरपि च गौरवम्।।

कृतज्ञतावन्दनशतानि

षेक्स्पियरनाटकत्रयम् इति ग्रन्थस्य सम्पादनकर्मणि मां नियुज्य निस्तुलमुपकृतवद्भ्यः संस्कृत अकादमी निदेशकेभ्यः प्राचार्येभ्यः के. नीलकण्ठवर्येभ्यः सभक्तिकं कार्तज्ञ्यं निवेदयामि।

इति बुधजनविनीता

डॉ. के. वरलक्ष्मीः

श्रीक्रोधिनामसंवत्सरे उत्तरायणे वसन्तर्तौ

चैत्रमासे पञ्चमीतिथिः, शनिवासरः

शालिवाहनशकः 1946

विक्रमसंवत् 2081

क्रिस्ताब्दः 2024 एप्रिलमासः दिनाङ्कः 13

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः

नाटकानां सारांशः

प्रथमः अङ्कः - प्रथमं दृश्यम्

अरण्यप्रदेशे तिस्रो डाकिन्यः प्रविशन्ति। तासां डाकिनीनां परस्परालापेन ज्ञायते यत् निर्जनदेशे मेक्बेतेन मेलनं भविष्यति।

प्रथमः अङ्कः - द्वितीयं दृश्यम्

फोर्रेसदुर्गसमीपे सैनिकशिबिरम्। तूर्यध्वनिना सह योधानां युद्धध्वनिः नेपथ्यात् श्रूयते। राजा डङ्कनः (स्काट्लण्डस्य राजा) माल्कमेन डोनाल्बेनेन (डङ्कनस्य पुत्रौ) लेन्नक्सेन (स्काट्लन्डे थेनः प्रभुः) (थेनः इति साधिकारबिरुदम्) कैश्चिदनुचरैश्च सह प्रविशति। तत्र ते क्षतं सेनापतिं मिलन्ति। तन्मुखात् महावीरो मेक्बेतः द्रोहिणं प्रतियोद्धारं मेक्डोन्वाल्डम् अहन् इति जानन्ति। ततः मेक्बेतः बेङ्कश्च (डङ्कनस्य सेनानीः) काडरस्य थेनेन सहायभूतं नार्वेदेशराजमपि अयुध्येताम् इति च ज्ञायते। तदनन्तरं फैफादागतौ थेनबिरुदाञ्चितौ रास-आङ्गसौ च निवेदितवन्तौ यत् मेक्बेतः नार्वेसैन्याक्रमणस्य प्रत्याक्रमणं विधायायुध्यत विजयञ्च प्राप्नोत्। डङ्कनः काडरस्य थेनाय मरणदण्डनं दातुं मेकबेतं काडरथेनबिरुदेन सम्मानयितुञ्च निरचिनोत्।

प्रथमः अङ्कः - तृतीयं दृश्यम्

तिस्रो डाकिन्यः प्रविशन्ति। तासु अन्यतमा डाकिनी भेरीध्वनिं नेपथ्यात् श्रुत्वा मेक्बेत उपागच्छतीति सूचयति। बेङ्कः डाकिनीः दृष्ट्वा संशयोपेतान् प्रश्नान् पृच्छति। 'विजयतां ग्लेमिसस्य (कश्चन प्रदेशविशेषः) थेनः' इति प्रथमा डाकिनी 'विजयतां मेक्बेतः काडरस्य थेनः' इति द्वितीया डाकिनी 'विजयतां मेक्बेतः भावी राजा' चेति तृतीया डाकिनी मेक्बेतं वर्धापयन्ति। बेङ्कस्य अनुरोधेन डाकिन्यः 'त्वं राजा न भविष्यसि किन्तु राज्ञां पिता भविष्यसी'ति तं वर्धापयन्ति। अहं ग्लेमिसस्य थेनोऽस्मि। काडरथेनो राजा च सुतरां नास्मि। कुत इमा मृषा वार्ता युष्माकं प्राप्ताः वदत इति आज्ञापयति मेक्बेते डाकिन्यः अदृश्यतां गताः।

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञा डङ्कनेन प्रेषितौ रास-आङ्गसौ प्रविश्य द्रोही काडरथेनः मरणदण्डेन दण्डितः मेक्बेतश्च काडरस्य थेनोऽस्तीति राजवचनानि निवेदयतः। तच्छ्रुत्वा मेक्बेतः चकितः चिन्ताक्रान्तश्च। 'डाकिनीनां द्वे कथने सत्ये अभवताम्। मुख्यस्य राजत्वस्य प्राप्तेरयं शुभारम्भः। किन्तु यदि तत् सुवचनं तर्हि किमर्थमहं राजानं डङ्कनं हन्तुं चिन्तयामीति' व्याकुलचित्तः भवति। ते सर्वे राजानम् उपगच्छन्ति।

प्रथमाङ्कः – चतुर्थं दृश्यम्

फोर्रेसदुर्गस्य राजभवनम्। राजा डङ्कनः लेन्नक्सः (स्काट्लेण्डे थेनः) माल्कमः डोनाल्बेनः (डङ्कनपुत्रौ) परिजनाश्च प्रविशन्ति। द्रोहिणः काडरथेनस्य मरणदण्डनं विहितमिति जीवितं तुच्छवस्तुवत् स अत्यजदिति च परस्परं वार्तालापं कुर्वन्ति ते। रास-आङ्गससहितौ मेक्बेतबेङ्कौ प्रविशतः। स्काट्लन्ड्-राजः डङ्कनः प्रशंसति यत् मेक्बतेन बहु कृतं यस्य बहुमानप्रदर्शनमशक्यमिति च धन्यवादान् प्रकटयति। राज्ञः सेवावसरः यः प्राप्तः स एव बहुमान इति मेक्बेतः विधेयतां प्रकटयति। डङ्कनः बेङ्कमपि प्रशंसति। मम ज्येष्ठपुत्रं माल्कमम् अस्य राज्यस्य युवराजं नियोजयामि। वयमिदानीं इन्वर्नेसं गमिष्यामः तव आतिथ्यसत्कारम् अनुभविष्यामः इति डङ्कनः सूचयति।

राजत्वस्य प्राप्तौ कम्बर्लैन्डयुवराजः माल्कमः मम अवरोधाय कल्पते इति मेक्बेतः दुश्चिन्तनपरो जातः। स राजानं स्वागतीकर्तुं पुरस्ताद् गतः। सर्वे तम् अनुसरन्ति।

प्रथमाङ्कः – पञ्चमं दृश्यम्

इन्वर्नेसे मेक्बेतस्य दुर्गः। मेक्बेतस्य पत्नी पत्युः लेखं पठति। मेक्बेतेन डाकिनीनां यत् वृत्तं लेखस्थं कृतं तत् तत्पत्नी पठित्वा चिन्तयति। यत् महत्त्वं प्राप्तुमिच्छति मेक्बेतः तत्तु दुष्कर्म विना न सिध्यति। महत्त्वाकाङ्क्षी सन्नपि सः कुकृत्यं कर्तुं बिभेति। तावता राजा डङ्कनः अत्र आगच्छतीति तत्पुरस्तात् मेक्बेतः आगच्छन्नस्तीति वार्ताहरः मेक्बेतस्य पत्नीं निवेदयति।

तच्छ्रुत्वा तस्याः मतिः क्रूरचिन्तनरता जाता। दुर्गमागतं मेक्बेतं स्वागतीकृत्य कर्त्तव्यं बोधयति प्रचोदयति च।

प्रथमाङ्कः – षष्ठं दृश्यम्

डङ्कनः माल्कमः डोनाल्बेनः बेङ्कः लेन्नक्सः मेक्डफः रासः आङ्गसः परिजनश्च प्रविशन्ति। मेक्बेतस्य पत्नी राजानं स्वागतीकरोति। मेक्बेतसकाशं मां नय इति राजा तां सूचयति।

प्रथमाङ्कः – सप्तमं दृश्यम्

मेक्बेतस्य मतिः डोलायते। अतिथिः उपकर्ता च राजा डङ्कनः रक्षणीयः। मम राजत्वकाङ्क्षया यदि तं मारयेयम् तर्हि विपदि निपतेयमिति तर्कयति। किन्तु मेक्बेतस्य पत्नी तद्भीरुतां निन्दति। साहसं प्रदर्श्य राजत्वकाङ्क्षां पूरय इति पतिं प्रचोदयति। शयनकोष्ठरक्षकौ मद्यं पाययित्वा डङ्कनं मारयित्वा तयोः रक्षकयोः हत्याभियोगं पातयिष्याव इति कार्यसिद्ध्युपायमपि सूचयति।

द्वितीयः अङ्कः – प्रथमं दृश्यम्

पितापुत्रौ बेङ्कफ्लेयंसौ मेक्बेतस्य दुर्गे कस्मिंश्चित् प्रदेशे सञ्चरतः। मेक्बेतः तत्रागतः। बेङ्कः मेक्बेतं प्रति राज्ञः प्रसन्नतां वर्णयति। डाकिनीनां भविष्यवाण्याः केचनांशाः सत्या अभवन्निति दृश्यत इति कथयति बेङ्के मेक्बेतः ता नैव चिन्तयामि इति छलेन वदति। राजानं प्रति मम विधेयता यावत् अचला तिष्ठति तावत् तव वचनं श्रोतुं मम विमुखता न भवतीति बेङ्कः प्रकटय्य ततः निष्क्रान्तः। विकलमतिः मेक्बेतः राज्ञः हननाय कृतनिश्चयः अभूत्।

द्वितीयः अङ्कः – द्वितीयं दृश्यम्

मेक्बेतस्य पत्न्या दत्तं औषधमिश्रितं मद्यं पीत्वा विसंज्ञौ रक्षकौ। राजा डङ्कनः मारितः। रक्तमयच्छुरिकाद्वयहस्तः मेक्बेतः प्रविशति। रक्तमयौ मम हस्तौ दुःखकरौ कृतपातकोऽहम् इति परितपति सः। अतःपरं निद्रा न भवति मेक्बेतो निद्रां हन्तीति कश्चित् कण्ठध्वनिः मया श्रुत इव इति मेक्बेतः

In Public domain. Digitization Muthulakshmi Research Academy

वदति। मेक्बेतस्य पत्नी हस्तौ क्षालयतु इति सुप्तौ सेवकौ रक्ताङ्कितौ करोतु इति पतिं सूचयति। भीतः मेक्बेतो तत्स्थलं गत्वा तथाचरितुमसमर्थो भवति। तत्कार्यं मेक्बेतस्य पत्नी करोति। हस्तौ प्रक्षाल्य रात्रिवस्त्रं धृत्वा शयनकोष्ठं गच्छाव येन कस्यापि शङ्का न जायत इति पत्नी पतिं सूचयति। मेक्बेतः अतीव व्याकुल अस्ति। कवाटताडनं श्रूयते।

द्वितीयः अङ्कः – तृतीयं दृश्यम्

द्वारताडनं श्रुत्वा द्वारपालकः द्वारम् अपावृणोति। मेक्डफः लेन्नक्सश्च प्रविशतः। प्रभुः जागरितो वा इति मेक्डफः पृच्छति। तत्रागतं मेक्बेतं वीक्ष्य कवाटताडनेन जागरित एष आयाति इति च कथयति मेक्डफः। पूर्वेद्युः राज्ञा आज्ञप्तः मेक्डफः तं प्रतिबोधयितुं तत्प्रकोष्ठं गत्वा विगतासुं डङ्कनं दृष्ट्वा दिग्भ्रान्तो जातः। आकारणघण्टानादेन बेङ्कोऽपि तत्र आयाति। मेक्बेतः सर्वेषां समक्षं भृशं विलपति। मेक्बेतस्य पत्नी अपि भयविह्वलताम् अभिनयति। सा ततः अन्यत्र नीयते। शयनकोष्ठसेवकाभ्यां हत्या कृतेति लक्ष्यत इति लेन्नक्सः कथयति। कोपेन तौ अहनमिति मेक्बेतः वदति। तथा न करणीयम् आसीदिति कथयति मेक्डफे दुःखावेगेन तथाचरितमिति स्वकर्म समर्थयति मेक्बेतः। मध्याह्ने दुर्गसभायां सम्मेलिष्याम इति मेक्बेते कथितवति ऋते माल्कमडोनाल्बेनाभ्यां सर्वे निर्गताः। प्राणभयेन माल्कमः इङ्गलन्डं डोनाल्बेनः ऐर्लन्डं गन्तुं कृतसङ्कल्पौ स्तः। अनुक्त्वा निर्गमनं वरमिति द्वौ निश्चिनुतः।

द्वितीयः अङ्कः – चतुर्थं दृश्यम्

मेक्बेतस्य दुर्गस्य बहिस्स्थलम्। रासः कश्चित् वृद्धश्च प्रविशतः। हत्याघटनया प्रकृतिरपि क्षुभ्यति इति तौ द्वौ विमृशतः। तत्रागतस्य मेक्डफस्य मुखात् निवेद्यते यत् यौ सेवकौ मेक्बेतेन मारितौ तौ राज्ञः हत्यायै वेतनेन नियुक्तौ। माल्कमडोनाल्बेनौ गूढं निर्गतौ येन पितुः हत्यायाः विषये

शङ्काविषयौ जातौ। मेक्बेतः राजा वृतः। अभिषेकोत्सवार्थं स्कोनञ्च गतः। अन्ते मेक्डफः फैफषैरं जिगमिषति। रासश्च स्कोनं जिगमिषति।

तृतीयः अङ्कः – प्रथमं दृश्यम्

फोर्रेसे राजसौधम्। बेङ्कः प्रविशति। स डाकिनीवचनानां विषये तर्कयति यत् तासां वचनं तथ्यमभवत्। निन्द्यविधिना मेक्बेतेन राजत्वं साधितं स्यादिति स शङ्कते। डाकिनीवचनानुगुणं मेक्बेतस्य पुत्रा राजानो न भविष्यन्ति। अपितु बेङ्कः भाविनां राज्ञां पिता भविष्यति। तदनु मेक्बेतः राज्ञी मेक्बेतः लेन्नक्सः रासः प्रभवः सेवकाश्च प्रविशन्ति। रात्रौ भोजनमहोत्सवः भविष्यति यस्मिन् बेङ्कः प्रधानातिथिर्भविष्यति। बेङ्कः मध्याह्ने पुत्रेण फ्लेयंसेन सह अश्वेन गमिष्यति। रात्रिभोजनाभ्यन्तरे सः पुनरागत्य भोजनोत्सवे उपस्थितो भविष्यतीति विषयाः तेषां वार्तालापेन ज्ञायन्ते।

डङ्केनं मारयित्वा प्राप्तं किरीटं मम सन्ततेः न गमिष्यति। बेङ्कस्य पुत्रसात् भविष्यति तद्दैवसङ्कल्पस्य प्रतिघातं करिष्यामीति वितर्क्य मेक्बेतः डाकिनीवचनानि अनुस्मरन् द्वौ घातकौ रहसि प्रचोद्य बेङ्कस्य हननाय नियुङ्क्ते।

तृतीयः अङ्कः – द्वितीयं दृश्यम्

मेक्बेतस्य पत्नी मेक्बेतश्च परस्परं चर्चां कुरुतः। सिंहासनं प्राप्तं चेदपि शान्तिस्तु शून्या। रात्रिभोजनमहोत्सवे मनोगतान् सन्देहान् भयानि अप्रकटय्य धृतमन्दहासौ भवाव। प्राप्तं सिहांसनं रक्षितुं दुष्टं मार्गमेव अनुसराव इति कृतसङ्कल्पौ भवतः। बेङ्कः तत्पुत्रश्च निर्मूलनीयौ। किञ्चन नृशंसं कार्यं करिष्यत इति मेक्बेतः प्रकटयति।

तृतीयः अङ्कः – तृतीयं दृश्यम्

राजसौधसमीपे उपवने त्रयो घातकाः प्रविशन्ति। मेक्बेतेन नियुक्तः आदिष्टश्च तृतीयः घातकः द्वौ घातकौ अनुसरतीति ज्ञायते। अश्वान् त्यक्त्वा पद्भ्यां पुत्रेण सह गच्छन् बेङ्कः घातकैः हतः। मम मरणं प्रतिकुर्याः इति

In Public domain. Digitization Muthulakshmi Research Academy

प्राणवियोगात् पूर्वं बेङ्कः पुत्रं बोधयति। पित्रा प्रचोदितः तत्पुत्रः फ्लेयंसः ततः पलायते। वृत्तमिदं मेक्बेतं निवेदयितुं घातकाः ततो निर्गच्छन्ति।

तृतीयः अङ्कः – चतुर्थं दृश्यम्

राजभवने सभाशाला। भोजनोत्सवः प्रवर्त्तते। मेक्बेतः तत्पत्नी रासः लेन्नक्सः प्रभवः परिचराश्च प्रविशन्ति।

यदा विनोदः प्रवर्त्तते तदा प्रथमो घातको द्वारि तिष्ठति। तन्मुखात् बेङ्कस्य हत्यां तत्पुत्रस्य पलायनञ्च ज्ञात्वा मुदितः व्याकुलश्च भवति मेक्बेतः। घातकस्य निष्क्रमणोत्तरं बेङ्कस्य भूतं सभाशालां प्रविश्य मेक्बेतस्यासने उपविशति। विनोदकार्यक्रमे अनुपस्थितं बेङ्कं मेक्बेतः संस्मरति। आसने उपवेष्टुं परिजनेन प्रार्थितः मेक्बेतः आसनाधिष्ठितं बेङ्कस्य भूतं दृष्ट्वा भयचकितो भवति। मया एतत् कारितमिति त्वं वक्तुं न शक्नोषि। मां पश्यन् तव रक्ताक्तकेशान् मा कम्पय इति भूतं प्रति वदन्तं मेक्बेतं वीक्ष्य परिजनः चिन्तयति यत् राजा अस्वस्थः। भूतम् अदृश्यं गत्वा पुनरायाति। अपेहि भयङ्करपिशाच निर्गच्छ निर्देहभूत इति राजा प्रलपति। मेक्बेतस्य पत्न्या प्रार्थिताः सर्वे प्रभवस्ततो निर्गताः। मेक्बेतेन सर्वेषां प्रभूणां गृहेषु धनेन वशीकृताः सेवकाः स्पशाः कृताः। परेद्युः प्रातः डाकिनीः गच्छामीति किं भविष्यतीति जिज्ञास इति मेक्बेतः वदति। निद्रया स्वस्थता सिध्यतीति श्रीमती मेक्बेतस्य सूचनया तया सह ततः मेक्बेतः निष्क्रान्तः।

तृतीयः अङ्कः – पञ्चमं दृश्यम्

वनभूमिं तिस्रो डाकिन्यः प्रविशन्ति। मायादेवीं हेकाटामुपगच्छन्ति। निगूढेषु प्राणान्तकेषु च विषयेषु मेक्बेतेन व्यवहारः कृत इति हेकेटा ताभ्यः कुप्यति। प्रमादस्य निष्कृतिः कार्या चेति सा सूचयति। स्वभविष्यं ज्ञातुं मेक्बेतः आयास्यतीति अन्यांश्च विशेषान् उक्त्वा हेकेटा अन्तर्हिता भवति। डाकिन्यः ततः निष्क्रान्ताः।

तृतीयः अङ्कः – षष्ठं दृश्यम्

फोर्रेस्से राजभवनम्। लेन्नक्सः अन्यश्च प्रभुः प्रविशतः। डङ्कनस्य पुत्रौ पितृघातकौ। धार्मिककोपेन मेक्बेतः डङ्कनं मारितवन्तौ सेवकौ जघान। पुत्रः फ्लेयंसः पितरं बेङ्कश्च जघान। मेक्डफः भोजनोत्सवं न गतः। ऋजुभाषी मेक्डफः राज्ञः अनुग्रहादपगत इति उक्त्वा स सम्प्रति क्व अस्तीति लेन्नक्सः अन्यप्रभुं पृच्छति। अन्यप्रभुः वदति यत् जन्मना राज्याधिकारः माल्कमस्य भवति। मेक्बेतेन स आक्रान्तः। अतः माल्कम इङ्गलन्डस्य राज्ञ एड्वर्डस्य आस्थाने अस्ति। मेक्डेफः नार्तम्बर्लैन्डप्रभुं वीरं सीवर्डं च सहायौ प्रेषयितुमर्थयितुं तत्र गतः। अनेन वयं पुनः शान्तिपूर्णं जीवनं यापयेम। क्रुद्धः मेक्बेतो युद्धाय योजनानि कुरुते। मेक्डफाय आगमनादेशपत्रं प्रेषितम् यच्च मेक्डेफेन निराकृतम्। क्रूरशासनात् देशः रक्षितो भवत्विति लेन्नक्सः आशास्ते। मेक्डफो विजयतामिति प्रार्थयते अन्यः प्रभुरपि।

चतुर्थः अङ्कः – प्रथमं दृश्यम्

गुहामध्ये तप्यमानं बृहत्पात्रम्। तिस्रो डाकिन्यः प्रविशन्ति। हेकेटा अपि प्रविशति। सर्वाः नृत्यन्ति च। हेकेटायाः निष्क्रमणानन्तरं मेक्बेतः प्रविशति। मेक्बेतस्य अनुरोधेन प्रथमा डाकिनी वदति यत् मेक्डफात् फैफस्य थेनात् सावधानेन भवितव्यम्। तस्याः निष्क्रमणोत्तरं मेक्बेतस्य प्रार्थनया द्वितीया डाकिनी वदति यत् यः तं हिंसितुमिच्छति तं प्रति सः निर्भयः प्रतियुध्येत। कोऽपि स्त्रीजातस्त्वां न हन्यात्। तस्याः निष्क्रमणोत्तरं तृतीया डाकिनी भणति यत् मेक्बेतो न पराजीयते यावद् बिर्नैमवनं चलित्वा तं प्रति नागच्छेत् उन्नतडन्सिनेनपर्यन्तम्। तदनु सा अन्तर्हिता। बेङ्कस्य पुत्राः स्काट्लण्डस्य राज्यं कदापि प्राप्स्यन्ति किमिति जिज्ञासते मेक्बेतः। अस्माभिर्बहूक्तम्। इतोऽधिकं ज्ञातुं मा प्रयतस्वेति उक्त्वा प्रथमा डाकिनी निष्क्रान्ता।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रागतः लेन्नक्सः मेक्बेतं निवेदयति यत् द्वित्रैः वार्ताहरैः वार्ता आनीता यत् मेक्डफः इङ्गलन्डं पलायितः। मेक्डफस्य दुर्गे आकस्मिकाक्रमणं कृत्वा फैफं दुर्गं वशीकृत्य तद्दारापुत्रादीन् खड्गसात् करिष्यामीति मेक्बेतः कृतसङ्कल्पः अभूत्। तदनु तौ ततः निष्क्रान्तौ।

चतुर्थः अङ्कः – द्वितीयं दृश्यम्

मेक्डफस्य दुर्गः फैफः। श्रीमती मेक्डफः तस्याः पुत्रः रासश्च प्रविशन्ति। श्रीमती मेक्डफः परिवारं त्यक्त्वा पत्या कृतं पलायनं विवेकरहितमिति भृशं विलपति। रासः तां बहुधा सान्त्वयति। मेक्डफः गुणगणसम्पन्नश्चेति प्रशंसति। प्रतिकूलस्थितौ जीवनं दुष्करमस्तीति चिन्तां प्रकटय्य रासः निर्गच्छति। कश्चन वार्ताहरः सन्निहितां विपदं प्रति श्रीमतीं मेक्डफं सतर्कां करोति। तस्य निर्गमनोत्तरमेव घातकाः प्रविश्य मेक्डफस्य पुत्रम् अघ्नन्। पलायमानां श्रीमतीं मेक्डफं घातकाः अनुधावन्ति।

चतुर्थः अङ्कः – तृतीयं दृश्यम्

इङ्गलन्डे राजसौधस्य पुरस्तात्। माल्कमो मेक्डफश्च प्रविशतः। स्काट्लन्डस्य दुःस्थितिं विवृणोति मेक्डफः। माल्कमः वदति यत् जनपीडको मेक्बेतः मेक्डफस्य मित्रमस्ति। मां मेक्बेताधीनं कृत्वा राजानुग्रहं प्राप्नुयाः इति मेक्डेफं सूचयति। एभिः वचनैः मेक्डफे स्वशङ्कां प्रकटयति माल्कमः। मेक्डफः स्वचित्तशुद्धिं निरूपयति। माल्कमः प्रतिश्रृणोति यत् मेक्बेतस्य शिरश्छेत्स्यामि। आत्मानम् अगण्यदोषं प्रकटयति माल्कमः। मम स्त्रीलोलुपत्वं धनलोलुपत्वञ्च मद्देशं मत्प्रजाश्च नाशयेत् मत्तः मेक्बेतः श्रेयान् स्यादिति माल्कमः अभिप्रैति। तेन दोषेण राजकिरीटो न त्याज्यो यः माल्कमस्यास्तीति मेक्डफः तं समर्थयति। मयि सुगुणा न सन्ति। विश्वशान्तिं नाशयिष्यामीति माल्कमस्य वचनानि श्रुत्वा मेक्डफः विलपति। स्काट्लन्डदेशस्य राजा डङ्केनः मुनिवदजीवत्। तद्राज्ञी प्रार्थनामकरोत्।

In Public domain. Digitization Muthulakshmi Research Academy

सिंहासनस्य सत्यो दायाद आत्मानं खलं प्रकटयति। स्काट्लेन्डदेशस्य का गतिर्भवेदिति उद्विजते मेक्डेफः।

मेक्डेफस्य तदावेगपूर्णानि वचनानि श्रुत्वा माल्कमः मेक्डेफं विश्वस्तं मनुते। केवलं त्वच्चित्तशुद्धिपरीक्षायै आत्मनि ये दुर्गुणा आरोपिताः तानुपसंहरामि। मम देशरक्षायै स्काट्लेन्डं वृद्धेन योधेन सीवर्डेन दशसहस्रयोधैस्सह गमिष्याम इति मेक्डेफम् आश्वासयति। तत्रागतः रासः अस्मन्मातृभूमिः श्मशानतुल्यास्तीति स्काट्लेन्डदुःस्थितिं वर्णयति। मेक्डेफस्य दुर्गः गृहीतः। तद्भार्यापुत्रादयश्च क्रूरं खण्डिता इति निवेदयति। माल्कमः मेक्डेफं समाश्वासयति। सर्वे मेक्बेतं दण्डयितुं युद्धाय सन्नद्धा भवन्ति।

पञ्चमः अङ्कः प्रथमं दृश्यम्

मेक्बेतस्य भवने कोष्ठः वैद्यः राज्ञ्या मान्या परिचारिका च प्रविशतः। वैद्यपरिचारिकयोः सम्भाषणेन ज्ञायते यत् मेक्बेतस्य युद्धगमनादारभ्य निद्राणा श्रीमती मेक्बेतः शयनादुत्थाय परिधानं धृत्वा स्वस्या उन्नतपेटिकां विवृत्य कागदमपसार्य लिखति पठति पत्रं संवृत्यान्यपत्रेण वेष्टयित्वा तत्र निधाय शय्यां पुनरायाति। अस्थिरनिद्रायां तया कृतानि भाषणानि वक्तुं परिचारिका बिभेति। ज्वलितदीपिकां गृहीत्वा श्रीमती मेक्बेतः प्रविशति। विवृतनेत्रा सा न किमपि निरीक्षते। पादहोरां यावत् हस्तौ घर्षति। इदानीमपि रक्ताङ्कः अस्ति। कुतोऽस्माकं भीतिः। अस्मत्कृतं कोऽपि न जानाति। सिंहासनमस्माभिः प्राप्तम्। परन्तु केनेदं चिन्तितं स्यात् तस्य वृद्धस्य देहे तावद् रक्तं भवतीति? फैफथेनस्य पत्नी कुत्रास्ति? इदानीमपि रक्तगन्धः अस्ति। परिमलाः मम हस्तं न शोधयेयुः। बेङ्को निखातः। समाधेर्निगम्य त्वां न पीडयेदित्यादिकं तस्याः प्रलपनं श्रुत्वा वैद्यः अभिप्रैति यत् यदा जना असहजानि कार्याणि कुर्वन्ति ते असहजै रोगैराक्राम्यन्ते। अपराधिनां निद्रा व्याकुला भवति। तदा ते स्वकृतं रहस्यापराधं वदन्ति। तस्याः सकाशे किमप्यायुधं मास्तु। आत्मघातं कुर्यात्

In Public domain. Digitization Muthulakshmi Research Academy

सा। तां सम्यक् परिपालय। वैद्यस्यापेक्षया पुरोहितः अभिलषणीय इति वैद्यः परिचारिकाम् उक्त्वा निर्गच्छति।

पञ्चमः अङ्कः द्वितीयं दृश्यम्

डेन्सिनेन्दुर्गसमीपे जनपदः। मेन्टीथः केयत्नेसः आन्गसः लेन्नक्सः (स्काट्लेन्डथेनाः) भटाश्च प्रविशन्ति। माल्कमः तस्य बन्धुः सीवर्डः मेक्डफश्च इङ्ग्लीषसैन्यैः सह प्रतिकाराय सुनिश्चिताः। तान् समासादयितुं बिर्नैमारण्यम् अनुरूपं स्थलमस्ति इति तेषां परस्परवार्तालापेन ज्ञायते। मेक्बेतः उन्मादीव व्यवहरति। रहस्यहत्याभिर्मनस्तस्य क्षुब्धमस्ति। भटादयः तस्मिन् आदरवन्तः न सन्ति। देशसंरक्षकाय माल्कमाय आत्मानं समर्पयितुं ते सर्वे स्काट्लेन्डथेनाः कृतसङ्कल्पाः भूत्वा बिर्नैमारण्यं प्रस्थिताः।

पञ्चमः अङ्कः तृतीयं दृश्यम्

मेक्बेतस्य दुर्गे कोष्ठः। मेक्बोतो वैद्यः सेवकाश्च प्रविशन्ति। अनुचराः प्रभवः त्यक्त्वा गता इति क्रुद्धः भवति मेक्बेतः। भविष्यकथनानुसारेण बिर्नैमारण्यं यावद् डन्सिनेनं नागच्छति तावत्तस्य भयं नास्ति। स्त्रियां जातः मनुष्यः तं न विजयेत इति भूतवचनानि स्मरन् निर्भीकस्तिष्ठति मेक्बेतः। दश सहस्रं आङ्गलेयाः सैनिकाः आगच्छन्तीति सेवकमुखात् ज्ञात्वा सः कोपोद्रिक्तो भवति। वार्धक्यं तं बाधते। सहचराणां गौरवं प्रेम मित्रसमागमं चापेक्षते सः। पत्न्याः उल्लाघतायाः विषये वैद्यं पृच्छति मेक्बेतः। तस्याः शारीरिकी अस्वस्थता नास्ति। मतिभ्रमाः तां व्याकुलयन्ति। औषधमपि प्रभावं न जनयति। रोगिणा स्वयं चिकित्सा कर्तव्येति वैद्यः निवेदयति। विरेचनकरमौषधं आङ्ग्लेयान् पुरुषान् प्रक्षालयेत् किं तादृशमौषधं श्रुतं किमिति वैद्यं पृच्छति मेक्बेतः। यद्यपि मनसि दौर्बल्यमनुभवति तथापि कपटधैर्यं प्रकटयति मेक्बेतः।

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमः अङ्कः चतुर्थं दृश्यम्

बिर्नैमारण्यसमीपे जनपदः। माल्कमः वृद्धः सीवर्डः तस्य पुत्रः मेक्डफः मेन्टीथः केयत्नेसः आन्गसः लेन्नक्सः रासः सैनिकाश्च पङ्क्त्या गच्छन्तः प्रविशन्ति। सर्वः सैनिको वृक्षादेकं शाखां छित्वा पुरस्ताद् वहन् गच्छेत् येन चारा शत्रुबलस्य असत्यगणनां मेक्बेतं वदेयुः इति युद्धव्यूहरचनां करोति माल्कमः। जनपीडको मेक्बेतः डन्सिनेनदुर्गे तिष्ठति। शत्रूणां दुर्गोपरोधं प्रतिहन्तुं सन्नह्यते इति वार्ता तैः ज्ञायते। सर्वे युद्धाय सन्नद्धाः भवन्ति।

पञ्चमः अङ्कः पञ्चमं दृश्यम्

डन्सिनेनदुर्गे मेक्बेतस्य भवनम्। मेक्बेतः सेटनः सैनिकाश्च प्रविशन्ति। भेरीः पताकाश्च गृहीत्वा केचन पुरुषाः प्रविशन्ति। आङ्ग्लेयाः आगच्छन्तीति सर्व आक्रोशति। वयं सुरक्षिता दृढाश्च। दुर्गोपरोधं व्यर्थं करिष्याम इति मेक्बेतः दम्भं प्रदर्शयति। राज्ञी मृतेति वार्ता ज्ञायते। तच्छ्रुत्वा विरागीव मेक्बेतः प्रलपति। बर्नैमारण्यम् इतो मैलत्रयदूराच्चलदागच्छच्च इति वार्ताहरात् ज्ञात्वा मेक्बेतः धैर्यच्युतो भवति। युद्धाय सैनिकाः आदिष्टाः भवन्ति।

पञ्चमः अङ्कः षष्ठं दृश्यम्

डन्सिनेनदुर्गस्य पुरोभागे। भेरीः पताकाश्च गृहीत्वा केचन पुरुषाश्चलन्ति। माल्कमः सीवर्डः मेक्डफः गृहीतवृक्षशाखा तेषां सेना च प्रविशन्ति। शाखाः प्रक्षिप्य आत्मानं प्रदर्शयत इति माल्कमः सेनाम् आदिशति। प्रथमसेनाभागं सीवर्डः सपुत्रो नयति। मेक्डफः अहं च शिष्टं करिष्याव इति माल्कमः सूचयति। विजयोऽस्तु पराजयो वा इति सीवर्डः वदति। ततः सर्वे निष्क्रान्ताः।

पञ्चमः अङ्कः सप्तमं दृश्यम्

युद्धे सीवर्डस्य पुत्रः मेक्बेतहस्तेन हतो भवति। मेक्बेतो ततः निष्क्रान्तः। मेक्डफः प्रविशति। मेक्बेतेन योद्धव्यम्। दारपुत्राणां क्रूरहत्यां

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिकुर्यामिति सङ्कल्पयति। मेक्डफः निष्क्रान्तः। माल्कमो वृद्धः सीवर्डश्च प्रविशतः। दुर्गः स्वाधीनं कृतः। विजयः प्राप्तकल्पः इति मन्यते सीवर्डः।

पञ्चमः अङ्कः अष्टमं दृश्यम्

रणरङ्गे अन्यस्थलम्। मेक्बेतः प्रविशति। मेक्डेफः तं सम्मुखीकरोति। मायाशक्तिर्मम जीवितं रक्षति। स्त्रियां जातः कोऽपि मां न हिंस्यादिति मेक्बेतः मेक्डेफं भाययति। सहजविधानेनाहं न जात इति अपूर्णकाले प्रसवात् पूर्वं मातुः शरीराच्छिन्नः इति मेक्डफः स्वजन्मवृत्तं कथयति। नष्टोत्साहो मेक्बेतः पश्चात्तापमनुभवति। मायाभूतेषु विश्वासो नैव कर्त्तव्यः। तानि अस्मान् अल्पान् कृत्वा द्व्यर्थवद्भिर्वचनैः भविष्यं वदन्ति। सत्याभासैर्वचनैर्व्यर्थाशां जनयन्ति। मेक्बेतः मेक्डफेन योद्धुं नैच्छति। किन्तु पराजयमङ्गीकर्तुं नेच्छति। युध्यमानौ तौ निष्क्रान्तौ।

माल्कमः वृद्धः सीवर्डः रासः अन्ये प्रभवः सैनिकाश्च प्रविशन्ति। सीवर्डः जयेन तृप्तिमनुभवति। मेक्डफः सीवर्डस्य पुत्रश्च न दृश्येते इति माल्कमः पृच्छति। रासमुखात् ज्ञायते यत् सीवर्डस्य पुत्रः वीरगतिं प्राप्तः। तावता मेक्बेतस्य शिरो गृह्णन् मेक्डफः प्रविश्य माल्कमं वर्धापयति। सर्वे तमनुसृत्य माल्कमं वर्धापयन्ति। सर्वेभ्यः अनुचरेभ्यः एर्लपदवीं ददामि। पलायितेभ्यः जनेभ्यः पुनरावासं कल्पयामि। धर्मं निर्वर्तयिष्यामीति माल्कमः प्रतिश्रृणोति। सर्वेभ्यः कृतज्ञतामभिवन्दनं च वदति। स्कोने स्वराजाभिषेकाय सर्वान् आह्वयति। तूर्यध्वनिना सर्वे निष्क्रान्ताः।

****

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः

पूर्वकथा – डेन्मार्कस्य पूर्वो राजा हेम्लेटः। तं रहसि हत्वा तस्यानुजः क्लाडियसो राजा बभूव। मृतस्य ज्येष्ठभ्रातुः पत्नीं गेर्ट्रूडां पर्यणयत्। नाटकनायको युवा हेम्लेटो मृतराजस्य हेम्लेटस्य पुत्रः।

प्रथमः अङ्कः प्रथमं दृश्यम्

एल्सिनोरे दुर्गस्य पुरस्तादुन्नतप्रदेशः। फ्रेन्सिस्कः (सैनिकः) स्वस्य रक्षणस्थानेऽस्ति। रात्रौ द्वादशवादने फ्रान्सिस्कस्य स्थाने रक्षणकार्यं कर्तुं बेर्नार्डः (उद्योगी) समागतः। तेन सह रक्षणकार्यं कर्तुं होरेषियः (हेम्लेटस्य मित्रम्) मार्सेल्लसः (उद्योगी) च तत्रागच्छतः। मार्सेल्लसः बेर्नार्डश्च पूर्वं द्विः भूतमपश्यत्। मार्सेल्लसः होरेषियं भूतस्य विषये वदति। होरेषियः तन्न विश्वसिति। केवलं तयोः ऊह इति वदति। अत मार्सेल्लसः होरेषियं तस्मिन् रात्रौ तत्र आनीतवान्। यदि भूतं दृश्यते तर्हि सः पश्येत् तत् प्रति भाषेत इति।

तयोः वचनं होरेषियः खण्डयति। तदा भूतं प्रविशति। होरेषियः तद् भूतं पश्यति। भूतं राजसदृशमस्तीति ते अभिप्रयन्ति। होरेषियः भयचकितः। ताभ्यां प्रचोदितः होरेषियः भूतं पृच्छति। अर्धरात्रे किं बहिश्चलसि युद्धाय धृतपरिधानो मृतो डेन्मार्कस्य राजेव त्वं दृश्यसे। वद इति। भूतं निर्गच्छति। न केवलं भूतं राजसदृशमस्ति अपितु तेन धृतं कवचमपि नार्वेराजेन युद्धं कुतवता अस्मद्राजेन धृतेन कवचेन सदृशमस्ति। भूतेन तथैव भ्रूभङ्गः कृतः यथा राज्ञा कृतः हिमस्योपरि वाहनेन गच्छता पोलानाक्रम्यता। सर्वमिदम् अतिमानुषमस्ति। अपि च इदम् अस्मद्देशस्य विपत्तिं सूचयतीति होरेषियः वदति।

मार्सेल्लसः पृच्छति। किमर्थं रक्षिणां नियुक्तिः आरकूटगुलिकाप्रक्षेपणीनां निर्माणं विदेशेभ्यो आयुधानाम् आनयनं नौकानिर्माणादिकञ्च प्रचलतीति। होरेषियः तं बोधयति। नार्वेराजः फोर्टिन्ब्रासः धार्ष्ट्येन अस्मद्राजं योद्धुम् आह्वयत्। शूरो अस्माकं राजा हेम्लेटो

In Public domain. Digitization Muthulakshmi Research Academy

फोर्टिन्ब्रासम् अहन्। तयोर्मध्ये कृतेन समयानुसारेण शत्रुराज्यं विजेतृसादभवत्। मृतस्य राज्ञः पुत्रः युवा फोर्टिन्ब्रासः जनान् सङ्गृह्य पित्रा नष्टान् भूभागान् पुनः प्राप्तुम् अभिलषति। अत एव अस्मद्देशे क्षोभः प्रचलति। एतानि दुश्शकुनानि आगामिनीं विपदं सूचयन्तीति।

भूतं पुनः प्रविशति। होरेषियः तद् वदति हे मायामय तिष्ठेति। भूतं हस्तौ प्रसारयति। होरेषियः भूतं वदति। यद्यहं किमपि सुकार्यं कर्तुं शक्नोमि यत् तव शान्तिं कुर्यात् तर्हि वद। यदि त्वं रहस्यज्ञानेन जानासि तव देशस्य दुष्परिणामं यं यदि जानीमो निवारयितुं शक्नुमः तर्हि वद इति। होरेषियस्य चोदनेन मार्सेल्लसः शूलप्रहारयत्नं करोति। भूतं निष्क्रान्तम्। होरेषियः मार्सेल्लसं सूचयति यत् भूतमस्मान् किमपि वक्तुं निराकरोति निश्चयेन तत् हेम्लेटं कथयेत्। हेम्लेटः निवेदनीयः। मार्सेल्लसः तथा कर्तुम् अङ्गीकरोति। ते निष्क्रान्ताः।

प्रथमः अङ्कः द्वितीयं दृश्यम्

दुर्गे राजभवने प्रकोष्ठः। राजा क्लाडियसः राज्ञी गेर्ट्रूडा हेम्लेटः पोलोनियसः लेर्टेसः वोल्टिमन्डः कार्नीलियसः प्रभवः सेवकाश्च प्रविशन्ति। राजा समावेशे प्रियभ्रातुर्हेम्लेटस्य मरणं प्रति शोकं प्रकटयति। भ्रातृपत्न्या विवाहः यः कृतः सः समुचितः सहेतुक इति समर्थयति च। युवा फोर्टिन्ब्रासः स्वपित्रा समर्पितान् भूभागान् पुनः प्राप्तुम् इच्छति। स नार्वेदेशजनेभ्यः सैन्यदलादिकं सङ्गृह्णाति अतः राजा क्लाडियसः द्वाभ्यां दूताभ्यां लेखं नार्वेदेशराजस्य समीपं प्रेषयति। यूनः फोर्टिन्ब्रासस्य पुरोगमननिरोधाय नार्वेदेशराजं प्रार्थयितुं लेखः प्रेषितः। तदनु राज्ञः अभिषेकसमये उपस्थातुं डेन्मार्कदेशमागतः पोलोनियसस्य पुत्रः लेर्टेसः फ्रान्सदेशं प्रतिगन्तुम् अनुमतिं प्रार्थयते। अनिच्छन्नपि राजा अनुमतिं ददाति। अनन्तरं विषादग्रस्तं हेम्लेटं राजा राज्ञी च अनुनयतः। पितृवत् मां चिन्तय इति राजा वदति। विन्टेनबर्गे पुनः विद्यालयं जिगमिषन्तं हेम्लेटं तौ निवारयतः। यथाशक्ति तयोर्वचनं

In Public domain. Digitization Muthulakshmi Research Academy

पालयिष्यते इति हेम्लेटस्य वचनं श्रुत्वा सानन्दं ततः निर्गच्छतः राजदम्पती सपरिवारौ। तत्रैव स्थितः हेम्लेटः देवतुल्यं पितरं स्मृत्वा मनसि भृशं विलपति। पितृमरणोत्तरमेव मृगतुल्येन पितृव्येन माता परिणीतेति दुःखोद्विग्नो भवति। होरेषियः मार्सेल्लसः बेर्नार्डश्च हेम्लेटेन मिलन्ति। पूर्वराजसदृशं भूतम् अपश्याम इति ते तं निवेदयन्ति। यत्र भूतस्य दर्शनमभवत् तत्र तैः सह सम्मेलनाय भूतस्य दर्शनाय च हेम्लेटः कृतनिश्चयो भवति। हेम्लेटस्य सूचनानुसारं तं विषयं रहस्ये स्थापयितुं ते त्रयः प्रतिश्रुत्य ततः निष्क्रान्ताः। घटनामिमां ज्ञात्वा क्वापि विश्वासघातः कृत इति हेम्लेटः शङ्कते। ततः सोऽपि निष्क्रान्तः।

प्रथमः अङ्कः तृतीयं दृश्यम्

पोलोनियस्य (कश्चित् प्रभुः) गृहे कोष्ठः। लेर्टेसः (पोलोनियस्य पुत्रः) ओफीलिया (पोलोनियस्य पुत्री) च प्रविशतः। फ्रान्सदेशं प्रस्थितः लेर्टेसः सोदरीम् उपदिशति यत् हेम्लेटः ओफीलियायां प्रेम करोतु नाम। हेम्लेटस्य उन्नतस्थानं मनसि निधाय तया अवहितया भवितव्यम्। साधारणजनवत् यथेच्छं हेम्लेटः कर्तुं न शक्नोति। मोहेन तस्मै शीलसम्पदं समर्पयिष्यति चेत् तत् लज्जावहं भविष्यति। अनुचितं न कर्त्तव्यम्। आत्मरक्षा कर्तव्या।

अनुशासनपरः पोलोनियसः प्रविश्य पुत्रम् आशीर्भिः अनुगृह्य हितम् उपदिश्य आपृच्छति। पितुः अनुरोधेन ओफीलिया वदति यत् भ्रातुः वचनं हेम्लेटमुद्दिष्टमस्ति। हेम्लेटः ओफीलियायाः सकाशे असकृत् प्रेम प्रकटयति। तस्य सर्वाणि प्रेमभाषणानि सम्मानसहितानि आसन्। हेम्लेटः पवित्रशपथेन सर्वं वचनं दृढमकरोदिति ओफीलियामुखात् हेम्लेटस्य प्रेमवृत्तं ज्ञात्वा पोलोनियसः असम्मतिं प्रकटयति। तस्य शपथेषु विश्वासः न करणीयः। तेन सह अनियता न प्रवर्तस्वेति पित्रा ओफीलिया वारितास्ति। पित्रादेशं परिपालयामीति ओफीलिया प्रतिश्रृणोति।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः अङ्कः चतुर्थं दृश्यम्

दुर्गस्य पुरोभागे उन्नतप्रदेशः। हेम्लेटः होरेषियः मार्सेल्लसश्च प्रविशन्ति। तूर्यध्वनिं लोहगोलद्वयस्य प्रयोगं च निशम्य होरेषियः किं तदिति जिज्ञासते। हेम्लेटः विवृणोति यत् राजा विनोदं करोति सामूहिकपानविनोदो नृत्यं च भवतः। वाद्यसङ्गीतेन सह मद्यपानं प्रवर्त्तते। कदाचारेणानेन वयं निन्दाभाजो भवेम इति कथयति हेम्लेटे भूतं प्रविशति। भूतं संज्ञया हेम्लेटं दूरं नयति। होरेषियः मार्सेल्लसश्च हेम्लेटं निवारयितुं प्रयत्नं कुरुतः। किन्तु विफलौ तौ हेम्लेटम् अनुसरतः।

प्रथमः अङ्कः पञ्चमं दृश्यम्

निर्जनस्थले भूतं स्वहत्यावृत्तं पुत्रं हेम्लेटं वर्णयति। आरामे निद्राणः राजा सर्पेण दष्ट इति प्रजाः प्रतारिताः। किन्तु हेम्लेटस्य पितृव्यः निद्राणस्य राज्ञः कर्णयोः घोरं विषमपातयत्। राजा च विगतप्राणः सञ्जातः। पितुः हत्यायाः प्रतिकारः पुत्रेण हेम्लेटेन कर्त्तव्य इति मातरं प्रति द्वेषो मास्तु इति च भूतं हेम्लेटं सूचयित्वा निर्गच्छति। हेम्लेटः व्याकुलचित्तो भवति। पितुर्वचनं पालयितुं कृतसङ्कल्पो भवति। तत्रागतौ होरेषियमार्सेल्लसौ हेम्लेटः प्रार्थयति यत् भूतस्य वृत्तं रहस्ये स्थापनीयम्। तावपि तथाकर्तुं प्रतिजानीतः।

द्वितीयः अङ्कः प्रथमं दृश्यम्

पोलोनियसस्य गृहे प्रकोष्ठः। पोलोनियसः रेनाल्डश्च (सेवकः) प्रविशतः। पोलोनियसः धनं लेखांश्च पुत्राय दातुं सेवकं रेनाल्डं पेरिसनगरं प्रेषयति। विविधैरुपायैः पुत्रस्य शीलं प्रवर्त्तनं ज्ञातव्यम्। पुत्रस्य स्वभावः परीक्षणीय इति सेवकं कर्त्तव्यं बोधयति पोलोनियसः। आदेशं पालयितुं रेनाल्डो निष्क्रान्तः। ओफीलिया प्रविशति। तस्याः मुखात् हेम्लेटस्य विचित्रं प्रवर्त्तनं ज्ञात्वा पोलोनियसः तर्कयति यत् हेम्लेटो प्रेमोन्मादी जातः। तस्य तीव्रकम्प आत्मघातं प्रति नयेत्। हेम्लेटस्य व्यवहारं राजानं निवेदयितुं तौ ततः निष्क्रान्तौ।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयः अङ्कः द्वितीयं दृश्यम्

राजा राज्ञी रोसेन्क्रान्जः गिल्डेन्स्टेर्नः (सैनिकौ) सेवकाश्च प्रविशन्ति। हेम्लेटे यत् विचित्रं परिवर्त्तनं जातं तस्य हेतुः पितुर्मरणमिति राजा मन्यते। हेम्लेटस्य चिरपरिचितौ द्वौ पुरुषौ रोसेन्क्रान्जगिल्डेन्स्टेर्नौ राजभवने वासं कर्तुम् राज्ञा आदिष्टौ। हेम्लेटेन सह उषित्वा तस्य मानसिकबाधाया अज्ञातं विशेषकारणमस्ति चेत् ताभ्यां तज्ज्ञातव्यम्। ज्ञातस्य चिकित्सा कार्या इति राज्ञः विचारः। राजादेशं गृहीत्वा रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च निष्क्रान्तौ।

पोलोनियसः प्रविश्य निवेदयति यत् नार्वेराजं प्रति प्रेषितौ दूतौ सुवार्तया सह निवृत्तौ अन्यच्च हेम्लेटस्योन्मादकारणं तेन ज्ञातम्। राजाज्ञया दूतौ प्रवेशयितुं निष्क्रान्तः पोलोनियसः। हेम्लेटस्य उन्मादस्य कारणं पितुर्मरणम् आवयोः शीघ्रविवाहश्चेति मम द्रढीयान् विश्वास इति राज्ञी राजानं वदति।

पोलोनियसः वोल्टिमन्डेन (राज्ञः सदस्यः) कार्नीलियसेन (सैनिकः) च सह पुनः प्रविशति। डेन्मार्कराजस्य दौत्यवाक्यं निशम्य नार्वेराजः दूतान् भ्रातृव्यं फोर्टिन्ब्रासं (नार्वेयुवराजं) प्रति सेनानां प्रबलीकरणमवस्थापयितुं प्रैषयत्। सेनाप्रबलीकरणं पोलानां प्रतीति नार्वेराजोऽचिन्तयत्। परिशील्य सेनासन्नाहो डेन्मार्कदेशं प्रति क्रियत इति अजानात्। फोर्टिन्ब्रासः पितृव्यसकाशे प्रतिज्ञामकरोत् यत् डेन्मार्कदेशं प्रति युद्धसन्नाहान् कदापि न करिष्यति इत्यादिकं विषयं दूतमुखात् श्रुत्वा राजा प्रसन्नः। दूतात् प्रमाणलेखं स्वीकृत्य द्वावपि दूतौ अभिनन्द्य नक्तं भोजनार्थम् आह्वयति। दूतयोः निष्क्रमणोत्तरं पोलोनियसः स्वपुत्रीं ओफीलियां प्रति हेम्लेटेन लिखितं प्रणयपत्रं पठित्वा श्रावयति। अस्मिन् प्रणयव्यवहरे तेन कृतो निरोधोऽपि विवृतः। अनेन निरोधेन हेम्लेटो विषण्णः जातः। क्रमेण उन्मादी परिणतः इति पोलोनियसः राजानं निवेदयति सूचयति च ओफीलियां हेम्लेटस्य सकाशं प्रेषयित्वा रहसि हेम्लेटस्य व्यवहरशैलीं परिशीलयाम इति। राज्ञा सम्मतिः प्रकटिता। तत्रागच्छन्तं हेम्लेटं दृष्ट्वा तत्स्थितिं परीक्षितुं राजदम्पती ततः प्रेषयति

In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः। सर्वेषां निष्क्रमणोत्तरं पठन् हेम्लेटः प्रविशति। हेम्लेटः पोलोनियसस्य प्रश्नानाम् असम्बद्धानि उत्तराणि ददाति। एष उन्मत्त इति पोलोनियसः निश्चिनोति। स्वपुत्र्या सह हेम्लेटस्य मेलनं कारयितुं पोलोनियसः ततः निर्गच्छति।

रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशतः। ताभ्यां सहापि हेम्लेटः उन्मत्तवत् प्रलपति। हेम्लेटं विनोदयितुं नटानां समितिरायाति। हेम्लेटः तान् नटान् स्वागतीकरोति। तेभ्यः आतिथ्यप्रदानाय पोलोनियसः आदिष्टो भवति। प्रथमं नटं विहाय अन्यैः नटैस्सह पोलोनियसः निष्क्रान्तः। गोन्जेगस्य हत्या इति नाटकं प्रदर्शयितुं द्वादश वा षोडश वा अधिकाः अतिरिक्ताः पङ्क्तीः कण्ठस्थाः कृत्वा वक्तुञ्च सः प्रथमः नटः हेम्लेटेन प्रचोदितो भवति। रोसेन्क्रान्जगिल्डेन्स्टेर्नौ निष्क्रान्तौ। पितृव्यस्य मनोगतं यथा प्रकटितं भवेत् तथा तैर्नटैः स्वपितुर्हत्याया सदृशं किमपि प्रदर्शनं पितृव्यसम्मुखं कारयितुं सङ्कल्पयति हेम्लेटः।

तृतीयः अङ्कः प्रथमं दृश्यम्

दूर्गे प्रकोष्ठः। राजा राज्ञी पोलोनियसः ओफीलिया रोसेन्क्राञ्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति। राज्ञा नियुक्तौ रोसेन्क्राञ्जगिल्डेन्स्टेर्नौ हेम्लेटस्य मनःप्रवृत्तिं निवेदयतः। तं विनोदे प्रवर्त्तयितुं नटाः आगताः इति तौ सूचयतः। नाटकं प्रेक्षितुं राजानं राज्ञीञ्च आह्वातुं हेम्लेटेन अहमभ्यर्थित इत्यपि पोलोनियसः निवेदयति। ओफीलियायाः हेम्लेटेन सह समावेशः कल्पितो भवति। हेम्लेटेन दत्तानि बहुमानवस्तूनि लेखांश्च प्रतिग्रहीतुम् अभ्यर्थयति ओफीलिया। मया किमपि न दत्तमिति हेम्लेटः वदति। असम्बद्धं प्रलपति च। हेम्लेटो निष्क्रान्तः। ओफीलिया भृशं परितपति। राजा अभिप्रैति यत् हेम्लेटस्य मनोभावेषु प्रेम न प्रचलति। तन्मनः नैराश्यपूर्णमस्ति। केनापि शोकेन तद् वर्धते। तद् बहिः पतति चेत् अत्याहितं भवेत्। तम् इङ्गलन्डं प्रेषयितुं कृतनिश्चयो भवति। पोलोनियसः स्वाभिप्रायं प्रकटयति यत् नाटकानन्तरं हेम्लेटस्य माता एकान्ते

In Public domain. Digitization Muthulakshmi Research Academy

तस्य मनोगतं पृच्छतु। निलीनो पोलोनियसः श्रोष्यति। रहस्यं न ज्ञायते चेत् हेम्लेटः इङ्ग्लन्डदेशं प्रेषणीयः।

तृतीयः अङ्कः द्वितीयं दृश्यम्

राजभवने शाला। हेम्लेटो नटाश्च प्रविशन्ति। हेम्लेटो नटान् रङ्गभूम्यां कथम् भावानुकूलं नटनं कर्त्तव्यमिति सूचयति। पोलोनियसमुखात् नाटकप्रदर्शने राज्ञः राज्याः उपस्थितिः दृढीकृता। हेम्लेटः होरेषियं वदति यत् नक्तं नाटकं प्रदर्श्यते यस्मिन् मत्पितृमरणवृत्तवद् एकं दृश्यं भविष्यति। तदा मत्पितृव्यं सूक्ष्मं परीक्षस्व। होरेषियः तथाचरितुं सम्मतिं सूचयति। राजा राज्ञी पोलोनियसः ओफीलिया रोसेन्क्रान्जः गिल्डेन्स्टेर्नः प्रभवः सेवकाः राजरक्षकाश्च प्रविशन्ति। तैस्सह अनुचितं भाषणं करोति हेम्लेटः।

वाग्रहितनाटकप्रदर्शनमारब्धम्। राजा राज्ञी (नटौ) च प्रविशतः। द्वावपि प्रेम्णा व्यवहरतः। यदा राजा पुष्पराशौ शेते तदा सुप्तं तं दृष्ट्वा सा ततः गच्छति। अन्यः आगत्य राज्ञः किरीटमपनीय तत्कर्णे विषं पातयित्वा गच्छति। राज्ञी प्रत्यागत्य राजानं मृतं दृष्ट्वा रोदिति। घातकोऽपि आगत्य दुःखं नटति। शवो नीतः। घातकः राज्याः प्रणयसम्मतिं याचते। आदौ अनिच्छां प्रकटय्य पश्चात् राज्ञी तस्य प्रणयमङ्गीकरोति। मौनप्रदर्शनस्य अभिप्रायं ज्ञातुमैच्छत् ओफीलिया। नाटकं सान्तं दृष्टम् अवगमिष्यत इति वदति हेम्लेटः। प्रस्तावनाकारो नटः प्रस्तावनां प्रस्तूय निर्गच्छति। राज्या राज्ञश्च पात्रधारिणौ नटौ प्रविशतः। यदा विषं राज्ञः कर्णे पातयित्वा घातकस्य पात्रधारी राज्ञः पात्रधारिणं हन्ति (इव अभिनयति) तदा नाटकप्रदर्शनस्य हत्यावृत्तं दृष्ट्वा राजा उत्तिष्ठति। सर्वे ततः निर्गच्छन्ति। हेम्लेटः होरेषियश्च राज्ञः प्रतिक्रियां दृष्ट्वा राजा घातकः इति निश्चिनुतः। गिल्डेन्स्टेर्नः राज्याः सन्देशं हेम्लेटं वदति यत् व्याकुलचित्ता राज्ञी पुत्रेण सह भाषितुमिच्छति। तत्रागतः पोलोनियसोऽपि तमेव समाचारं वदति। हेम्लेटः सम्मतिं सूचयति। पोलोनियसः राज्ञीं वक्तुं ततः निर्गच्छति। हेम्लेटस्य मनः दुःखतप्तमस्ति। सः निष्क्रान्तः।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयः अङ्कः तृतीयं दृश्यम्

राजा रोसोन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति। रोसेन्क्रान्जगिल्डेन्स्टेर्नाभ्यां सह हेम्लेटम् इङ्ग्लन्डदेशं प्रेषयितुं कृतनिश्चयो भवति राजा। राजादेशं पालयितुं द्वावपि सम्मतिं सूचयतः। पोलोनियसः सूचयति यत् हेम्लेटः मातृगृहं गच्छति। निलीय मातापुत्रयोः भाषणं श्रोष्यामि। राज्ञे निवेदयामि च। राजा सम्मतिं सूचयति। पोलोनियसः निर्गच्छति। राजा पश्चात्तापदग्धः सन् परितपति। जानुभ्यां नमति। हेम्लेटः प्रविश्य तं हन्तुमुद्युक्तोऽपि विरतो भवति यतः प्रार्थयमानः सः स्वर्गं प्रवेक्ष्यति। तन्न भवतु। अन्यः अनुकूलः अवसरः यदा लभ्यते तदा पितुर्हत्यायाः प्रतिकारः कर्तव्य इति निश्चित्य तत निष्क्रान्तः हेम्लेटः। राजापि उत्थाय निष्क्रान्तः।

तृतीयः अङ्कः चतुर्थं दृश्यम्

राजभवने प्रकोष्ठः। राज्ञी पोलोनियसश्च प्रविशतः। पोलोनियसः हेम्लेटस्य उपालम्भं कर्तुं कुपितस्य राज्ञः हेम्लेटस्य च मध्यवर्तित्त्वं वोढुं राज्ञीं सूचयति। पोलोनियसो जवनिकान्तरितो निलीनः। हेम्लेटः प्रविशति। राज्ञी पुत्रमुपालभते यत् त्वया तव पितरं प्रति महदपराद्धम्। तच्छ्रुत्वा पुत्रोऽपि मातरमुपालभते यत् त्वया मम पितरं प्रति महदपराद्धम्। मातापुत्रयोर्मध्ये वादः प्रचलति। दर्पणेन आत्मनः अन्तरङ्गं द्रष्टुं मातरं प्रार्थयते पुत्रः। पुत्रः हन्तीति भीत्या माता रक्षार्थम् आक्रोशति। जवनिकान्तरितः पोलोनियसः रक्ष्यतामिति आक्रोशति। हेम्लेटः कृपाणेन जवनिकायां विध्यति पोलोनियसं हन्ति च। मतिहीनं क्रूरं कर्म इति माता पुत्रं दूषयति। यथा राज्ञो हननं तस्य भ्रात्रा सह विवाहश्च। तादृशम्? इति पुत्रोऽपि मातरमुपालभते। जवनिकामपसार्य पोलोनियसं दृष्ट्वा परकार्येषु व्यापारः प्रमादकर इति यदर्हति तत् तेन प्राप्तमिति च ब्रूते हेम्लेटः। स्वपितुः गुणगणान् प्रशंसति। पितृव्यस्य अवगुणान् तेन सह कृतं मातुः द्वितीयविवाहञ्च गर्हति। मातुः द्वितीयः पतिः स्वपितुः घातक इति निन्दति।

In Public domain. Digitization Muthulakshmi Research Academy

तदा भूतं प्रविशति। हेम्लेटस्तं भूतमुद्दिश्य भाषते। भूतं हेम्लेटं कर्त्तव्यं बोधयति। तदनुसृत्य हेम्लेटः मातरमाश्वासयति। शून्यं दृष्ट्वा केन भाषसे इति पुत्रं पृच्छति माता। मम पिता गच्छति। पश्येति पुत्रः कथयति। पुत्रस्य ऊहकल्पनमिति उन्मादः तादृशभ्रमान् कल्पयतीति माता तद्वचनं खण्डयति। पितृव्यस्य साङ्गत्यं परिहर्तुं कृतस्य पापस्य पश्चात्तापम् अनुभोक्तुं सदाचारं पालयितुं मातरं प्रार्थयते हेम्लेटः। कापटिकाभ्यां पाठशालामित्राभ्यां सह इङ्ग्लन्डः गन्तव्यः काचन प्रतिक्रिया कर्तव्या इति मातरं निवेदयति। । पोलोनियसस्य शवं नीत्वा हेम्लेटो निष्क्रान्तः।

चतुर्थः अङ्कः प्रथमं दृश्यम्

दुर्गे प्रकोष्ठः। राजा राज्ञी रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति। एकान्ते राज्ञी पुत्रेण कृतां हत्यां राजानं निवेदयति। यदि तत्स्थाने राजा अभविष्यत् तर्हि निश्चयेन हतोऽभविष्यत्। अनेन चिन्तनेन राजा उद्विग्नः। हेम्लेटेन कृतात् अपराधात् युक्त्या राजशक्त्या च आत्मानं रक्षितुम् उपायं चिन्तयति। शीघ्रं हेम्लेटं प्रेषयितुं कृतसङ्कल्पो भवति। कर्तव्यनिर्वहणाय रोसेन्क्रान्जगिल्डेन्स्टेर्नौ प्रेषितौ। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः द्वितीयं दृश्यम्

दुर्गे अन्यः कोष्ठः। हेम्लेटः प्रविशति। तेन मृतदेहः सुरक्षितस्थले निक्षिप्तः। रोसेन्क्रान्जगिल्डेन्स्टेर्नौ प्रविश्य राजाज्ञया मृतदेहं पूजायतनं नेतुम् इच्छतः। हेम्लेटमुखात् मृतदेहस्य स्थानं ज्ञातुं प्रयत्नं कृत्वा विफलौ तौ हेम्लेटं राजसमीपं नयतः।

चतुर्थः अङ्कः तृतीयं दृश्यम्

दुर्गे अन्यः कोष्ठः। राजा परिजनश्च प्रविशन्ति। अपराधिनं हेम्लेटं दण्डयितुं वा उपेक्षितुं वा अशक्नुवन् राजा क्लेशमनुभवति। रोसेन्क्रान्जः मृतदेहः कुत्र निक्षिप्त इति हेम्लेटो नावददिति राजानं निवेदयति। हेम्लेटो राज्ञः समक्षम् आनीतः। राज्ञा पृष्टः सः उन्मादीव प्रलपन् उपरि शालायां पश्यन्तु

In Public domain. Digitization Muthulakshmi Research Academy

इति वदति। राजा सेवकान् मृतदेहस्य अन्वेषणाय प्रेषयति। इङ्ग्लन्डप्रयाणाय सिद्धो भव इति राजा हेम्लेटं सूचयति। हेम्लेटः अङ्गीकरोति। राजादेशं पालयितुं रोसेन्क्रान्जगिल्डेन्स्टेनौं निष्क्रान्तौ। कापटिकेन राज्ञा क्लाडियसेन हेम्लेटं हन्तुं लेखेषु इङ्गलन्डराजोऽनुशिष्टोऽस्ति।

चतुर्थः अङ्कः चतुर्थं दृश्यम्

डेन्मार्कदेशे काचित् समभूमिः। फोर्टिन्ब्रासः (नार्वेदेशयुवराजः) नायकश्च प्रविशतः सेनया सह। पूर्वं दत्तया अनुमत्या नार्वेदेशस्य सेना डेन्मार्कदेशस्य अन्तर्गतमार्गेण क्रमणं करिष्यतीति डेन्मार्कदेशराजाय निवेदयितुं नायकः फोर्टिन्ब्रासेन आदिष्टः। नायकं विहाय अन्ये निष्क्रान्ताः। हेम्लेटः रोसेन्क्रान्जगिल्डेन्स्टेर्नाभ्यां सह प्रविशति। हेम्लेटः सेनाविषयं जिज्ञासते। नायकः तं वदति। सेनायाः उपयोगः कस्मिंश्चित् पोलन्डदेशभागे भविष्यति। वित्तलाभापेक्षां विना कीर्तिकामनया कस्यचिद् भूभागस्य कृते सेना योत्स्यते। तच्छ्रुत्वा हेम्लेटः आत्मनिन्दां करोति। 'पिता हतः। माता दूषिता। तथापि अहं प्रतिकारे मन्दोऽस्मि। इतःप्रभृति मम चिन्तनानि रक्तमयानि सन्तु' इति सङ्कल्प्य ततः निष्क्रान्तः।

चतुर्थः अङ्कः - पञ्चमं दृश्यम्

एल्सिनोरदुर्गे प्रकोष्ठः। राज्ञी होरेषियः कश्चित् पुरुषश्च प्रविशन्ति। राज्ञ्याः अनुमत्या काञ्चिद् उन्मादिनीं प्रकोष्ठं प्रवेशयति पुरुषः। तत्र प्रविष्टास्ति ओफीलिया या पितुः मरणेन उन्मादिनी अभूत्। सा किमपि गायति प्रलपति। राजा प्रविशति। ओफीलियायाः उन्मादपूर्णानि वचनानि श्रृणोति। ततः निर्गच्छन्तीम् ओफीलियां परिपालयितुं होरेषियम् आदिशति राजा। सः पोलोनियसस्य मृतिविषये रहसि फ्रान्सदेशात् प्रत्यागतस्य पोलोनियसस्य पुत्रस्य च विषये चिन्ताक्रान्तः। नेपथ्यात् शब्दं श्रुत्वा राजा भीतभीतः। पौरैरनुगतः सायुधः पोलोनियसस्य पुत्रः लेर्टेसः प्रविश्य पितुः मरणविषये राजानं पृच्छति। तस्मिन् विषये अनपराधी अस्मि। तदैव नष्टमतिः ओफोलिया

तत्रायाति। पूर्ववत् विलपति प्रलपति गायति च। लेर्टेसः सोदरीं दृष्ट्वा विषादग्रस्तः। राजा तं कर्त्तव्यं बोधयति। तस्य प्रतिकाराग्रहः अपराधिनि पतत्विति सर्वं स्पष्टीकरोमीति च राजा तं सान्त्वयति। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः षष्ठं दृश्यम्

दुर्गे अन्यः प्रकोष्ठः। होरेषियः सेवकश्च प्रविशतः। होरेषियः नाविकेभ्यः लेखं प्राप्नोति। लेखेन हेम्लेटः होरेषियं सूचयति यत् नाविकानां सकाशे राज्ञे लेखाः सन्ति। ताः राजानं प्राप्नुवन्तु। समुद्रप्रयाणं कुर्वाणः हेम्लेटः समुद्रचोरसङ्घेन गृहीतः। किन्तु तेन सङ्घेन दयया व्यवहृतम्। होरेषियं नाविकानां साहाय्येन स्वसकाशमागन्तुं सूचयति। होरेषियः हेम्लेटस्य आदेशं पालयितुं तैस्सह निष्क्रान्तः।

चतुर्थः अङ्कः सप्तमं दृश्यम्

दुर्गे अन्यः कोष्ठः। राजा लेर्टेसश्च प्रविशतः। मत्पितुः हत्यायाः अपराधी किमर्थम् अदण्डित इति लेर्टेसः राजानं पृच्छति। अपराधी राज्ञ्याः पुत्र इति प्रजानुरागभाक् इति च कारणद्वयेन तात्कालिकरूपेणैव उपेक्षितः इति राजा सूचयति। तावता दूतः प्रविश्य राज्ञः कृते राज्ञ्याश्च कृते हेम्लटेन प्रेषितौ लेखौ प्रयच्छति। लेखेन हेम्लेटस्य प्रत्यागमनं ज्ञात्वा राजा विस्मितः। राजा लेर्टेसम् उपायं सूचयति येन पूर्णः प्रतिकारो भविष्यति। कृपाणक्रीडायाः व्याजेन लेर्टेसः विषाक्तेन कृपाणेन अपराधिनं हन्यात्। यदि अपराधी अक्षतो भविष्यति तर्हि विषपानीयदानेन तस्य प्राणाः हरणीयाः। राज्ञी प्रविश्य ओफीलियायाः मरणं सूचयति। दुःखोद्विग्नेन लेर्टेसेन सह राजदम्पती ततः निष्क्रान्तौ।

पञ्चमः अङ्कः प्रथमं दृश्यम्

एल्सिनोरे श्मशानम्। विदूषकौ समाधिखनकौ समाधिं खनतः। तदा तत्रागतौ होरेषियहेम्लेटौ कस्य कृते समाधिः खात इति तौ खनकौ पृच्छतः। किन्तु समुचितमुत्तरं न प्राप्तम्। ततः प्रविशन्ति पुरोहिताः ओफीलियाया

In Public domain. Digitization Muthulakshmi Research Academy

मृतदेहः लेर्टेसः राजा राज्ञी अन्ये च। हेम्लेटो होरोषियश्च अपसरतः। समाधौ खननाय ओफीलियायाः मृतदेहः स्थापितः। तदा दुःखोद्विग्नः लेर्टेसः समाधौ स्कन्दति। प्रियाया ओफीलियायाः मरणेन दुःखविचलितः हेम्लेटोऽपि समाधौ स्कन्दति। हेम्लेटलेर्टेसयोर्बाहूबाहवि भवति। राजाज्ञया सेवकैः तौ पृथक् कृतौ। लेर्टेसेन सह अस्मिन् विषये युद्धं करिष्यामीति वदति हेम्लेटः। जीवन्नपि ओफीलियया सह निखननं गच्छेयमिति विलपति हेम्लेटः। हेम्लेटस्य निर्गमनोत्तरं राजा लेर्टेसं सान्त्वयति। सर्वे निष्क्रान्ताः।

पञ्चमः अङ्कः द्वितीयं दृश्यम्

हेम्लेटहोरेषियौ प्रविशतः। हेम्लेटः स्वप्रयाणकथायाः शेषं होरेषियं वदति। हेम्लेटः प्रयाणकोष्ठादुद्धृत्य पोट्टलिकाम् उद्घाट्य तत्रत्यं लेखं पठित्वा अवागच्छत् यत् राज्ञा हेम्लेटे दुष्टत्वमारोप्य डेन्मार्कदेशस्य इङ्ग्लन्डस्य च क्षेमरक्षणाय तच्छिरःखण्डनादेशः दत्तः। हेम्लेटः तल्लेखं होरेषियं दर्शयति। तदनु आत्मना किं कृतमिति हेम्लेटः कथयति। उभयोर्देशयोः मैत्रीशान्तिप्रेमादीनां विवृद्ध्यै लेखवाहकौ हन्तव्यौ इति लिखित्वा स्वसमीपे विद्यमानेन पितुर्मुद्रासहिताङ्गुलीयकेन कृतहस्ताक्षरं लेखं पूर्वलेखस्थाने अस्थापयत् हेम्लेटः। तदनन्तरं घटितं वृत्तं पूर्वमेव हेम्लेटः होरेषियम् अवदत्। लेखवाहकौ गिल्डेनस्टेर्नरोसेन्क्रान्जौ नाशं गताविति होरेषियः अवागच्छत्।

तत्रागतः आस्त्रिकः निवेदयति यत् राज्ञा हेम्लेटस्य कृपाणप्रयोगनैपुण्ये पणः कृत इति। हेम्लेटलेर्टेसयोर्मध्ये कृपाणचालनप्रयोगस्पर्धा हेम्लेटस्याङ्गीकारेण आयोजयिष्यते। स्पर्धायां हम्लेटः पराजेष्यते इति होरेषियः वदति। यद् भवति तद् भवतु इति मित्रोपदेशम् अवधीर्य स्पर्धायै सहोरेषियः हेम्लेटो निर्गच्छति।

राजा राज्ञी लेर्टेसः प्रभवः आस्त्रिकः तूर्यभेरीकृपाणमद्यैः सह सेवकाश्च प्रविशन्ति। हेम्लेटहोरेषियौ प्रविशतः। हेम्लेटः लेर्टेसस्य क्षमां याचते। हेम्लेटः आवृतकृपाणं लेर्टेसश्च विषलिप्तम् अनावृतकृपाणं गृह्णीतः। स्पर्धायाः

मध्ये राजा हेम्लेटेन विषयुक्तं मद्यं पाययितुं प्रयतते। हेम्लेटः निराकरोति। स्पर्धायां पुत्रस्य नैपुण्यं दृष्ट्वा तुष्ट्वा राज्ञी मद्यं पातुमुद्युक्ता। राज्ञा निवारितापि सा पिबति। लेर्टेसो हेम्लेटे विषाक्तखड्गप्रहारेण क्षतिं करोति। तदा जाते तुमुले युद्धे तयोः कृपाणयोर्विनिमयो भवति। तेन विषलिप्तकृपाणेन हेम्लेटो लेर्टेसे क्षतिं करोति। उभावपि विषाक्तकृपाणेन क्षतौ जातौ। स्वदुष्टकर्मणा हतोऽस्मीति लेर्टेसः पश्चात्तापमनुभवति। मद्ये विषप्रयोगः कृतः इति उक्त्वा पतिता राज्ञी विगतासुर्भवति। लेर्टेसमुखात् राज्ञः कपटं ज्ञात्वा हेम्लेटः कृपाणेन राजानं क्षिणोति। बलाद् राजानं विषमद्यं पाययति। राजा म्रियते। लेर्टेसोऽपि म्रियते। प्राणत्यागाय उद्युक्तं होरेषियं निवार्य हेम्लेटः कर्त्तव्यं बोधयति। तदैव पोलन्डाद् विजयी फोर्टिन्ब्रासः निवृत्त इति ज्ञात्वा स एव डेन्मार्कस्य राजा भवितुं योग्य इति उद्घुष्य हेम्लेटो म्रियते। फोर्टिन्ब्रास इङ्ग्लन्डदूता अन्ये च प्रविशन्ति। भयङ्करं तद्दृश्यं भीतावहमासीत्। सर्वजनदर्शनाय तानि सर्वाणि शरीराणि उन्नतप्रदेशे स्थापयितुं प्रवृत्तं सर्वं सर्वान् निवेदयितुञ्च सङ्कल्पयन्ति। डेन्मार्केराज्ये मम साम्प्रदायिकाधिकाराः सन्ति। तानिदानीं स्वायत्तान् करोमीति फोर्टिन्ब्रासः वदति। हेम्लेटस्य सम्मतमिदमपि शीघ्रं क्रियतामिति होरेषियः सूचयति। हेम्लेटस्य सम्मानार्थं गोलकाः प्रयुक्ताः।

अनेन नाटकं समाप्तिं गतम्।

*****

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः क्लियोपेट्रा च

पूर्वकथा – क्लियोपेट्रा ईजिप्टस्य राज्ञी आसीत्। रोमनसाम्राज्यपरिपालकेन जूलियसेन सीजरेण सह तस्याः प्रणय आसीत्। स रोमनगरे ब्रूटसकेशियसादिभिः हतः। मार्कः एन्टोनिः आक्टेवियसः सीजरः लेपिडसश्च सम्मिल्य ब्रूटसादीन् हत्वा रोमनराज्यपालका बभूवुः। तेषु एन्टोनिः मुख्यः। पश्चात् एन्टोनिः अलेग्जेन्ड्रियां गतः। तत्र स क्लियोपेट्रया वशीकृतः। स पत्नीं विहाय क्लियोपेट्रया सहाभवत्।

प्रथमः अङ्कः – प्रथमं दृश्यम्

अलेग्जेन्ड्रियानगरे क्लियोपेट्रायाः सौधे कोष्ठः। डिमिट्रियसः फैलश्च प्रविशतः। क्लियोपेट्रावशं गतं वीरं एन्टोनिं गर्हति फैलः। एन्टोनिः क्लियोपेट्रा तस्याः परिजनश्च प्रविशन्ति। रोमनगरात् वार्तामानयति सेवकः। सङ्क्षेपेण वक्तुम् सेवकम् आदिशति एन्टोनिः। 'एन्टोनेः पत्नी फूल्विया अथवा सीजरः ईजिप्टं त्यज इति वा युद्ध् कुरु इति वा आदिशेत्। वार्तां सम्यक् शृणु' इति एन्टोनिं क्लियोपेट्रा अपहसति। रोमनसाम्राज्यं निपततु। लोके आवयोस्तुल्यौ प्रेयसीप्रियौ न स्तः। यदीदं सत्यं नास्ति तर्ह्यहं दण्ड्य इति एन्टोनिः क्लियोपेट्रां वदति। क्लियोपेट्रा तादृशानि वचनानि ब्रूते यैः एन्टोनिः दूतमुखं द्रष्टुं विमुखो भवति। परेद्युः एन्टोनेः व्यवहारः श्रेयान् भवेदिति आशास्य ततः निष्क्रान्तौ फैलडिमिट्रियसौ।

प्रथमः अङ्कः – द्वितीयं दृश्यम्

तस्मिन्नेव सौधे अन्यः कोष्ठः। छार्मियाना ऐरासा अलेक्सासः दैवज्ञश्च प्रविशन्ति। दैवज्ञमुखात् सर्वाः स्वभाग्यं जिज्ञासन्ते। अकस्मात् एन्टोनिः रोमनगरं प्रति चिन्तापरो जात इति क्लियोपेट्रा व्याकुला भवति। एन्टोनिः तत्र आयाति। किन्तु क्लियोपेट्रा तं द्रष्टुं निराकरोति ततः निर्गच्छति च। एन्टोनिः प्रथमदूतेन सेवकैश्च प्रविशति। दूतमुखात् ज्ञायते यत् एन्टोनेः भ्रात्रा लूसियसेन फूल्विया (एन्टोनेः पत्नी) युद्धम् अकरोत्। किन्तु युद्धाद् विरम्य ताभ्यां सीजरं

प्रति स्वसेनानां सङ्घटनं कृतम्। किन्तु प्रथमयुद्धे विजयिना सीजरेण तौ इटलीदेशाद् विद्रावितौ। लेबैनसः स्वपार्थियसेनाभिः सह सर्वमासियाभूखण्डं वशे कृतवान् युफ्रेटसानदीं यावत्। ततः परं वक्तुं दूतः सङ्कुचति। परं एन्टोनिः अवगच्छति। रोमनगरे क्लियोपेट्रावशं गतं एन्टोनिं जनाः उपालभन्ते।

प्रथमदूतनिर्गमनोत्तरं द्वितीयदूतः प्रविशति। तस्मात् ज्ञायते यत् एन्टोनेः भार्या फूल्विया मृता। लेखं दत्त्वा द्वितीयदूतो निष्क्रान्तः। एन्टोनिः स्वकर्मणा पश्चात्तापमनुभवति। क्लियोपेट्रायाः आत्मा मोक्तव्य इति निश्चिनोति।

एन्टोनेः आदेशेन प्रविष्टः इनोबार्बसः जिगमिषन्तम् एन्टोनिं निवारयितुं प्रयतते। गमनकारणं उक्त्वा राज्ञ्याः अनुमत्या गच्छामीति वदति एन्टोनिः। पत्न्याः फूल्वियायाः मरणं सीजरेण सह स्पर्धमानस्य सेक्स्टसस्य पाम्पेः समुद्रे आधिपत्यं रोमनसाम्राज्यस्य स्थितेः अपायस्य सम्भावना च ईजिप्टाद् गन्तुं एन्टोनिं प्रेरयन्ति। तौ द्वौ निष्क्रान्तौ।

प्रथमः अङ्कः – तृतीयं दृश्यम्

क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति। क्लियोपेट्रा एन्टोनेः स्थितेः विवरणं जिज्ञासते। तदर्थं अलेक्सासो निष्क्रान्तः। एन्टोनिं प्रति क्रियमाणः अतीव निरोधः कार्यनिरोधकं प्रति द्वेषाय कल्पेत इति छार्मियाना क्लियोपेट्रां सूचयति। तत्रागतः एन्टोनिः स्वपत्न्याः मरणं सेक्स्टसस्य पाम्पेः समुद्रे आधिपत्यं रोमनगरसङ्कटस्थितिञ्च विवृत्य क्लियोपेट्राम् अनुनीय तदनुमतिं प्राप्नोति। सर्वे निष्क्रान्ताः।

प्रथमः अङ्कः – चतुर्थं दृश्यम्

रोमनगरे सीजरस्य गृहम्। लेखं पठन् आक्टेवियसः सीजरः लेपिडसः सेवकाश्च प्रविशन्ति। एन्टोनेः स्त्रीव्यामोहं गर्हति सीजरः। तत्रागतात् प्रथमदूतात् ज्ञायते यत् समुद्रे पाम्पिः प्रबलो जायते। सीजरस्य अनुचराः इदानीं प्रबलं पाम्पिम् आश्रयन्ति। द्वितीयदूतात् ज्ञायते यत् शक्तिसम्पन्नाः समुद्रचोराः पाम्पिना सह भविष्यन्ति। सीजरः एन्टोनेः शौर्यं

In Public domain. Digitization Muthulakshmi Research Academy

प्रशंसति। तस्य प्रत्यागमनम् अभिलषति। पाम्पिः विजृम्भते इति सीजरः व्याकुलो भवति। युद्धस्य कृते स्वसैन्यबलं कियदस्तीति गणयाव इति निश्चित्य लेपिडससीजरौ निष्क्रान्तौ।

प्रथमः अङ्कः – पञ्चमं दृश्यम्

अलेग्जेन्ड्रियानगरे क्लियोपेट्रायाः सौधम्। क्लियोपेट्रा छार्मियाना ऐरासा मार्डियाना च प्रविशन्ति। क्लियोपेट्रा एन्टोनेः वियोगेन विह्वलास्ति। अलेक्सासः एन्टोनिना उपायनीकृतं मौक्तिकं क्लियोपेट्रायै समर्पयति। विंशतिर्दूताः पृथक् पृथक् तया प्रेषिताः। प्रतिदिनं एन्टोनये शुभकामनां प्रेषयिष्यामि। मम राज्यात् सर्वान् जनान् दूतान् प्रेषयिष्यामीति प्रेमविह्वला क्लियोपेट्रा निश्चिनोति। सर्वे निष्क्रान्ताः।

द्वितीयः अङ्कः - प्रथमं दृश्यम्

मेस्सिनाप्रदेशे पाम्पेर्गृहम्। पाम्पिः मेनिक्रेटसः मेनसश्च (पाम्पेः सुहृदौ) युद्धसन्नद्धाः प्रविशन्ति। मार्कः एन्टोनिः स्त्रीव्यामोहपाशबद्धः। धनार्थं प्रजाः पीडयतीति हेतोः सीजरो लोककण्टको जातः। लेपिडसः तयोर्द्वयोश्चाटुकारः। अतः पाम्पिः चिन्तयति यत् सः निश्चयेन विजयी भविष्यति। वार्रियसः प्रविश्य मार्कः एन्टोनिः अचिरेण रोममागच्छतीति वार्तां श्रावयति। पाम्पिः अनया वार्तया उद्विजते। यद्यपि परस्परकलहोऽस्ति तथापि अस्मान् प्रति शत्रुत्वेन तेषां सङ्घटनं स्यात्। सैन्यशक्तेः सद्विनियोगमाश्रयन्ति अस्मज्जीवितानीति तर्कयति पाम्पिः। ते निष्क्रान्ताः।

द्वितीयः अङ्कः - द्वितीयं दृश्यम्

रोमनगरे लेपिडसस्य गृहम्। इनोबार्बसः लेपिडसश्च प्रविशतः। सीजरस्य एन्टोनेश्च मध्ये स्नेहपूर्णव्यवहारः भवतु इति द्वावपि आशासाते। सीजरः एन्टोनिश्च मुक्तमनसा सम्भाषणं कुरुतः। द्वयोर्वैमनस्यं दूरीकर्तुं मैत्रीञ्च द्रढयितुं एन्टोनिः सीजरस्य स्वसुः आक्टेवियायाः पाणिग्रहणं करोत्विति

In Public domain. Digitization Muthulakshmi Research Academy

अग्रिप्पः उपायं सूचयति। सीजरः एन्टोनिं स्वसुः समीपं नेतुमिच्छति। सीजरः एन्टोनिः लेपिडसश्च निष्क्रान्ताः।

सिड्नेसनदीसमीपे एन्टोनिक्लियोपेट्रयोः प्रथममेलनं क्लियोपेट्रायाः सौन्दर्यं वैभवोपेतं विलासमयं जीवनम् एन्टोनिक्लियोपेट्रयोः प्रेमव्यवहारञ्च इनोबार्बसः मेसिनसम् अग्रिप्पञ्च श्रावयति।

द्वितीयः अङ्कः - तृतीयं दृश्यम्

रोमनगरे सीजरस्य गृहम्। एन्टोनिः सीजरः तयोर्मध्ये आक्टेविया च प्रविशन्ति। एन्टोनिः जनैः कथ्यमानान् मम दोषान् मा विश्वसिहीति आक्टेवियां सूचयति। सीजरस्य आक्टेवियायाश्च निष्क्रमणोत्तरं दैवज्ञः एन्टोनिम् उपगच्छति। सीजरस्य समीपे एन्टोनेः शक्तिः चकिता विस्मिता च भवति। अतः तस्मात् दूरे भव। क्रीडासु एन्टोनिः पराजितो भवति। यद्यपि एन्टोनिः समर्थः तथापि सीजरस्य भागधेयमधिकमिति दैवज्ञः एन्टोनिं सूचयित्वा निष्क्रान्तः। तद्वचनप्रभावेण स्वपराजयं विशङ्क्य शान्तिस्थापनाय ओक्टेवियया सह विवाहं कृत्वापि ईजिप्टं जिगमिषति एन्टोनिः।

द्वितीयः अङ्कः - चतुर्थं दृश्यम्

काचित् वीथिः। लेपिडसः मेसिनसः अग्रिप्पश्च प्रविशन्ति। तव नायकाननुगच्छेति लेपिडसः अग्रिप्पमेसिनसौ सूचयति। अग्रिप्पः मेसिनसश्च एन्टोनिम् अनुसरिष्याव इति कथयतः। सर्वे निष्क्रान्ताः।

द्वितीयः अङ्कः - पञ्चमं दृश्यम्

अलेग्जान्ड्रियायां क्लियोपेट्राया गृहम्। क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति। इटलीतः आगतात् दूतात् एन्टोनेः क्षेमसमाचारं ज्ञात्वा हृष्टा क्लियोपेट्रा तस्य विवाहसमाचारं ज्ञात्वा क्रुद्धा दुःखिता च तं दूतं दण्डयति। आक्टोवियायाः रूपस्वभावादिकं जिज्ञासते क्लियोपेट्रा। सा भृशं विलपति।

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयः अङ्कः - षष्ठं दृश्यम्

मिसेनपर्वतसमीपे। भेरीणां ध्वनिः। एकस्मात् पार्श्वात् पाम्पिर्मैनसश्च प्रविशतः। अन्यपार्श्वात् सीजर एन्टोनिः लेपिडसः इनोबार्बसः मेसिनसः अग्रिप्पश्च प्रविशन्ति। उभयपक्षयोः चर्चाः भवन्ति। ये प्रस्तावाः अस्माभिः प्रेषिताः ते पाम्पिना परिशीलिताश्चेत् कीदृशास्तेषां प्रभाव इति सीजरः पाम्पिं पृच्छति। पाम्पिः वदति यत् स्वपितुः मृतेः प्रतिकारो केन कारणेन न कर्त्तव्य इति नाहं जानामि। जूलियसस्य सीजरस्य मृतेः प्रतिकारो आक्टेवियससीजरादिभिः कृत एव। मया निर्मितया नौसेनया क्रूरं रोममहं दण्डयिष्यामि येन मम पितुर्विश्वासघातः कृतः। एन्टोनिः वदति यत् तव नौसेनया वयं न बिभियाम। भूम्यां अस्मत्सैन्यं पाम्पेः नौसेनाम् अतिशेते। लेपिडसः प्रस्तावस्य विषये पाम्पेः अभिप्रायं जिज्ञासते। प्रस्तावाः मम सम्मता इति पाम्पिः आमोदं प्रकटयति। पाम्पिः सर्वान् नावोपरि आह्वयति। मेनसम् इनोबार्बसं च विहायान्ये निष्क्रान्ताः। पाम्पिना कृतेन सन्धिना मेनसः असन्तुष्टः भवति। इनोबार्बसमेनसयोर्मध्ये एन्टोनेः विवाहविषये चर्चा जायते। एन्टोनेः विवाहः समयानुकूलमात्रः। इदानीं तयोः स्नेहकारणमस्ति। तदेव शत्रुत्वकारणं भविष्यतीति इनोबार्बसः मनसि चिन्तयति। तौ निष्क्रान्तौ।

द्वितीयः अङ्कः – सप्तमं दृश्यम्

मिसेनमनद्या अपरतीरे पाम्पेर्नावि सङ्गीतं श्रूयते। त्रयः सेवकाः प्रविशन्ति पानादिकं गृहीत्वा। सीजरः एन्टोनिः लेपिडसः अग्रिप्पः मेसेनसः इनोबार्बसः मेनसः अन्ये च नायकाः प्रविशन्ति। मद्यपानगोष्ठी प्रचलति। मद्यपानमत्तान् सीजरादीन् दृष्ट्वा नावि स्थितं मद्यपानमत्तं शत्रुपक्षं निर्मूल्य प्रपञ्चाधिपत्यं प्राप्तुं पाम्पिं प्रचोदयति मेनसः। यदि पाम्पिम् अनुक्त्वा एतत् मेनसः अकरिष्यत् तर्हि पश्चात् तत्कार्यस्य सम्मतिम् अकरिष्यत् पाम्पिः। लाभाद् यशो मुख्यतरमिति उक्त्वा तच्चिन्तनात् विरमेति मेनसं सूचयति पाम्पिः। मद्यपानगोष्ठी अनुवर्त्तते। किञ्चित्कालानन्तरं सर्वे निष्क्रान्ताः।

तृतीयः अङ्कः – प्रथमं दृश्यम्

सिरियादेशे किञ्चन स्थलम्। वेन्टिडियसः सिलियसः अन्ये रोमदेशीया अधिकारिणः सैनिकाश्च विजयोत्साहेन चलन्तः प्रविशन्ति। पकोरसस्य मृतदेहस्तेषां पुरस्तान्नीयते। वेन्टिडियसः पकोरसं हत्वा मार्कसस्य क्रेस्ससस्य हत्यायाः प्रतिकारमकरोत्। सिलियसः निलीनान् पार्थियाजनान् विदारयेति वेन्टिडियसं प्रचोदयति। आज्ञानुसारं विवेकेन कर्त्तव्यम्। ततोऽप्यधिकं न कर्त्तव्यम्। एन्टोनेः अप्रीतिर्भवेदिति वेन्टिडियसः वदति। एथेन्सं जिगमिषता एन्टोनिना मिलाम इति वेन्टिडियसस्य वचनमनुसृत्य ते सर्वे निष्क्रान्ताः।

तृतीयः अङ्कः - द्वितीयं दृश्यम्

रोमनगरे सीजरस्य गृहे पुरस्तात् कोष्ठः। पाम्पिना कार्यमवसितम्। पाम्पिर्गतः। सीजरः एन्टोनिः लेपिडसश्च समयपत्रं मुद्राङ्कितं कुर्वन्तीति इनोबार्बसः अग्रिप्पं निवेदयति। सीजरः आक्टेवियां एन्टोनिञ्च आपृच्छति। तयोः शुभमाशास्ते सीजरः।

तृतीयः अङ्कः – तृतीयं दृश्यम्

अलेग्जान्ड्रियायां क्लियोपेट्रायाः सौधम्। क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति। क्लियोपेट्रा दूतं आक्टेवियायाः आकृतिविषये पृच्छति। तस्याः वामनत्वं वयः मुखस्य आकारं केशानां वर्णम् इत्यादिकं दूतमुखात् ज्ञात्वा हृष्यति क्लियोपेट्रा। आक्टेवियायामेन्टोनेः प्रेम भवेदित्यसाध्यमिति अभिप्रैति छार्मियाना। क्लियोपेट्रा दूताय स्वर्णम् उपायनीकृत्य रोमनगरं प्रति तं प्रेषयति।

तृतीयः अङ्कः – चतुर्थं दृश्यम्

एथेन्सनगरे एन्टोनेर्गृहम्। एन्टोनिः आक्टेविया च प्रविशतः। एन्टोनिः आक्टेवियां सूचयति यत् सीजरः पाम्पिं प्रति नूतनं युद्धमकरोत्। सीजरः एन्टोनिम् अवधीरयति। भ्रातुः पत्युश्च वैमनस्यं आक्टेवियां

In Public domain. Digitization Muthulakshmi Research Academy

व्याकुलयति। आक्टेवियायाः अपेक्षानुसारं भ्रात्रा सह व्यवहारभाषणं कर्तुम् तां प्रेषयति एन्टोनिः।

तृतीयः अङ्कः – पञ्चमं दृश्यम्

तत्रैवान्यः कोष्ठः। इनोबार्बसः ईरासश्च प्रविशतः। ईरासात् ज्ञायते यत् सीजरो लेपिडसश्च पाम्पिं प्रति युद्धं प्राकटयताम्। युद्धे लेपिडसः सीजरेणोपयुक्तः। अवसिते युद्धे नायकत्रयात् लेपिडसो बहिष्कृतः। द्रोहारोपणं कृत्वा लेपिडसः कारायां बद्धः। इनोबार्बसः सीजरस्य एन्टोनेश्च मध्ये नौसेनायुद्धं भविष्यतीति वदति। स एन्टोनिसकाशं गन्तुं ईरासमनुसरन् निष्क्रान्तः।

तृतीयः अङ्कः – षष्ठं दृश्यम्

रोमनगरे सीजरस्य सौधम्। अग्रिप्पः मेसनसः सीजरश्च प्रविशन्ति। सीजरः एन्टोनये कुप्यति। एन्टोनिः अलेग्जेन्ड्रियायां अस्मान् अदूषयत्। सिसिलीदेशो वशीकृते सेक्स्टसस्य पाम्पेः सम्पद्राशौ आत्मनो भागो न दत्त इति माम् अधिक्षिपति। लेपिडसः अधिकारादपनीत इति तस्य सर्वा सम्पन्मयैव गृहीतेति चाधिक्षिपतीति सीजरः वदति। आक्टेविया प्रविशति। एन्टोनिना निराकृता आगतासि। शोचनीयमिदमिति सीजरः स्वसारं वदति। एन्टोनेः उपरि युद्धसन्नाहान् कुर्वता भ्रात्रा सह मेलनाय स्वेच्छया आगतास्मीति आक्टेविया वदति। 'सपदि एन्टोनिना त्वमनुमता यतः त्वं तस्य कामस्यावरोधोऽसि। क्लियोपेट्र्या स आकारितः। त्वां त्यजति एन्टोनिः' इति सीजरः स्वसारं सूचयति। परस्परं हन्तुं कृतनिश्चययोः भ्रातृपत्योश्च अहं विभक्तास्मीति विलपति आक्टेविया।

तृतीयः अङ्कः – सप्तमं दृश्यम्

एक्टियम् इति समुद्रतीरे एन्टोनेः युद्धशिबिरम्। क्लियोपेट्रा इनोबार्बश्च प्रविशतः। एन्टोनिना सह युद्धे स्थास्यामीति क्लियोपेट्रा वदति। अनेन एन्टोनिः चपलचित्तो भवेदिति इनोबार्बसोऽभिप्रैति। एन्टोनिः केनिडियसश्च प्रविशतः।

समुद्रे योद्धुम् एन्टोनिः सीजरेण आहूतः। इनोबार्बसः एन्टोनिं समुद्रयुद्धात् निवारयितुं प्रयतते। यदि तत्र विफला भविष्यामस्तर्हि पश्चाद् भुवि योत्स्यामह इति एन्टोनिः वदति। 'मम षष्टिर्नावः सन्ति। सीजरस्याधिका न सन्ती'ति क्लियोपेट्रा सूचयति। दूतात् ज्ञायते यत् सीजरेण टोरैनं वशीकृतम्। भूम्यां सीजरस्य अभियोगं कर्तुं केनिडियसं सूचयति नौभिः स्वयं योद्धुं निश्चिनोति एन्टोनिः। सैनिकः प्रविश्य समुद्रे युद्धं मास्तु। वयं भुवि स्थित्वा विजेष्यामहे यत्र वयमनुभवशालिन इति सूचयति। एन्टोनिः क्लियोपेट्रा इनोबार्बश्च निष्क्रान्ताः। स्त्रियाः वचनमनुसृत्य एन्टोनिः निर्णयान् स्वीकरोतीति केनिडियसः सखेदं वदति। महाराजः केनिडियसमाकारयतीति दूतात् ज्ञात्वा ततः निष्क्रान्तः केनिडियसः।

तृतीयः अङ्कः – अष्टमं दृश्यम्

एक्टियमसमीपे समभूमिः। सीजरः टारसश्च प्रविशतः सेनया सह। भूम्यामभियोगं मा कुरु। सेनां सङ्घटितां कुरु। समुद्रयुद्धं प्रथमं समाप्तं भवतु। ततः पूर्वं भूयुद्धं मा प्रेरय। अत्र लिखितं ममादेशं मा अतिक्रमस्वेति तस्मै एकं पत्रं यच्छति। तौ निष्क्रान्तौ।

तृतीयः अङ्कः – नवमं दृश्यम्

तत्रैवान्यस्थले। एन्टोनिः इनोबार्बसश्च प्रविशतः। पर्वतस्यापरपार्श्वे अस्मत्सैन्यानि स्थापय यतः सीजरस्य नौसेना दृश्येत। सीजरस्य नौसङ्ख्यां ज्ञास्यामः। तदनुगुणमस्माकं कल्पयाम इति इनोबार्बसमुक्त्वा तेन सह एन्टोनिः निष्क्रान्तः।

तृतीयः अङ्कः – दशमं दृश्यम्

सेनासहितः केनिडियसो रङ्गभूम्यामेकस्मिन् मार्गे प्रचलति। एवं सीजरस्य सेनापतिः टारसस्तदभिमुखमन्यमार्गे प्रचलति। एवं तेषां निर्गमनानन्तरं समुद्रे युद्धस्य शब्दः श्रूयते। तत्र प्रविश्य इनोबार्बसः आक्रोशति। ईजिप्टदेशध्वजयुता एन्टोनियडनामा नौः षष्ट्या ईजिप्टनौभिः सह

In Public domain. Digitization Muthulakshmi Research Academy

परिवृत्य पलायिता। स्कारसः प्रविश्य वदति प्रपञ्चे अस्माकमधिकभागो नष्टो महता मूढत्वेन इति। भीता क्लियोपेट्रा स्वस्या नावं परावर्त्य पलायिता। तदा प्रेम्णा एन्टोनिः स्वस्य च नावं परावर्त्य तामनुसृतः। तदा सर्वा नावः परावृत्य पलायिताः। केनिडियसः प्रविश्य निवेदयति यत् पदातिसेनाविभागान् आश्विकसैन्यञ्च सीजरायार्पयिष्यामि। षड् राजानः पूर्वमेव सीजरस्याधीना अभवन्। अहमपिताननुसरामि। स्कारसोऽपि अनन्तरकार्यं निरूपयिष्यामीति निष्क्रान्तः। स्वविवेकमनुसृत्य इनोबार्बसः एन्टोनिमनुसर्तुं मतिं करोति।

तृतीयः अङ्कः – एकादशं दृश्यम्

अलेग्जेन्ड्रियायां क्लियोपेट्रायाः सौधम्। परिजनसहित एन्टोनिः प्रविशति। एन्टोनिः लज्जामनुभवति। कोशपूर्णा नौरस्ति। कोशं गृहीत्वा विभजत। सीजरं शरणं गच्छत इति परिजनान् सूचयति एन्टोनिः । परिजनाः तथा कर्तुं नाङ्गीकुर्वन्ति। क्षणकालमेव मां विसृजतेति तान् सूचयति। छार्मियाना ऐरासा ताभ्यामवलम्बिता क्लियोपेट्रा ईरासश्च प्रविशन्ति। एन्टोनिं सान्त्वयेति क्लियोपेट्रां सूचयन्ति परिजनाः। नावं विसृज्य भयेन पलायितां मां त्वम् अनुसरिष्यसीति मया न ऊहितमिति क्लियोपेट्रा क्षमां याचते। मम सर्वा चेतना तवाधीनास्ति। तव संज्ञामात्रेण देवानामप्यादेशं न गणयामीति त्वं जानासि। सीजरेण शान्तिप्रस्तावः कार्यः। तत्सकाशं अस्मत्पुत्राणाम् अध्यापको प्रेषितः। अश्रु मा मुञ्च। इति एन्टोनिः ताम् आश्वासयति। ते निष्क्रान्ताः।

तृतीयः अङ्कः – द्वादशं दृश्यम्

ईजिप्टे सीजरस्य शिबिरम्। सीजरः अग्रिप्पः डोलबेल्लः थैरियसः अन्ये च प्रविशन्ति। यूफ्रोनियसः एन्टोनेर्दूतः सीजरस्य सकाशं दौत्यं वदति। दूतमुखात् ईजिप्टे निवस्तुं सीजरस्य अनुज्ञां प्रार्थयते एन्टोनिः। यदीदं निराक्रियते तर्हि एथेन्से साधारणपौरवद् जीवितुमनुज्ञां प्रार्थयते। क्लियोपेट्रा सीजराधीनः ईजिप्टराज्याधिकारो मम पुत्रेषु कृपया स्थाप्यतामिति प्रार्थयते।

In Public domain. Digitization Muthulakshmi Research Academy

सीजरः एन्टोनेः अभ्यर्थनं निराकरोति। यदि एन्टोनिं ईजिप्टान्निष्कासयति हन्ति वा तर्हि राज्ञ्याः अभ्यर्थनं श्रोष्यामीति सीजरः वदति। दूतो निष्क्रान्तः। वाक्चातुर्येण क्लियोपेट्राम् एन्टोनितः पृथक्कुर्विति थैरियसं प्रचोदयति सीजरः। पराजयेन एन्टोनेः का स्थितिरिति परिशीलय इत्यपि सूचयति सीजरः। ते निष्क्रान्ताः।

तृतीयः अङ्कः – त्रयोदशं दृश्यम्

अलेग्जेन्ड्रियायां क्लियोपेट्राया भवनम्। क्लियोपेट्रा इनोबार्बसः छार्मियाना ऐरासा च प्रविशन्ति। वयोऽतिगं मम शिरः प्रेषयित्वा सीजरात् राज्यानि प्राप्नोतु इति सदूतः एन्टोनिः क्लियोपेट्रां सूचयति। सीजरः मया सह द्वन्द्वयुद्धं करोतु। युद्धाकारणां लिखामीति दूतेन सह एन्टोनिः निष्क्रान्तः। युद्धाकारणा अविवेकपूर्णेति इनोबार्बसः तर्कयति। सीजरस्य दूतः थैरियसः प्रविश्य क्लियोपेट्रां वदति यत् क्लियोपेट्रा भयादेव एन्टोनेः साहाय्यम् आचरितवती। तया कृतानि अकार्याणि बलात् कृतानि न तु स्वेच्छया। क्लियोपेट्रा अङ्गीकुर्वती वदति यत् मया एन्टोनेः कृतः सम्मानः स्वेच्छया न कृतः। बलाद् भयाच्च कृतः। एतच्छ्रुत्वा इनोबार्बसः चिन्तयति यत् एन्टोनिः सरन्ध्रा नौरिवास्ति। स त्याज्यः।

'एन्टोनिम् अत्यजम्। सीजरस्य रक्षणे अस्मीति क्लियोपेट्रा वदति चेत् सीजरस्य हर्षो भवती'ति थैरियसः क्लियोपेट्रां निवेदयति। क्लियोपेट्रा तं वदति। दूतं मध्यवर्तिनं कृत्वा सीजरमहमिदं वदामि। विजयिनस्तस्य हस्तं चुम्बामि। मम किरीटं तस्य पादयोरर्पयित्वा नता भवितुं सम्मतास्मि। थैरियसः क्लियोपेट्रायाः अनुमत्या तस्याः पाणिं चुम्बति। एन्टोनिः इनोबार्बसश्च पुनः प्रविशतः। एन्टोनिः क्लियोपेट्रायाः पाणिं चुम्बितवते थैरियसाय वेत्रदण्डनं ददाति। क्लियोपेट्रां निन्दति एन्टोनिः। तस्याः कृते एन्टोनिना स्वधर्मपत्नीत्यागः औरसपुत्रप्राप्तिविनाशश्च कृतः। सा सर्वदा असत्यभाषिणी। अधमाय सेवकाय पाणिः दत्त इति एन्टोनिः तां गर्हति। वेत्रप्रहारैः दण्डितः थैरियसः

In Public domain. Digitization Muthulakshmi Research Academy

पुनरानीतः। तं कटुवचनैः भर्त्सयित्वा एन्टोनिः प्रेषयति। अलेग्जान्ड्रियायां शिबिराणि कल्पितवता सीजरेण सह योद्धुमिच्छति एन्टोनिः। इनोबार्बसः एन्टोनेः सेवां त्यक्तुं सङ्कल्पयति।

चतुर्थः अङ्कः - प्रथमं दृश्यम्

अलेग्जेन्ड्रियायाः पुरोभागे सीजरस्य शिबिरम्। सीजरः अग्रिप्पः सेनासहितो मेसिनसश्च प्रविशन्ति। सीजरो लेखं पठति। दूतः वेत्रैः दण्डित इति सीजरः क्रुद्धः। द्वन्द्वयुद्धाह्वनप्रस्तावम् उपहसति। श्वस्तनं युद्धमस्माकं चरमं युद्धं भवतु इति सीजरः आदिशति।

चतुर्थः अङ्कः - द्वितीयं दृश्यम्

अलेग्जेन्ड्रियायां क्लियोपेट्रायाः सौधम्। एन्टोनिः क्लियोपेट्रा इनोबार्बसः छार्मियाना ऐरासा च प्रविशन्ति। गतवैभवं स्मरन् दुःखितः एन्टोनिः आक्रोशति। स सेवकान् वदति यत् अद्य युष्माकं सेवा अवसिता भविष्यति। मां पुनर्न द्रक्ष्यथ। अद्य नक्तं होराद्वयं मम सेवां कुरुत। श्वो मम सुपरिणाममाशंसे। इदानीं रात्रिभोजनाय गच्छाम। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - तृतीयं दृश्यम्

तत्रैव सौधस्य पुरस्ताद् बहिर्देशः। द्वौ सैनिकौ प्रविशतः रक्षणकार्यं कुर्वन्तौ। द्वावन्यौ सैनिकौ प्रविशतः। वेदिकाया अधोभागात् नालिकासङ्गीतं श्रूयते। द्वितीयः सैनिकः वक्ति यत् इदं सङ्गीतं सूचयति एन्टोनेः कुलदैवं हेर्कुलसः यस्मिन् एन्टोनेर्भक्तिरस्ति प्रेम च तमिदानीं त्यजति। सर्वे सैनिकाः तत्सङ्गीतं श्रृण्वन्ति।

चतुर्थः अङ्कः – चतुर्थं दृश्यम्

तत्रैव राजसौधे कोष्ठः। एन्टोनिः क्लियोपेट्रा छार्मियाना परिजनश्च प्रविशन्ति। एन्टोनिः कवचं धरति। एन्टोनेः सूचनया ईरासोऽपि धृतकवचो भवति। अस्मिन् प्रातःकाले धृतकवचाः सहस्रं सैनिकाः नौकाश्रये एन्टोनिं प्रतीक्षन्ते इति सैनिकः सूचयति। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - पञ्चमं दृश्यम्

अलेग्जेन्ड्रियायाम् एन्टोनेः शिबिरम्। एन्टोनिः ईरासश्च प्रविशतः। अभिमुखमागच्छन् एकः सैनिकः तावसादयति। सैनिकः एन्टोनिं निवेदयति यत् इनोबार्बसः सीजरपक्षम् आश्रयति। दयालुः एन्टोनिः तस्य पेटिकाः सम्पदश्च तस्मै दातुमादिशति।

चतुर्थः अङ्कः – षष्ठं दृश्यम्

अलेग्जेन्ड्रियायां सीजरस्य शिबिरम्। सीजरः अग्रिप्पः इनोबार्बसः डोलबेल्लश्च प्रविशन्ति। सीजरः एन्टोनिं जीवग्राहं ग्रहीतुकामोऽस्ति। एन्टोनिः रणभूमिमागत इति ज्ञात्वा सीजर आदिशति यत् एन्टोनेः पक्षं त्यक्त्वा ये अस्मत्पक्षमागताः तान् पुरस्तात् स्थापय। जानातु एन्टोनिः स्वजनान् प्रति युध्यते इति। सर्वे निष्क्रान्ताः। इनोबार्बसः अन्यैस्सह अगत्वा एन्टोनेः औदार्यं सीजरस्य क्रौर्यञ्च स्मरन् पश्चात्तापम् अनुभवति। महावदान्यः एन्टोनिः तस्य सम्पदं उपहारैस्सह प्रैषयदिति सैनिकः इनोबार्बसं सूचयति। एन्टोनिं प्रति योद्धुमनिच्छन् इनोबार्बसः मर्तुम् उपकुल्यामन्विष्यति। स निष्क्रान्तः।

चतुर्थः अङ्कः – सप्तमं दृश्यम्

युद्धशब्दः। अग्रिप्पः सीजरस्यान्यसैनिकाश्च प्रविशन्ति। विरोधः अस्मदुदीक्षितमतिक्रम्यावर्तत इति अग्रिप्पः वदति। ते निष्क्रान्ताः। एन्टोनिः क्षतेन स्कारसेन सह प्रविशति। अद्यास्माभिः सुष्ठु युद्धं कृतम्। यदि पूर्वमपि एवं युद्धं कृतं स्यात् तर्हि शत्रवः पलायिताः स्युः इति स्कारसः वदति। ईरासः प्रविश्य सूचयति यत् शत्रवः अपक्राम्यन्ति। अस्माकमाधिक्यं विजयं सूचयति। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - अष्टमं दृश्यम्

अलेग्जेन्ड्रियाबहिर्भूमिः। युद्धध्वनिः। एन्टोनिः पुरस्तात् प्रचलति। स्कारसः अन्ये च अनुसरन्ति। एन्टोनिः सर्वान् अभिनन्दति। सपरिवारा

In Public domain. Digitization Muthulakshmi Research Academy

क्लियोपेट्रा प्रविशति। विजयानन्दं तस्याः समक्षं प्रकटयति एन्टोनिः। स्कारसः क्लियोपेट्र्या अभिनन्दितः। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - नवमं दृश्यम्

सीजरस्य शिबिरम्। रक्षकाः प्रविशन्ति। इनोबार्बसः अनुसरति। रक्षकाः इनोबार्बसस्य वचनानि निलीय शृण्वन्ति। एन्टोनिं प्रति कृतेन द्रोहेण इनोबार्बसस्य हृदयं क्षुभ्यति। विलपन् स म्रियते। मृतं तं रक्षकाः नयन्ति।

चतुर्थः अङ्कः - दशमं दृश्यम्

एन्टोनिः स्कारसश्च सैन्येन सह प्रविशतः। शत्रुपक्षः समुद्रात् उद्यमं कर्तुमिच्छति। अस्माकं भूसैन्यम् अस्मत्समीपे नगरपार्श्वपर्वतेषु भवति। नौकायोद्धार आदिष्टा नौकास्थानात् ते निर्गताश्च। पर्वतेभ्यो वयं युद्धं सम्यग् विश्लेषयामः प्रवर्तयामश्चेति एन्टोनिः वदति। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - एकादशं दृश्यम्

तत्रैव अन्यस्थलम्। सीजरः प्रविशति सैन्यं च। एन्टोनिरद्य नौसेनां चालयन् दृश्यते। वयं पर्वतोपत्यकासु स्थानं ग्रहीष्यामः तदनुकूलं भविष्यतीति सीजरः वदति। सर्वे निष्क्रान्ताः।

चतुर्थः अङ्कः - द्वादशं दृश्यम्

तत्रैवान्यः प्रदेशः। एन्टोनिः स्कारसश्च प्रविशतः। एन्टोनिः शूरोऽस्ति किन्तु अकस्मात् तस्य मनोदशा परिवर्त्तते आशाभययोः जयपराजययोश्च मध्ये तस्य चञ्चलभाग्यं सञ्चलतीति चिन्तयति स्कारसः। एन्टोनिः प्रविश्य मम नौसेना शत्रोर्वशीभूता। क्लियोपेट्रा माम् अवञ्चयदिति वदति। क्लियोपेट्रायां प्रति प्रतिकारः कार्य इति स वदति। क्लियोपेट्रा प्रविशति। एन्टोनिः तां भर्त्सयति। सा निष्क्रान्ता।

चतुर्थः अङ्कः – त्रयोदशं दृश्यम्

क्लियोपेट्रायाः सौधम्। क्लियोपेट्रा छार्मियाना ऐरासा मर्डियाना च प्रविशन्ति। छार्मियानायाः सूचनया क्लियोपेट्र्या आत्मघातः कृत इति मिथ्यासमाचारं एन्टोनिं सूचयितुं मर्डियाना गच्छति। सर्वा निष्क्रान्ताः।

चतुर्थः अङ्कः - चतुर्दशं दृश्यम्

तत्रैवान्यकोष्ठे। एन्टोनिः ईरासश्च प्रविशतः। युद्धपराजयेन दुःखोद्विग्नः एन्टोनिः क्लियोपेट्रां निन्दति। कूटरचनया मम विजयं विनाश्य सीजरस्य विजयं निश्चितमकरोत्। मार्डियाना आगत्य क्लियोपेट्रा त्वयि प्रेमाकरोत्। सा मृतेति अनृतं वदति। एन्टोनेः अनुमत्या मार्डियाना ततः निष्क्रान्ता। क्लियोपेट्रा मृतेति एन्टोनिः विरागी सन् मां हन्या इति ईरासम् आदिशति। एन्टोनिना दत्तेन खड्गेन ईरासः आत्मानं हन्ति। एन्टोनिः स्वखड्गस्योपरि पतति। त्रिभिः रक्षकैः सह डेर्सिटासः प्रविशति। मया सम्यङ् न कृतम्। मां प्रहरतु मारयतु इति रक्षकान् एन्टोनिः प्रार्थयते। रक्षकाः निष्क्रान्ताः। डेर्सिटासः एन्टोनेः खड्गं गृह्णाति। तं खड्गं सीजरं दर्शयित्वा एन्टोनेः मरणं कथयित्वा तस्यानुग्रहं प्राप्तुमिच्छति सः। डयोमेडिसः प्रविश्य एन्टोनिं सूचयति यत् एन्टोनेः कोपप्रशमनाय राज्ञी मृतेति मिथ्यावार्ता प्रेषिता। पश्चात् वार्तायाः अस्याः त्वयि कः प्रभावो भवेदिति भीत्या सत्यं वक्तुं मां तव सकाशं प्रैषयत्। आगमने विलम्बः कृत इति व्यग्रोऽस्मीति वदति डयोमेडिसः। यत्र क्लियोपेट्रास्ति तत्र मां नयन्त्विति एन्टोनेः प्रार्थनया सेवकाः एन्टोनिम् ईरासञ्च नयन्ति।

चतुर्थः अङ्कः – पञ्चदशं दृश्यम्

क्लियोपेट्रायाः प्रार्थनाकोष्ठः। क्लियोपेट्रा छार्मियाना ऐरासा परिचारिकाश्च प्रविशन्ति वेदिकायाः पश्चात् किञ्चिदुपरिभागे। वेदिकायाः अधोभागे डयोमेडिसः प्रविश्य आसन्नमरणः एन्टोनिः इति सूचयति। अधस्तात् एन्टोनिम् उद्धरतेति क्लियोपेट्रा सेवकान् सूचयति। एन्टोनिः

In Public domain. Digitization Muthulakshmi Research Academy

क्लियोपेट्रायाः ओष्ठयोः अन्तिमं चुम्बनं न्यस्तुमभिलषति। उद्धृत एन्टोनिः क्लियोपेट्रासमीपे स्थापितः। मरुस्थलतुल्ये हीनप्रपञ्चे एन्टोनिं विना कथं जीविष्यामीति विलपति क्लियोपेट्रा। एन्टोनिः मृतः। क्लियोपेट्रा मूर्च्छिता। क्लियोपेट्रा मृतेति अनुचराः चिन्तयन्ति। सा प्रतिबुध्य एन्टोनेः निखननं कृत्वा वीरोचितमुदात्तं चात्मविनाशं करिष्याम इति क्लियोपेट्रा अनुचरान् सूचयति। एन्टोनेः शरीरं वहन्तो सर्वे निष्क्रान्ताः।

पञ्चमः अङ्कः प्रथमं दृश्यम्

अलेग्जेन्ड्रियायां सीजरस्य शिबरम्। सीजरः प्रविशति युद्धसभायाम्। अग्रिप्पः डोलबेल्लः मेसिनसः गेल्लसः प्रोक्युलियसश्च सन्ति। आत्मसमर्पणाय एन्टोनिम् आदेष्टुं सीजरेण डोलबेल्लः प्रेष्यते। एन्टोनेः खड्गमादाय डेर्सिटासः प्रविश्य तस्य आत्मघातं वृत्तं निवेदयति। श्रुत्वेदं सीजरो दुःखितः। कश्चिद् ईजिप्टदेशीयः प्रविशति। क्लियोपेट्रा प्रार्थनाप्रकोष्ठे स्वयमात्मानम् अबध्नात्। तां प्रति सीजरस्य के सङ्कल्पा इति ज्ञातुं तं प्रैषयत्। अचिरेण दूतमुखात् क्लियोपेट्रायां सीजरस्य को व्यवहारः भविष्यतीति ज्ञास्यति। असौम्यं किमपि न क्रियते इति सीजरात् आश्वासनवचनानि आदाय ईजिप्टदेशीयः निष्क्रान्तः। स्वविजययात्रायां तां प्रदर्श्य शश्वत्कीर्तिं प्राप्तुकामो सीजरः प्रोक्युलियसं गेल्लसञ्च क्लियोपेट्रायाः समीपं प्रेषयति। सर्वे निष्क्रान्ताः।

पञ्चमः अङ्कः द्वितीयं दृश्यम्

क्लियोपेट्रायाः सौधे प्रार्थनाकोष्ठः। क्लियोपेट्रा छार्मियाना ऐरासा च प्रविशन्ति। क्लियोपेट्रा आत्महत्या महत् कार्यं भवति। तेन सर्वाणि अन्यकार्याणि अवसितानि भवन्तीति चिन्तयति। प्रार्थनाकोष्ठद्वारे प्रोक्युलियसः गेल्लसः सैनिकाश्च प्रविशन्ति। कीदृशान् आत्माधिकारान् अभिलषति यान् सीजरः अनुजानीयादिति प्रोक्युलियसः क्लियोपेट्रां पृच्छति। आक्रान्तम् ईजिप्टं प्रयच्छति चेत् मम पुत्राय दद्यामिति क्लियोपेट्रा वदति। प्रोक्युलियसः सैनिकौ च पश्चादागम्य क्लियोपेट्रां गृह्णन्ति। क्लियोपेट्रा छुरिकामुद्धरति। प्रोक्युलियसः

छुरिकाम् अपनयति। सीजरः क्लियोपेट्राम् उपगच्छति। सा तं प्रणमति। आत्मघातं कृत्वा यदि मां क्रूरं प्रदर्शयेस्तर्हि तव पुत्राणां विनाशो भविष्यतीति क्लियोपेट्रां वदति सीजरः। सीजरस्य निर्गमनोत्तरं क्लियोपेट्रा छार्मियानायाः कर्णे उपांशु वदति। क्लियोपेट्रायाः आज्ञया तस्य परिजनाः ताम् अलङ्कुर्वन्ति। किरीटं राज्ञीचिह्नानि च धारयन्ति। कस्माश्चित् जानपदात् स्वल्पो नैलनदीसर्प आसादितः येन दष्टा क्लियोपेट्रा आत्मघातं करोति। ऐरासा छार्मियाना च आत्मघातं कुरुतः। सीजरः परिजनाश्च प्रविशन्ति। मृतां क्लियोपेट्रां दृष्ट्वा सीजरः खिन्नो भवति। तस्या निखननम् एन्टोनेः पार्श्वे भवत्विति सीजरः परिजनम् आदिशति। मम विजया वैभवोपेताः सन्ति एन्टोनिक्लियोपेट्र्योः कथा तु शोकमयीति सविषादं वदति सीजरः। सर्वे निष्क्रान्ताः।

*****

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः

पात्राणि

Macbeth	मेक्बेतः । ग्लेमिसस्य प्रभुः ।	
Duncan	डङ्केनः । स्काट्लन्डस्य राजा ।	
Malcolm	माल्कमः ।	
Donalbain	डोनाल्बेनः । डङ्केनस्य पुत्रौ ।	
Banquo	बेन्कः - डङ्केनस्य सेनानीः ।	
Fleance	फ्लेयंसः - बेन्कस्य पुत्रः ।	
Macduff	मेक्डफः	स्काट्लन्डे थेनाः प्रभवः ।
Lennox	लेन्नक्सः ।	
Ross	रासः ।	
Angas	आन्गसः ।	
Menteith	मेन्टीथः ।	
Caithness	केयत्नेसः ।	
Siward	सीवर्डः । इङ्गलीषनायकः ।	
Young Siward	तस्य पुत्रः ।	
Seyton	सेटनः - मेक्बेतस्य सेवकः ।	

बालः मेक्डफस्य पुत्रः । वैद्यौ ।

क्षतः सेनापतिः । द्वारपालकः ।

घातकाः । प्रभवः । वार्ताहराः । सेवकाः । भटाः । वृद्धः ।

 In Public domain. Digitization Muthulakshmi Research Academy

Lady Macbeth श्रीमती मेक्बेतः ।

Lady Macduff श्रीमती मेक्डफः ।

डाकिन्यः

Hecate हेकेटा । डाकिनीनां नायिका

मान्या परिचारिका ।

मान्याः स्त्रियः

स्थलम् । स्काट्लन्डः इन्ड्ग्लन्डश्च ।

In Public domain. Digitization ... Research Academy

मेक्बेतः

प्रथमः अङ्कः : प्रथमं दृश्यम् ।

(अरण्यप्रदेशः । तटिद्द्योतनमशनिपातश्च
तिस्रो डाकिन्यः प्रविशन्ति ।)

प्रथमा डाकिनी - तिसृणामस्माकं भूयोऽपि
कदा मेलनं भविष्यति ?
तटिद्विभासे पविसंपाते
अथ वा सुमहति वृष्टिनिपाते ?

द्वितीया डाकिनी - अन्तं समरनिनादे प्राप्ते
एके पक्षे प्राप्ते विजयम् ।
पक्षे चान्ये प्राप्तेऽपजयं
तदा भविष्यति नः सम्मेलः ।।

तृतीया डाकिनी - सूर्यास्तमयात् किञ्चित् पूर्वम् ।

प्रथमा डाकिनी - क्व नु सम्मेलः ?

द्वितीया डाकिनी - निर्जनदेशे ।

तृतीया डाकिनी - तत्र मेक्बेतं मेलिष्यामः ।

प्रथमा डाकिनी - धूसराखुभुक् आगच्छामि ।

द्वितीया डाकिनी - मम मण्डूकी मामाह्वयति ।

तृतीया डाकिनी - अहमपि तत्रैव भविष्यामि ।

सर्वाः - शिष्टं यत् तद् दुष्टं नः स्यात्

 In Public domain. Digitization Muthulakshmi Research Academy

पुनश्च दुष्टं शिष्टं नः स्यात् ।
गगनं तुषारमलिनं संप्रति
तिस्र उत्पतिष्यामः सहिता : ॥

(निष्क्रान्ताः ।)

प्रथमः अङ्कः : द्वितीयं दृश्यम्

(फोर्रेसदुर्गसमीपे सैनिकशिबिरम् । तूर्यध्वनिना सह योधानां युद्धध्वनिः नेपथ्यात् श्रूयते। राजा डङ्केनः माल्कमेन डोनाल्बेनेन लेन्नक्सेन कैश्चिदनुचरैश्च सह प्रविशति । क्षतं रक्तार्द्रं कंचन सेनापतिं ते मिलन्ति ।)

डङ्केनः - क एष रक्तसिक्तः पुरुषः ? अस्यानेन दर्शनेनाहं निश्चितं जानामि एषोऽस्य सैन्यद्रोहयुद्धस्य साम्प्रतिकीं स्थितिं वक्तुं शक्नोति ।

माल्कमः - एष वीरो भटनायको मम ग्रहणं विरुध्य शत्रुभिरयुध्यत। साधु वीरमित्र ! स्वागतं ते । राजानं वद तव निर्गमनसमये युद्धस्य स्थितिम् ।

भटनायकः - को युद्धस्य परिणाम इति वक्तुमशक्यमभवत् कञ्चि-त्कालम् । सेने द्वाविव जले तरन्तौ पुरुषौ भृशं श्रान्तौ कथञ्चिज्जले वर्तमानौ चलितुमशक्तौ परस्परं लग्नाविव च दृष्टे आत्मानं रक्षितुं शत्रुं जेतुं च प्रयत्नपरे । द्रोही प्रतियोद्धा मेक्डोन्वाल्डः पश्चिमद्वीपेभ्य आगतैः शिक्षितैरशिक्षितैश्च पदातिभिः सहायभूतः। अदृष्टदेवता मेक्डोन्वाल्डेन सहासीदिव तस्य प्रेयसीव । परन्तु अदृष्टदेवतया सह मेक्डोन्वाल्डः अलं नासीत् । अस्माकं महावीरो मेक्बेतः तामदृष्टदेवतामपहसन् खण्डितशत्रुरक्तमयेन खड्गेन स्वमार्गं कुर्वन् मेक्डोन्वाल्डं प्रतिमुखोऽ

In Public domain. Digitization: Muthulakshmi Research Academy

तिष्ठत् । स तं किमप्यनुक्त्वानामन्त्र्य पराक्रमस्य प्रियपुत्रवत् तस्य नाभेः शिरो यावद् द्विधाकरोत् । तस्य शिरः अस्मद्दुर्गभित्तिं प्रति प्राहरत्।

डङ्केनः - हे मम वीरबन्धो ! हे सुगुणयुत ! हे सुजन मेक्बेत!

भटनायकः - परन्तु यथा रमणीयसूर्योदययुतवसन्तकाल आयाति तथा नावः प्रभञ्जयन्ती प्रचण्डवात्या चायाति । एवमेव मेक्डोन्वाल्डं प्रति अस्माकं विजयेन सह दुर्भाग्यं चोत्पन्नम् । हे स्काट्लन्डस्य राजन्! श्रूयताम् । यावदस्माभिस्ते शीघ्रविक्रमाः शत्रवः पराजिता विद्रुताश्च तावन्नार्वेदेशराजः नूतनैः सैन्यैः प्रकाशमानैरायुधैश्चास्मानभ्ययुङ्क्त एष युक्तः समय इति ।

डङ्केनः - किमनेनाभियोगेनास्माकं नायकौ मेक्बेतबेङ्कौ न पर्याकुलौ?

भटनायकः - अनेन नूतनेनाभियोगेन तौ तावद् भीतौ यावद् गरुडश्चटकानां सिंहः शशानां चाभियोगेन । अहं सत्यं वदामि । तौ नूतनं तं शत्रुं पूर्वस्माद् द्विगुणया शक्त्या अयुध्येताम् । किं तौ स्रवत्शत्रुरक्तेन स्नातुमथवा रणाङ्गणे शत्रुकपालराशिं कर्तुमैच्छतां नाहं जानामि । किन्तु शक्तिहीनस्य मम मूर्छेव जायते । मम क्षतानां चिकित्सा कार्या ।

डङ्केनः - तव क्षतय इव वचांसि च तव सम्मानं कुर्वन्ति । एष चिकित्सकसकाशं नीयताम् ।

(सेवकसहायो भटनायको निष्क्रान्तः ।)

क एषः ?

(रासः तमनुसृत्य आङ्गसश्च प्रविशतः ।)

माल्कमः - अयं मान्यः थेनबिरुदाञ्चितो रासः ।

लेन्नक्सः - अस्य नेत्रे व्यग्रवद् दृश्येते । यथा दृश्यते तथा एष

 In Public domain. Digitization Muthulakshmi Research Academy

विस्मयकरीं वार्तां कथयेत् ।

रासः - देवो राजानं रक्षतु ।

डङ्केनः - मान्य ! थेन ! कुतस्तवागमनम् ?

रासः - अहं फैफादागच्छामि । तत्र नार्वेदेशपताका विस्फुरति अस्माकं देशमपहसन्ती अस्मद्देशजनान् त्रासयन्ती च । महतीं सेनां नयन् अविधेयेन काडरस्य थेनेन सहायभूतः स नार्वेराजो घोरं रणमुपक्रान्तः । परन्तु धृतकवचो मेक्बेतः नार्वेसैन्याक्रमणस्य प्रत्याक्रमणं कृत्वायुध्यत । तदा स युद्धदेवतायाः कान्त इवादृश्यत । अन्ते स शत्रोरुत्साहमभञ्जयत् । वयं विजयिनः संवृत्ताः ।

डङ्केनः - महानानन्दः ।

रासः - इदानीं नार्वेदेशराजः स्वीनः अस्माभिः सह संधिमिच्छति । अस्माभिः स उक्तो दश सहस्राणि डालराणि तेनास्माकं समर्पणीयानि स्वदेशनिर्गमनात् पूर्वम्। ततः पूर्वं तस्य मृतानां भटानां निखननमपि वयं नानुमन्यामहे इति ।

डङ्केनः - काडरस्य थेनः पुनरस्मासु द्रोहं न करिष्यति । गत्वा तस्य मरणदण्डनं तमाख्याहि । मेक्बेतं वद तस्येदानीं काडरथेन बिरुदं दीयते ।

रासः - एष गच्छामि ।

डङ्केनः - यत् काडरस्य थेनेन नष्टं तत् मान्येन मेक्बेतेन विजितम्।

(निष्क्रान्ताः ।)

प्रथमः अङ्कः : तृतीयं दृश्यम् ।

(तटित्प्रकाशः । अशनिपातः । तास्तिस्रो डाकिन्यः प्रविशन्ति)

प्रथमा डाकिनी - भगिनि । क्व गता त्वम् ?

In Public domain Digitization Muthulakshmi Research Academy

द्वितीया डाकिनी - सूकरान् घ्नती गतास्मि ।

तृतीया डाकिनी - त्वं कुत्र गता ?

प्रथमा डाकिनी - कस्यचिन्नाविकस्य पत्नी भूचणकानङ्के निधाय भक्षयति स्म । एकं मे देहीत्यहं तामवदम् । दुष्टा सा भामा आक्रोशत् डाकिनि मत्सकाशादपेहीति । तस्याः पतिर्व्याघ्रनाम्न्या नावो नायको भूत्वा एलेप्पं प्रति गतः । अहमेकां चालनीं नावं कृत्वा वालहीना मूषिका भूत्वा तमनुसृत्य गत्वा तं प्रति मम वैरस्य प्रतिकारं करिष्यामि । तथा मयि कृतस्यापराधस्य निर्यातनं करिष्यामि ।

द्वितीया डाकिनी - तव प्रयाणेऽहमनुकूलपवनं प्रेषयिष्यामि ।

प्रथमा डाकिनी - सा तव मयि दया ।

तृतीया डाकिनी - अहमपि तवानुकूलतरं पवनं प्रेषयिष्यामि ।

प्रथमा डाकिनी - तदा सर्वे पवना ममाधीनाः सर्वाणि नौस्थानानि च ममाधीनानि भविष्यन्ति । अहं तस्य नावं यथेच्छं प्रकम्पयिष्यामि प्रचालयिष्यामि च । तस्य सर्वां शक्तिं विनाश्य तं शोषयिष्यामि । शप्तवत् स जीविष्यति। एकाशीतिसप्ताहान् महता क्लेशेन स जीवित्वा नशिष्यति । नावं समुद्रे पातयितुं मम शक्तिर्यद्यपि नास्ति तथापि महावातेन तां कम्पयिष्यामि।

द्वितीया डाकिनी - द्रक्ष्यामि तावत् ।

(नेपथ्ये भेरीध्वनिः ।)

तृतीया डाकिनी - हा भेरीध्वनिः । मेक्बेत उपागच्छति ।

सर्वा - वयं डाकिनीभगिन्यः परस्परं हस्तान् गृहीत्वा भूम्यां समुद्रे च शीघ्रं प्रयामः । भूयो भूयो मण्डलं नर्तिष्यामः । (मण्डलाकारेण नृत्यन्ति ।) तव कृते त्रिः । मम कृते त्रिः। पुनस्त्रिवारान् । तेनालम् । वशीकरणमन्त्रः

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः सिद्धः।

(मेक्बेतः बेङ्कश्च प्रविशतः ।)

मेक्बेतः - (बेङ्कं प्रति) मया कदापि न दृष्टमेतावद् दुर्दिनं पुनः सुदिनं च । यद् दुष्टं तत् शिष्टमभवत् ।

बेङ्कः - इतः फोर्रेसः कियति दूरे ? (डाकिनीः पश्यति ।) एतानि भूतानि कानि ? तेषां मुखानि ग्लानानि । विचित्रं तेषां वस्त्रधारणम् । एतानि भूलोकस्थानीव न दृश्यन्ते तथापि पश्यामि तानि अत्र भुवि स्थितानि। (भूतानि प्रति) अपि यूयं जीवथ ? अपि प्रश्नान् समाधातुं शक्नुथ? यथा दृश्यध्वे तथा मम वचनानि अवगच्छथ यतः कर्कशास्तर्जन्यः अधरेषु निहिता युष्माभिः । स्त्रीवद् दृश्यध्वे तथापि मुखेषु दृश्यमानं श्मश्रु मां संदेहे पातयति स्त्रीत्वे ।

मेक्बेतः - भणत भणत यदि शक्नुथ । कीदृशाः प्राणिनो यूयम् ?

प्रथमा डाकिनी - हे मेक्बेत ! वयं त्वां वर्धापयामः । विजयतां ग्लेमिसस्य थेनः ।

द्वितीया डाकिनी - विजयतां मेक्बेतः काडरस्य थेनः ।

तृतीया डाकिनी - विजयतां मेक्बेतः भावी राजा ।

बेङ्कः - प्रियमित्र ! किं विस्मितश्चकितश्च भवसि बिभेषि च अनुकूल-प्रियवचनैः ? (भूतानि प्रति) सत्यं वदत । का यूयम् ? अस्मदूहो-त्पन्नभूतानि उत सम्प्रति दृश्यमानानि? मम मान्यः सुहृत् युष्माभिर्वर्धापितः महोज्ज्वलो भावी चोक्तो भाविनी राजता च सूचिता येन स किमपि चिन्तयन् निर्वचनः कृतः । मां तु किमपि न वदथ । यदि यूयं मम भावि पश्यथ तर्हि वदत किं तत् शुभमशुभं वा । ममानुकूलं प्रतिकूलं वा नाहं

In Public domain. Digitization Muthulakshmi Research Academy

तन्मनसि कुर्याम् ।

प्रथमा डाकिनी - विजयतां बेङ्कः ।

द्वितीया डाकिनी - विजयतां बेङ्कः ।

तृतीया डाकिनी - विजयतां बेङ्कः ।

प्रथमा डाकिनी - भवान् मेक्बेतादवरः पुनरधिकश्च ।

द्वितीया डाकिनी - भवान् मेक्बेतवत् सुखी नास्ति तथापि तस्मादधिकः सुखी भविष्यति ।

तृतीया डाकिनी - त्वं राजा न भविष्यसि किन्तु राज्ञां पिता भविष्यसि। विजयतां मेक्बेतः विजयतां बेङ्कश्च ।

प्रथमा डाकिनी - विजयेतां बेङ्को मेक्बेतश्च ।

मेक्बेतः - भो डाकिन्यः। स्थीयन्तामिमानि गूढानि वचनानि । स्पष्टमुच्यताम् । अतोऽधिकं ज्ञातुमिच्छामि । मां वदत । अहं जानामि अहं ग्लेमिसस्य थेनोऽस्मि । तद् बिरुदं मम प्राप्तं मम पितृपादे सैनेले मृते । मां काडरस्य थेनं कथं वदथ ? काडरस्य थेनो धनवान् शक्तिमानपि धरते । मम राजत्वं तु पूर्णरूपेण मिथ्या । मृषा मां मा भाषध्वम् । अहं काडरथेनो राजा च सुतरां नास्मि । कुत इमा मृषा वार्ता युष्माकं प्राप्ताः ? अस्मानस्मिन् देशे निरुध्य किमेवं वदथ ? अहं युष्मानाज्ञापयामि । वदत ।

(डाकिन्यः अदृश्या भवन्ति ।)

बेङ्कः - जले बुद्बुदवद् भूम्यां विभ्रमा उत्पद्यन्ते । अदृश्यानि तानि भूतानि कुतो गतानि?

मेक्बेतः - वायुं प्रविष्टानि । अन्तर्हितानि च । तेषां रूपाणि वायौ निश्वासवदन्तर्हितानि । अहमीहे तेषामिहेतोऽपि स्थितिम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

बेङ्कः - किमेतानि भूतानि यैरावयोः सम्भाषणमभवत् सत्यानि उत औषधप्रभावेणावयोरुन्मादो जातः ?

मेक्बेतः - तव पुत्रा राजानो भविष्यन्ति ।

बेङ्कः - त्वं राजा भविष्यसि ।

मेक्बेतः - काडरस्य थेनोऽपि भविष्यामि । ननु इदमेव तैरुक्तम् ?

बेङ्कः - अथकिम् । एवमेव । कोऽत्र ?

(रासः आङ्गसश्च प्रविशतः ।)

रासः - मेक्बेत ! तव विजयेनाद्य राजा सुप्रीतः । अद्य द्रोहिणः प्रति तव वीरकार्याणां श्रवणात् स आश्चर्यसंविग्नमना जातः। आश्चर्यं वा तव प्रशंसां वा प्रकटयितुमसमर्थः स निर्वचनो जातः । तदा त्वं नार्वेदेशसैन्येनाक्रान्तोऽभवः । तथापि स्वकृतेन मारणेन दुर्मना नाभवः । वार्ताहराणां परम्परा तव देशरक्षाधुरीणत्वमसमानपराक्रमं च प्राशंसत् ।

आङ्गसः - महाराजस्य स्थाने त्वामभिनन्दितुं त्वां राजसकाशं नेतुं चावां प्रेषितौ । अर्हाणि पारितोषिकाणि महाराजः स्वयं दास्यति ।

रासः - तव लभ्यमानानां पारितोषिकाणां सूचनरूपेण राजा मामवदत् त्वमिदानीं काडरस्य थेनोऽसि । राजवचनेनाहमिदं वदामि । विजयतां काडरस्य थेनः । इदं बिरुदमिदानीं तवास्ति ।

बेङ्कः - (स्वगतम्) अपि डाकिन्यः सत्यं वक्तुं शक्ताः ?

मेक्बेतः - काडरस्य थेनो जीवति । तस्य लाञ्छनानि मयि किं स्थाप्यन्ते ?

आङ्गसः - स पुरुषः काडरस्य थेनो जीवत्येव । किन्तु तस्य मरणदण्डनं विहितं यत् सः अर्हति । अहं न जानामि किं स नार्वेराजपक्षेणायुध्यत उत

In Public domain. Digitization: Muthulakshmi Research Academy

तस्य सहायतामेवाकरोत् उत द्वयमप्यकरोदस्मान् प्रति । तेन कृतो देशद्रोहस्तु निरूपितस्तेनाङ्गीकृतश्च । अनेन स इदानीं पतितः।

मेक्बेतः - (स्वगतम्) यथा डाकिन्यः अवदन् तथाहं ग्लेमिसथेनोऽस्मि काडरथेनश्च । तेषां भविष्यत्कथनस्य श्रेष्ठो भागः प्राप्तव्यः। (रासम् आङ्गसं चोद्दिश्य) सुवार्तायाः कृते भवद्भ्यां मम धन्यवादाः । (यथा बेङ्क एव शृणुयात्) तव पुत्रा राजानो भविष्यन्तीति किं तवाशा इदानीमुत्पद्यते ? ताभिर्डाकिनीभिर्मम काडरथेनपदवी तव पुत्राणां राजत्वं च प्रतिश्रुतम्।

बेङ्कः - काडरथेन पदवीं प्राप्य यदि त्वं डाकिनीवचांसि विश्वसिहि तर्हि राजा भविष्यामीति च तव विश्वासो भवेत् । तत् तु महदद्भुतं कार्यम्। कदाचिद् दुष्टानि भूतानि स्वल्पविषयेषु सत्यमुक्त्वा विश्वास्य पश्चात् पूर्णरूपेणास्मान् विनाशयिष्यन्ति । (रासम् आङ्गसं च प्रति) भद्रमुखौ ! भवन्तौ किञ्चिद् वक्तुमिच्छामि ।

(रासः आङ्गसः बेङ्कश्च किञ्चिदपसरन्ति ।)

मेक्बेतः - (स्वगतम्) डाकिनीनां द्वे कथने सत्ये अभवताम् । मुख्यस्य राजत्वस्य प्राप्तेरयं सुप्रारम्भः । (रासम् आङ्गसं च प्रति) मान्यौ ! कृतज्ञोऽस्मि भवद्वार्तायाः कृते । (स्वगतम्) एवमिदं लोकातीतवचनं सुवचनं दृश्यते । परन्तु तद् दुर्वचनमपि दृश्यते । यदि तद् दुर्वचनं तर्हि किं तत् सत्यमभवत् ? अहं काडरस्य थेनोऽस्मि । एवं भावी विजयो दृश्यते। परन्तु यदि तत् सुवचनं तर्हि किमर्थमहं चिन्तयामि राजानं डङ्केनं हन्तुम्? इयमालोचनैव भयंकरी । अनया मम रोमाञ्चो जायते वक्षसि हृदयस्पन्दनाघातश्च । हत्याभिप्रायः सम्प्रति ऊहमात्रः। तथापि स मां व्याकुलयति। मां परितः स्थिता यथार्था अपाया न मां भाययन्ति। हत्यायाः केवल ऊहो

 In Public domain. Digitization Muthulakshmi Research Academy

मम चिन्तनामाक्रम्य व्याकुलयति । तदसत्यमसाध्यं च । तथापि तदेव चिन्तयामि ।

बेङ्कः - पश्यतम् । अस्मन्मित्रं मेक्बेतो गाढचिन्तायां निमग्नः ।

मेक्बेतः - (स्वगतम्) यदि दैवं मां राजानमिच्छति दैवमेव तत् करिष्यति। तत्र मम करणीयं किमपि न भविष्यति ।

बेङ्कः - (रासम् आङ्गसं चोद्दिश्य) नूतनं बिरुदं मेक्बेते नूतनं परिधानमिव नोपपद्यते । उपयोगेनोपपन्नं भविष्यति ।

मेक्बेतः - (स्वगतम्) यद् भविता तद् भविता । कालो गच्छति क्लेशपूर्णोऽपि ।

बेङ्कः - मान्य मेक्बेत ! यदा भवानिच्छति तदा वयमनुगमिष्यामः ।

मेक्बेतः - क्षम्यताम् । अहं किमपि चिन्तयन्नासम् । (रासम् आङ्सं च प्रति) भद्रमुखौ ! यदैवाहमिदं दिनं स्मरामि तदैव भवतोर्मयि उपकृतिं न विस्मरामि । राजानमुपगच्छामः । (बेङ्कं प्रति मन्दवचनैः) अद्य यदभवत् तद् यथावकाशं विश्रब्धं विचारयिष्यामः ।

बेङ्कः - सप्रमोदम् ।

मेक्बेतः - इदानीं किमपि न वक्तव्यम् । (रासम् आङ्गसं च प्रति) सुहृदौ ! साधयामः ।

(निष्क्रान्ताः ।)

प्रथमाङ्कः : चतुर्थं दृश्यम् ।

(फोर्रेसदुर्गे राजभवनम् । तूर्यध्वनिः कोलाहलश्च । राजा डङ्केनः लेन्नक्सः माल्कमः डोनाल्बेनः परिजनश्च प्रविशन्ति।)

In Public domain. Digitization Muthulakshmi Research Academy

डङ्कनः - अपि द्रोहिणः काडरस्य मरणदण्डनं कृतम् ? अपि तत्कार्यकर्तारः प्रत्यागताः ?

माल्कमः - महाराज ! इदानीमपि ते न निवृत्ताः । किन्तु म्रियमाणः काडरो येन दृष्टः तेन सह मम भाषणमभवत् । सोऽवदत् काडरः स्वं द्रोहं पूर्णरूपेणाङ्गीकृतवान् । महाराजस्य क्षमामयाचत । प्रगाढं पश्चात्तापं प्राकटयत् । सर्वस्मिन् जीविते तेन तावत् सुकृतं न कृतं यावत् मरणं प्राप्नुवता प्रशान्तोदारं प्रवर्तमानेन । अतिप्रियममूल्यं च जीवितं किमपि स्वल्पवस्तु इव सोऽत्यजत् । मरणसमये स सुशिक्षितो नट इव प्रावर्तत ।

डङ्कनः - मुखं दृष्ट्वा कस्यचिन्मनो ज्ञातुं किमपि मानवनैपुण्यं नास्ति। सुभगे काडरे मम संपूर्णो विश्वास आसीत् ।

(मेक्बेतः बेङ्कः रासः आङ्गसश्च प्रविशन्ति ।)

डङ्कनः - (मेक्बेतं प्रति) हे अनर्घबन्धो ! मेक्बेत ! इदानीमेव त्वां प्रति मम कृतघ्नतापराधं चिन्तयन्नासम् । मयोक्ता धन्यवादा दत्तानि पारितोषिकाणि चाल्पानि तव सम्मुखे । भवता मम बहु कृतं यस्य बहुमानप्रदर्शनमशक्यम् । यदि तवोपकृतिर्नैतावती तर्हि मम बहुमानानि तव कर्मसदृशानि स्युः । इदमेव वदामि यत् त्वया कृतं तस्य प्रतिदानं ममाशक्यम् ।

मेक्बेतः - राजन् ! भवतः सेवावसरो यो मम प्राप्तः स एव मम बहुमानः । अस्माकं सेवाकार्याणां ग्रहणमेव महाराजस्यास्माकं पारितोषिकम्। भवतः सिंहासनस्य राज्यस्य च कृते अस्माकं सेवा पुत्राणां पितुः सेवासदृशी सेवकानां प्रभुसेवासदृशी च । महाराजस्य तव तव गौरवस्य च रक्षा

 In Public domain. Digitization Muthulakshmi Research Academy

अस्माकं प्रमुखतमो धर्मः ।

डङ्कनः - अत्र तव स्वागतमस्तु । तव कृते सुमहतो भाविन आरम्भो मया कृतः । तत्कार्यस्य वर्धनं मया करिष्यते । (बेङ्कं प्रति) आर्य! बेङ्क! यथा मेक्बेतस्तथा त्वमपि तत्समामस्मत्संभावनामर्हसि । यावती तस्य श्लाघा तावती तव च । आश्लिष्य त्वां हृदयसकाशे स्थापयामि ।

बेङ्कः - भवत्सेवायां तस्य प्रेम्णो वर्धनं भवतु भवतः कृपया सेवाफलं च भवदर्पितमस्तु ।

डङ्कनः - महानानन्दो मामाक्रम्याश्रुरूपेण निपतति । पुत्रौ बान्धवाः प्रधानाश्च ! भवन्तो भवतां पदवीगुणेन मम सन्निहिताः सन्ति । भवतो विज्ञापयामि अहं मम ज्येष्ठपुत्रं माल्कममस्य राज्यस्य युवराजं नियोजयामि । स इदानीं कम्बर्लेन्डयुवराज इति ज्ञायते ममानन्तरीयः । तस्मै कृतमिमं सम्मानमनुसृत्य तदर्हाणामपि सम्माना भविष्यन्ति । (मेक्बेतं प्रति) इदानीं वयम् इन्वर्नेसं गमिष्यामस्तवातिथ्यसत्कारं चानुभविष्यामः।

मेक्बेतः - भवत्सेवाया अन्यत्र यापितो मम कालो वृथाश्रमः। अहमेव भवतो वार्ताहरो भूत्वा भवदागमनवार्तया मम पत्न्याः श्रोत्रे आनन्दयिष्यामि। इदानीं गन्तुं सविनयं भवदनुमतिमपेक्षे ।

डङ्कनः - गम्यतां मान्य काडर !

मेक्बेतः - (स्वगतम्) माल्कम इदानीं कम्बर्लेन्डयुवराजोऽस्ति पश्चाद् राजा भविष्यति च । अयं ममैश्वर्यकाङ्क्षापथे अवरोधः । इदं मां गृहीत्वा निरुणद्धि अहं तमवरोधमतिक्रमिष्ये वा । गगनस्थास्ताराः ! यूयमात्मनः प्रकाशमाच्छादयत । मम मनसि प्रवर्तमानेषु गभीरदुष्टचिन्तनेषु कोऽपि प्रकाशो मा पततु । मम घातकहस्तेन करिष्यमाणं किमपि मम त्रासितनयनं

In Public domain. Digitization: Muthulakshmi Research Academy

मा पश्यतु । परन्तु तत् कार्यं प्रवर्तताम् यत् कृतं द्रष्टुं नेत्रं बिभियात् । (निष्क्रान्तः।)

डङ्केनः - मान्य बेङ्क ! त्वं सत्यं वदसि । यथा त्वं वदसि तथा स महावीरः । तस्मिन् तव प्रशंसाभिरहं नितरां प्रीतोऽस्मि । वयं मेक्बेत-मनुसरामः । अस्माकं स्वागतं कर्तुं स पुरस्ताद् गतः । सः असदृशः सुहृत् ।

(तूर्यध्वनिः । ते निष्क्रान्ताः ।)

प्रथमः अङ्कः पञ्चमं दृश्यम् ।

(इन्वर्नेसे मेक्बेतस्य दुर्गः । प्रविशति तत्रभवती मेक्बेतस्य पत्नी लेखं पठन्ती ।)

श्रीमती मेक्बेतः - युद्धे विजयिनं मां तस्मिन्नेवाह्नि ता डाकिन्यः अमिलन् । निश्चयं श्रूयते तासामतिमानुषज्ञानं भवति यत् मानवमात्राणां परिज्ञानं सर्वथा अतिशेते । यदाहं महतौत्सुक्येन ताः परं प्रष्टुमना अभवं तास्तथा अन्तर्हिता यथा वायौ निलीनाः । मन्त्रमोहितवद् यदाहं स्थित-श्चिन्तयन् तानि विचित्रवृत्तानि तदा राज्ञो वार्ताहरा आगताः काडरथेन-बिरुदेन ममाभिनन्दनमकुर्वन् । तेनैव बिरुदेन ता रहस्यज्ञा डाकिन्यो मां तत्पूर्वं समबोधयन् । ता मम भविष्यवृत्तमप्यवदन् विजयस्व मेक्बेत त्वं राजा भविष्यसीति । त्वं मम साम्प्रतिकानां भाविनां च भागस्वामिनी असि। अत इदं तवाख्यातव्यमहं मन्ये । इदं ज्ञात्वा त्वमागामि महत्त्वं चिन्तयन्ती प्रहर्षमनुभविष्यसि । इदं मनस्येव स्थापय । स्वस्ति ।

(सा लेखादुपरि पश्यति ।)

 In Public domain. Digitization Muthulakshmi Research Academy

भवान् ग्लेमिसथेनोऽस्ति काडरथेनश्च। यथा प्रतिश्रुतं तथा त्वं राजा भविष्यसि च ! परन्तु अहं संदेह्मि महत्त्वमधिगन्तुं त्वरां त्वं न करिष्यसि यतस्तव स्वभावे मानवसाधारणा दया अधिकास्ति । त्वं महत्त्वं प्राप्तुमिच्छसि प्राप्तुं गाढः अभिलाषश्च तवास्ति परन्तु तत् प्राप्तुं दुष्कार्यं त्वं न कर्तुमिच्छसि । दुष्कार्यमकृत्वा त्वं महत्त्वं नैव प्राप्स्यसि । तवोद्देशा उन्नताः सन्ति परन्तु सुकर्मभिस्तान् प्राप्तुमिच्छसि । दुष्कार्यं त्वं न चिकीर्षसि इच्छसि च वस्तु यन्न प्राप्यते दुष्कर्म विना । त्वं महान् ग्लेमिसोऽसि महान् काडरश्चासि राजपदवीमाकाङ्क्षसि च । किन्तु जानासि तत् प्राप्तुं त्वया हत्या कर्तव्या । अहं जानामि त्वमिदं कार्यं कर्तुं बिभेषि। यदि तु तत् कथमपि कृतं स्यात् तर्हि तेन कर्मणा प्राप्यैर्विजयैस्तव खेदो न भविष्यति । शीघ्रमत्रागच्छ । उत्साहवर्धकानि वचनान्युक्त्वा मम जिह्वया तव शौर्यं प्रचोदयिष्यामि । तवोत्साहात् संदेहमपनेष्यामि यस्त्वां राजकिरीटाधिगमान्निवारयति । स्वर्णकिरीटं त्वया प्राप्तव्यं तव सुभाग्यमतिमानुषसहायता च तत् ते प्रतिशृणुतः ।

(वार्ताहरः प्रविशति ।)

का तव वार्ता ?

वार्ताहरः - राजाद्य नक्तमत्रायास्यति ।

श्रीमती मेक्बेतः - असंभवम् । उन्मत्तोऽसि एवं वक्तुम् । किं तव प्रभुस्तमनुयाति ? एवं तर्हि स मां पूर्वमेव संदिशेत् येनाहं राज्ञः अवश्य-संविधानानि कुर्याम् ।

वार्ताहरः - भवती प्रसीदतु । इयं वार्ता सत्या। अस्माकं प्रभुर्मेक्बेतः अत्रागच्छन्नस्ति । मम भ्राता अन्यो वार्ताहरस्ततः पूर्वं शीघ्रमायातः ।

In Public domain. Digitization Muthulakshmi Research Academy

शीघ्रागमनेन सः अतीव श्रान्तः ।

श्रीमती मेक्बेतः - विश्राम्यतु सः । महती वार्ता तेनानीता । (वार्ताहरो निष्क्रान्तः।) भवनोपरि घूक उच्चै रौति राजानमिहाह्वयन्निव यत्र तस्य दिष्टं तं प्रतीक्षते । हे दुष्टभूतानि ! मर्त्यानां सर्वे मनोव्यापारा युष्माकं ज्ञाताः। मम सहायतां कुरुत । मम स्त्रीदौर्बल्यमपनयत यन्मां हत्याप्रयत्नान्निवारयेत् । आपादमस्तकं मां महानिर्दयक्रौर्येण पूरयत । मम धमनीषु रक्तं तथा प्रवहतु यथा तत्र दया न प्रविशेत् । सहजनैतिकसंदेहा मानसिकातङ्काश्च मां मम क्रूराभिप्रायाणां निर्वहणात् मा निरुन्धन्तु । हे अदृश्यानि वायौ वर्तमानानि लोके पापवृद्धिं कुर्वन्ति दुष्टभूतानि ! मम स्तनाभ्यां प्रेममयमातृक्षीरमपनीय तौ कटुविषेण पूरयत । सान्द्ररजनि! आयाहि । मां नरकतुल्यान्धकारेणावृणु येन मम तीक्ष्णा छुरिका अदृष्टा मरणकरं प्रहारं कुर्यात् न च किमपि स्वर्गस्थं मृदुहृदयं भूतमन्धकारात् कथमपि निभृतं दृष्ट्वा मामेत्याक्रोशेत् ।

(मेक्बेतः प्रविशति ।)

महात्मन् ग्लेमिसथेन ! मान्य काडरथेन ! इतोऽप्यधिकबिरुदेन त्वां संबोधयेयं राजन्निति यद्यहं विजयतां मेक्बेत भवान् राजा भविष्यतीति डाकिनीनां भविष्यवाणीमनुसरेयम् । वर्तमानकाले स्थिता वयमागामिकालं न जानीमः । परन्तु तव लेखो मां वर्तमानानन्तरकालमनयत् अस्मिन् क्षणे अहमावयोर्भविष्यत्कालमागतमिव पश्यामि ।

मेक्बेतः - मम प्रियतमे ! डङ्कनः अद्य नक्तमत्रायाति ।

श्रीमती मेक्बेतः - कदा इतो गमिष्यति ?

मेक्बेतः - श्वः । एवमिदानीं तस्य संकल्पः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमती मेक्बेतः - तस्य श्वो न भवतु । किन्तु प्रभो ! तव मुखं पुस्तकवत् स्पष्टमस्ति । विचित्राणि चिन्तनानि तस्मिन् पठितुं शक्यन्ते। लोकं प्रतारयितुं मुखे तत्कालानुगुणं भावं प्रदर्शय । राजानं स्वागतेनाभिवादय । तदा नेत्रे हस्ते जिह्वायां च स्वागतभावं प्रदर्शय । पुष्पवत् शुचिः प्रतिभाहि । तदधस्तात् स्थितः सर्प इव कपटी भव । अस्मन्मार्गाद् राजा बहिष्कर्तव्यः। अद्य नक्तमिदं कार्यं मयि निक्षिप । अनेन कर्मणा अस्माकं शेषजीवितं राजाधिकारेण राजशासनेन च गमिष्यति ।

मेक्बेतः - इदं पश्चात् संवदावः ।

श्रीमती मेक्बेतः - अकलुषमुखेन तं स्पष्टं पश्य । यदि मुखे संशयं प्रदर्शयिष्यसि तदा भयं प्रदर्शयिष्यसि । सर्वं शेषं मयि स्थापय ।

(तौ निष्क्रान्तौ ।)

प्रथमः अङ्कः : षष्ठं दृश्यम् ।

(वाद्यानि उल्मुकाश्च । डङ्केनः, मालकमः डोनाल्बेनः बेङ्कः लेन्नक्सः मेक्डफः रासः आङ्गसः परिजनश्च प्रविशन्ति ।)

डङ्केनः - अयं दुर्गः रम्ये स्थलेऽस्ति । सुखस्पर्शो वायुर्मामाह्लादयति।

बेङ्कः - लघुग्रीष्मकालपक्षी मार्टिनः यो महाभवनानि परितो नीडान् निर्माति सोऽत्र बहुषु प्रदेशेषु नीडानकरोत् । अस्मिन् प्रदेशे बहवो मार्टिननीडा दृश्यन्ते । अत्र ते नीडान् निर्मान्ति सह जीवन्ति च । तेन ज्ञायतेऽत्र वायोर्मनोज्ञता ।

(श्रीमती मेक्बेतः प्रविशति ।)

In Public domain. Digitization Muthulakshmi Research Academy

डङ्केनः - पश्य एषा मान्या अस्मदातिथ्यकारिणी आयाति । मम जनैर्मयि कृतः प्रणयः कदाचिन्मां व्याकुलयति । तथाप्यहं कृतज्ञोऽस्मि यतः स सत्यः प्रणयः । अहमपि भवत्सु प्रणयी अस्मि । ममागमनेन यद्यप्यत्र कञ्चित् क्लेशं करोमि तं च प्रणयादेव । तदर्थं भवद्भिर्भगवान् प्रार्थनीयः राज्ञि भद्राणि वितरतु इति ।

श्रीमती मेक्बेतः - यद्यपि वयं भवन्तं द्विगुणं चतुर्गुणं च सेवितुमिच्छामस्तदपि अपर्याप्तं भवेत् भवत्सकाशादस्मत्कुटुम्बेन प्राप्तानां सम्मानानामपेक्षया । इतः पूर्वमिदानीं च भवतः सम्मानान् प्राप्य वयं पुरोहितवत् त्वत्कृते भगवत आशिषः प्रार्थयामहे ।

डङ्केनः - प्रभुः काडरः कुत्रास्ति ? वयं तस्यानुपदमागतास्तमतिक्रमितुमिच्छन्तः। परन्तु स प्रशस्त आश्विकः । अस्मासु प्रणयस्तस्य वेगमवर्धयत्। अतः सः अस्मत्पूर्वमागतः । शोभने मान्ये आतिथ्यकारिणि ! इदं नक्तमहं भवतामतिथिरस्मि ।

श्रीमती मेक्बेतः - भवतां सेवकाः स्वधनं भवत्सेवार्थमेव रक्षन्ति । या संपत् तेषां सकाशे अस्ति तां भवतः सेवायां विनियोक्तुं ते प्रीता भवन्ति। एवं कृत्वा तवैव संपत् त्वयि समर्प्यते ।

डङ्केनः - मामतिथिं मेक्बेतसकाशं नय । अहं मेक्बेते गाढमनुरक्तोऽस्मि । सर्वदा तस्मिन्ननुग्रहं करिष्यामि । इदानीं भवती अनुरोधं करोतु मां नयतु च ।

(सर्वे निष्क्रान्ताः ।)

प्रथमः अङ्कः : सप्तमं दृश्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

(वाद्यानि उल्मुकाश्च । प्रधानसेवकः प्रविशति पश्चात् पात्रहस्ताः सेवकाः । ते निष्क्रान्ताः । मेक्बेतः प्रविशति ।)

मेक्बेतः - (स्वगतम्) तस्मिन् कर्मणि कृते यदि तदनु किमपि न भविष्यति तर्हि शीघ्रं तत् कर्तव्यम् । यदि हत्या हत्ययैवावसिता भविष्यति सुफलं च निश्चितं करिष्यति तर्हि अस्मिन् जन्मनि तस्या हत्यायाः प्रभावः अवसीयेत । तेन प्रभावेण परलोके अस्माकं का गतिर्भवेदितीदानीं व्यग्रा न भवामः । तथापि अस्मिन्नपि जन्मनि तस्य कर्मणो दुष्परिणामा भवेयुः । यद् वयं कुर्मस्तदन्येऽपि कुर्युः । पश्चादस्माकमपि हत्या भवेत्। यद् विषमन्येभ्यः अस्माभिः कृतं तत् कालान्तरे अस्माभिरेव पातव्यं स्यात् । लोकगतिः पक्षपातरहिता प्रवर्तते । इदानीं डङ्कनः अत्रास्ति । तस्य रक्षणभारो मयि द्विविधः अस्ति । प्रथमं स मम बन्धुः । किं चास्य राज्ये निवसामि । उभयप्रवृत्त्या तस्य हत्यारूपं पातकं मया निरोद्धव्यम्। किं च स इदानीं मम गृहे अतिथिरस्ति । अतिथिसत्कारधर्मेण मया स बलप्रयोगाद् रक्षणीयः । मयैव स न हन्तव्यः । किं च डङ्कनः राजाधिकारं सदयं निर्वहति । तेन किमपि दुष्कार्यं न कृतम् । तस्य सदाचारा एव तस्य हत्या अकार्येति अभ्यर्थयन्तः स्वर्गस्थानां देवतानामुच्चैरुद्घोषवद् भवन्ति । निन्द्या हत्या यदि करिष्यते तदा करुणोद्वेगः सर्वत्र प्रकटितो भविष्यति । जनानामश्रुधारा भुवि पतिष्यन्ति । राजसकाशान्मया कदापि कोऽपि मनःखेदो न प्राप्तः। अत इदं हत्याकार्यं कर्तुं मम किमपि कारणं नास्ति विना ममोत्पतद्राजत्वकाङ्क्षाम् । अनया काङ्क्षयाहं मम नियत-जीवनधर्ममुल्लङ्घ्य विपदि निपतेयम् ।

In Public domain. Digitization Muthulakshmi Research Academy

(श्रीमती मेक्बेतः प्रविशति ।)

कां वार्तां त्वमानयसि ?

श्रीमती मेक्बेतः - तस्य रात्रिभोजनमवसितप्रायम् । किमर्थं त्वं तस्मात् कोष्ठान्निर्गतः ?

मेक्बेतः - किं स मां प्रति अपृच्छत् ?

श्रीमती मेक्बेतः - अथकिम् । किं न जानासि ?

मेक्बेतः - अस्मिन् संकल्पे आवां पुरस्तान्न गच्छावः । एष्वेव दिनेषु स मम मान्यं बिरुदमददात् । सर्वविधजनानामभिप्रायमविन्दं सुजनोऽयमिति। सा मान्यता सा गणना चामलिना रक्षणीया । निन्द्यं पातकं कृत्वा सा सहसा न क्षेप्तव्या ।

श्रीमती मेक्बेतः - इतः पूर्वं राजत्वमाकाङ्क्षन् किं त्वं मद्यपानमत्त आसीः ? निद्रां गत्वा प्रतिबुद्धो मद्यप्रभावान्मुक्त इदानीं तत् कार्यं प्रति ससाध्वसः पश्यसि यत् त्वया निर्भयेण चिन्तितपूर्वम् । इतः प्रभृति मयि तव प्रेम अविश्वसनीयम् । अपि भीतोऽसि ? स्वमाकाङ्क्षितं जेतुं किं तव पर्याप्तं शौर्यं नास्ति? त्वं राजकिरीटं लब्धुमीहसे किन्तु स्वबुद्ध्यैव भीरुर्भवसि । तवाकाङ्क्षा वदति अहमाकाङ्क्षामीति त्वं तु वदसि नाहं साहसं कुर्यामिति । त्वमसि स मार्जाल इव यो मत्स्यान् भक्षयितुमिच्छति तथापि पादावार्द्रौ कर्तुं बिभेति ।

मेक्बेतः - अहं प्रार्थये । अलं भाषणेन । यन्मनुष्यस्य कर्तव्यं तत् कर्तुं मम शौर्यमस्ति । यस्तदतिक्राम्यति स मनुष्यो न भवति ।

श्रीमती मेक्बेतः - तर्हि त्वं पुरुषो नासीः । कश्चिज्जन्तुरासीर्यदा आत्मन आकाङ्क्षां मां सप्रत्ययमवदः । यदा आकाङ्क्षां लब्धुं यत् करणीयं

In Public domain. Digitization Muthulakshmi Research Academy
तत् कर्तुं धैर्यं प्राप्स्यसि तदा त्वं पुरुषो भविष्यसि । लब्ध्वा अधिकपुरुषश्च भविष्यसि । यदा त्वं तामाकाङ्क्षां मनस्यकरोस्तदा स्थलं समयश्च नानुकूलौ । तथापि तत् कर्तुं त्वमिच्छामकरोः । इदानीं स्थलं कालश्चानुकूलौ । त्वं तु तस्मात् कर्मणः पराजयसे । अहं मातास्मि । शिशुं स्तन्येनापोषयम् । अहं जानामि आत्मना पोष्यमाणे शिशौ मातुः सुकुमारं प्रेम कीदृशं भवति । तथापि त्वद्वदहं किमपि कर्तुं यदि कृतनिश्चया स्यां तर्हि मम मातुः स्तनं तस्य दन्तहीनादास्यादुत्कृष्य तस्य शिरो भुवि भिन्द्यां न तु निश्चितमपूरयित्वा विसृजेयम् ।

मेक्बेतः - किं भविष्यति यद्यस्मत्प्रयत्नो भग्नो भविष्यति ?

श्रीमती मेक्बेतः -कथं भग्नो भविष्यति ? धैर्यं स्थापय । प्रयत्नभङ्गः असंभवः । यदा डङ्केनो निद्रितो भविष्यति अद्य दीर्घप्रयाणेन स प्रगाढं स्वप्स्यति । अहं तस्य शयनकोष्ठरक्षकौ द्वावपि महता मद्यपानेन निश्चेतनौ करिष्यामि । यदा तौ मद्यपानमत्तौ स्वप्स्यतस्तदावां रक्षकरहितं डङ्केनं किमपि कर्तुं शक्नुयाव । पश्चात् हत्याभियोगं तयोः पातयिष्यावः । हत्यां तु आवां करिष्यावः ।

मेक्बेतः - त्वादृशी धीरा स्त्री पुत्रानेव प्रसूयेत न तु पुत्रीः । असमाना तव निर्भयता निर्दिशति त्वं पुरुषाणामेव माता भवितुमर्हसि । यदावां रक्षिणोः कृपाणावुपयुज्य हत्वा मधुपानमत्तयोस्तयोः शरीरयो रक्तं लेप्स्यावः किं पश्यतां विश्वासो न भविष्यति ताभ्यामेव हत्या कृतेति ?

श्रीमती मेक्बेतः -को नामान्यथा चिन्तयेत् ? आवां तत्र सुमहद् रोदनं च करिष्यावः ।

मेक्बेतः - अहमिदानीं कृतनिश्चयोऽस्मि । इदं दारुणं कार्यं कर्तुमहं

In Public domain. Digitization Muthulakshmi Research Academy

सर्वां शक्तिमुपयोक्ष्ये । आवामिदानीमपापसज्जनवद् दृश्यमानौ मन्दहासमुखौ मनसि स्थितं वञ्चनाकार्यक्रमं निह्नुवहे ।

(निष्क्रान्तौ ।)

द्वितीयः अङ्कः प्रथमं दृश्यम् ।

(मेक्बेतस्य दुर्गे कश्चित् प्रदेशः । बेङ्कः फ्लेयंसश्च प्रविशतः। फ्लेयंस उल्मुकं गृहीत्वा पुरस्ताद् गच्छति ।)

बेङ्कः - वत्स ! रात्र्यामिदानीं का वेला ?

फ्लेयंसः - चन्द्रो गगने अवनतः । घण्टाध्वनिस्तु मया न श्रुतः ।

बेङ्कः - द्वादशवादने चन्द्रः अवनतो भवति ।

फ्लेयंसः - इदानीं वेला द्वादशात् किञ्चिदतिक्रान्ता स्यात् ।

बेङ्कः - मम खड्गं धर । आकाशः कान्तिवितरणे परिमितिं करोतीव। नक्षत्राणि चन्द्रश्च न प्रकाशन्ते । इमामपि धर । (छुरिकां ददाति ।) अयं मम निद्रासमयः । मम नेत्रच्छदौ भारायेते । तथापि न स्वप्तुमिच्छामि। हे गगनस्थानि शक्तिमन्ति भूतानि ! मम दुश्चिन्तनानि निवारयत यानि निद्रायां मनः प्रविशन्ति ।

(उल्मुकहस्तेन सेवकेन सह मेक्बेतः प्रविशति ।)

मम खड्गं देहि । कोऽत्र भोः ?

मेक्बेतः - सुहृत् ।

बेङ्कः - भवानभ्यन्तरं न प्रविष्ट इदानीमपि ? राजा शय्यां गतः । स नितरां प्रीतः । औदार्येण स तव सर्वजनेभ्यः पारितोषिकाणि प्रैषयत् । इदं वज्रं बहुमानरूपेण तव भार्याया दत्तम् । सा परमादरणीया आतिथ्यकर्त्री

In Public domain. Digitization Muthulakshmi Research Academy
स पूर्णरूपेण संतुष्टः ।

मेक्बेतः - राज्ञ आगमनाय वयमसन्नद्धाः । शोभनमातिथ्यं कर्तुमभिलाषिणोऽपि वयं लोपान् निवारयितुमसमर्था अभवाम स्वागतीकरणे । अन्यथा स्वाशयानुगुणमातिथ्यं तस्मै कृतं स्यात् ।

बेङ्कः - भवतु । अहं ता डाकिनीः प्रति अचिन्तयम् । दृश्यते त्वां प्रति तासां भविष्यवाण्याः केचनांशा निश्चयं सत्या अभवन् ।

मेक्बेतः - अहं ता नैव चिन्तयामि । पश्चात् तां घटनां चर्चयिष्यावः यदि भवतः समयो भवेत् ।

बेङ्कः - अथकिम् । यदैव भवतः समयो भवेत् ।

मेक्बेतः - यदि भवान् मे संवदति तर्हि तेन तव कोऽपि लाभो भवेत्।

बेङ्कः - यावत् स्वलाभं प्राप्तुं व्यक्तिगतं मानं न ह्रासयामि मनः अपराधरहितं करोमि राजानं प्रति विधेयता मयि अचला तिष्ठति तावत् तव वचनं श्रोतुं मम विमुखता न भवति ।

मेक्बेतः - तावत् तव सुखा विश्रान्तिर्भवतु रात्रौ ।

बेङ्कः - अनुगृहीतोऽस्मि । भवानपि तथा विश्रान्तो भवतु ।

(बेङ्कः फ्लेयंसश्च निष्क्रान्तौ ।)

मेक्बेतः - स्वामिनीं वद । यदा पानीयं सिद्धं भवति तदा घण्टा वाद्यतामिति । त्वं गच्छ शेष्व। (सेवको निष्क्रान्तः ।) (स्वगतम्) अहं किं पश्यामि ? किमियं छुरिका ? (ऊहितछुरिकां गृह्णाति ।) हा ! इयं छुरिका दृश्यते न गृह्यते । मम मतिः संतप्ता । अविद्यमानं पश्यामि । मम मतिविभ्रमो जातः। छुरिकां तु पश्यामि या मां कर्तव्यं प्रति नयति । किं मम नेत्रे मां प्रतारयतः उत नेत्रे एव सत्यं पश्यतः ममान्यानीन्द्रियाणि

 In Public domain. Digitization Muthulakshmi Research Academy

भ्राम्यन्ति ? इदानीं छुरिकायास्तले त्सरौ च रक्ताङ्कानहं पश्यामि । न न । अत्र छुरिका नास्ति । हननं चिन्तयतो मम छुरिका दृश्यते या नास्ति । अर्धप्रपञ्चे रात्रिः प्रवर्तते । दुस्स्वप्ना मनुष्याणां निद्राभङ्गं कुर्वन्ति । डाकिन्यो यथेच्छं संचरन्ति । अमायिको डङ्केनः सुगाढं सुखं स्वपिति । क्रूरोऽहं तस्य समीपं प्रवेक्ष्यामि । मम कर्तव्यनिर्वहणे इदं भाषणं नोपकुरुते । (घण्टानादः श्रूयते ।) अहमिदानीं गच्छामि तत् कार्यं समापयितुम् । घण्टानादो मम सूचना । डङ्केन ! अहमाशासे त्वमिमं घण्टानादं न शृणोषि । एष घण्टानादस्तव मृत्युसमयं ध्वनति ।

(मेक्बेतो निष्क्रान्तः ।)

द्वितीयः अङ्कः : द्वितीयं दृश्यम् ।

(तत्रैव मेक्बेतस्य गृहे । श्रीमती मेक्बेतः प्रविशति ।)

श्रीमती मेक्बेतः - तन्मद्यं यत् सेवकाभ्यां पीतं मां धीरामकरोत् । तत् तयोरिन्द्रियज्ञानं व्यनाशयत् मम तु तीक्ष्णधैर्यपूरणमकरोत् । कोऽयं शब्दः ? आम् ज्ञातम् । उलूकोऽयम् । मरणदण्डननिर्वहणात् पूर्वं घण्टारणनमिव उलूको रौति । अस्मिन् क्षणे मेक्बेतस्तत् कार्यं कुर्वन् भवति । कवाटा विवृताः । बहु मद्यं पीत्वा नियोगानर्हौ रक्षकौ सेवकौ घर्घरायमाणौ गाढं स्वपितः । मया तस्मिन् मद्ये औषधानि मिश्रितानि । तौ जीवन्तावपि मृततुल्यौ ।

मेक्बेतः - (नेपथ्यात्) कस्तत्र ? किं तत् ?

श्रीमती मेक्बेतः - बत ! व्यग्रास्मि । संशये सेवकौ प्रतिबुद्धौ हत्या न कृता च । विफलः प्रयत्नो नौ नाशयेत् । (सा ध्वनिं शृणोति ।) कोऽयं

In Public domain. Digitization Muthulakshmi Research Academy
ध्वनिः ? सेवकयोः कृपाणौ मया तत्रैव निहितौ । तौ मेक्बेतो न पश्यतीति न । सुप्तं डङ्केनमहमपश्यम् । स मम पितृसरूपो दृष्टः । नो चेदहमेव तं हन्याम् ।

(मेक्बेतः प्रविशति रक्तमयच्छुरिकाद्वयहस्तः)

एष मम पतिः ।

मेक्बेतः - कृतं मया तत् कार्यम् । अपि कश्चित् शब्दः श्रुतस्त्वया ?

श्रीमती मेक्बेतः - मया उलूकस्य रुतं श्रुतं झिल्लिकाध्वनयश्च । अपि त्वया किमप्युक्तम् ?

मेक्बेतः - कदा ?

श्रीमती मेक्बेतः - इदानीमेव ।

मेक्बेतः - सौधादवतरता ?

श्रीमती मेक्बेतः - अथकिम् ।

मेक्बेतः - कः पार्श्वकोष्ठे स्वपिति ?

श्रीमती मेक्बेतः - डोनाल्बेनः ।

मेक्बेतः - मम हस्तौ पश्य । रक्ताङ्कितौ दर्शनेन दुःखकरौ । (हस्तौ दर्शयति ।)

श्रीमती मेक्बेतः - मा मूढो भव । मा वद दुःखकरौ हस्ताविति ।

मेक्बेतः - कश्चित् निद्रायामुच्चैर्हसन् श्रुतः । अन्यो हत्येत्याक्रोशत् । तौ प्रतिबुद्धौ । अहं स्थितः प्रतीक्षमाणः । तौ प्रार्थनां कृत्वा पुनः शयितौ।

श्रीमती मेक्बेतः - पार्श्वकोष्ठे द्वावतिथी स्तः शयितौ ।

मेक्बेतः - एकतर उच्चैरवदत् भगवानावयोः शुभमाशास्तामिति । अन्यतरोऽवदत् तथास्तु इति । ताभ्यामहं दृष्टोऽपि स्यां

 In Public domain. Digitization Muthulakshmi Research Academy

रक्तसिक्तहस्तद्वयः। मया तयोर्भयवचनानि श्रुतानि । यदा ताभ्यां भगवत आशिषः अभ्यर्थिताः तदाहं तथास्तु इति वक्तुमसमर्थ आसम् ।

क्षीमती मेक्बेतः - भवतु तत् तथा । मा तत् तव मनः क्लिश्नातु ।

मेक्बेतः - किन्तु तथास्तु इति वक्तुं कस्मादहमसमर्थः अभवम् ? कृतपातकः अहमेव देवस्याशिषः अपेक्षे सर्वेषामुपरि । तथापि तद्वचनं मम कण्ठे एव लग्नं बहिर्नागतम् ।

श्रीमती मेक्बेतः - एतानि वृत्तानि मनसि न स्थापनीयानि। तेषामतिचिन्तनेनोन्मादो जायते ।

मेक्बेतः - तदा कश्चित् कण्ठध्वनिर्मया श्रुत इव। अतः परं तव निद्रा न भवति । मेक्बेतो निद्रां हन्तीति । निद्रा नाम निर्दोषा स्थितिः। अस्माकं चिन्ता व्यग्रताश्च नाशयति । मतिं स्थिरीकरोति । कार्यभारानन्तरं प्रशान्तां विश्रान्तिं करोति । श्रामिकस्यादिनान्तश्रमस्य विरामः पीडितमतेरौषधं जीवितभयाद् विमोचनं च ।

श्रीमती मेक्बेतः - किमिदं तव भाषणम् ?

मेक्बेतः - स कण्ठध्वनिः सर्वं गृहं वदति स्म । अतः परं निद्रा मास्तु। मेक्बेतो ग्लेमिसथेनो निद्रां जघान मेक्बेतः काडरथेनः अतः परं प्रशान्तं न शयिष्यते । येन केनापि वा बिरुदेन सहितो मेक्बेतः पुनर्न शयिष्यते इति ।

श्रीमती मेक्बेतः - किन्तु क एवमुच्चैरवदत् ? हे प्रभो ! एवं चिन्तयन् त्वं भीरुर्भवसि । जलमानय । हस्ताभ्यां रक्ताङ्कान् प्रक्षालय । नो चेत् ते तवापराधस्य साक्ष्यं कुर्युः । इमौ कृपाणौ किमानीतौ ? तौ तत्र त्याज्यौ। तत्र तौ नय । सुप्तौ सेवकौ रक्ताङ्कितौ कुरु ।

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - अहं तत् स्थलं पुनर्न गच्छामि। कृतं पातकं चिन्तयितुमप्यहं बिभेमि। पुनस्तत्र गत्वा द्रष्टुं नैव शक्नोमि।

श्रीमती मेक्बेतः - कियान् खलु त्वं दुर्बलनिर्णयः! कृपाणौ मम देहि। निद्राणो मृतश्च दर्शने समौ भवतः। उद्वेगकरं दृश्यं दृष्ट्वा बाला एव बिभ्यति। यदि डङ्केन इदानीमपि रक्तं स्रवति तत् किञ्चित् सेवकयोर्मुखयो -र्लेप्स्यामि।

(श्रीमती मेक्बेतः बहिर्गच्छति।
नेपथ्यात् कवाटताडनं श्रूयते।)

मेक्बेतः - कुत आयाति कवाटताडनशब्दः ? का मम स्थितिर्यदा सर्वः शब्दो मां भाययति? किमिमौ रक्ताङ्कितौ हस्तौ मम ? तौ मम नेत्रे पीडयतः। किं सर्वसमुद्राणां जलं पर्याप्तं भवति रक्ताङ्कान् प्रक्षालयितुम् ? न न। मम हस्तयो रक्तमेव सर्वं महासमुद्रं रक्तं कुर्यात्। पूर्वं हरितं समुद्रतीरं रक्तं कुर्यात्।

(श्रीमती मेक्बेतः पुनः प्रविशति।)

श्रीमती मेक्बेतः - मम हस्ताविदानीं तव हस्ताविव रक्तौ। यदि मम हृदयं तवेव भीरु तदाहं लज्जिता भवेयम्।

(नेपथ्यात् कवाटताडनं श्रूयते।)

दक्षिणद्वारे कवाटताडनं श्रूयते। अस्मत्शयनकोष्टं गच्छावः। किञ्चिज्जलमावाभ्यां रक्तं प्रक्षाल्यापनयति। तदा अस्मत्कृतस्य कार्यस्य साक्ष्यं न भवति ततः सर्वं सुलभं भविष्यति। तव मनसो दृढत्वं नष्टम्। (अधिकं कवाटताडनं श्रुतम्।) शृणु। कवाटताडनं प्रवर्तते। रात्रिवस्त्र धर। यद्यावाभ्यां बहिर्गन्तिव्यमावयोरिदं दिनवस्त्रं सूचयेत् आवां जागरिता-

 In Public domain. Digitization Muthulakshmi Research Academy

विति । व्याकुलो मा भव ।

मेक्बेतः - अहं मम कृतं तत् कार्यमेव चिन्तयन्नस्मि यदि मम चेतना नश्यति ममास्तित्वं च विस्मरामि तत् श्रेयो भवति । (अधिकं कवाटताडनं श्रूयते ।) ताडय ताडय । ताडनेन डङ्केनं प्रतिबोधय । अहमाकाङ्क्षामि त्वं तत् करिष्यसि ।

(निष्क्रान्तौ ।)

द्वितीयः अङ्कः तृतीयं दृश्यम् ।

(तत्रैव ।)

(अधिकं कवाटताडनं श्रुतम् । द्वारपालकः प्रविशति ।)

द्वारपालकः - कश्चिद् द्वारि कवाटं ताडयति । यदि नरकद्वारे कश्चिद् द्वारपालको भवेत् स द्वारमुद्घाटयेत् येन सर्वे पापिनः प्रविशेयुः । ताडनं ताडनं ताडनम् । कः स पिशाचः ? नरके बहुविधाः पापिनो भवन्ति । चोरा वञ्चका दाम्भिका घातका बहुविधाः । (द्वारमपावृणोति ।)

(मेक्डफः लेन्नक्सश्च प्रविशतः ।)

मेक्डफः - किं त्वं नक्तं विलम्बेन शय्यां गतः येन प्रातर्विलम्बेन प्रतिबुद्धोऽसि ?

द्वारपालकः - आर्य ! सत्यमुक्तम् । ह्यः आ प्रातर्वयं विनोदमकुर्म ।

मेक्डफः - अपि तव प्रभुः शय्यामत्यजत् ?

(मेक्बेतः प्रविशति ।)

आवयोः कवाटताडनेन स प्रतिबुद्धः । एष आयाति ।

लेन्नक्सः - सुप्रभातम् आर्य !

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - युवयोः सुप्रभातम् ।

मेक्डफः - आर्य ! थेन ! अपि राजा उत्थितः ?

मेक्बेतः - नोत्थित इदानीमपि ।

मेक्डफः - राजा मामादिशत् अहं प्रभाते शीघ्रं प्रतिबोधनीय इति । अहं तु निर्दिष्टकालमतिक्रम्यागतोऽस्मि ।

मेक्बेतः - अहं त्वां नयामि ।

मेक्डफः - तव क्लेशो मा भवतु ।

मेक्बेतः - इदं डङ्कनस्य कोष्ठकवाटम् ।

मेक्डफः - इदानीमहं तं प्रतिबोधयामि । इदं मम विशेषकर्तव्यम् ।

(मेक्डफः डङ्कनस्य कोष्ठं प्रविशति ।)

लेन्नक्सः - अपि राजा इतः अद्य गच्छति ?

मेक्बेतः - गच्छति । गन्तुं संविधानानि कृतानि ।

लेन्नक्सः - नक्तं वात्या आसीत् । केचन गृहोपरिभागा उत्क्षिप्ताः । जना अवदन् विचित्रा रोदनध्वनयो बहिः श्रुताः । म्रियमाणस्येवाक्रोशाः श्रुताः । भयंकराः कण्ठध्वनयः श्रुताः । विप्लवः संक्षोभघटनाश्च भविष्यन्त्यस्मिन्नसुखसमये इत्यवदन् । अन्धकारप्रणयी उलूको रात्रौ निरन्तरमाक्रोशत् । केचिदाहुर्भूमिरकम्पतेति ।

मेक्बेतः - सत्यम् । नक्तं वात्या आसीत् ।

लेन्नक्सः - युवाहं सदृशीं रात्रिं नापश्यम् ।

(मेक्डफः पुनः प्रविशति ।)

मेक्डफः - घोरं दृश्यम् । मतिर्न उहेत जिह्वा न वदेच्च यद् वृत्तम्।

मेक्बेतः लेन्नक्सश्च - किमत्याहितम् ?

 In Public domain. Digitization Muthulakshmi Research Academy

मेक्डफः - विनाशः विनाशः । घोरो विनाशः । क्रूरहस्तेन कृता हत्या पवित्रं राजानमदूषयत् राज्ञो जीवितमलुण्टत् ।

मेक्बेतः - किं वदसि ? राज्ञो जीवितम् ?

लेन्नक्सः - किं वदसि ? राज्ञः ?

मेक्डफः - एहि तस्य कोष्ठम् । यद् दृश्यं तत्र द्रक्ष्यसि तत् त्वां भयेन शिलां करिष्यति । मां न पृच्छ । गत्वा पश्य । तदा तत् कथयितुं पदानि प्राप्नुहि ।

(मेक्बेतः लेन्नक्सश्च राज्ञः कोष्ठं गच्छतः ।)

हे सर्वो मानव ! त्यज निद्राम् । त्यज निद्राम् । उत्तिष्ठ । घण्टां नादयित्वा सर्वमाकारय । अत्र हत्या । अत्र राजद्रोहः । हे बेङ्क ! डोनाल्बेन ! माल्कम ! सर्वे जागृत । प्रशान्तनिद्राया जागृत । निद्रा नाम मृत्योः सौम्या छाया । यूयं सत्यं मृत्युं पश्यत । उत्तिष्ठत । लोकस्यान्त्यदिनविनाशसदृशं विनाशदृश्यं पश्यत । उत्तिष्ठ माल्कम । उत्तिष्ठ डोनाल्बेन । उत्तिष्ठ बेङ्क । मृतशरीरेभ्यो भूतानीवोत्थायेदं दृश्यं पश्यत । आकारणघण्टां वादयत ।

(दुर्गस्य महाघण्टा नदति । श्रीमती मेक्बेतः प्रविशति ।)

श्रीमती मेक्बेतः - कात्र महती विपत् ? भयंकरशब्देन गृहजना आकारिताः तूर्यध्वनिना सैन्यं समावेशार्थमिव । वद । मां वद ।

मेक्डफः - सौम्ये ! अत्रभवति । इदं मम वचनं स्त्रीकर्णाभ्यां न श्रोतव्यं यतो घातकशस्त्रवत् त्वां हन्यात् ।

(बेङ्कः प्रविशति ।)

हे बेङ्क ! बेङ्क ! राजा अस्मत्स्वामी हतः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमती मेक्बेतः - महादुःखकरी वार्ता । किमस्मद्गृहे हतः?

बेङ्कः - यत्रकुत्रापीदं भयंकरम् । प्रिय मेक्डफ! प्रार्थये । इदं मम वचनमसत्यमिति वद ।

(मेक्बेतः लेन्नक्सश्च रासेन सह पुनः प्रविशतः ।)

मेक्बेतः - यद्यहमेतद्वृत्तादेकहोरापूर्वं मृतोऽभविष्यं मया चिन्तितमभविष्यत् मम जीवितं सानन्दमासीदिति । एतत्क्षणादारभ्य मरणधर्मणां मानवानां जीवितेषु सारो वा सत्यता वा न भवतीति मे प्रतिभाति । सर्वे विषयास्तुच्छाः । कीर्तिः शोभा चातःपरं न स्तः । सर्वस्य हर्षस्य रेचनात् जीवितं शुष्कमभवत् । गगनावृतेऽस्मिन् लोके दुःखमेव शिष्यते यथा सुभोजनानन्तरं भुक्तशेषास्त्यक्ताः शिष्यन्ते ।

(माल्कमः डोनाल्बेनश्च प्रविशतः ।)

डोनाल्बेनः - किमत्रानुचितं संजातम् ?

मेक्बेतः - सर्वं तवानुचितं प्रवर्तितं त्वं च न वेत्सि। तव पितृनिर्झरः शुष्कः । राजपुत्रस्य तवोत्पत्तिस्थानं कृत्तम् ।

मेक्डफः - राजा तव पिता हतः ।

माल्कमः - हा केन ?

लेन्नक्सः - दृश्यते शयनकोष्ठसेवकाभ्यां तत् कृतम् । तयोर्हस्तेषु मुखयोश्च रक्ताङ्का आसन् । तथा तयोः कृपाणयोश्च । कृपाणौ न क्षालितौ तयोरुपधानयोस्त्यक्तौ च । यदा हत्या सूचिता तौ विस्मितौ स्थिरदृष्ट्यापश्यताम् । तौ उद्वेगाक्रान्तौ ।

मेक्बेतः - तथाप्यहमनुशोचामि कोपोद्रेकेण तौ तत्रैवाहनम् ।

मेक्डफः - कथमेवं त्वया कृतम् ?

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - किमिदं कस्यापि शक्यं येन स सद्यो विवेकी विह्वलः शान्तः कोपाविष्टो विधेय उदासीनश्च भवेत् ? न शक्यम् । डङ्कने ममानुरागेण प्रोद्भूतेन प्रचण्डकोपेन मया तत् कृतम् । पश्चादेव मया विचारितं तत् तथा सपदि न कर्तव्यमिति । तत्रासीद् डङ्कनः । तस्य श्वेतं चर्म पूर्णतो रक्तमयं दृष्टम् । कृपाणखण्डिताः क्षतय आसन् । पार्श्वे एव तौ हन्तकौ दृष्टौ रक्ताक्तौ रक्ताक्तकृपाणसहितौ । डङ्कने प्रणयी कः शौर्यवानात्मानं संयच्छेत् तथा न कुर्याच्च ।

श्रीमती मेक्बेतः - शीघ्रं मां बहिर्नयत ।

मेक्डफः - अत्रभवत्या रक्षणं क्रियताम् ।

बेङ्कः - अत्रभवतीं रक्षत । (सा बहिर्नीता ।) इदानीं कार्यचर्चाया अनुकूलता नास्ति । मध्याह्ने करणीयं चर्चयिष्यामः । अस्य क्रूरकर्मणः अनुयोगः समग्रतया भवतु । अहं मम क्षेमं दैवे न्यस्य तेन रक्षितः अविधेयद्रोहिणां रहस्यसंकल्पान् प्रतिरोत्स्यामि ।

मेक्डफः - अहमपि ।

सर्वे - एवं सर्वे वयम् ।

मेक्बेतः - मध्याह्ने वयं दुर्गसभायां सम्मेलिष्यामः ।

सर्वे - संवदामः ।

(माल्कमं डोनाल्बेनं च विहाय सर्वे गताः ।)

माल्कमः - भ्रातः ! किमिदं प्रवर्तितम् ? मनसि अस्थितं शोकं प्रकटयितुं शक्यते कपटिनाम् । मम शोकादुपरि भयमुत्पद्यते ।

डोनाल्बेनः - ममापि । अस्मत्पितरि प्रयुक्तः कृपाण आवामपि प्रतीक्षेत ।

माल्कमः - इतः पलायनं कार्यम् । अहमिङ्ग्लन्डं गच्छामि ।

डोनाल्बेनः - अहमैर्लन्डं गच्छामि । पृथग्जीवनमावयोः क्षेमकरम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

कोऽप्यत्र न विश्वसनीयः ।

माल्कमः - आवां हन्तुं प्रयत्नः सम्प्रति न कृतः स्यात् । ततः पूर्वमेव निर्गच्छावः । अश्वावारुह्य कमप्यनुक्त्वा निर्गच्छावः ।

(निष्क्रान्तौ ।)

द्वितीयः अङ्कः : चतुर्थं दृश्यम् ।

(मेक्बेतस्य दुर्गस्य बहिस्स्थलम् । रासः कश्चिद् वृद्धश्च प्रविशतः ।)

वृद्धः - गतानि सप्ततिवर्षाण्यहं सुस्मरामि । तस्मिन् सुदीर्घे काले मया न दृष्टानि विचित्राणि भयंकराणि च वृत्तानि यानि गतरात्रौ दृष्टानि।

रासः - हे वृद्ध सुजन ! व्यक्तं त्वं पश्यसि उपरि स्वर्गो भुवि मनुष्याणां प्रवर्तनैः कुपितः। भूतले मनुष्याः क्रूरकार्याणि प्रवर्तयन्ते । अतः कुपिता देवता भूमिं भर्त्सयन्ते । घटीं पश्य । इदं दिनम् । तथापि रात्रेरन्धकारा आकाशे गच्छतः सूर्यस्य किरणान् कथमपि चेष्टमानान् निरुन्धन्ति । अस्मिन् समये भूतलेन सूर्यकान्तिपूर्णेन भवितव्यम् । किन्तु पश्य । रात्रेर्विजयेन वा सूर्यस्य पराजयेन वा भूतलमन्धकारावृतमस्ति ।

वृद्धः - इदं प्रकृतिविरुद्धं राज्ञो हत्येव । अन्यत्र चैवमेव प्रवर्तते । गतमङ्गलवासरे सुजन्मा श्येनः सदर्पं गगने उच्चैर्डयमानः अवरेणोलूकेनाभियुज्य हतः येन प्रायेण मूषिका एव हन्यन्ते ।

रासः - किं च । इदं विचित्रं तथापि सत्यम् । डङ्केनस्याश्वाः सुन्दरा वेगवन्तश्च जात्यां श्रेष्ठाश्चाविनीता भूत्वा मन्दुरां भित्त्वा तत्र नियुक्तान् प्रतिरुध्य चतसृषु दिक्षूद्गताः । मनुष्यं प्रति तैर्युद्धं प्रकटितमिव दृष्टम् ।

In Public domain. Digitization Muthulakshmi Research Academy

वृद्धः - श्रुतं श्रुतम् । बहूनि विचित्राण्यपूर्वाणि संभवन्ति ।

रासः - एष मान्यो मेक्डफ आयाति ।

(मेक्डफः प्रविशति ।)

बाढम् आर्य ! का वार्ता इदानीम् ?

मेक्डफः - किं त्वया भयंकरघटनानां क्रमोत्कर्षो न दृष्टः ?

रासः - अपि ज्ञातं भयंकरी सा हत्या केन कृता?

मेक्डफः - सेवकाभ्यां यौ मेक्बेतेन हतौ ।

रासः - बहु दुःखकरम् । किन्तु तेन तयोः को लाभः स्यात् ?

मेक्डफः - तौ तत् कर्तुं वेतनेन नियुक्तौ । माल्कमो डोनाल्बेनश्च राज्ञः पुत्रौ गूढं निर्गतौ । तेन रहस्यनिर्गमनेन तयोः शङ्का भवति ।

रासः - इदमन्यदसहजं वृत्तम् । पितरं हत्वा किं प्रयोजनं तौ प्राप्नुयाताम् ? अथ दृश्यते राजकिरीटं धर्तुं मेक्बेतस्य वरणं भवति।

मेक्डफः - स राजा वृतः । अभिषेकोत्सवार्थं स स्कोनं गत एव ।

रासः - डङ्कनस्य देहः कुत्र ?

मेक्डफः - स कोल्मेकिलप्रदेशं नीतः । तत् पवित्रं निखननस्थलं यत्र सर्वे पूर्वा राजानो निखाताः । सा भूमिः मृतराजानामस्थीनि धरति।

रासः - किं त्वं स्कोनं गच्छसि ?

मेक्डफः - न न । मम गृहं फैफषैरं गच्छामि ।

रासः - भवतु । अहं तत्र गच्छामि ।

मेक्डफः - स्कोने सर्वं सुकृतं पश्येः । अहं त्वामामन्त्रये । अस्माकमाशा भवतु आगामी कालो गतकालात् हीनतरो मास्तु ।

रासः - हे वृद्ध त्वामामन्त्रये ।

 In Public domain. Digitization Muthulakshmi Research Academy

वृद्धः - भगवत आशिषस्त्वयि सन्तु । तेषु च भवन्तु ये निन्द्यं श्लाघ्यं कुर्युर्ये च शत्रून् मित्राणि कुर्युः ।

(ते निष्क्रान्ताः ।)

तृतीयः अङ्कः : प्रथमं दृश्यम् ।

(फोर्रेसे राजसौधम् । बेङ्कः प्रविशति ।)

बेङ्कः - (स्वगतम्) बाढं मेक्बेत ! त्वया अभिलषितं प्राप्तम् । राजाभवः । काडरथेनोऽसि ग्लेमिसथेनश्च । डाकिन्यो यदवदन् तदिदं सर्वमभवत् । अहं तु शङ्के महानिन्द्यविधानेन त्वया प्राप्तम् । किन्तु डाकिन्य इदमप्यवदन् । तव पुत्रा राजानो न भविष्यन्ति । अहं बेङ्को भाविनां राज्ञां पिता भविष्यामीति । डाकिनीवचनं त्वयि सत्यमभवत् । तथा मयि च सत्यं भविष्यति । अहं तदाशंसे । किन्तु । हष् हष् । अतः परं मया न मन्तव्यम् ।

(तूर्यध्वनिः । मेक्बेतो राजा श्रीमती मेक्बेतो राज्ञी लेन्नक्सः रासः प्रभवः अत्रभवत्यः सेवकाश्च प्रविशन्ति ।)

मेक्बेतः - अत्रास्ति बेङ्को योऽद्य रात्रौ भोजनोत्सवेऽस्माकं प्रधानातिथिर्भवति ।

श्रीमती मेक्बेतः - यदि स विस्मृतः स्यात् तर्हि अस्माकं भोजनमहोत्सवः असंपूर्णः असंतोषकरश्च भवेत् ।

मेक्बेतः - मान्य ! अद्य रात्रौ भोजनमहोत्सवं करिष्यामः । भवन्तमुपस्थितमाशंसे ।

बेङ्कः - महाराज आदिशतु । अनुष्ठानं मम कर्तव्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - किं भवानद्य मध्याह्ने अश्वेन गमिष्यति ?

बेङ्कः - प्रभो ! गमिष्यामि ।

मेक्बेतः - यदि भवता गमनं न संकल्पितं स्यात् तर्हि अद्य मन्त्रण-समावेशे भवानुपस्थितो भवतु मम बोधनं करोतु इत्यभ्यर्थितः स्यात् । तव बोधनं सर्वदा विज्ञानसंपन्नं मम सुभाग्यं च । किन्तु श्वोऽपि भवतु । अपि भवान् दूरं गमिष्यति !

बेङ्कः - इतो रात्रिभोजनसमयपर्यन्तमेव मम गमनागमनं भविष्यति । रात्रिप्रारम्भात् होरानन्तरं वा द्विहोरानन्तरं वा भवेत् ममाश्वस्य गमन-वेगमनुसृत्य ।

मेक्बेतः - नक्तं भोजनोत्सवे तु अवश्यमुपस्थितो भव ।

बेङ्कः - अवश्यं प्रभो ।

मेक्बेतः - श्रूयते अस्मद्बन्धू अपराद्धौ माल्कमः डोनाल्बेनश्च इङ्गलन्ड-मैर्लन्डं चाध्युषितौ । ताभ्यां पितुः क्रूरहत्या न अङ्गीकृता । प्रत्युत तौ श्रोतॄनसत्यकथां वदतः । इदं श्वः समावेशे चर्चयिष्यामः । तदा इतोऽधिका अन्ये च राज्यव्यवहारा भविष्यन्ति । तत्र भवानपि भविष्यति । इदानीं भवतः सुखप्रयाणं भवतु । नक्तं प्रत्यागच्छतु । अपि भवत्पुत्रः फ्लेयंसः सह गच्छति ?

बेङ्कः - प्रभो ! मया सह गच्छति । इदानीमावयोर्गमनसमयः ।

मेक्बेतः - तवाश्वाः क्षेमं शीघ्रं च गच्छन्तु । तव क्षेमं तेषु निवेशयामि। स्वस्ति । (बेङ्को निर्गच्छति ।) इदानीं सर्वो यथेच्छं कालक्षेपं करोतु नक्तं सप्तवादनं यावत् । युष्माकं सन्निधानेन भोजनोत्सवो मधुरतरो भवतु । तावदहमेको भविष्यामि । स्वस्ति ।

 In Public domain. Digitization Muthulakshmi Research Academy

(सर्वे निर्गच्छन्ति मेक्बेतं सेवकं च विहाय ।)

हे उपस्थित ! शृणु ! किं तौ पुरुषौ मां प्रतीक्षेते ?

परिचरः - अथकिम् प्रभो ! तौ भवनद्वारे प्रतीक्षेते ।

मेक्बेतः - तावत्रानय । (परिचरो बहिर्निर्गच्छति ।) (स्वगतम्) एतावता कार्ये मया विजयः प्राप्तः । परन्तु स न पर्याप्तः । यत् प्राप्तं तत् स्थिरीकर्तव्यम् । मम बेङ्कं प्रति सुमूलं भयमस्ति । तस्मिन् राजस्थैर्यमस्ति तेजश्च । स महासाहसी । तस्य बुद्धिर्भयरहिता विवेकवती च । अतः सर्वाणि तस्य कार्याणि प्रमादरहितानि भवन्ति । मम कस्मिन्नप्यन्ये एतावद् भयं नास्ति । मम संरक्षिणी देवता एतस्मात् संकुचति यथा श्रूयते मार्कस्य एन्टोनेः सीजरात् । बेङ्को डाकिनीरुपालभत यदा ता मां राजानमवदन् । मां वदतेति स ता अपृच्छत् । तदा ता डाकिन्यो भविष्यद्वादिन्य इव तमभ्य-नन्दन् त्वं भाविनां राज्ञां पितेति । ता मम किरीटमयच्छन् तत् तु मम संततेर्न गमिष्यति । ता मम राजदण्डमयच्छन् स तु मम वंशस्य न प्रतिपत्स्यते । अस्मिन् व्यतिकरे सिध्यति मया बेङ्कस्य कुटुम्बार्थं मम मनः अपीडयं सुभगं डङ्केनमहनम् । तेषां कृते अहं मम मनःशान्तिमनाशयं ममामर्त्यमात्मानं मानववैरिणां पिशाचानामधीनमकरवम् । सर्वमेतन्मया कृतं बेङ्कस्य पुत्रान् राज्ञः कर्तुं सिंहासनं बेङ्कपुत्रसात् कर्तुम् । अहमेतस्य प्रेक्षको न भवामि । अहं तस्य दैवसंकल्पस्य प्रतिघातं करिष्यामि आमरणम्।

(प्रकाशम्) कोऽत्र ?

(सेवको घातकाभ्यां सह प्रविशति ।)

(सेवकं प्रति) बहिस्तिष्ठ यावदाकार्यसे । (सेवको बहिर्गच्छति ।)

(घातकौ प्रति) ननु ह्यः अस्माकं संभाषणमभवत् ?

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमघातकः - महाराज ! यदि भवान् प्रीतः एवमभवत् ।

मेक्बेतः - ह्यो ममोक्तानि वचनानि किं युवाभ्यां चिन्तितानि ? इदं ज्ञातव्यं युवयोर्गतदुःस्थितेः कारणं बेङ्कः । युवां तु मामनागसं निन्दथः। युवाभ्यां सह गतसंभाषणे अस्य घनं निरूपणं मया कृतम् । युवयोः सर्वः अपकारो बेङ्केन कृतः ।

प्रथमः - सत्यम् । सर्वमिदं भवतोक्तम् ।

मेक्बेतः - निस्संशयं मयोक्तम् । इतोऽधिकमपि । अत एवास्माकमिदं द्वितीयं मेलनम् । किं युवां मन्येथे आवां स्वभावेन विनीतौ सहिष्णू सर्वं च क्षमावहे इति ? किं युवाभ्यां बैबिलबोधनमेवं मनसि स्थापितं येन बेङ्कस्य तस्य कुटुम्बस्य च कृते प्रार्थनां कर्तुं शक्नुथः ? तेनैव बेङ्केन युवां मृतप्रायौ कृतौ युवयोः कुटुम्बे च दारिद्र्ये पातिते ।

प्रथमो घातकः - प्रभो ! तथा न करिष्यावः । आवां पुरुषौ ।

मेक्बेतः - आवां पुरुषाविति साधरणवचनम् । श्वानो बहुविधा भवन्ति। सर्वे ते श्वानः कथ्यन्ते । किन्तु तेषु केचित् शीघ्राः केचिन्मन्दाश्च । केचिद् रक्षकाः केचित् प्रतारिणः केचिन्मृगयायां निपुणाः । एवं पुरुषा अपि बहुविधा भवन्ति । यदि युवां पुरुषेषु अधमौ न भवथः यदि च तेषां मध्ये अर्हस्थाने तिष्ठथस्तर्हि वदतम् । युवयोः किञ्चन मुख्यकार्यं ददामि विश्वासेन येन युवयोः शत्रुर्बेङ्कः अपनीयेत युवयोर्मम च सविश्वाससम्मेलनं च स्यात् । यावत् बेङ्को जीवति तावदहं रुग्णो भवामि । तस्मिन् मृते ममारोग्यं भविष्यति ।

द्वितीयघातकः - प्रभो ! अहं लोकेन दुष्कृतः अवमतः कोपितश्च । तत् प्रतिकर्तुमहं किमपि कुर्याम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

प्रथमघातकः - अहं दुर्विधिना ततस्ततः क्षिप्तोऽस्मि । जीवितेन खिन्नोऽस्मि अतो जीवितं पणं कृत्वा किमपि कुर्यां येन जीविते वृद्धिं प्राप्नुयामथवा जीवितान्तं प्राप्नुयाम् ।

मेक्बेतः - उभावपि युवां जानीथः बेङ्को युवयोः शत्रुः ।

उभौ घातकौ - प्रभो ! सत्यम् ।

मेक्बेतः - तथा ममापि । तस्मात् सर्वदा मम मरणभयमस्ति । धरमाणः सः अनुक्षणं मां भाययति मनः पीडयति च । काममहं राजाधिकारेण धाष्ट्र्येन तस्य मरणदण्डनं कर्तुं शक्नोमि तत्कार्यसमर्थनहेतूनां प्रकटनं ममानावश्यकं च तथापि सुकारणैर्मया तन्न कर्तव्यम् । मम बेङ्कस्य च साधारणमित्राणि सन्ति । यदि स्वयमहं तस्य मरणं करिष्यामि मम तेषां मित्राणां मैत्री नशिष्यति । तस्मात् तदहं नेच्छामि । अनेन कारणेन अन्यैश्च कारणैरस्मिन् कार्ये युवयोः सहायतामभ्यर्थये येनेदं कार्यं लोकाद् गोप्यं भवति ।

द्वितीयो घातकः - प्रभो ! यद् भवानादिशति तत् करिष्यावः ।

मेक्बेतः - युवयोर्वचनानि कार्यनिर्वहणोत्साहं प्रकटयन्ति । होरान्तरे वक्ष्यामि कुत्र निगूढाभ्यां युवाभ्यां स्थातव्यम् । कदा कस्मिन् क्षणे कर्तव्यमित्यपि वक्ष्यामि। हत्या अद्य रात्रौ राजभवनात् किञ्चिद्दूरे कर्तव्या। इदं मनसि स्थापयितव्यं मयि कस्यापि संदेहो न भवतु । बेङ्केन सहास्य पुत्रः फ्लेयांसश्च गच्छति । पित्रा सह तस्य च हत्या ममावश्यकी । अस्मिन् कर्मणि स्खलनं वा प्रमादो वा न भवतु । सम्यक् सह निश्चयं कुरुतम् । शीघ्रमहं पुनरागच्छामि ।

उभौ घातकौ - प्रभो ! आवां कृतनिश्चयौ ।

 In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - दुर्गस्याभ्यन्तरे प्रतीक्षमाणौ तिष्ठतम् । शीघ्रमाकारयामि ।

(घातकौ निष्क्रान्तौ ।)

विधानं कल्पितम् । बेङ्क ! यदि मरणानन्तरं तव स्वर्गगमनसुकृतमस्ति तदद्यैव भविष्यति नक्तम् ।

(मेक्बेतो निर्गच्छति ।)

तृतीयः अङ्कः द्वितीयं दृश्यम् ।

(राजसौधम् । श्रीमती मेक्बेतः सेवकश्च प्रविशतः ।)

श्रीमती मेक्बेतः - अपि बेङ्को गतः ?

सेवकः - आर्ये ! गतः । अद्यैव सायं प्रत्यागच्छति ।

श्रीमती मेक्बेतः - राजानं वद तेन सह किञ्चिदालपितुमिच्छामि यदि समयोऽस्ति ।

सेवकः - आर्ये ! तथा । (सेवको निष्क्रान्तः ।)

श्रीमती मेक्बेतः - (स्वगतम्) अस्माभिः किमपि न प्राप्तं प्रत्युत सर्वं नष्टम् । यदस्माकं काङ्क्षितं तत् प्राप्तं नाम । किन्तु मनसः शान्तिस्तृप्तिर्वा अप्राप्ता । सम्प्रत्यावां मनसः अशान्त्याक्रान्तौ । यदावाभ्यां प्राप्तं तन्नश्येत्। मृतस्य डङ्केनस्य मनः शान्तम् । आवयोर्मनः क्षुब्धम् ।

(मेक्बेतः प्रविशति ।)

किमिदं प्रभो किमर्थमेककस्तिष्ठसि ? अथवा किमर्थं विषादमयश्चिन्तयन् भवसि ? सदा डङ्केनं चिन्तयसि । स मृतः । तेन मृतेन सह तं प्रति तव चिन्तनं च नश्यतु । त्वं तु न तथा करोषि । चिकित्सितुमशक्या रोगाः सोढव्याः । यत् कृतं तत् कृतमेव । तदकृतं न भवति ।

 In Public domain. Digitization Muthulakshmi Research Academy

मेक्बेतः - यदि सर्पस्य स्वल्पो घातः क्रियते विसृज्यते च तत् कार्यमस्मत्कृतवद् भवति । स कदापि पुनरागत्य दशेत् । भवतु । सर्वमिदं लोकनिर्माणं शकलितं भूत्वा पततु स्वर्गो भूमिश्च क्षयताम् । आवाभ्यां शाश्वतभयेन न जीवितव्यम् । भयंकरस्वप्ना ये इदानीं भवन्ति ते प्रतिरात्रि आवां न व्याकुलयन्तु । यो राजा मया हतः स शान्तिमनुभवति। मया सिंहासनं प्राप्तं शान्तिस्तु मम शून्या । सर्वदा मम मनः संदेहमयम्। मृतानां प्रति ममासूया भवति । स डङ्कनः पर्याकुलजीवितमतिक्रम्य चैत्यशिलाया अधस्तात् परमां प्रशान्तिं प्राप्तः । विश्वासघातकेन यत् कर्तुं शक्यते तत् तस्य मया कृतम् । घातकस्य छुरिका विषं वा राज्यसभ्यस्य कूटप्रबन्धो वा विदेशशत्रूणां रणप्रसंगो वा तमिदानीं किमपि न करोति ।

श्रीमती मेक्बेतः - आर्यपुत्र ! दर्शनीयो भव सप्रमोदश्च । नक्तमतिथीनां मध्ये सोल्लासो भव ।

मेक्बेतः - प्रिये ! एवं मया कर्तव्यम् । आशये त्वमप्येवं करिष्यसि। सम्प्रत्यावयोः स्थितिः क्षेमरहिता । आवयो राजपदवीं रक्षितुं नत्वा मिथ्याप्रियवचनानि वक्तव्यानि । मनोगतान् संदेहान् भयानि च धृतमन्द-हासमुखाभ्यामावृणुवः ।

श्रीमती मेक्बेतः - ईदृशं चिन्तनं त्वया त्यक्तव्यम् ।

मेक्बेतः - प्रिये मम मनसि चिन्ताः प्रवर्तन्ते या वृश्चिका इव मां विध्यन्ति । त्वं जानासि बेङ्कः पुत्रश्च जीवतः ।

श्रीमती मेक्बेतः - तौ मरणधर्माणौ मानवौ । अधृष्यौ न स्तः ।

मेक्बेतः - अस्मिन् चिन्तने आश्वासनमस्ति तौ धृष्याविति । यावज्जतुका

In Public domain. Digitization Muthulakshmi Research Academy

दुर्गस्थवनानि परित उड्डयन्ते रात्रिप्रारम्भे यावच्च डाकिनीनां नायिका हेकेटा स्वमन्त्रशक्तिं प्रयुङ्क्ते तावत् पूर्वमेव किञ्चन नृशंसं कार्यं करिष्यते ।

श्रीमती मेक्बेतः - किं करणीयम् ?

मेक्बेतः - वरं त्वं न जानासि यावत् कृतं कार्यं प्रशंसितुमवसरं प्राप्स्यसि । इदानीं हे रजनि! आगच्छ । लोकमन्धकारेण बधान। दयावद् दिनं रहस्यहत्यां मा पश्यतु या मम शत्रुमपनेष्यति यः शत्रुर्मां शश्वद्भये स्थापयति । कान्तिः क्षयति । काकः अटव्यां नीडं प्रति उड्डयते। कार्यशीलाः सुप्राणिनो दिने जागरूका इदानीं निद्रावशं गच्छन्ति। रात्रिसंचारिणः कुप्राणिन आहारमन्विष्यन्ति । मम वचनं त्वां विस्मापयति। तथापि सहिष्णुर्भव । आवाभ्यां दुष्टविधानमारब्धम् । प्राप्तं रक्षितुं दुष्टमेव मार्गमनुसरावः । इदानीं मया सहागच्छ ।

(निष्क्रान्तौ ।)

तृतीयः अङ्कः : तृतीयं दृश्यम् ।

(राजसौधसमीपे उपवनम् । त्रयो घातकाः प्रविशन्ति ।)

प्रथमो घातकः - केनोक्तस्त्वमावामनुसरसि ?

तृतीयो घातकः - मेक्बेतेन ।

द्वितीयो घातकः - इममविश्वसितुमावयोः कारणं नास्ति । एषोऽपि आवामिवानुशासितो दृश्यते ।

प्रथमः - तर्हि आवाभ्यां सहात्र तिष्ठ । निर्गच्छतो दिनप्रकाशस्यावशेषाः सन्ति पश्चिमाकाशे इदानीमपि । प्रयाणिका अश्वान् त्वरयन्ति अन्धकारा-

 In Public domain. Digitization Muthulakshmi Research Academy

वरणात् पूर्वं पथिकाश्रमं प्राप्तुम् । स पुरुषो यं वयं प्रतीक्षामहे सम्प्रति सन्निहितो भवति ।

तृतीयः - शृणु । अहमश्वान् शृणोमि ।

बेङ्कः - (नेपथ्यात्) कोऽत्र ? दीप आनीयताम् ।

द्वितीयः - एष सः । अन्ये सर्वे अतिथयो दुर्गं प्रविष्टा राजभवनं गन्तुम् ।

प्रथमः - अश्वास्त्यक्ताः ।

तृतीयः - इत एकमैलदूरं गन्तव्यम् । बेङ्कश्चान्ये इवेतो राजभवनं पद्भ्यां गच्छति ।

द्वितीयः - दीपः । दीपः ।

तृतीयः - एष सः ।

प्रथमः - सिद्धो भव कार्यस्य ।

(बेङ्कः उल्मुकहस्तः फ्लेयंसश्च प्रविशतः ।)

बेङ्कः - नक्तं वृष्टिर्भविष्यति ।

प्रथमः - भवतु ।

(त्रयो घातका बेङ्कमभियुञ्जते ।)

बेङ्कः - अहो द्रोहः । पलायस्व पुत्र फ्लेयंस । पलायस्व । त्वं मम मरणं प्रतिकुर्याः । हे क्रीता घातकाः ! (स म्रियते । फ्लेयंसः पलायितः।)

तृतीयः - केन दीपो निर्वापित्तः ?

प्रथमः - आक्रमणकाले दीपो मास्तु इति खलु ।

तृतीयः - एको हतः । पुत्रः पलायितः ।

द्वितीयः - कार्यस्य श्रेयान् भागः अस्माभिर्न कृतः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः - गच्छामः । मेक्बेतं वक्ष्यामः कार्यस्य कियान् भागः कृतः ।

(निष्क्रान्ताः ।)

तृतीयः अङ्कः : चतुर्थं दृश्यम् ।

(राजभवने सभाशाला । भोजनोत्सवः सिद्धः । मेक्बेतः श्रीमती मेक्बेतः रासः लेन्नक्सः प्रभवः परिचराश्च प्रविशन्ति ।)

मेक्बेतः - भवन्तो जानन्ति । स्वस्वप्रतिष्ठाश्रेणिमनुसृत्य स्थानेषु उपविशेयुः । तथा उपविशन्तु । भवतां हृद्यं स्वागतं कर्तुं मामनुजानन्तु ।

प्रभवः - महाराजस्य धन्यवादान् वदामः ।

मेक्बेतः - अहं युष्माभिः सह सम्मेलनं गच्छामि नम्र आतिथ्यकर्ता प्रवर्ते । राज्ञी स्वस्या आसने उपविशति । यथासमयं वयं तामभ्यर्थयामः स्वागतं भाषितुम् ।

श्रीमती मेक्बेतः -आर्य ! मम स्थाने भवान् मित्राणां स्वागतं वदतु । सत्यमहं पूर्णेन मनसा तेषां स्वागतं करोमि ।

मेक्बेतः - पश्य । ते धन्यवादैः प्रतिवदन्ति । यथा तव स्वागतं तथा तेषां धन्यवादाश्च हृद्याः सन्ति । अतो युष्माकं सौजन्यं परस्परं प्रत्यर्पितम् । अत्राहं परिषदः द्वयोः समपार्श्वयोर्मध्ये उपविशामि । युष्माकं विनोदः स्वैरं प्रवर्तताम् ।

(प्रथमो घातको द्वारि दृश्यते ।)

सम्प्रति वयं चषकैर्मद्यं पिबामः एकैकः क्रमेण ।

(द्वारि स्थितस्य प्रथमघातकस्य समीपं गच्छति ।)

 In Public domain. Digitization Muthulakshmi Research Academy

तव मुखे रक्तमस्ति ।

घातकः - बेङ्कस्य रक्तमेतत् ।

मेक्बेतः - अहं प्रीतोऽस्मि रक्तं तव मुखेऽस्ति नेदानीं तस्य रक्तनालेषु। अपि स हतः?

घातकः - प्रभो ! तस्य कण्ठं खण्डितम् । मयैव तत् कृतम् ।

मेक्बेतः - त्वं श्रेष्ठो घातकः । स ततोऽप्यधिकश्रेष्ठघातको भवेत् यः फ्लेयंसं प्रति च तत् कुर्यात् । यदि त्वया तदपि कृतं त्वं घातकानां श्रेष्ठो भविष्यसि ।

घातकः - महाराज! स आत्मानं रक्षित्वा पलायितः ।

मेक्बेतः - तर्हि मम व्यग्रता पुनरायाति । यदि स च हतः स्यात् मम संतृप्तिः पूर्णा स्यात् । तदाहं शिलाकठिनः स्याम् । प्रसरद्वायुवत् स्वैरी स्याम् । इदानीमहमावृतोऽस्मि । बद्धोऽस्मि । बहुविधैर्दुष्टसंदेहैर्भयैश्च निगडितोऽस्मि । भवतु । अपि बेङ्कः समाप्तः ?

घातकः - प्रभो ! स पार्श्वोपकुल्यायां पतितः । विंशतिस्तीक्ष्णाः क्षतयस्तस्य शिरसि सन्ति यासामेकाप्यल्पा क्षतिस्तं हन्तुमलम् ।

मेक्बेतः - तदर्थं मम धन्यवादाः । वृद्धो राजद्रोही मृतः पतितः । युवा यः पलायितः स भयजनकोऽपि अधुना क्लेशं न कुर्यात् । गम्यतामिदानीं श्वः पुनर्भाषिष्यामहे ।

(घातको निष्क्रान्तः ।)

श्रीमती मेक्बेतः - आर्यपुत्र ! भवानतिथीन् नाभिनन्दति । यद्यातिथ्यकर्ता पुनः पुनरभिनन्दनानि वदन् न भवति केवलं भक्षणमेव भवति तर्हि भोजनोत्सव उत्सवो न भवति भोजनशालायां विक्रीतं भोजनमिव भवेत्।

In Public domain. Digitization Muthulakshmi Research Academy

यदि भक्षणमेव कर्तव्यं तर्हि वरं गृहे खादामः । अतः अतिथिमहाशयैः सहाभिनन्दनादिसौम्यभाषणं प्रवर्तताम् ।

मेक्बेतः - प्रिये ! काले मम कर्तव्यं ज्ञापितम् । सम्प्रति सर्वेषां सुभोजनं भवतु भुक्तस्य सुपरिणामस्तमनु उत्तममारोग्यं च ।

लेन्नक्सः - कृपया महाराज उपविशतु ।

(बेङ्कस्य भूतं प्रविशति । मेक्बेतस्यासने उपविशति ।)

मेक्बेतः - अस्यां शालायामस्मद्राज्यस्य सर्वे सम्मान्या एकत्र समाविष्टाः स्युर्यदि मान्यो बेङ्क एक उपस्थितः स्यात् । अनुपस्थानस्य कृते तमहं निन्देयम् । मार्गे केनापि प्रमादेन स निरुद्ध इति नाहं चिन्तयामि ।

रासः - तस्यानुपस्थितिस्तं दोषिणं करोति अभ्युपगमभङ्गात् । अपि भवानुपविशति महाराजसन्निधानेनास्माननुगृह्णाति च?

मेक्बेतः - इदानीं रिक्तमासनमत्र नास्ति ।

लेन्नक्सः - अत्रास्ति भवत्कृते निर्दिष्टम् ।

मेक्बेतः - कुत्र ?

लेन्नक्सः - प्रभो ! अत्र । किन्तु किमर्थं भवान् चकितः स्पन्दते?

मेक्बेतः - कोऽत्र मां छलयति ?

प्रभवः - किं वदसि महाप्रभो !

मेक्बेतः - (भूतं प्रति) त्वं वक्तुं न शक्नोषि मयैतत् कारितमिति । मां पश्यन् तव रक्ताक्तकेशान् मा कम्पय ।

रासः - आर्याः । उत्तिष्ठेम । राजा अस्वस्थः ।

श्रीमती मेक्बेतः - आर्याः ! उपविशत । मम पतिरसकृदेवं भवति यौवनकालादपि । एष चलदावेशः। क्षणेषु स स्वस्थो भवति । यदि तं

 In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यवहिता भवथ स आत्मानमपराद्धं मन्येत। भोजनकार्यं प्रचलतु । तं प्रति तु न पश्यत । (मेक्बेतं प्रति अपवार्य) कथं त्वमात्मानं मनुष्यं व्याहरसि एवं प्रवर्तमानः ?

मेक्बेतः - (अपवार्य) अथकिमहमस्मि मनुष्यः शूरश्च । किन्तु यद् दृश्यमिदानीमहं पश्यामि तद् भूतमपि भाययति ।

श्रीमती मेक्बेतः - (अपवार्य) इदमसंबद्धम् । सर्वमिदमूहोद्भूतभयानां प्रतिच्छायारूपम् । डङ्कनस्य हत्यायाः पूर्वमपि त्वमेवमेव किमपि पश्यामीत्यूहित्वा भीतोऽभवः । अहो तव मनसश्चापल्यं दौर्बल्यं च । सर्वाणि तानि ऊहितभयान्यसत्यानि । तादृशान्युत्पद्यन्ते शीतकाले अग्निपार्श्वे पौत्रैः सह स्थितया पितामह्या कथितासु कथासु । तव प्रवर्तनं लज्जावहम् । किमर्थमाश्चर्यमुखो भवसि ? त्वं केवलमासनं पश्यसि ।

मेक्बेतः - पश्य । अहं प्रार्थये । पश्य । किमिदानीं वदसि ? (भूतं प्रति) किमर्थं मम भीतिर्न भवतु ? शिरःकम्पेन सूचय । यदि शक्नोषि वद । यदि समाधयो निखातानि मृतशरीराणि प्रतिप्रेषयेयुस्तदा तानि पक्षिणो भक्षयेयुः ।

(भूतमदृश्यम् ।)

श्रीमती मेक्बेतः - कथं स्वं पौरुषं विस्मृत्य ऊहवशो भवसि?

मेक्बेतः - अहमत्र स्थितोऽस्मीति यथा सत्यं तथाहं तद् भूतं पश्यामीति च ।

श्रीमती मेक्बेतः -बत । त्वया लज्जितेन भवितव्यम् ।

मेक्बेतः - पुराकालेषु बहुः रक्तस्राव आसीत् । पश्चान्मानवधर्माः समाजं सौम्यतरमकुर्वन् । तथापि ततः पश्चाच्च श्रवणभयंकरा हत्याः

In Public domain. Digitization Muthulakshmi Research Academy

कृताः । पुराकाले यदा कस्यचिन्मस्तिष्कं ताडितं शिरसो निष्कासितं च तदा स समाप्तः । अद्यत्वे हता मनुष्याः समाधिभ्यः शिरसि विंशत्या क्षतिभिः सह पुनरुत्तिष्ठन्ति अस्मानासनेभ्यः अपसारयन्ति तान्यधितिष्ठन्ति च । इदं कस्या अपि हत्याया अधिकं विचित्रम् ।

श्रीमती मेक्बेतः - आर्यपुत्र ! मान्यास्तवातिथयस्त्वां प्रतीक्षन्ते ।

मेक्बेतः - अहो मम विस्मरणम् ! हे सुहृदः ! मम प्रवर्तनेन विस्मयो भवतां मास्तु । मम कश्चिद् विचित्रो रोगोऽस्ति । ये मां बाढं जानन्ति ते न गणयन्ति । सर्वे भवन्तः प्रणयमारोग्यं चानुभवन्तु । एषोऽहमुपविशामि। चषकपूर्णं मद्यं दीयताम् । इदानीमहं सर्वेषामुपस्थितानामारोग्यमभिलषन् पिबामि अनुपस्थितस्य बेङ्कस्य च येनाहं वियुक्तः । अहमभिलषामि सः अत्रास्तु इति । तस्य चारोग्यस्य कृते पातुं मम तृष्णास्ति । युष्माकं सर्वेषां कृते च । इदानीमहं सर्वेषां भवतां शुभमाकाङ्क्षामि ।

प्रभवः - वयमस्माकं नियोगान् सम्यक् करिष्यामः भवता सह सर्वेषां शुभमभिलषामश्च ।

(भूतं पुनरायाति ।)

मेक्बेतः - इतोऽपसर । मम दर्शनादपसर । तव समाधिस्त्वां पुनरप्यावृणोतु । तवास्थिषु जीवितरसो नास्ति । कोष्णं रक्तं तव नालीषु न प्रवहति । विवृतनयनाभ्यां मां पश्यसि । किन्तु तव मृतनेत्रयोर्ज्ञानयुता दृष्टिर्नास्ति ।

श्रीमती मेक्बेतः - मान्याः प्रभवः । सर्वमिदं राज्ञो दुर्भाग्यप्रवर्तनविधानम्। इदमेतदुत्सवकालविनोदं भञ्जयति ।

मेक्बेतः - यद् वीरकृत्यं मनुष्यस्य शक्यमस्ति तदहं कर्तुं साहसं

 In Public domain. Digitization Muthulakshmi Research Academy

कुर्याम् । रष्यादेशीयः कर्कशो भल्लूको वा सहजकवचवान् भयंकरः खड्गमृगो वा इरानदेशीयो व्याघ्रो वा कोऽपि भवतु बेङ्कादन्यो मम नाड्यः स्थिरा भवन्ति । अथवा पूर्ववज्जीवन् आयाहि । मां योद्धुमाकारय। कस्मिन्नपि विविक्तप्रदेशे उभौ खड्गहस्तौ भवाव । यदि मयि अणुमात्रमपि कम्पनं पश्येः तर्हि मां बालिकाहस्तगतां पाञ्चालिकां कथय । अपेहि भयंकरपिशाच । निर्गच्छ निर्देहभूत । (भूतमदृश्यं भवति ।) त्वं निर्गतः। पुनश्चाहं यथावदस्मि । सर्वे प्रशान्ता उपविशन्तु । मान्या अहमभ्यर्थये ।

श्रीमती मेक्बेतः - त्वया विनोदोत्साहो निष्कासितः । आश्चर्यकर-व्याकुलतया अतिथिसमावेशो भञ्जितः ।

मेक्बेतः - इदं मम विस्मयं जनयति यद् यूयमभीतास्तत् पश्यथ यत् पश्यन्नहं बिभेमि ।

रासः - प्रभो ! किं तद् दृश्यम् ?

श्रीमती मेक्बेतः - कृपया तेन सह तदुद्दिश्य मा वद । तस्यास्वास्थ्यं वर्धते । संभाषणं तमुत्तेजयति । आवां सपदि भवतां शुभां रात्रिमभिलषावः। श्रेणिमनुसृत्य निर्गमनक्रमो मास्तु । सर्वे सपदि केनापि क्रमेण निर्गच्छन्तु।

लेन्नक्सः - शुभास्तु रात्रिः । महाराजस्यारोग्यं वर्धताम् ।

श्रीमती मेक्बेतः - अनुकूला शुभा रात्रिर्भवतु युष्माकम् ।

(मेक्बेतं श्रीमतीं मेक्बेतं च विहाय सर्वे निर्गताः ।)

मेक्बेतः - रक्तं रक्तेनैव प्रतिक्रियते । उच्यते हतस्य रक्तमधिकं रक्तमपेक्षते प्रतिकर्तुम् । हत्यां प्रकटयितुं समाधिशिलाश्चलिताः किल । निन्दितुं वृक्षा व्याहरन् किल। दैवज्ञा जन्तूनां पक्षिणां च चेष्टाभिर्ज्ञात्वा रहस्यहत्यां प्राकटयन् किल । कः काल इदानीम् ?

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमती मेक्बेतः - रात्रेः प्रभातस्य च संध्या वर्तते ।

मेक्बेतः - मया राज्ञा आदिष्टोऽपि मेक्डफः अत्रोपस्थातुं निराकरोति। अत्र तवाभिप्रायः कः ?

श्रीमती मेक्बेतः - अप्याकारणा प्रेषिता ?

मेक्बेतः - परोक्षं श्रुतम् । इदानीं तमाकारयामि । सर्वेषां प्रभूणां गृहेषु मया सेवकाः स्पशाः कृता धनेन । श्वः प्रातरेवाहं तास्तिस्रो डाकिनीर्गच्छामि। ताभिरहमधिकं वक्तव्यः । अहं निश्चितोऽस्मि । अहं ज्ञातुमिच्छामि किं भविष्यति । तदवश्यं मया ज्ञातव्यम् । प्रथमं मम क्षेमं रक्षितव्यम् । अहं रक्तनद्यां दूरं प्रविष्टोऽस्मि । इदानीं पुरोगमनं कष्टं पश्चाद्गमनं च कष्टम् । मम मनसि विचित्राः कार्यक्रमाः सन्ति यानाचरिष्यामि । तेषामाचरणविधानविस्तृतपरिशीलनस्य समयो नास्ति । शीघ्रं कर्तव्याः ।

श्रीमती मेक्बेतः - तव निद्रा आवश्यकी । निद्रा सर्वान् पुष्णाति ।

मेक्बेतः - आगच्छ निद्रां गच्छावः । महत् कार्यं मया संकल्पितम्। तादृशेषु कार्येषु ममानुभवो नास्ति । कालेनानुभवो भवति । क्रूरकार्येषु अहमिदानीमनुभवरहितो युवास्मि । (निष्क्रान्तौ ।)

तृतीयः अङ्कः पञ्चमं दृश्यम् ।

(वनभूमिः । तटित्प्रकाशः अशनिपातश्च । तिस्रो डाकिन्यः प्रविशन्ति । मायादेवीं हेकेटामुपगच्छन्ति ।)

प्रथमा डाकिनी - अयि हेकेटे ! कुपिता दृश्यते भवती ।

हेकेटा - किमहमकारणं कुपितास्मि प्रगल्भासु साहसिकीषु वृद्धासु युष्मासु ? कथं युष्माभिर्निगूढेषु प्राणान्तकेषु च विषयेषु मेक्बेतेन सह

 In Public domain. Digitization Muthulakshmi Research Academy

व्यवहारः कृतः ? अहं खलु देवतास्मि या मायामन्त्रान् दुष्प्रवर्तनकल्पनानि च नियच्छामि । किमहं कदाप्याहूतास्मि युष्माभिरस्मिन् व्यवहारे भागं ग्रहीतुं येनास्माकं मायाशक्तिः प्रदृश्येत? अयं विषयो निकृष्टतरः क्रियतेऽनेन सत्येन यद् युष्माभिरिदं सर्वं कृतं कस्यचिद् रोषपूर्णस्य द्विष्टस्य भूतानां प्रति दुष्टसंकल्पस्य च कृते यः सर्वान्यमनुष्य इव केवलं स्वार्थपरो यस्य च मायाप्रयोगेषु सत्या आसक्तिर्नास्ति । युष्माकं प्रमादस्येदानीं निष्कृतिः कार्या । गच्छतेदानीं प्रातर्मां नरकगर्तस्थले समाविशत । तत्र मेक्बेत आयास्यति स्वस्य भविष्यं ज्ञातुम् । अतः स्थालीः सिद्धाः कुरुत युष्माकं मायासम्मोहनानां निगूढमन्त्राणां च कृते यच्चान्यदावश्यकम् । अहमिदानीमाकाशे उड्डीय गच्छामि । अद्य रात्रौ मया घोरं मारणं कर्तव्यम् । किं च पूर्वाह्णे एव मम महान्ति कार्याणि सन्ति । चन्द्ररेखामाश्रित्य मुख्य एको रसबिन्दुर्लम्बते । यावत् स भूमौ न पतति तावत् तं ग्रहीष्यामि । मम मन्त्रप्रयोगेन स बिन्दुः शक्तिशाली भविष्यति । ततो मायाभूतान्युत्पत्स्यन्ते यैस्तस्य मनःकल्पनानि प्रभावितानि भविष्यन्ति स च शीघ्रं विनाशं प्रति चोद्यते । स दिष्टस्य प्रतीपं चेष्टिष्यते मृत्योर्न भेष्यति विज्ञानपरिमितीर्दैवबोधनानि साधारणमनुष्यभयानि चातिरिच्याशावान् भविष्यति । किं च सर्वा यूयं जानन्ति आत्मरक्षणं प्रति असत्यभावना मानवजातेर्महत्तमः अपायः ।

(बहिः संगीतं श्रूयते । आयाहि आयाहीति कश्चिद् गायति।)

किन्तु शृणु । श्रूयते ममाह्वानम् । इदं तद् लघु भूतं यन्मम सुपरिचितं यच्च तुषारावृते मेघे उपविश्य मां प्रतीक्षते ।

(हेकेटा अन्तर्हिता ।)

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमा डाकिनी - आगच्छ। शीघ्रं गच्छामः। हेकेटा शीघ्रं प्रत्यागच्छति।

(निष्क्रान्ताः।)

तृतीयः अङ्कः : षष्ठं दृश्यम्।

(फोर्रेस्से राजभवनम्। लेन्नक्सः अन्यश्च प्रभुः प्रविशतः।)

लेन्नक्सः - यद्यत् त्वं पूर्वं मयोक्तः तत् तत् तवाभिप्रायानुगुणमस्ति संप्रति तमभिप्रायं निश्चिनुयाः। किन्तु यथाहं वदामि अत्र व्यवहारा विचित्रं प्रचाल्यन्ते। मेक्बेतो मान्याय डङ्केनाय महतीं दयां प्राकाशयत्। निश्चयं डङ्केनो मृतः। वीरो बेङ्को नक्तं पादचारेणागच्छत्। कथ्यते च पुत्रः फ्लेयंसस्तमहन्। स च पलायितः। दृश्यते तस्मिन् घटने नीतिः नक्तं पादचारी न गच्छतु। माल्कमो डोनाल्बेनश्च पितरं जघ्नतुः। क्रूरं कर्मैतत्। भृशं शोचनीयं सत्यम्। अनेनापराधेन मेक्बेतस्य मनसि प्रघातः कृतस्तत्क्षणं च स धार्मिककोपेन तत्र स्थितौ द्वावपि सेवकावपराधिनौ जघान यौ पानमत्तौ निद्रितौ। उदारस्य खलु स उत्साहः। विवेकयुतं च तत् कार्यं यतो निद्रावशौ तौ सेवकौ स्वकृतं हत्यापराधं नाङ्गीकुर्यातां तेन केषाञ्चन कोपो जायेत। अतो दृश्यते मेक्बेतेन सर्वं विवेकेन निरुह्यते। यदि डङ्केनस्य पुत्रौ मेक्बेतस्याधीनौ स्यातां तर्हि ताभ्यां ज्ञातं स्यात् पितृघातकयोः का गतिर्भवेत्। सुदैवेन डङ्केनस्य पुत्रौ मेक्बेताधीनौ मा भूताम्। तथैव फ्लेयंसश्च। किन्तु अस्माभिर्निश्शब्दं स्थातव्यम्। श्रूयते मेक्डफो राज्ञः अनुग्रहादपगतो यतः स ऋजुभिर्वाग्भिर्भाषते निष्ठुरशासनस्य भोजनोत्सवमगतश्च।

मेक्बेतःIn Public domain. Digitization Muthulakshmi Research Academy
आर्य ! अपि भवान् वक्तुं शक्नोति सम्प्रति मेक्डफः क्व वसति?

प्रभुः - जन्मना राज्याधिकारो भवति माल्कमस्य । मेक्बेतेन स आक्रान्तः । डङ्केनस्य पुत्रः स माल्कम डङ्गलन्डस्य राज्ञ आस्थानेऽस्ति। सुराजा एड्वर्डः सौजन्येन तमगृह्णात् । भाग्यविपर्ययेण गौरवं न हीयते । मेक्डफस्तत्र गतः । नार्तम्बर्लेन्डप्रभुं वीरं सीवर्डं च सहायौ प्रेषयितुमर्थयितुम् । अनयोर्वीरयोः साहाय्येनास्मिन् प्रयत्ने उपरिष्टाद् भगवत आशीर्भिश्च स तत् कर्तुं शक्ष्यति येन पुनर्वयं शान्तिं सुरक्षितरात्रिविश्रान्तिं च प्राप्स्यामः । अस्माकं महाभोजनोत्सवाश्च भवेयुर्विना रक्तसिक्तकृपाणप्रयोगान् । राज्ञो भक्तियुतसेवां कृत्वा दाक्षिण्येन बहुमानान् विन्देम । यद्यदिदानीमपेक्षामहे तत्तत् लप्स्यामहे । अनया वार्तया भृशं कुपितो मेक्बेतो युद्धाय योजनानि कुरुते ।

लेन्नक्सः - अपि तेन मेक्डफायागमनादेशपत्रं प्रेषितम् ?

प्रभुः - प्रेषितम् । तस्योत्तरं प्राप्तं प्रभो नाहमागच्छामीति । मेक्बेतेन प्रेषितः कोपस्वभावः स दूतः अस्योत्तरस्य कृते शोचिष्यसीति अश्राव्यं वदन् प्रत्यागतः ।

लेन्नक्सः - तस्मात् मेक्डफः सावधानो भवतु । मेक्बेतादात्मानं सुदूराद् रक्षतु विवेकेन सह । अहमाशासे काचिद् देवता इङ्गलीषराजस्यास्थाने गगनात् पतित्वा मेक्डफस्याभ्यर्थनां वदतु मेक्डफस्यागमनात् पूर्वमेव सहायता आयातु क्रूरस्य शूरापसदस्य पादयोरधस्तात् क्लिश्यमानमस्माकं देशं रक्षतु ।

प्रभुः - मेक्डफो विजयतामित्यहं प्रार्थये ।

(निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः अङ्कः प्रथमं दृश्यम् ।

(गुहामध्ये तप्यमानं बृहत्पात्रम् । तिस्रो डाकिन्यः प्रविशन्ति ।)

प्रथमा डाकिनी - रेखितचर्मा मार्जालो
म्या म्या म्या इत्याक्रोशत् ।

द्वितीया डाकिनी - घुर्घुरशब्दं शल्यसूकरः
त्रिश्चकार पुनरपि च सकृत् ।

तृतीया डाकिनी - सखी ममाहो दूरादाक्रोशति
काल आगतः काल आगतः ॥

(ततः प्रविशति हेकेटा ।)

हेकेटा - वयमत्र नृत्यामः ।

(संगीतानुसारेण ताश्चतस्रश्च नृत्यन्ति । हेकेटा निष्क्रान्ता। मेक्बेतः प्रविशति ।)

मेक्बेतः - हे मध्यरात्ररहस्यसंचारिण्यो वृद्धा डाकिन्यः। किं कुरुथ?

सर्वाः - नामरहितं कार्यम् ।

मेक्बेतः - अहमादिशामि । युष्माकं निगूढमायाशक्तयः सन्ति । यया कयापि वा शक्त्या भाविनं व्यतिकरं वदेत नाम । मम तु प्रश्नान् समाधत्त। अन्तर्गतया शक्त्या आकाशात् पवनान् भवनेषु प्रयुङ्ध्वे । तैरेव पवनैः समुद्रतरङ्गान् संचाल्य नावो ग्रसेत । सस्यं क्षेत्रे पातयेत । वृक्षानुन्मूलयेत । स्खलितान् दुर्गान् तद्रक्षकाणां शिरस्सु अवपातयेत । एवं सर्वं दृश्यमानं जगद् व्याकुलितराशिर्भवतु तथापि मम प्रश्नान् समाधत्त ।

 In Public domain. Digitization Muthulakshmi Research Academy

प्रथमा डाकिनी - वद ।

द्वितीया डाकिनी - प्रश्नान् वद ।

तृतीया डाकिनी - वयमुत्तराणि दद्मः ।

प्रथमा डाकिनी - वद । तव प्रश्नान् वद । किं समाधानान्यस्मन्मुखात् श्रोतुमिच्छसि उत दुष्टभूतात् प्राप्तुमिच्छसि यद् वयं सेवामहे?

मेक्बेतः - आकारय तवेश्वरीः । अहं ताः पश्यामि ।

(तटिद्भासः । अशनिपातशब्दश्च ।)

प्रथमा डाकिनी - ममेश्वर्या प्रभाविताहं वदामि । मेक्बेत ! मेक्बेत ! मेक्डफात् फैफस्य थेनात् सावधानो भव । अलं मम कथनेन । अहं गच्छामि । (निष्क्रान्ता ।)

मेक्बेतः - उपकृतोऽस्मि अनुशासनेन । कापि स्यास्त्वम् । भयं यन्मम हृदयं दशति तत् तव ज्ञातम् । अपरं च पृच्छामि ।

द्वितीया डाकिनी - ममेश्वर्या प्रभाविताहं वदामि । मेक्बेत ! मेक्बेत! रक्तपिपासुर्भव । धैर्यवान् भव । कृतनिश्चयो भव । यस्त्वां हिंसितुमिच्छति तं प्रति निर्भयः प्रतियुध्येथा यतः कोऽपि स्त्रीजातस्त्वां न हिंस्यात् । (निष्क्रान्ता ।)

मेक्बेतः - हे मेक्डफ ! अथ त्वामुपेक्षे । अनया भविष्यद्वाण्या मम त्वत्तः किमपि भयं नास्ति । तथापि त्वां हनिष्यामि । संशयो मास्तु । पुनः पृच्छामि ।

(विद्युत्प्रकाशः । अशनिपातश्च ।)

तृतीया डाकिनी - ममेश्वर्या प्रभाविताहं वदामि । सिंहवद् धैर्यवान् भव। अहंकारपूर्णो भव । कः पीड्यते के त्वामपकर्तुं कूटरचनां कुर्युरिति

In Public domain. Digitization Muthulakshmi Research Academy

नावेक्षस्व । मेक्बेतो न पराजीयते यावद् बिर्नेमवनं चलित्वा तं प्रति नागच्छेत् उन्नतडन्सिनेनपर्यन्तम् । (अन्तर्हिता।)

मेक्बेतः - तन्नैव भविष्यति । उन्मूलितमूला भूत्वा वृक्षाः कथं चलेयुः? अरण्यं कथं गच्छेत्? अनुकूलानि शकुनानि । सर्वमिदं मदर्थं भद्रम्। मेक्बेतः साधारणजीवितं जीवति बहुकाले गते सहजमरणं गमिष्यति। वयसा तद् भविष्यति यतो मनुष्यो मरणधर्मा । किन्तु मम मनः अन्यदेकं ज्ञातुमुत्कण्ठते । हे डाकिन्यः । पुनरागच्छत। इमं प्रश्नं समाधत्त । अपि बेङ्कस्य पुत्राः स्काट्लण्डस्य राज्यं कदापि प्राप्स्यन्ति?

(प्रथमा डाकिनी पुनः प्रविशति ।)

प्रथमा डाकिनी - ममेश्वर्या प्रभाविताहं वदामि । अस्माभिर्बहूक्तम्। अपरं ज्ञातुं मा प्रयतस्व ।

(निष्क्रान्ता ।)

मेक्बेतः - एता गताः । कोऽत्र ?

(लेन्नक्सः प्रविशति ।)

लेन्नक्सः - महाराज आज्ञापयतु ।

मेक्बेतः - किं भवान् डाकिनीरपश्यत् ?

लेन्नक्सः - महाराज ! नापश्यम् ।

मेक्बेतः - किं तास्तव पार्श्वान्न गताः ?

लेन्नक्सः - महाराज ! न गताः ।

मेक्बेतः - सर्वोऽयं मम मतिभ्रमो भवेत् । ये तासां भविष्यद्वाणीं विश्वसन्ति ते उत्सीदेयुः। किन्तु अहमश्वधावनशब्दं शृणोमि ।

लेन्नक्सः - द्वित्रा वार्ताहराः । प्रभो ! तैर्वार्ता आनीता मेक्डफः

मेक्बेतः In Public domain. Digitization Muthulakshmi Research Academy
इङ्गलन्डं पलायितः ।

मेक्बेतः - अपि इङ्गलन्डं पलायितः ?

लेन्नक्सः - प्रभो ! सत्यम् ।

मेक्बेतः - (स्वगतम्) काल ! त्वया मम दारुण आशयः पूर्वमेव निरुद्धः । आशयः सद्यः अनुष्ठातव्यः । नो चेत् स नश्यति । अतः परं कृतमात्रः संकल्प आचरितव्यः । नैव व्याक्षेप्यः । संकल्पेन सहाचरणं गन्तव्यम् । अहं मेक्डफस्य दुर्गे आकस्मिकाक्रमणं कुर्याम् । तस्य फैफं दुर्गं गृह्णीयाम् । तस्य पत्नीं पुत्राननन्यांश्चापगतभाग्यान् बन्धून् खड्ग-सात् कुर्याम् । अलमविवेकविकत्थनैः कार्याणाम् । यावत् संकल्पानामुत्साहो न हीयते तावदेव कर्तव्यम् । अलं डाकिनीसंवादेन । (लेन्नक्सं प्रति) क्व ते वार्ताहरा ये इदानीमागताः ? आगच्छ । मां तेषां सकाशं नय ।

(निष्क्रान्तौ ।)

चतुर्थः अङ्कः : द्वितीयं दृश्यम् ।

(मेक्डफस्य दुर्गः फैफः । श्रीमती मेक्डफः तस्याः पुत्रः रासश्च प्रविशन्ति ।)

श्रीमती मेक्डफः - किं कृतं मम पत्या येन स देशात् पलायितः ?

रासः - आर्ये ! क्षमा कर्तव्या ।

श्रीमती मेक्डफः - स्पष्टं तस्य क्षमा नास्ति । तस्य पलायनमुन्माद-कार्यम् । यदास्माकं कार्येषु राजविरोधादिकं नास्ति तदास्माकं भयान्य-स्मासु राजद्रोहशङ्कां जनयन्ति ।

रासः - भवती अधुनापि न जानाति तस्य पलायनं भयेनोत विवेकेन।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमती मेक्डफः - विवेक इति वदसि ? स भार्यां पुत्रान् कुटुम्बं च तस्मिन् स्थानेऽजहात् यस्मिन् स आत्मानमपि सक्षेमं न मन्यते । एवं कृतवतस्तस्यास्मासु नास्ति प्रणयः । जन्तूनामपि स्वापत्यरक्षणे या नैसर्गिकी बुद्धिर्भवति तया स हीनः । लघुः पक्षी चटकोऽपि क्रूरमुलूकं प्रति युध्यते यदि नीडे शिशवः पक्षिणः स्युः । मम पतिर्भयं प्राकटयत् न तु प्रेम । तस्य पलायनं हेतुरहितं विवेकरहितं च ।

रासः - प्रियबान्धवि ! अहमभ्यर्थये । उद्वेगं नियच्छ । तव पतिर्मान्यः सुजनो विवेकी विचक्षणश्च । एषामनियतव्यापाराणां मध्ये किं कार्यमिति स जानाति । नाहमन्यद् वक्तुमुत्सहे । वयमिदानीं क्रूरे काले जीवामः । वयं राजद्रोहिणः परिगणिताः । अस्माकं का स्थितिरिति न जानीमः । बह्वीः किंवदन्तीः शृणुमो मनसि कुर्मश्च । बहुभिर्भयैर्वयं तथा कर्तुं प्रेरिताः । कुतोऽस्माकं भयमिति च वयं न जानीमः । संदेहभयमयसमुद्रे वयं क्षिप्ताः । अहमिदानीं त्वामामन्त्रये अचिरे पुनरागमिष्यामि भवतीं द्रष्टुम् । अत्र व्यवहारा निकृष्टतरा भवेयुः पूर्णरूपेण भग्ना वा । अथवा पूर्वां सुखस्थितिं पुनः प्राप्नुयुः । प्रियबान्धवि ! तव ममाशिषः सन्तु ।

श्रीमती मेक्डफः - ममास्य पुत्रस्य पितास्ति परन्त्वयं पितृहीनवदस्ति।

रासः - यद्यहं भवत्या दुःखं पश्यन् इतोऽपि तिष्ठामि सा मम मूढता भवेत् । अश्रुमोचनेन स्वपौरुषमवमान्य त्वामस्वस्थां कुर्यां च । (निष्क्रान्तः।)

श्रीमती मेक्डफः - वत्स ! तव पितावां त्यक्त्वा गतः । त्वं कथं जीविष्यसि ?

पुत्रः - मातः ! यथा पक्षिणः ।

श्रीमती मेक्डफः -किं त्वं कीटान् मक्षिकादींश्च भक्षयिष्यसि ?

पुत्रः - पक्षिण इवाहं यत् प्राप्यते तद् भक्षयिष्यामि ।

श्रीमती मेक्डफः - दयनीयपक्षिवत् त्वं त्वां बन्द्धुं प्रसारिताज्जालान्न भेष्यसि ।

पुत्रः - कुतोऽहं भेष्यामि ? लघुपक्षिणां कृते जालानि न प्रसार्यन्ते । किं च मम पिता शीघ्रं पुनरागमिष्यति । अस्मान् न त्यजति ।

श्रीमती मेक्डफः - नागमिष्यति । शश्वदावां त्यक्त्वा स गतः ।

(वार्ताहरः प्रविशति ।)

वार्ताहरः - आर्ये ! त्वं मां न जानासि । अहं तु महामान्यां त्वां जानामि । महती विपत् तव सन्निहितेदानीमित्यहमाशङ्के । यदि मम साधारणजनस्यावबोधं गृह्णासि तर्हि भवत्यात्र न स्थातव्यम् । इतो निर्गच्छ पुत्रैः सह । स्यामहं कठोर इत्थं त्वां भाययितुं किन्तु त्वामत्र सुमहती क्रूरता प्रतीक्षते इति बहुनिकृष्टा स्थितिः । देवस्त्वां रक्षतु । अतः परं मयात्र न स्थातव्यम् । (निष्क्रान्तः ।)

श्रीमती मेक्डफः - कुतोऽहं पलाये ? मया कोऽपि नापकृतः। तथापि मया न विस्मर्तव्यमहं दुष्टलोकेऽस्मि यत्रापकारः प्रायेण श्लाघ्यं कार्यमुप -कारः प्रायेण मूर्खता कर्तुरपायकरश्च। (घातकाः प्रविशन्ति ।) अहो ! अहं भयंकराणि मुखानि पश्यामि ।

प्रथमो घातकः - तव पतिः कुत्रास्ति ?

श्रीमती मेक्डफः - आशासे स तस्मिन् स्थले नास्ति यत्र त्वादृशमधम-मासादयेत् ।

प्रथमो घातकः - स राजद्रोही ।

पुत्रः - मृषा वदसि ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमो घातकः - रे बालक ! (तं छुरिकया विध्यति।) हे राजद्रोहिपुत्र!

पुत्रः - अहं हतोऽस्मि । मातः पलायस्व ।

(स म्रियते । श्रीमती मेक्डफो धावति हत्येत्याक्रोशन्ती । घातकास्ता-मनुधावन्ति ।)

चतुर्थः अङ्कः तृतीयं दृश्यम् ।

(इङ्ग्लन्डे राजसौधस्य पुरस्तात् ।
मात्कमो मेक्डफश्च प्रविशतः ।)

माल्कमः - वयं कंचन घोरं निर्जनं प्रदेशं गच्छेम तत्र दुःखाश्रूणि मुञ्चेम यान्यस्मासु भरितानि ।

मेक्डफः - किमेवम् ? वयं संहारकर्तॄन् खड्गान् गृह्णीयाम । वयं शुद्धहृदयाः । पतितमस्मद्देशं रक्षिष्यामः । स्काट्लन्डे प्रतिप्रभातं नूतना विधवा विलपन्ति । नूतना मातापितृरहिता आक्रोशन्ति । नूतना विलापा आकाशं स्पृशन्ति । ते आक्रोशा आकाशे प्रतिध्वनिता भूत्वा आकाश एव स्काट्लन्डस्य दुःखमनुभवतीति भयं जनयन्ति ।

माल्कमः - अहं यत् सत्यमिति विश्वसिमि, तदर्थं विलपामि । यदहं जानामि तद् विश्वसिमि । अनुकूले काले सुकृत्यानि करिष्यामि । यत् त्वयोक्तं तत् सत्यं स्यात् । एष जनपीडको यस्य नामापि जुगुप्सां जनयति पुरा ऋजुरमायी मतः। त्वं तस्य मित्रमासीः । एतावत् तेन तवापकृतिर्न कृता । अहं नवो युवास्मि । स्यादेवं त्वं मां तदधीनं कृत्वा तस्यानुग्रहं प्राप्नुयाः । यदि त्वं मामनागसमजं तस्यै कुपितदेवतायै मेक्बेताय बलिं दद्यास्तत् तव विवेकयुतं कार्यं स्यात् ।

मेक्डफः - अहं विश्वासघातो नास्मि ।

माल्कमः - मेक्बेतोऽस्ति विश्वासघातः । सुगुणः सुस्वभावोऽपि राजशासनात् सुपथं त्यजेत् । क्षम्यताम् । त्वं सुजनो भवेर्दुर्जनो वा । मम त्वयि चिन्तना त्वां न परिवर्तयेत् । कश्चिद् देवः कदाचित् किमपि अकार्यमकरोदिति सर्वे देवास्तेजोहीना न भवन्ति । एवं मां विरुध्यापि त्वं प्रभाववान् भवेः । कानिचन दुष्कृतानि सुकृतवदात्मानं प्रदर्शयन्तु नाम सुकृतं तु सुकृतवद् लोकेन ग्राह्यम् ।

मेक्डफः - त्वयि ममाशा भग्ना ।

माल्कमः - तस्य कारणं त्वयि मम संदेहः । नाहमवगच्छामि किं त्वया त्वरमाणेन भार्या पुत्राश्च त्यक्ताः । तेषां प्रेमबन्धमुत्सृज्यानामन्त्र्य कथमागतोऽसि ? नाहं त्वामनेन वचनेन निन्दामि । एष मम संदेहमात्रः। मयात्मा रक्षितव्य इत्येवं वदामि । सन्तु त्वयि मम संदेहाः । त्वं संपूर्णः सज्जनः स्याः ।

मेक्डफः - वराको मम देशो दिनदिनपीडामनुभवतु । महाजनपीडकः स स्वलाभानेकीकृत्य स्थापयतु यतः कोऽपि सुजनस्तं न प्रतिरुन्ध्यात् । स्यात् तस्य पदवी कुमार्गेण संपादिता तथापि सा तस्य स्थिरा जाता। युवराज ! त्वामामन्त्रये । नाहं द्रोही दुर्वृत्तो वा यथा त्वं शङ्कसे । असंख्यधनराशीनामपि कृते नाहं द्रोही दुर्वृत्तो वा भवेयम् ।

माल्कमः - मा मम वचनैरमर्षी भव । त्वयि संदेहेनैवं वदामि । अस्माकं देशः पीडनभारस्याधस्तान्निमज्जति । अश्रूणि रक्तं च समं प्रवहन्ति । प्रतिदिनं नूतना क्षतिः क्रियते। अहं मन्ये राज्याधिकारे मेक्बेतं प्रति ममाधिकारं समर्थयन्तः केचन स्युः । प्रसन्न इङ्गलन्डस्य

In Public domain. Digitization Muthulakshmi Research Academy

राजा सुसैनिकसहस्राणि मह्यमुपाहरत् । सत्स्वेतेषु सर्वेषु अहमिदं वक्तुमिच्छामि । अहं तं पीडकं संमर्दिष्यामि । तस्य शिरश्छेत्स्यामि । तद् दिनमागमिष्यति । सर्वमिदं भवतु नाम । परन्तु अस्मद्दुर्भाग्यदेशः आनन्तरिकस्य ममाधिकारेऽधिकं क्लेशमाप्नुयात् ।

मेक्डफः - कं प्रति एवं वदसि ?

माल्कमः - आत्मानं प्रति एवं वदामि । अहं बहुभिर्दुर्गुणैः कलुषितोऽस्मि। यदि ते प्रकटिताः स्युस्तर्हि पिशाचतुल्यो मेक्बेतः श्रेयान् दृश्येत । अगण्यदोषस्य ममापेक्षया देशस्तमेवापायरहितं सौम्यं मन्येत ।

मेक्डफः - तदसाध्यम् । घोरे नरके ये पिशाचानां समूहा भवन्ति मेक्बेतादधिकदुर्गुणभूयिष्ठस्तेषु न भवति ।

माल्कमः - कामं स रक्तपिपासुर्महादुराशः लोभी मायी वञ्चकः स्वैरवर्ती द्वेषमयसंकल्पश्च । लोके न किमपि पापमस्ति यत् तस्मिन् नास्ति। किन्तु अहं कीदृशोऽस्मि ? मम पांसुलकामनानामवधिर्नास्ति । देशे सर्वाः स्त्रियो युवत्यो मध्यवयस्काश्च कामुकं मां तृप्तं न कुर्युः । कोऽपि मां न निरुन्ध्यान्नाहं कमप्युपरोधं सहे । अहं तादृशोऽस्मि । वरं मेक्बेतो राज्यं प्रशिष्यात् ।

मेक्डफः - अनियतविषयासक्तिर्नरं स्ववाञ्छायाः किंकरं करोति । सा बहून् राज्ञः सिंहासनभ्रष्टानकरोदकाले । सा तानपातयत् । तथापि तेन कारणेन तव मनसि संकोचो मास्तु त्वदीयं किरीटं ग्रहीतुम् । रहसि तव कामनाः सर्वथा पूरयितुं शक्नोषि बहिर्लोकायात्मानं प्रदर्शयिष्यसि संयतचित्तवत् ।

माल्कमः - इमं दोषमतिरिच्य ममानियतो लोभोऽस्ति । स सद

 In Public domain. Digitization Muthulakshmi Research Academy

अतुष्टः । अतो यद्यहं राजा भवेयं तर्हि प्रभूणां भूमीः केषाञ्चन रत्नानि केषाञ्चन निवासान् चाच्छिद्य गृह्णीयाम् । अधिकमधिकं गृह्णन् ततोऽप्यधिकमधिकं ग्रहीतुं प्रवर्ते । तदर्थमनुरक्तसुवर्तनप्रजाभिः सह कलहान् प्रकल्पयेयं तेन निमित्तेन धनार्थं तान् नाशयेयम् ।

मेक्डफः - लोभः कामोद्रेकाद् गरीयान् अधिकापायकरश्च । स बहून् पूर्वराजाननाशयत् । किन्तु तेन दोषेण राजकिरीटो न त्याज्यो यस्तव । स्काट्लन्डे सुमहान् संपद्राशिरस्ति येन तव लोभस्तर्पितो भवेत् । तत्र यद्यदस्ति तत्तत् तवैव। एते दोषाः सहनीयाः स्युर्यदि अन्ये सुगुणाः सन्ति ।

माल्कमः - मम सुगुणा न सन्ति । न्यायः सत्यं संयमः स्थिरचित्तता वदान्यता सततोद्यमः करुणा विनयो धार्मिकता सहिष्णुता धैर्यं पराक्रमश्चैतेषु कस्मिन्नपि गुणे ममापेक्षा नास्ति । किं चाहमेकैकं मम दुर्गुणं भागशो विभज्याभिवर्धयामि । यदि ममाधिपत्यमस्ति तर्हि सर्वां शान्तिं सर्वं क्षेमं च नरकसात् करिष्यामि । विश्वशान्तिं नाशयिष्यामि। मानवस्य मानवेन सह संबन्धमुत्सादयिष्यामि ।

मेक्डफः - बत बत स्काट्लन्ड ! तव का गतिः स्यात् ।

माल्कमः - मम सर्वमकथयम् । यदि त्वं चिन्तयसि मादृशः स्काट्लन्डं परिपालयितुमर्हति तर्हि वद । अर्हतीति वद ।

मेक्डफः - किं त्वं स्काट्लन्डं परिपालयितुमर्हसि? त्वं जीवितुं नार्हसि । हे दुर्भाग्य देश ! प्रजापीडकेनाक्रान्त ! रक्तमयदण्डेन परिपालित! कदा त्वं प्राचीनवैभवं पुनः प्राप्स्यसि ? संप्रति तव सिंहासनस्य सत्यो दायाद आत्मानं खलं प्रकटयति । आत्मनो राजकुलसंभूतिमेवाभिशंसति।

In Public domain. Digitization Muthulakshmi Research Academy

राजा तव पिता मुनिवदजीवत् । तव माता राज्ञी अभीक्ष्णं जानुभ्यां नत्वा प्रार्थनामकरोत् । इदानीं तु त्वामामन्त्रये। आत्मानं प्रति त्वयोक्तैः स्वदुर्लक्षणैः सिध्यति मम स्काटलन्डप्रतिगमनापेक्षा व्यर्था भवेत् । मम मनस आकाङ्क्षा अवसिताः ।

माल्कमः - मेक्डफ ! उदारमनसः साधुस्वभावप्रेरितस्य तवावेगो मम मनसस्त्वां प्रति दुष्टसंदेहानपानयत् । इदानीमहं तव सत्यतां सुजनता च विश्वसिमि । दुष्टबुद्धिर्मेक्बेतः कथमपि मां गृहीत्वा नेतुमुपायान् करोति । अतोऽहं विज्ञानं विवेकं चोपयुज्य न कस्मिन्नपि अधिकं विश्वसिमि । इदानीं यद्यदहं त्वां वदामि तस्य सर्वस्य भगवान् प्रमाणम् इदानीमहमात्मानं तव निर्देशे स्थापयामि । ये ये दुर्गुणा आत्मानं प्रति मयोक्तास्तांस्तानुपसंहरामि । सर्वान् दुर्गुणान् सर्वाणि पापानि यानि मया मयि कथितानि तानि प्रत्याख्यामि । तानि विचित्राणि ममाज्ञातानि च स्त्रिया सह संसर्गो मया न कृतः । स च नियमो मया कदापि न भग्नः यन्मम नासीत् तदर्थं कदापि ममाभिकाङ्क्षा नासीत् । न कदापि मया प्रतिज्ञाभङ्गः कृतः । खलमप्यहं न वञ्चयामि । यावज्जीविते प्रीणामि तावत् सत्ये च । मया प्रथममसत्यमुक्तस्त्वमिदानीमेव मामुद्दिश्य यथार्थतो योऽहं सोऽहं तव सेवायामस्मि वराकस्य मम देशस्य रक्षार्थम् सत्यं तवात्रागमनात् पूर्वं वृद्धः सीवर्डः दशसहस्रयोधैः सह सुसज्जित स्काट्लन्डं प्रति प्रयातुं सिद्धः । इदानीं वयं सह गमिष्यामः। अस्माकं विजयावकाशो महानस्ति यतो युद्धकारणं धर्मयुतम् । कथं त्वं तूष्णीं स्थितोऽसि ?

मेक्डफः - परस्परविरुद्धकथनं कथमवगन्तव्यं न जानामि ।

 In Public domain. Digitization Muthulakshmi Research Academy

(कश्चिद् बैद्यः प्रविशति ।)

मात्कमः - इमां चर्चां किञ्चित् पश्चात् करिष्यावः। वैद्य ! कृपया वद । अपि राजा बहिरागच्छति ?

वैद्य - अथकिम् । रुग्णानां समूहः चिकित्सार्थं तं प्रतीक्षते । तेषां रोगः श्रेष्ठवैद्यानां महाप्रयत्नानपि मोघीकरोति । किन्तु यदा स तान् दैवदत्तपवित्रशक्तियुतहस्तेन स्पृशति तदा ते शीघ्रं मुक्तरोगा भवन्ति।

माल्कमः - वैद्यमहाशय ! अनुगृहीतोऽस्मि भवता । (वैद्यो निष्क्रान्तः।)

मेक्डफः - कः स रोगो यमुद्दिश्य वैद्योऽवदत् ?

माल्कमः - क्षयरोगेषु अन्यतमः । श्लाघ्यः स राजा विस्मयकरीं चिकित्सां करोति । अत्रागतोऽस्मि इङ्ग्लन्डे स्थातुम् । मया असकृत् स दृष्टस्तां चिकित्सां कुर्वन् । प्रार्थनाभिर्देवताह्वानं करोति । कथं स तत् करोति स एव जानाति । किन्तु येऽन्यैर्वैद्यैर्निराशया त्यक्तास्तान् रोगिणः स चिकित्सति । व्रणैश्चावृतशरीरान् करुणाजनकदर्शनान् स चिकित्सति। स स्वर्णनाणकं रोगिणः कण्ठे लम्वयति । पवित्रप्रार्थनां करोति । उक्तं च तां पवित्रचिकित्साशक्तिमनन्तरीयायान्त्यकाले स संक्रामयिष्यति । अनया विस्मयकरशक्त्या सह तस्याश्चर्यकरभविष्यकथनशक्तिश्चास्ति। तस्यास्या आध्यात्मिकशक्तेर्बहूनि निदर्शनानि सन्ति तदर्थं तस्य बह्वयः श्लाघाश्चोक्ताः ।

मेक्डफः - कश्चिदायाति । कः सः ?

माल्कमः - वेषेण दृश्यते सः अस्मदीय एव स्काटलन्डदेशीयः । अहं तु तं नाभिजानामि ।

(रासः प्रविशति ।)

In Public domain. Digitization Muthulakshmi Research Academy

मेक्डफः - प्रियबन्धो ! इङ्गलन्डे तव शुभागमनमस्तु ।

माल्कमः - इदानीमहं तं जानामि । देवस्तं दुःस्थितिसंचयं शीघ्रमपनयतु येन वयमत्र परस्पराज्ञातवत् सम्मिलामः ।

रासः - मान्य ! तव प्रार्थनायास्तथास्तु इत्यहं वदानि ।

मेक्डफः - किं स्काट्लन्डस्तस्यामेव दुःखस्थित्यामस्ति इदानीमपि?

रासः - बत बत वराकः स्काट्लन्डदेशः । इदानीं तं स्काट्लन्डनाम्ना कथयितुं न शक्यम् । सास्माकं मातृभूमिर्नास्ति प्रत्युतास्माकं श्मशानम्। कोऽपि मन्दहासं कुर्वन् न दृश्यते एकं विहाय यो न जानाति किं प्रवर्तते। निश्वासा आर्तरवा आक्रन्दनानि च सर्वत्र व्याप्नुवन्ति । कोऽपि तानि न लक्षयति न शृणोति च । प्रगाढदुःखं गण्यते कश्चिन्मनोविकार इव। यदा मरणं सूचयन्ती घण्टा नदति को मृत इति प्रष्टुं कोऽपि न चेष्टते। यावद् धृतानि पुष्पाणि न म्लायन्ति तावत् सुजना लोकात् पृथग्भवन्ति। अरोगिणोऽपि जना म्रियन्ते ।

मेक्डफः - हा ! कीदृशी कथा ! विस्तृता तथापि सत्या ।

माल्कमः - किमत्याधुनिकं दुःखम् ?

रासः - एकहोरापूर्ववार्ता गतवार्ता गण्यते । प्रतिनिमेषं नूतना वार्ता भवति ।

मेक्डफः - मम भार्या कथमस्ति ?

रासः - बाढम् ।

मेक्डफः - मम पुत्राः ?

रासः - ते च ।

मेक्डफः - दृश्यते मेक्बेतेन ते प्रशान्ता विसृष्टाः।

 In Public domain. Digitization Muthulakshmi Research Academy

रासः - यदाहं तान् विहाय निर्गतस्तदा ते प्रशान्ताः ।

मेक्डफः - स्पष्टमुच्यताम् । का वार्ता ?

रासः - यदाहमत्र वार्तामाहरन् भरितहृदय आगतः काचिद् वार्ता आगता बहवः सुपुरुषा राजानं प्रति व्युत्थानं कुर्वन्तीति । मम तत्र निदर्शनमस्ति विश्वसिमि च यतो मया लक्षितं तस्य जनपीडकस्य सैन्यानि चलन्ति । अस्मद्देशं रक्षितुमिदानीं समयः । स्काट्लन्डे तव सन्निधिस्तव नेतृत्वे मेक्बेतं विरुध्य योद्धुं प्रेरयेत् । दुःखादात्मानं रक्षितुं स्त्रियोऽपि युध्येरन् ।

माल्कमः - ममेदं वचनं तान् सान्त्वयतु । अहं तत्रागच्छामि । प्रसन्न इङ्ग्लन्डराजो मम सहायतां करोति श्लाघ्येन नायकेन सीवर्डेन दशसहस्रसैन्यसंपन्नेन । तस्मादधिकानुभवशाली वीरः ख्रैस्टीयलोके अप्राप्यः ।

रासः - तद्वत्संतोषकरीं वार्तां वक्तुमहं स्पृहयामि । परन्तु मम सकाशे तादृशी विषादवार्तास्ति यस्याः पदानि निर्जनदेशे उच्चैराक्रोष्टव्यानि। कस्मिंश्चिन्निर्जनदेशे यत्र न कश्चिन्नरः शृणुयात् ।

मेक्डफः - कस्य वार्ता ? देशस्य उत कस्यचिदेकस्य ?

रासः - सर्वः सुचिन्तकस्तस्मिन् विषादे भागी भवतु । अधिको भागस्तव भवति ।

मेक्डफः - यदि स विषादो मम तर्हि गुप्तो न भवतु । सपदि मां वद ।

रासः - इमां घोरां वार्तां मत्सकाशात् श्रोतुं तव कर्णौ मम जिह्वां शश्वन्न द्विष्टाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मेक्डफः - अहमनुमन्तुमारभे का सा वार्तेति ।

रासः - अकस्मादाक्रमणेन तव दुर्गो गृहीतः । तव भार्या पुत्राश्च क्रूरं खण्डिताः । अस्य कार्यस्य विवरणेन तैः त्त्वत्प्रियजनैः सह तव च मृतिर्भवेत् ।

माल्कमः - देवा दयन्ताम् । किन्तु मेक्डफ ! दुःखं मा गोपाय । बाधया मौनेन पराङ्मुखो न भव । दुःखं वचनैः प्रकटय । वाचा अप्रकटितं दुःखं मनो दहति ।

मेक्डफः - अपि मम पुत्राश्च विदारिताः ?

रासः - अथकिम् । तव भार्या पुत्राः सेवकाश्च । यो यो दुर्गे दृष्टः स स हतः ।

मेक्डफः - अहं च गृहाद् दूरे आसम् । अपि भवान् वदति मम भार्या च हता ?

रासः - अथकिम् । मया तदुक्तम् ।

माल्कमः - समाश्वसितु भवान् । वैरनिर्यातनं प्रति अस्मद्विचारेण तव दुःखस्य किञ्चित् निष्कृतिर्भवतु ।

मेक्डफः - तव पुत्रा न सन्ति । यस्य पितुः सर्वे पुत्रा हतास्तस्य दुःखं त्वं न जानासि । बत बत । सुन्दरा मम सर्वे शिशवो हताः ? उक्तं खलु भवता सर्वे इति । किं मम सर्वे प्रियपुत्रास्तेषां माता च हता एकेन घातेन ?

माल्कमः - वीरोऽसि । तस्य प्रतिकारं कुरु ।

मेक्डफः - तमहं करिष्यामि । ततः पूर्वं मानवसहजः शोको मया अनुभवितव्यः । एकदा ते जीविता ममात्यन्तप्रियाश्च । अपि देवास्तत्

 In Public domain. Digitization Muthulakshmi Research Academy

पश्यन्तः कमपि निरोधकं नाप्रेषयन् ? पापिन् मेक्डफ ! त्वया स जनपीडकः कोपितस्तेनैव हेतुना सर्वे ते हताः । अहमकिञ्चित्कर आसम्। ममाकार्यैस्ते हता न तेषां दोषैः । देवस्तेषामात्मनां शान्तिं दद्यात् ।

माल्कमः - इयमापन्निकषग्रावा भवतु यस्मिन् तव कोपखड्गं तीक्ष्णीकरोषि । शोकः कोपरूपेण परिणमतु । बाधया तव मनो मन्दं न भवतु। प्रतिकाराय कुपितं भवतु ।

मेक्डफः - अहं पुरुषवत् सरोषं वदामि स्त्रीवद् विलपामि च । परन्तु हे देवाः ! कालविलम्बो मास्तु । स्काट्लन्डपालकं तं राक्षसं मम सम्मुखं कुरुत । मम खड्गप्रहारपरिमितदूरे तं स्थापयत । तदा यदि मया स विसृष्टो भवेत् तर्हि नाहं विषीदेयं यतो देवाश्च तं मर्षयन्ति ।

माल्कमः - इदानीं पुरुषवद् ब्रवीषि । राज्ञः सकाशं गच्छामः । अस्माकं सेना सन्नद्धा । सर्वं सिद्धमामन्त्रणमेव शिष्यते । मेक्बेतो वृक्षे पक्वफलवदस्ति । कम्पनेन पतति । दैवशक्त्या वयं प्रेरिताश्चालिताश्च। दैन्यं त्यक्त्वोत्तिष्ठत । अवधिमतिक्रम्य रात्रिरनन्तदीर्घा न भवति । दिनं भवति । अस्माकं शोकश्चान्तरहितो न भवति ।

(निष्क्रान्ताः ।)

पञ्चमः अङ्कः प्रथमं दृश्यम् ।

(मेक्बेतस्य भवने कोष्ठः । वैद्यः राज्ञ्या मान्या परिचारिका च प्रविशतः ।)

वैद्यः - त्वं मया राज्ञीं प्रतिपालयन्ती स्थापिता । द्वे रात्र्यौ गते । तव निवेदनस्य तु मम निर्धारणं नास्ति सा निद्राणा पद्भ्यामितस्ततश्चलतीति।

In Public domain. Digitization Muthulakshmi Research Academy

कदा तया तथा कृतमितः पूर्वम् ?

मान्या परिचारिका - राज्ञो मेक्बेतस्य युद्धगमनादारभ्य मया सा दृष्टा शयनादुत्थाय परिधानं धृत्वा स्वस्या उन्नतपेटिकां विवृत्य कागदमपसार्य लिखति पठति पत्रं संवृत्यान्यपत्रेण वेष्टयित्वा तत्र निधाय शय्यां पुनरायाति । निद्राणा सा सर्वमिदं करोति ।

वैद्यः - निद्राणापि जागरितेव किमपि करोतीति महती व्याकुलता। अस्थिरनिद्रायां गमनमतिरिच्य किं सा अन्यत् करोति? अपि सा किमपि भाषते ?

मान्या परिचारिका-सा तानि भाषते यानि वक्तुमहं बिभेमि ।

वैद्यः - मां वक्तुमर्हसि । मम पुरस्ताद् वक्तव्यं च ।

मान्या परिचारिका-तानि वचनानि तुभ्यं वान्यस्मै वाहं न वदामि यतः अहं सत्यं वदामीति साक्षी नास्ति ।

(ज्वलितदीपिकां गृहीत्वा श्रीमती मेक्बेतः प्रविशति ।)

किन्तु पश्य । एषात्रागच्छति । एवमेव सा सदा दृश्यते । इदानीं सा निद्रिता च। तस्या अदृश्यः सन् तां निरूपय ।

वैद्यः - कथं सा दीपिकां प्राप्ता ?

मान्या परिचारिका - सा दीपिका सदा तस्याः सकाशे भवति। एवं तस्या आदेशः ।

वैद्यः - पश्य सा विवृतनेत्रा ।

मान्या परिचारिका - किन्तु सा किमपि न निरीक्षते ।

वैद्यः - किं करोति सेदानीम् ? पश्य कथं सा हस्तौ घर्षति ।

मान्या परिचारिका - इयं तस्याः साधारणा चेष्टा । एवं सा हस्तौ

 In Public domain. Digitization Muthulakshmi Research Academy

धावतीव । एवं सा पादहोरां यावत् कुर्वती मया दृष्टा ।

श्रीमती मेक्बेतः - इदानीमपि अङ्कः अस्ति ।

वैद्यः - शृणु । सा वदति । यत् सा वदति तदहं लिखामि येनाहं तत् निश्चयं स्मरामि ।

श्रीमती मेक्बेतः - (प्रलपन्ती) अपसर गर्ह्य रक्ताङ्क ! अहमादिशामि। प्रथमा होरा । द्वितीया होरा। अथायं कालस्तत् कर्तुम् । नरकः अन्धकारमयः । लज्जा जायते । त्वं वीरोऽसि । किन्तु बिभेषि । कुतोऽस्माकं भीतिर्यदास्मत्कृतं कोऽपि न जानाति ? सिंहासनमस्माभिः प्राप्तं न कोऽपि अस्मदधिकारमनुयुङ्क्ते । परन्तु केनेदं चिन्तितं स्यात् तस्य वृद्धस्य देहे तावद् रक्तं भवतीति ?

वैद्यः - अपि भवत्या श्रुतमेतत् ?

श्रीमती मेक्बेतः - फैफथेनस्य भार्यासीत् । इदानीं सा कुत्र? किमिदम्? अपि मम हस्तौ शुद्धौ न भवतः? एतावतालम् । नातः परम् । मेक्बेत! नातः परम् । तव कम्पशीलता त्वां नाशयिष्यति ।

वैद्यः - (मान्यपरिचारिकां प्रति) अलमलम् । अहं शङ्के यत् त्वया न श्रोतव्यं तत् श्रुतम् ।

मान्या परिचारिका - यत् तया न वक्तव्यं तत् तयोक्तम् । तन्मम निश्चितम् । देवो जानाति कीदृशस्तस्या अनुभवः ।

श्रीमती मेक्बेतः - इदानीमपि रक्तगन्धः अत्रास्ति । प्राग्देशीयाः सर्वे परिमला मम लघुहस्तं न शोधयेयुः । हा हा हा ।

वैद्यः - दीर्घः स निश्वासः । अस्या हृदयं शोकपूर्णम् ।

मान्या परिचारिका - नाहमेतादृशं भरितहृदयं वहामि शेषशरीरस्य

In Public domain. Digitization Muthulakshmi Research Academy

सम्मानं प्राप्तुम् ।

वैद्यः - भवतु भवतु भवतु ।

मान्या परिचारिका - देवोऽनुगृह्णातु सा कुशलिनी भवेत् ।

वैद्यः - एष रोगो मम वृत्तिनैपुण्यमतिशेते । तथाप्यहं जानामि केचन निद्रायामचलन् तथापि प्रशान्तं स्वाभाविकं च मरणं प्राप्नुवन् ।

श्रीमती मेक्बेतः - इदानीं हस्तौ प्रक्षालय । धृतवस्त्रो भव । विवर्णो मा भव । पुनरहं त्वां वदामि । बेङ्क्वो निखातः । न स समाधेर्निर्गम्य त्वां पीडयेत् ।

वैद्यः - अपीदं सत्यम् ?

श्रीमती मेक्बेतः - इदानीं शयितव्यम् । द्वारि ताडनं श्रूयते। आगच्छ आगच्छ । यदस्माभिः कृतं तदकर्तुं न शक्यते इदानीम् । शय्या शय्या। (सा गच्छति ।)

वैद्यः - अपि सा शय्यामिदानीं गच्छति ?

मान्या परिचारिका - सपदि ।

वैद्यः - जनानां दुष्टप्रवादाः प्रचलिताः । यदा जना असहजानि कार्याणि कुर्वन्ति ते असहजै रोगैराक्राम्यन्ते । येऽपराधं कुर्वन्ति तेषां निद्रा व्याकुला भवति । तदा स्वकृतं रहस्यापराधं ते वदन्ति च । अस्या इदानीं वैद्यस्यापेक्षया पुरोहितः अभिलषणीयः । भगवानस्माकं सर्वाणि कर्माणि क्षमताम् । सम्यक् तां प्रतिपालय । तस्याः सकाशे किमप्यायुधं मास्तु । आत्मघातं सा कुर्यात् । सम्यक् पश्य । शुभास्तु रात्रिः । मम मनः क्षुब्धम्। नेत्रे विस्मिते दर्शनात् । मम मनसि काश्चन चिन्ता जायन्ते परन्तु वक्तुं नाहं धृष्टोऽस्मि ।

 In Public domain. Digitization Muthulakshmi Research Academy

मान्या परिचारिका - सुवैद्य ! शुभास्तु तव रात्रि ।

(निष्क्रान्तौ ।)

पञ्चमः अङ्कः द्वितीयं दृश्यम् ।

(डन्सिनेनदुर्गसमीपे जनपदः । भेरीः पताकाश्च गृहीत्वा जनाः । मेन्टीथः केयत्नेसः आन्गासः लेन्नक्सः भटाश्च प्रविशन्ति ।)

मेन्टीथः - इङ्ग्लीषसैन्यानि सन्निहितानि । तानि माल्कमेन नीतानि। तस्य बन्धुः सीवर्डः मेक्डफश्च तेन सह स्तः । ते प्रतिकाराय सुनिश्चिताः। तैरनुभूता अपकाराः क्लेशाश्च मृतमपि विस्मितं कुर्युः । मृतः पुनर्जीवितं प्राप्य प्रेरितो भूत्वा युद्धे पुनश्च रक्तं मुञ्चेत् ।

आन्गासः - बिर्नेमारण्यमनुरूपं स्थलं तान् समासादयितुम् । ते तेन मार्गेणागच्छन्ति ।

केयत्नेसः - अपि ज्ञायते डोनाल्बेनो भ्रात्रा सहास्ति नास्ति वा ?

लेन्नक्सः - अहं निश्चितं जानामि स नास्ति । मम सकाशे प्रमुखानां नामपट्टिकास्ति । सीवर्डस्य पुत्रस्तेन सहास्ति । बहवो नूतना युवानः स्वं पौरुषं प्रथमं प्रदर्शयिष्यन्ति ।

मेन्टीथः - जनपीडकः किं करोति ?

केयत्नेसः - स डन्सिनेनदुर्गं महाप्रबलं करोति । स उन्मादीति केचिद् वदन्ति । अन्ये ये तं नात्यन्तं द्विषन्ति ते वदन्ति वीरयोधवत् स आत्मनः क्रोधं प्रदर्शयतीति । इदं तु तथ्यं तस्यानुचरा अविश्वसनीयाः सन्ति तान् स्वाधीनान् स्थापयितुं स न शक्नुयादिति ।

In Public domain. Digitization Muthulakshmi Research Academy

आन्गसः - दृश्यते इदानीं स स्वकृताभिः रहस्यहत्याभिर्मनसि भरितवल्लक्ष्यते। प्रतिनिमेषं स्वानुचराणां नूतना अभिद्रोहास्तं ज्ञापयन्ति स्वस्य डङ्कनं प्रति विश्वासघातम्। तस्याज्ञा पालनीया इत्येव तस्याज्ञाबद्धा भटादयः प्रवर्तन्ते न तु तस्मिन् प्रेम्णा। तस्य शक्तिरिदानीं संकुचिता। अनर्हस्य तस्य राजपदवी सम्प्रति तमतिक्रम्यातिमहती दृश्यते। यदि कश्चिद् वामनश्चोरः कस्यचिद् बृहच्छरीरस्य परिधानं चोरयित्वा धरति स कथं दृश्येत ?

मेन्टीथः - तत्राश्चर्यं नास्ति। स निरन्तरं मनसि क्षुब्धः। तस्य जीवितमात्मदूषणं परिणतम्।

केयत्नेसः - वयं पुरस्ताद् गच्छामः। माल्कमायात्मसेवां निवेदयामः। स एवास्माकं सेवाया भाजनम्। अस्माकं मोचकं तं संगच्छामहे। सः अस्माकं दुःखितदेशस्यानारोग्यं चिकित्सति। वयमस्मद्देशस्य दुस्थितिं क्षालयितुं प्रतिरक्तबिन्दु उपकुर्मः।

लेन्नक्सः - राजपुष्पं माल्कमं विकासयितुम् अस्मद्देशारामे कक्षादिकं विनाशयितुं च यावद् रक्तमपेक्ष्यते तावद् दद्मः। सम्प्रति बिर्नेमं प्रति गच्छामः। (निष्क्रान्ताः।)

पञ्चमः अङ्कः तृतीय दृश्यम्।

(मेक्बेतस्य दुर्गे कोष्ठः। मेक्बेतो वैद्यः सेवकाश्च प्रविशन्ति।)

मेक्बेतः - ममानुचराः प्रभवो मां त्यक्त्वा गता इति मह्यं निवेदनानि अतः परं न सन्तु। अपक्राम्यन्तु ते। भविष्यकथनानुसारेण बिर्नेमारण्यं

यावद् डन्सिनेनं नागच्छति तावन्मम भयं नास्ति । कः स बालो माल्कमः ? किं स मरणधर्मा मनुष्यो नास्ति मरणधर्मणः स्त्रिया जातः । लोके सर्वमनुष्याणां सर्वव्यवहारज्ञानि भूतानि मामवदन् मेक्बेत ! मा भैषीः । स्त्रियां जातो मनुष्यस्त्वां न विजयेत । तस्मान्ममानुचराः स्वामिद्रोहिणः प्रभव आशापूर्णानाङ्ग्लेयान् गच्छन्तु । मम कार्याणि निर्दिशन् मम चेतो मम वक्षसि स्पन्दन् मम हृदयं च कदापि न नमतः न च कम्पेते संदेहेन भयेन च ।

(सेवकः प्रविशति ।)

हे पाण्डुमुख मूर्ख ! पिशाचस्त्वां दण्डयतु । किमेवं दीनमुख आगतोऽसि?

सेवकः - दशसहस्र ....

मेक्बेतः - अज्ञ ! दशसहस्रगृध्राः ?

सेवकः - न प्रभो ! सैनिकाः ।

मेक्बेतः - गच्छ । कण्टकेन मुखे क्षतिं कुरु यावद् रक्तं स्रवति । एवं भयसूचकं श्वेतवर्णं संवृणु । के सैनिकाः ? ममात्मा नश्यतु। पाण्डुरं तव मुखमन्यान् भाययेत् । न तु माम् । के ते सैनिका विषण्णमुख ?

सेवकः - प्रभो ते आङ्ग्लेयाः सैनिकाः ।

मेक्बेतः - हे दुःखाक्रान्तमुख ! इतो गच्छ ।

(सेवको निर्गतः ।)

(स्वगतम्) मम मनो ग्लायति । यथा पश्यामि तथा वदामि । अयं संक्षोभो मां सिंहासने स्थिरीकरोति अथवा तस्माद् भ्रंशयति । किन्तु मया चिरं जीवितम् । अयं मम जीवितवृक्षस्य शिशिरर्तुः । मम शक्तयः सामर्थ्यं च पतन्ति शिशिरे पत्रवत् । वार्धक्यं सहचराणां गौरवं प्रेम

In Public domain. Digitization Muthulakshmi Research Academy

मित्रसमागमं चापेक्षते । मम तु एतानि न भवन्ति । तत्स्थाने मम शाप भवन्ति नोच्चैः किन्तु सोद्वेगम् । शून्योपहाराश्चाटुवचनानि च प्राप्यन्ते यानि इच्छया विना वक्तॄणां मनोदौर्बल्येन उच्यन्ते । (उच्चैः) सेटन !

(सेटनः प्रविशति ।)

सेटनः - महाराजस्य का इच्छा ?

मेक्बेतः - का वार्ता प्रत्यग्रा ?

सेटनः - सर्वाणि पूर्वकथनानि सत्यानीति ज्ञायते ।

मेक्बेतः - यावन्ममास्थिभ्यो मांसं खण्डितं भवेत् तावदहं योत्स्ये । मम कवचं दीयताम् ।

सेटनः - इदानीमेव तव कवचस्यावश्यकता नास्ति ।

मेक्बेतः - तथाप्यहं कवचं धरामि । अधिकानश्वारोहान् प्रेषय । सर्वो देशः अन्विष्यताम् । यदि कश्चिद् भयलक्षणं प्रदर्शयेत् तस्य कण्ठोद्बन्धनं क्रियताम् । मम कवचमुपहर । (वैद्यं प्रति) मम पत्न्या उल्लाघतायाः का स्थितिः ?

वैद्यः - तस्याः शारीरिकी अस्वस्थता अधिका नास्ति । प्रभो ! मतिभ्रमास्तस्याश्चेतसि राशीभवन्ति तां व्याकुलयन्ति च ।

मेक्बेतः - तस्या रोगस्य चिकित्सा क्रियताम् । रुग्णायास्तस्या मतेश्चिकित्सा क्रियताम् । स्मृतौ स्थितं दुःखमपनीयताम् । केनाप्यौषधेन तस्या मत्यां स्थितानि पीडाकराणि आलोचनानि अपनीय तस्या मनसो भारं विनाशय ।

वैद्यः - ईदृशेषु रोगेषु रोगिणा स्वयं चिकित्सा कर्तव्या ।

मेक्बेतः - तर्हि भवतामौषधानि श्वभ्यः क्षिप्यन्ताम्। तैर्मम किमपि

 In Public domain. Digitization Muthulakshmi Research Academy

कार्यं न भवति । सेटन ! मां कवचं धारय । मम शूलमुपहर । वैद्य ! सम्प्रति कश्चिद् रोगो मम देशं बाधते । तं रोगं निर्धार्य चिकित्सां कृत्वा पूर्वारोग्यस्थितिः संपाद्या । यदि तत् क्रियते तर्हि सर्वस्मिन् प्रपञ्चे तव श्लाघां कुर्याम् । (सेटनं प्रति) पुनः कवचमपसारय । वैद्य! विरेचनकर-मौषधं र्हुबर्बः सेन्ना वा किं मम देशादाङ्ग्लेयपुरुषान् प्रक्षालयेत् ? अपि भवता तादृशमौषधं श्रुतम् ?

वैद्यः - प्रभो ! महाराजेन युद्धसन्नाहाः क्रियन्ते इति वयं चिन्तयामः किमपि प्रवर्तते इति ।

मेक्बेतः - (सेटनं प्रति) कवचं गृहीत्वा मामनुसर । यावद् बिर्नेमारण्यं डन्सिनेनं प्रति न प्रचलति तावदहं मृत्योर्वा क्षतेर्वा न बिभेमि ।

वैद्यः - (स्वगतम्) यद्यहमस्माद् डन्सिनेनदुर्गात् सक्षेममपसरामि तर्हि न कयापि लाभप्रत्याशया प्रत्यागमिष्यामि ।

(ते निष्क्रान्ताः ।)

पञ्चमः अङ्कः चतुर्थं दृश्यम् ।

(बिर्नेमारण्यसमीपे जनपदः । भेरीः पताकाश्च गृहीत्वा केचिज्जनाः प्रविशन्ति । माल्कमः वृद्धः सीवर्डः तस्य पुत्रः मेक्डफः मेन्टीथः केय्त्नेसः आन्गासः लेन्नक्सः रासः सैनिकाश्च पङ्क्त्या गच्छन्तः (marching) प्रविशन्ति ।)

माल्कमः - बन्धुजनाः ! आशासे स काल आसाद्यते यदा गृहेषु कोष्ठान् सक्षेमजीवनयोग्यान् कुर्मः ।

मेन्टीथः - कुर्मः । निस्संशयं कुर्मः ।

In Public domain. Digitization Muthulakshmi Research Academy

सीवर्डः - किमिदं वनमस्माकं पुरस्तात् ?

मेन्टीथः - बिर्नेमारण्यम् ।

माल्कमः - सर्वः सैनिको वृक्षादेकां शाखां छित्त्वा पुरस्ताद् वह गच्छतु । तथा वयं सैनिकसंख्यां गोपायामः । तस्य चारा अस्मद्बल-स्यासत्यगणनां तं वदेयुः ।

सैनिकाः - एवं कुर्मः ।

सीवर्डः - अस्माकमियमेव वार्ता प्राप्ता स जनपीडको मेक्बेत आत्मविश्वासपूर्णः डन्सिनेनदुर्गे तिष्ठति । अस्माकं दुर्गोपरोधं प्रतिहन्तुं सन्नह्यते ।

माल्कमः - सैव तस्य प्रधानाशंसा । यद्यत् समभवत् तत्तद् गुरु लघु वा तस्य प्रतीपमभवत् । ये तमिदानीं सेवन्ते ते बलात्कारेण कुर्वन्ति । तस्मिन् तेषां मनांसि न सन्ति ।

मेक्डफः - अस्माकं तस्याभिशंसनं युज्यते । तथापि सम्प्रति तस्माद् विरमामः । सम्प्रति वयं समर्थाः सैनिका भूत्वा प्रवर्तामहे । तस्योद्यमस्य फलं द्रक्ष्यामः ।

सीवर्डः - अस्माकं प्रयत्नस्य फलं द्रक्ष्यामः । कियत् प्राप्तं कियन्नष्टमिति । अनिश्चितालोचनानि विजयं प्रति संशयं प्रकटयेयुः । दृढप्रहारा एवान्त्यं फलं निर्णयन्ति । अस्याः कार्यसिद्धेः कृते युद्धे प्रवर्तामहे ।

(ते पङ्क्त्यां निर्गच्छन्ति ।)

पञ्चमः अङ्कः पञ्चमं दृश्यम् ।

(डन्सिनेनदुर्गे मेक्बेतस्य भवनम् । मेक्बेतः सेटनः सैनिकाश्च प्रविशन्ति । भेरीः पताकाश्च गृहीत्वा केचन पुरुषाः प्रविशन्ति ।)

मेक्बेतः - पताका दुर्गबहिर्भित्तिषु बध्यन्ताम् । सर्व आक्रोशति आङ्ग्लेया आगच्छन्तीति । वयं सुरक्षिता दृढाश्च । दुर्गोपरोधं व्यर्थं करिष्यामः । ते दुर्गस्य बहिः सैन्यनिवेशं कुर्वन्तु तत्रैव क्षुधा ज्वरेण च क्षयन्तु । अस्मदीयाः केचिदस्मान् हित्वा तान् संगताः । नो चेत् बहिर्गत्वा धैर्येण तैः सह युद्ध्वा तान् इङ्ग्लन्डे तेषां गृहाणि द्रावयेम ।

(अभ्यन्तरात् स्त्रीणामाक्रोशाः श्रूयन्ते ।)

क एष ध्वनिः ?

सेटनः - स्त्रीणामाक्रोशोऽयम् । (स निष्क्रान्तः ।)

मेक्बेतः - भयं कीदृशमिति मया विस्मृतम् । नक्तमकस्मादाक्रोशं श्रुतवतो मम पुरा देहकम्पनमासीत् । दुःखकथां श्रुतवतो रोमहर्षो जातश्च। सम्प्रत्यहं भयंकरवार्ताः श्रुत्वा निर्विण्णो न भवामि । भयंकरकथा वा हत्याचिन्तनानि वा इदानीं मयि अकिञ्चित्कराणि ।

(सेटनः पुनः प्रविशति ।)

सेटन ! तस्याक्रोशस्य किं कारणम् ?

सेटनः - प्रभो ! राज्ञी मृता ।

मेक्बेतः - तया मर्तव्यमेवाद्य वा कस्मिन्नपि अनन्तरकाले वा । यस्मिन् कस्मिन्नपि दिने सा वार्ता निश्चयमागच्छति । श्वः श्वः श्वः ।

In Public domain. Digitization Muthulakshmi Research Academy

दिनानि क्रमशः शनैः शनैर्गच्छन्ति निर्दिष्टकालस्यान्त्यक्षणं यावत् यद्यद् दिनं गतं तत्तदविवेकिनो जनान् मरणसमीपमनयत् । इदानीं जनाः केवलं भस्म । हे लघुदीप ! निर्वापणं गच्छ । जीवितं नाम मिथ्या लोकवेदिकायां वराको नटः साटोपं सोद्वेगं च नटति परिमितं काल पश्चात् तस्य कथा पुनर्न श्रूयते । जीवितं नाम केनचिन्मूढेन कथित कथा शब्दैरुद्रेकेण च भरिता किन्तु अर्थहीना निस्सारा च ।

(वार्ताहरः प्रविशति ।)

काञ्चन वार्तां वक्तुमागतोऽसि । झटिति वद ।

वार्ताहरः - महाराज ! यन्मया दृष्टं तद् वक्तव्यम् । तथापि कथं वक्तव्यमहं न जानामि ।

मेक्बेतः - स्वैरं वद ।

वार्ताहरः - पर्वते स्थित्वा परितः पश्यन्नासम् । बिर्नेमारण्यं प्रत्यपश्यम् चलतीव तद् दृष्टम् ।

मेक्बेतः - मिथ्याप्रलापिन् ! दासापसद !

वार्ताहरः - यद्यसत्यं वदामि तर्हि मयि दण्डनं कुरु। इतो मैलत्रयदूरा- च्चलदागच्छच्च वनं पश्येः ।

मेक्बेतः - यद्यसत्यं भाषसे त्वां सजीवं निकटवृक्षे लम्बयामि क्षुधा मरणपर्यन्तम् । यदि सत्यं वदसि तत् त्वं मयि कुरु । ममात्मविश्वासो विलुप्यते । मम संदेहो जायते भूतैर्ममासत्यमुक्तं यत् सत्यवत् श्रुतम्। यावद् बिर्नेमारण्यं डन्सिनेनं नायाति तावत् तव भयं नास्तीति । इदानीं किञ्चन वनं डन्सिनेनमायाति । युद्धाय सन्नद्धो भव गच्छ । सैनिकाः ! आयुधानि धरत । युद्धाय गच्छामः । यदि वार्ताहरः सत्यं वदति तर्हि

In Public domain. Digitization Muthulakshmi Research Academy

इतः पलायनं वा अत्र स्थानं वा वृथा । जीवितेन श्रान्तोऽस्मि । सम्प्रति सूर्यप्रभामपि द्वेष्मि । लोको ध्वंसताम् । घण्टा नाद्यताम् । वायवो वान्तु । विनाश आगच्छतु । कवचधारिणो वयं मरिष्यामः ।

(निष्क्रान्तौ ।)

पञ्चमः अङ्कः षष्ठं दृश्यम् ।

(डन्सिनेनदुर्गस्य पुरोभागे । भेरीः पताकाश्च गृहीत्वा केचन पुरुषाश्चलन्ति । माल्कमः सीवर्डः मेक्डफः गृहीतवृक्षशाखा तेषां सेना च प्रविशन्ति ।)

माल्कमः - वयं दुर्गसमीपमागताः । शाखाः प्रक्षिप्यन्ताम् । यथावदात्मानं प्रदर्शयत । अस्माकं प्रथमसेनाभागं बन्धुः सीवर्डः सपुत्रो नयति । मान्यो मेक्डफः अहं च शिष्टं करिष्यावः यथा चिन्तितं कल्पितं च ।

सीवर्डः - विजयताम् । अद्य नक्तं यदि मेक्बेतस्य सेनामासादयामस्तर्हि अस्माकं विजयोऽस्तु पराजयो वा ।

मेक्डफः - तूर्याणि नाद्यन्ताम् । सर्वाणि वाद्यानि वाद्यन्ताम् । तेन सूच्यते महान् रक्तस्रावः संघातवधश्च भविष्यतीति ।

(निष्क्रान्तौ ।)

पञ्चमः अङ्कः सप्तमं दृश्यम् ।

(रणभूम्यामन्यो भागः । तूर्यध्वनिः । रणध्वनयश्च ।)

मेक्बेतः - अहमस्मिन् स्थले बद्धवदस्मि । अत्रैव मया योद्धव्यं यथा बद्धो भल्लूकः श्वभिः। किन्तु कोऽपि स्त्रीजातो मां न हन्ति । मम मरण-भयं नास्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

(सीवर्डस्य पुत्रो युवा प्रविशति ।)

सीवर्डस्य पुत्रः - किंनामा त्वम् ?

मेक्बेतः - श्रोतुं त्वं बिभेषि ।

सीवर्डस्य पुत्रः - नाहम् । यदि तव नरकस्थवेतालादधिकभयंकरं नामास्ति तदाप्यहं न बिभेमि ।

मेक्बेतः - मम नाम मेक्बेतः ।

सीवर्डस्य पुत्रः - वेतालनाम्नोऽपि जुगुप्साजनकं तव नाम ।

मेक्बेतः - तस्मादपि मत्तस्तव भयं भवेत् ।

सीवर्डस्य पुत्रः - गर्ह्य ! जनपीडक ! मृषा मा वद । त्वत्तोऽहं न बिभेमीति मम खड्गेन निरूपयामि ।

(तौ युध्येते । सीवर्डस्य पुत्रो हतः ।)

मेक्बेतः - त्वं स्त्रियां जातः । स्त्रीजातस्यायुधं प्रेक्ष्याहं हसामि ।

(मेक्बेतो निष्क्रान्तः । युद्धध्वनिः । मेक्डफः प्रविशति ।)

मेक्डफः - अत्र महान् युद्धध्वनिर्भवति । जनपीडक ! मुखं प्रदर्शय। यदि त्वमन्यस्य प्रहारेण हन्यसे तदा मम भार्यायाः पुत्राणां च भूतानि मम शान्तिं न दद्युः । अहं मम खड्गमेतेषु दीनदासेषु न प्रयुञ्जे यतस्ते वेतनेन युध्यन्ते । मया मेक्बेतेन योद्धव्यम् । नो चेन्मम खड्गमनुपयुक्तं कोशे पुनः स्थापयामि वैरनिर्यातनमकृत्वा। अत्रायुधप्रयोगोऽत्यन्तं दृश्यते। अत्र केनापि महाशूरेण भवितव्यम् । देव ! तं मे दर्शय । नान्यदपेक्षे ।

(मेक्डफो निष्क्रान्तः । युद्धशब्दः । माल्कमो वृद्धः सीवर्डश्च प्रविशतः।)

सीवर्डः - इत इतः प्रभो ! प्रतिरोधं विना दुर्गः अस्मदधीनोऽभवत् । जनपीडकस्य सैनिका यावन्तस्तस्य पक्षे सन्ति तावन्तः अस्मत्पक्षे च ।

 In Public domain. Digitization Muthulakshmi Research Academy

अस्माकं मान्याः प्रभवः अस्मिन् युद्धे प्रशंसनीयं कार्यमकुर्वन् । त्वया विजयः प्राप्तकल्पः । स्वल्पमेव शिष्यते ।

माल्कमः - अस्मिन् युद्धे येऽस्माकं पुरा शत्रव आसन् तेऽस्मत्पक्षेऽयुध्यन्त ।

सीवर्डः - आर्य ! दुर्गं प्रविश ।

(ते गताः । युद्धशब्दाः श्रूयन्ते ।)

पञ्चमः अङ्कः अष्टमं दृश्यम् ।

(रणरङ्गे अन्यस्थलम् । मेक्बेतः प्रविशति ।)

मेक्बेतः - (स्वगतम्) युद्धे पराजिता रोमदेशनायकाः स्वखड्गैरात्मघातमकुर्वन् । मूर्खान् तानहं किमनुकुर्याम् ? यावत् जीवन्तः शत्रवो दृश्यन्ते तावत् तेषु क्षतयः कर्तव्याः । न तु मयि ।

(मेक्डफः प्रविशति ।)

मेक्डफः - हे नरकलोकमहाशुनक ! इत आगच्छ । युध्यस्व ।

मेक्बेतः - सर्वेषु शत्रुषु त्वं मया विशिष्य विसृष्टः। इतो गच्छ । तव कुटुम्बस्य महान् रक्तराशिर्मया स्रावितः । तत् पापं मयि वर्तते ।

मेक्डफः - अलं वाग्भिः । मम वाचो मम खड्गे सन्ति । तव पापानि वाचमतिरिच्यन्ते ।

(तौ युध्येते ।)

मेक्बेतः - त्वं वृथा श्राम्यसि । तव पुरस्तात् स्थिते वायौ किं त्वं खड्गेन क्षतिं कुर्याः ? यान् त्वं खड्गेन विदारयेः तेषां शिरांसि खण्डयितुं तवायुधमुपयुङ्क्ष्व । मम सकाशे मायाशक्तिरस्ति या मम

In Public domain. Digitization Muthulakshmi Research Academy

जीवितं रक्षति । स्त्रियां जातः कोऽपि मां न हिंस्यात् ।

मेक्डफः - इदानीं तव नैराश्यं भवतु यतस्तव मायाशक्तिर्विफला भवति । तव प्रभुर्दुष्टपिशाचस्त्वां वदतु मेक्डफः सहजविधानेन न जातः। अपूर्णकाले प्रसवात् पूर्वं मातुः शरीराच्छिन्नः ।

मेक्बेतः - इदं वक्तुं त्वयि शापः पततु । अनेन वचनेन ममोत्साहः पराजितः । तेषु मायाभूतेषु विश्वासो न कर्तव्यः । तान्यस्मानल्पान् कृत्वा भविष्यं वदन्ति द्व्यर्थवद्भिर्वचनैः । सत्याभासैर्वचनैर्व्यर्थाशां जनयन्ति । अहं त्वया सह न योत्स्ये ।

मेक्डफः - तर्हि पराजयं स्वीकृत्य भीरुर्मदधीनो भव । त्वां प्रदर्शयिष्यामः विचित्रैर्जन्तुभिः सह एष जनघातकः प्रदर्श्यते इति ।

मेक्बेतः - अहं पराजयं न स्वीकरोमि । यूनो माल्कमस्य विधेयो न भवामि । नाहमनागरिकजनसमूहस्य दूषणानि सहेय । सत्यं बिर्नेमवनं डन्सिनेनमागतम् । रणे मम प्रतिमुखं स्थितस्त्वं स्त्रियां न जातः । तथाप्यहं युध्ये । फलकं खड्गं च गृहीत्वा स्थितोऽस्मि । मेक्डफ ! युध्यस्व । यः प्रथमं वदेदलं युद्धेनेति स शश्वन्नरके तिष्ठतु ।

(युध्यमानौ तौ निष्क्रान्तौ । युद्धशब्दः । तूर्यध्वनयः ।
भेरीभिः पताकाभिश्च सह माल्कमः वृद्धः सीवर्डः
रासः अन्ये प्रभवः सैनिकाश्च प्रविशन्ति ।)

माल्कमः - अहमाशासे अस्मत्सुहृदः येऽत्र न दृश्यन्ते ते च सन्तु ।

सीवर्डः - युद्धे केचिन्म्रियन्ते । तथाप्यत्र सक्षेमं स्थितानां संख्यां दृष्ट्वा महान् विजयः अस्माकं प्राप्तः अल्पेन जीवितनाशेनेति तृप्तोऽस्मि ।

माल्कमः - मेक्डफस्तव पुत्रश्चास्मिन् समुदाये न दृश्येते ।

In Public domain. Digitization Muthulakshmi Research Academy

रासः - प्रभो सीवर्ड ! यद् योधेन कर्तव्यं तत् तव पुत्रेण कृतम् । युध्यमानः स मृतः । यौवनप्राप्तिपर्यन्त एव तस्य जीवितकाल आसीत् । पराक्रमं निर्भयतां च प्रदर्श्य वीरगतिं प्राप्तः ।

सीवर्डः - अयमर्थः । स मृतः ।

रासः - तस्य देहो रणभूमेर्नीतः । यदि तस्य सुगुणानां प्रमाणेन विलापं कुर्यास्तर्हि तव विलापस्यावसानं न भविष्यति ।

सीवर्डः - अपि क्षतयस्तस्य शरीरस्य पुरस्तादासन् ?

रासः - अथकिम् । सर्वाः क्षतयो देहस्य पुरोभागे सन्ति ।

सीवर्डः - तत् प्रशस्तम् । मम सैनिकः पुत्र इदानीं भगवतः सैनिकः संजातः । यदि मम शतं पुत्राः सन्ति तेषामितो महत्तरं मरणं नाशासे । पुत्र ! आमन्त्रये त्वाम् । त्वं प्रशस्यं मरणं प्राप्तः ।

माल्कमः - वयमस्य मरणानन्तरकार्याणि सम्यक् करिष्यामः ।

सीवर्डः - स किमप्यधिकं नापेक्षते । प्रशस्यं मरणं प्राप्य जीवितस्य कर्तव्यमकरोत् । देवस्तस्य शान्तिं ददातु । इदानीं प्रशस्यतरा कापि वार्ता मेक्डफेनानीता दृश्यते ।

(मेक्डफः पुनः प्रविशति मेक्बेतस्य शिरो गृह्णन् ।)

मेक्डफः - विजयतां माल्कमः स्काट्लन्डदेशस्य राजा । इयमिदानीं तव पदवी । पश्य जनपीडकस्य तस्य शिरो दण्डाग्रे स्थापितम् । सम्प्रति अस्मज्जना मुक्ताः। त्वमुत्तमैस्तव प्रभुभिः परिवृतोऽसि । यानि वचनान्यहं त्वां वदानि तानि तेषां मनस्सु प्रतिध्वनितानि भवन्ति । अहमाशासे मम कण्ठनादेन सह तेषामपि कण्ठनादाः सम्मिलन्ति तव स्काट्लन्डराजस्य जयनिनादकरणे ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वे - स्काट्लन्डस्य राजन् ! तव स्वागतमस्तु ।

माल्कमः - नातिकालो गच्छेद् यदाहं सर्वेषां भवतां प्रणयं प्रशंस पारितोषिकाणि दास्यामि। एवं मम धर्मं निर्वर्तयिष्यामि । भो मम प्रधान मम बन्धवश्च ! सर्वेषां भवतां एर्लपदवीं प्रददामि या पदवी स्काट्लन्ड देशेन प्रथमपौराणां दीयते । अन्यानि च बहूनि कार्याणि सन्ति यानि परिस्थितिपरिवर्तनेन आपतितानि । तेषु कानिचित् । जनपीडकात् मेक्बेतादात्मानं रक्षितुं ये पलायितास्तेषां पुनरानयनम् । मृतस्य तस्य घातुकस्य तस्य राक्षसपत्न्याश्च क्रूरप्रतिनिधयो ये तस्य कार्याण्यकुर्वन् तेषां विषये किं कार्यम् ? श्रूयते सा राक्षसी मेक्बेतस्य पत्नी आत्मघात-मकरोत् । अन्ये च बहवो विषयाः सन्ति येषु अस्माकमवधानं कर्तव्यम्। सर्वाण्येतानि दैवसहायतया करिष्यामः अनुरूपे काले स्थले च । इदानीमहं सर्वेभ्यो युष्मभ्यं संघाय प्रतिव्यक्ति च कृतज्ञतामभिवन्दनं च वदामि। वयं युष्मानाह्वयामः स्कोने अस्मद्राजाभिषेकाय ।

(तूर्यध्वनिना सह निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः

In Public domain. Digitization Muthulakshmi Research Academy

 In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः

पात्राणि

Hamlet	हेम्लेटः । डेन्मार्कस्य पूर्वराजस्य हेम्लेटस्य पुत्रः ।
Claudius	क्लाडियसः । पूर्वराजस्य हेम्लेटस्य कनीयान् भ्राता ।
Polonius	पोलोनियसः । कश्चित् प्रभुः ।
Laertes	लेर्टेसः । पोलोनियसस्य पुत्रः ।
Reynaldo	रेनाल्डः । पोलोनियसस्य सेवकः ।
Horatio	होरेषियः । हेम्लेटस्य मित्रम् ।
Voltimand	वोल्टिमन्डः । राज्ञः सदस्याः ।
Cornelius	कार्नीलियसः ।
Rosencrantz	रोसेन्क्रान्जः ।
Guildenstern	गिल्डेन्स्टेर्नः ।
Osric	आस्रिकः ।
Fransisco	फ्रान्सिस्कः । सैनिकः ।
Bernardo	बेर्नार्डः । } उद्योगिनौ
Marcellus	मार्सेल्लसः } उद्योगिनौ
Fortinbras	फोर्टिन्ब्रासः । नार्वेयुवराजः ।
Gonzago	गोन्जागः । नटः ।

In Public domain. Digitization Muthulakshmi Research Academy

भूतम् प्रभवः सेवकाः खनकौ नाविकाः नटाः ।

Gertrude	**गेर्ट्रूडा । हेम्लेटस्य माता ।**
Ophelia	**ओफीलिया । पोलोनियसस्य पुत्री ।**

पूर्वकथा - डेन्मार्कस्य पूर्वो राजा हेम्लेटः । तं रहसि हत्वा तस्यानुजः क्लाडियसो राजा बभूव । मृतस्य ज्येष्ठभ्रातुः पत्नीं गेर्ट्रूडां पर्यणयत्। नाटकनायको युवा हेम्लेटो मृतराजस्य हेम्लेटस्य पुत्रः ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः

प्रथमः अङ्कः : प्रथमं दृश्यम् ।

(एल्सिनोरे दुर्गस्य पुरस्तादुन्नतप्रदेशः । फ्रेन्सिस्कः स्वस्य रक्षणस्थानेऽस्ति । तं प्रति बेर्नार्डः प्रविशति ।)

बेर्नार्डः - कोऽत्रास्ति नियोगे ?

फ्रान्सिस्कः - कस्त्वम् ? प्रथमं वद । यथास्थित आत्मनः अभिज्ञानं प्रकटय ।

बेर्नार्डः - दीर्घायुरस्तु राजा ।

फ्रान्सिस्कः - अपि भवान् बेर्नार्डः ?

बेर्नार्डः - अथकिम् ।

फ्रान्सिस्कः - निर्दिष्टे समये आगतोऽसि ।

बेर्नार्डः - इदानीमेव घटी द्वादशीं होरामरणत्! फ्रान्सिस्क! गृहं गच्छ । शेष्व ।

फ्रान्सिस्कः - अनुगृहीतोऽस्मि इतो गन्तुम । बहिरतीव शीतलम् । अहं क्लान्तश्च ।

बेर्नार्डः - किं तव रक्षणकर्मणि कोऽपि क्लेश आसीत् ?

फ्रान्सिस्कः - मूषिकोऽपि न प्राचलत् ।

बेर्नार्डः - बाढम् । शुभास्तु तव रात्रिः । इदं नक्तं होरेषियेण मार्सेल्लसेन च मया सह रक्षणकार्ये भवितव्यम् । यदि त्वं तौ पश्यसि तर्हि त्वरां कर्तुं तौ वद ।

फ्रान्सिस्कः - श्रूयते तयोरागमनशब्दः । स्थीयताम् । कस्तत्र ?

 In Public domain. Digitization Muthulakshmi Research Academy

(मार्सेल्लसः होरेषियश्च प्रविशतः ।)

होरेषियः- आवां देशस्य सुहृदौ ।

मार्सेल्लसः - डेन्मार्कराजजनौ च ।

फ्रान्सिस्कः - शुभास्तु रात्रिर्युवयोः ।

मार्सेल्लसः - गम्यतां सुसैनिक ! को रक्षी तव स्थाने ?

फ्रान्सिस्कः - बेर्नार्डेन मम स्थानं गृहीतम् । शुभास्तु तव रात्रिः ।

(फ्रान्सिस्कः निष्क्रान्तः ।)

मार्सेल्लसः - बेर्नार्ड ! अयमस्मि ।

बेर्नार्डः - बाढम् । अपि होरेषियश्चास्ति ?

होरेषियः - अस्मि अहमपि ।

बेर्नार्डः - स्वागतं होरेषिय ! स्वागतं मार्सेल्लस !

मार्सेल्लसः - किं तत् पुनर्दृष्टं त्वयाद्य नक्तम् ?

बेर्नार्डः - मया किमपि न दृष्टम् ।

मार्सेल्लसः - होरेषियो वदति तत् केवलमस्माकमूह इति । भयानकं तदावाभ्यां द्विर्दृष्टम् । स तु किमपि तन्न विश्वसिति । अत एव स मयाभ्यर्थितः अद्य नक्तमिदानीमत्रागन्तुं येन तद् भूतं यदि दृश्यते स च पश्येत् तत् प्रति भाषेत च ।

होरेषियः - मृषा प्रलापः । नैव तद् दृश्येत ।

बेर्नार्डः - उपविशतु भवान् शृणोतु च किञ्चिदस्मद्वचनम् । आवां पुनः कथयावस्तां कथां यां त्वं विश्वसितुं नेच्छेः । आवाभ्यां तु तद् दृष्टं द्वयोः रात्र्योः ।

होरेषियः - बाढम् । उपविशामः । शृणुमो बेर्नार्डस्य कथनम् ।

In Public domain. Digitization Muthulakshmi Research Academy

बेर्नार्डः - पश्याकाशे तन्नक्षत्रम् । गतरात्रौ तत् तत्रैव स्थाने आसीत् यत्रेदानीं प्रकाशते ध्रुवनक्षत्रात् पश्चिमदिशि । तदा एकवादनसमय आसीत् । मार्सेल्लसः अहं च -

(भूतं प्रविशति ।)

मार्सेल्लसः - निश्शब्दं कुरु । तदागतं पुनरपि ।

बेर्नार्डः - मृतस्य राज्ञः सदृशं दृश्यते ।

मार्सेल्लसः - (होरेषियं प्रति) होरेषिय ! त्वं महाविद्वानसि । तत् किमपि वद ।

बेर्नार्डः - होरेषिय ! अपि तद् राजसदृशं नास्ति ?

होरेषियः - सर्वथा राजसदृशमस्ति । भयं जनयति विस्मयं च ।

बेर्नार्डः - किमपि वक्तव्यमस्माभिरिति तदिच्छति ।

मार्सेल्लसः - होरेषिय ! पृच्छ तत् किमपि ।

होरेषियः - किमसि त्वम् ? अर्धरात्रे किं बहिश्चलसि ? युद्धाय धृतपरिधानो मृतो डेन्मार्कस्य राजेव त्वं दृश्यसे । देवो मां प्रष्टुमादिशति । वद । अहमादिशामि ।

मार्सेल्लसः - त्वया अपराद्धं तद् दृश्यते ।

बेर्नार्डः - पश्य । तन्निर्गच्छति ।

होरेषियः - तिष्ठ । वद । वद । अहमाज्ञापयामि । वद ।

(भूतं निष्क्रान्तम् ।)

मार्सेल्लसः - तद् गतम् । इदानीं न प्रतिवक्ति ।

बेर्नार्डः - किं भवति त्वयि होरेषिय त्वं विवर्णोऽसि कम्पसे च । अपीदानीं त्वं मन्यसे नास्तीदं केवलमस्माकमूह इति ? तद् भूतं प्रति किं

 In Public domain. Digitization Muthulakshmi Research Academy
चिन्तयसि ?

होरेषियः - दैवसन्निधौ प्रतिजानामि । यदि स्वचक्षुर्भ्यामिदं न मया दृष्टं तदा नैव विश्वसिमि ।

मार्सेल्लसः - किं तदस्मद्राजसदृशं नास्ति ?

होरेषियः - कः संदेहः ? यावान् त्वं त्वत्सदृशस्तावत् तद् भूतं राजसदृशम् । अस्माकं राज्ञा एतदेव कवचं धृतं यदा स नार्वेराजमयुध्यत। भूतेन च तथैव भ्रूभङ्गः कृतः यथा राज्ञा कृतः हिमस्योपरि वाहनेन गच्छतः पोलानाक्राम्यता । सर्वमिदमतिमानुषमस्ति ।

मार्सेल्लसः - इतः पूर्वमिदं द्विरभवत् । अन्यूनानतिरिक्तमस्मिन्नेव समये । रक्षणकर्मणि स्थितयोरावयोः स्थाने स वीर इव साटोपं चलति स्म ।

होरेषियः - अहं न जानामि कथमिदं व्याख्यातुम् । तथापि मम भाति इदमस्मद्देशस्य विपत्तिं सूचयति ।

मार्सेल्लसः - अस्माभिरुपविश्येयं समस्या चर्चनीया । कोऽपि मां वदतु । किमर्थं रक्षिणो नियुक्ता निर्दिष्टानि नियतं कुर्वन्तः ? किमर्थमारकूटगुलिकाप्रक्षेपिण्यो निर्मीयन्ते डेन्मार्कदेशे ? किमर्थं विदेशेभ्यो बहून्यायुधान्यानीयन्ते ? किमर्थं नौकानिर्मातारो बहुव्यापृता रविवासरेष्वपि न विश्राम्यन्तः ? किमर्थं कर्मकरा नक्तंदिवं कर्म कुर्वन्ति ? किं कोऽपि मां बोधयेत् ?

होरेषियः - अहं बोधयेयम् । अथवा किंवदन्तीर्वर्णयेयम् । त्वं जानासि अस्माकं मृतो राजा यमिदानीमेव भूतरूपेण वयमपश्याम स नार्वेराजस्य फोर्टिन्ब्रासस्य महान् शत्रुरभवत् । फोर्टिन्ब्रासो धाष्टर्येन तं योद्धुमाह्वयत्।

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन् युद्धे अस्माकं राजा शूरो हेम्लेटो राजानं फोर्टिन्ब्रासमहन्। एवं स डेन्मार्के कीर्तितः । तयोर्मध्ये न्यायबद्धः समय आसीत् । मृतः स राजा तेन समयेन सर्वं स्वराज्यं विजेतृसादकरोत् जीवितेन सह । यदि अस्मद्राजः पराजितः स्यात् तेन चैवमेव कृतं स्यात् । इदानीं तु मृतस्य तस्य पुत्रो युवा फोर्टिन्ब्रासः वीरोऽपि अनुभवहीनः देशस्याञ्चलेषु वर्तमानानां केषाञ्चन कलहशीलानां समूहं समगृह्णात् । सर्वदा ते योद्धुं सिद्धाः। तेषां साहाय्येन युवा फोर्टिन्ब्रासः पित्रा नष्टान् भूभागान् पुनः प्राप्तुमभिलषति। यथाहं जानामि तथा इदमेव कारणं येन डेन्मार्के अद्यत्वे एतावान् क्षोभः प्रचलति ।

बेर्नार्डः - इदं सत्यं मन्ये । अत एव मृतस्य राज्ञो भूतं नित्यमत्रायाति यत एतानि युद्धानि तेनैव कृतानि ।

होरेषियः - इदं भूतं निश्चितमस्माकं मनःपीडां जनयति नेत्रे पतितो धूलिकण इव । अत्युन्नतशक्तिमति रोमनसाम्राज्ये महाराजस्य जूलियसस्य सीजरस्य घातात् किञ्चित्पूर्वं समाधिभ्य शवा बहिर्निर्गता रोमनगरवीथीषु अधावंश्च किमप्यसंबद्धं प्रलपन्तः । धूमकेतवो दृष्टाः। प्रातर्हिमे रक्तं मिलितम् । सूर्ये प्रतिकूलताचिह्नानि दृष्टानि । समुद्रवेगप्रवर्तकश्चन्द्रः पूर्णप्रायग्रहणान्न दृष्टः । इदानीमस्माकं च तादृशानि महादुश्शकुनानि संभवन्ति यानि आगामिनीं विपदं सूचयन्ति । भूमिः स्वर्गश्च सहास्मान् संभाविनीमापदं प्रबोधयतः ।

(भूतं पुनः प्रविशति ।)

पश्य । पुनरागतं तत् । अहं तस्याभियोगं करोमि । मयि तद् दुष्टप्रभावं करोतु । हे मायामय ! तिष्ठ ।

In Public domain. Digitization Muthulakshmi Research Academy

(भूतं हस्तौ प्रसारयति ।)

यदि तव वागस्ति अथवा शब्दान् कर्तुं शक्नेषि तर्हि मां वद । यद्यहं किमपि सुकार्यं कर्तुं शक्नोमि यत् तव शान्तिं कुर्यात् मम गौरवं च तर्हि वद । यदि त्वं रहस्यज्ञानेन जानासि तव देशस्य दुष्परिणामं यं यदि जानीमो निवारयितुं शक्नुमस्तर्हि वद । यदि जीवितकाले त्वया दुष्कर्मणा संपत् संपादिता भूगर्ते निगूहिता येन यथा लोको वदति तथा त्वं मृतमप्युद्विजसे तर्हि वद ।

(कुक्कुटो रौति ।)

मार्सेल्लस स्थापय तत्

मार्सेल्लसः - किमहं तत् शूलेन प्रहरेयम् ?

होरेषियः - प्रहर यदि तन्न तिष्ठति ।

बेर्नार्डः - अस्ति तदत्र ।

(भूतं निष्क्रान्तम् ।)

मार्सेल्लसः - गतं तत् । अस्माभिस्तस्य मानो राजतेजश्चापराद्धं प्रहारप्रयत्नेन । वायाविव तस्मिन् क्षतिकरणमसाध्यम् । अस्माकं वृथाप्रहारा अस्मान् हास्यास्पदं कुर्वन्ति ।

बेर्नार्डः - व्याहर्तुमुपक्रान्ते तस्मिन् कुक्कुटः अरावीत् ।

होरेषियः- तदा तत् तथा भयादुद्विग्नं यथा कश्चिद् दोषी भवति अपराधमारोप्य न्यायालयेनाकारणे । मया श्रुतं कुक्कुटो यः प्रभातमाविष्करोति स दिनदेवतां जागरयति कर्कशकण्ठरवेण । तस्य कर्कशकण्ठरावेण कृतावधानं विचरद् भूतं समुद्रे अग्नौ भुवि वायौ वा स्थितं सत्वरं स्वं समाधिं पुनर्गच्छति । अस्मिन् वचने सत्यं निरूपितमनेन भूतेन ।

In Public domain. Digitization Muthulakshmi Research Academy

मार्सेल्लसः - कुक्कुटेन विरावे कृते तद् भूतमन्तर्हितम् । केचिद् वदन्ति अस्माकं रक्षकस्य जननमहोत्सवात् क्रिस्टमसात् किञ्चित्पूर्वं कुक्कुट आनक्तं विरौति । वदन्ति च किमपि भूतं स्वसमाधेर्बहिरागन्तुं साहसं न करोति रात्रयः सुतरामापद्रहिता ग्रहा दुष्प्रभावं न कुर्वन्ति न च किमपि भूतादिकं सम्मोहयति मन्त्रैर्वशीकरोति वा । स कालस्तावान् पवित्रस्तावान् हितकरश्च ।

होरेषियः - मया तत् श्रुतम् । भागशो विश्वसिमि । किन्तु पश्य । अरुणमेघवस्त्रं धृत्वा प्राग्दिशि प्रभातं दूरपर्वतशिखरस्थहिमोपरि क्राम्यति। वयं रक्षणकर्मणो विरमामः । भवान् हेम्लेटं निवेदयतु यदिदं नक्तमस्माभिर्दृष्टम् । निश्चयमहं वदामि यदिदं भूतमस्मान् किमपि वक्तुं निराकरोति तत् हेम्लेटं वदेत् । अपि त्वं मया संवदसि इदमस्माभिर्हेम्लेटो वक्तव्यः प्रेम्णा सेवाधर्मेण च ?

मार्सेल्लसः - एवं कुर्मः । विज्ञापयामि अहं जानामि कुत्र स द्रष्टव्यः अव्यापृतः अस्मिन् प्रभाते । (ते निष्क्रान्ताः ।)

प्रथमः अङ्कः द्वितीयं दृश्यम् ।

(दुर्गे राजभवने प्रकोष्ठः । राजा क्लाडियसः राज्ञी गेर्ट्रूडा हेम्लेटः पोलोनियसः लेर्टेसः वोल्टिमन्डः कार्नीलियसः प्रभवः सेवकाश्च प्रविशन्ति ।)

राजा - मम प्रियभ्रातुर्हेम्लेटस्य मरणमस्मत्स्मृतौ प्रत्यग्रमस्ति । युज्यते च तं प्रति शोकः सर्वस्मिन् अस्मद्राज्ये । तं प्रति प्रगाढसंतापमनुभवन्तोऽपि वयमात्मनः श्रेयश्च चिन्तयामः। अत एव मया पूर्वं मम भ्रातृपत्नी सम्प्रति

In Public domain. Digitization Muthulakshmi Research Academy

अस्माकं राज्ञी एषा परिणीता या अस्य वीरराज्यस्य मया सह तुल्याधिकारिणी अस्ति । इदं मया कृतं हर्षेण शोकमिश्रितेन । तदा मम नयनाभ्यामानन्दाश्रूणि पतितानि दुःखाश्रूणि च । श्मशाने स्थित्वा मोदः विवाहे शोकश्च मयानुभूतौ । एवं मया मोदशोकौ समप्रमाणौ कृतौ । न च मयास्मिन् कार्ये भवतां सकाशादनुमोदनग्रहणं विस्मृतम् । भवतां संपूर्णानुमोदो मया प्राप्त इति प्रमोदे । सर्वस्यास्य कृते युष्मासु मम कृतज्ञताप्रकटनं भवति । इदानीमहमिदं वक्तुमिच्छामि यद् यूयं जानीथ। युवा फोर्टिन्ब्रासः अस्माकं बलं सामर्थ्यानि चावगणय्य वा अस्मद्भ्रातुर्मरणादस्माकं राज्यं व्याकुलतायां निपतितमिति मत्वा वा स्वप्नेषु स्वलाभं पश्यन् अस्मान् व्यथयति तस्य पित्रा मम भ्रात्रे हेम्लेटाय नष्टान् तान् भूभागान् मे समर्पयतेति साधिकारार्थनेन । ते भूमिभागा विक्रान्तेन मम भ्रात्रा प्राप्ता न्यायबद्धलेख्येन । इदमेव तं प्रति मम वचनम् । तं प्रति यद् वक्तव्यं तन्मया उक्तम् । इदानीमस्मान् प्रति अस्य समावेशस्याशयं प्रति च वदामः । अयमेवाशयः । यूनः फोर्टिन्ब्रासस्य समीपबन्धवे नार्वेदेशराजाय वयं लेखमलिखाम । स दुर्बलः शय्यागतश्च। बन्धोर्यूनः फोर्टिन्ब्रासस्योद्योगान् स सम्यङ् न जानाति च । नार्वेदेशराजो मयाभ्यर्थितः फोर्टिन्ब्रासस्यास्मिन् कर्मणि पुरोगमनं प्रतिषेद्धुं यतः सर्वाणि सैन्यदलानि संभाराश्च नार्वेदेशजनेभ्य एव गृहीताः । कार्नीलयस ! वयं त्वां प्रेषयामः । वोल्टिमन्ड । त्वामपि । युवां नार्वेदेशस्य वृद्धराजाय इमां वार्तां वहतम् । यदस्मिन् लेखे लिखितं सैव युवयोर्दौत्यपरिमितिर्नान्यत्। स्वस्ति । स्वनियोगः क्रियतां शीघ्रम् ।

कार्नीलयसः वोल्टिमन्डश्च - शीघ्रतायामन्यविषयेषु च कार्यनिर्वहणे

In Public domain. Digitization Muthulakshmi Research Academy

युष्माकं तुष्टिं करिष्यावः ।

राजा - अत्र मम मनागपि संदेहो नास्ति । स्वस्ति । भद्रमस्तु । (वोल्टिमन्डः कार्नीलयसश्च निष्क्रान्तौ ।)

अथ लेर्टेस । का तव वार्ता ? काप्यभ्यर्थना त्वयोक्ता । का सा? डेन्मार्कराजसकाशे तव समुचितायाः कस्या अप्यभ्यर्थनायाः प्रत्याख्यानं न भवति । का तवाभ्यर्थना स्यात् या मया न दीयते ? यथा बुद्धिर्मनसः हस्तो मुखस्य च सन्निहितौ तथा तव पिता डेन्मार्कराज्यस्य। लेर्टेस। का तवापेक्षा ?

लेर्टेसः - मम प्रभो । अहं तवानुमतिं प्रार्थये फ्रान्सं प्रतिगन्तुम् । अहं फ्रान्सात् स्वेच्छया डेन्मार्कमागतोऽस्मि अभिषेकसमये भवति मम भक्तिं विज्ञापयितुम् । इदानीं मम कर्तव्यं कृतम् । मम सर्वं चिन्तनं प्रतीक्षा च फ्रान्से भवतः । सर्वं तद् भवतः अनुमत्यां क्षमायां च समर्पयामि ।

राजा - अपि तव पितुरनुमतिः प्राप्ता ? पोलोनियसः किं वदति ?

पोलोनियसः - प्रभो ! स ममानुमतिमाकृष्टवान् । शनैः शनैः सा दत्ता। निरन्तरप्रबलाभ्यर्थनेनान्ते अनिच्छता मया अनुमतिर्दत्ता । प्रार्थये गन्तुं सः अनुमन्यताम् ।

राजा - लेर्टेस ! अयं तव जीविते आनन्दकालः । स सर्वदा सूपयुज्यताम् । सम्प्रति हेम्लेट ! मम ज्ञाते ! मम पुत्र !

हेम्लेटः - (स्वगतम्) ज्ञातेः किञ्चिदधिकोऽस्मि पुत्रान्न्यूनश्च प्रेम्णः अभावात् ।

राजा - कथमिदानीमपि तव मुखं विषादेन व्याप्तमस्ति ?

हेम्लेटः - प्रभो ! न तथा । मम मुखं सूर्यातपेन म्लानम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

राज्ञी - प्रियपुत्र ! तव मुखमावृत्य व्याप्तं विषादं त्यज । तव दृष्टि-र्डेन्मार्कराजं मित्रं पश्यतु । आर्यं तव पितरं शश्वदधस्ताद् धूल्यां मा पश्यतामवनते ते नेत्रे । त्वं जानासि मरणं सार्वजनिकम् । सर्वे ये जीवन्ति तैरवश्यं मर्तव्यम् । सर्वैर्मृत्युद्वारेणान्यो लोको गन्तव्यः ।

हेम्लेटः - आर्ये ! ध्रुवं तथा । मरणं साधारणम् ।

राज्ञी - यद्येवं किं तर्हि त्वं तं मृत्युं प्रति भृशं विषादेन चिन्तयन्निव दृश्यसे ?

हेम्लेटः - आर्ये ! दृश्यसे इति किं तत् ? मातः ! विलापसमयोचितानि मया धृतानि कृष्णवर्णवस्त्राणि वा श्वासकोशान्निस्सारिता भारा निश्श्वासा वा नेत्राभ्यां निर्गतः अश्रुप्रवाहो वा मुखे दृष्टो विषादो वा सर्वाणीमानि दुःखप्रकटनानि मां याथार्थ्येन न दर्शयन्ति । उपरि कथितानि लक्षणानि केवलं बहिर्दृष्टानि । कोऽपि तानि लक्षणानि धरेत् । मम तु मनसि यदस्ति तत् प्रदर्शयितुं न शक्यम् । इमानि मम निश्श्वासादिबहिर्लक्षणानि अन्तर्गतदुःखस्य सूचकान्येव ।

राजा - हेम्लेट । स्वाभाविकमिदं तव प्रवर्तनं श्लाघ्यम् । पितरमेवं विषादेन संभावयसि । तथापीदं तव ज्ञातव्यम् । तव पितुः पिता नष्टः । तस्य च पिता नष्टः । जीवतः पुत्रस्य पुत्रत्वधर्मो भवति कञ्चित कालं विलापः । किन्तु विलापे अव्यवहितप्रवर्तनं दैवे असम्मानो भवति मानवस्यानुचितं च । एवं निश्चयो दैवसम्मतो न भवति । दुर्बलं तादृशस्य तस्य हृदयम् । तस्य मनः अशान्तम् । तस्यावगमनविधानमशिक्षितम् । अन्ते यद् भविष्यति तद् वयं जानीमः सर्वो जानाति । तदर्थं किं प्रसक्तशोकेन? त्वया लज्जितेन भवितव्यं यतो दैवसमक्षमिदं पापं भवति।

In Public domain. Digitization Muthulakshmi Research Academy

मृतानां प्रतीदमघम् । आत्मस्वभावं प्रतीदमघम् । विवेकेन तस्य समर्थनमसाध्यम्। पितुर्मरणं नाम लोकस्वभावः । लोके प्रथमं मरणमारभ्याद्य कस्यचिन्मरणं यावत् लोकगतिर्वदति एतदेवमेव भवतीति। वयं त्वां प्रार्थयामः विसृजेमं निरुपयोगं शोकम् । मां पितृवत् चिन्तय। लोकः पश्यतु त्वमस्य सिंहासनस्योत्तराधिकारी युवराजोऽसि । महता प्रेम्णा औदार्येण चेदं तव प्रतिपादयामि यथा पित्रा पुत्रस्य दातव्यम्। विन्टेनबर्गे पुनर्विद्यालयं गन्तुं तवाभिप्रायस्तु अस्मत्संकल्पविरुद्धः । वयं प्रार्थयामः । आत्मानमनुनय । अत्रैव भव । तथास्माकमाह्लादमाश्वासं च कुरु । मम ज्ञातिः पुत्रश्च त्वं मम राजसभायाः प्रमुखः सदस्यो भव।

राज्ञी - तव मातुरभ्यर्थना वृथा मा भवतु । हेम्लेट ! अहं प्रार्थये । अत्र वस । विन्टेन्बर्गं मा गच्छ ।

हेम्लेटः - मान्ये ! अहं तव वचनमनुसृत्य प्रवर्ते यथाशक्ति ।

राजा - इदं समुचितं प्रसन्नं प्रतिवचनम् । डेन्मार्के अस्माभिः सह स्थितमात्मानं संभावय । मान्ये ! मामनुसर । अयं सौम्यः स्वच्छन्दश्च हेम्लेटस्यानुमोदो मम मनः प्रीणाति । तस्य सत्कारार्थं डेन्मार्कस्य राजाद्य रात्रौ पिबतु । युगपद् बहवो भुशुण्ड्यस्तत् प्रकटयन्तु तच्चाकाशे प्रतिशब्दितं भवतु । इदानीं साधयामः ।

(हेम्लेटं विना सर्वे निष्क्रान्ताः ।)

हेम्लेटः - (स्वगतम्) बत बत । ममायं मलिनो भौतिको देहो द्रवीभवतु तुषारे मिश्रितो भवतु । अथवा भगवता आत्मघातो यदि न प्रतिषिद्धः । बत बत । लोकरीतीः पश्यन्नहं कियानातुरोऽस्मि ! कियज्जडं कियदर्थरहितं च जीवितं मम प्रतिभाति । इह जीवितं नाम लज्जास्पदम्।

In Public domain. Digitization Muthulakshmi Research Academy

अयं प्रपञ्चः कश्चिदारामो यस्मिन् बहवः कक्षा उद्भूता विवृद्धाश्च । असहजैर्नीचैर्वस्तुभिः प्रपञ्च आविष्टः । एते परिणामा लोके मया नोहिताः। मृतस्य मम पितुर्द्वाविव मासौ गतौ । नापि द्वौ मासौ । स नितरां सुराजा। देवतुल्यः । अद्यतनोऽयं राजा मृगतुल्यः । मम पिता मम मातरि नितान्तं प्रणयी आसीत् । आकाशादागतान् वायून् तस्या मुखं धृष्टं स्प्रष्टुं स नानुजानाति स्म । हे भगवन् ! किमिदं सर्वं मया स्मर्तव्यम् ? सा मम पितरि तथा अनुबद्धा आसीद् यथा तेन सहाधिकं स्थित्वा अधिकतरं स्थातुमैच्छत् । तथापि एकस्मिन्नेव मासे ! नाहमिदं स्मर्तुमिच्छामि । मम पितुर्मृतशरीरमनुगम्य सा समाधिस्थलं गता भृशमश्रूणि विहरन्ती । तदा तया धृतयोरुपानहोः परिष्कारोऽपि न कलुषितः । मासोऽपि न गतः । विस्मयेऽहं सा एवमकरोत् । भगवन् सुतरां चिन्तनशून्यो मृगोऽपि ततोऽधिककालं विलपेत् । सा मम पितृव्यं पर्यणयत् । मम पितृव्यपित्रो-स्तावदन्तरमस्ति यावन्मम हेर्कुलसस्य च । मासादवरकाले! दुःखरहिता-श्रुमोचनारुणिमा नेत्रयोर्मनाक् शिष्ट एव। बत बत । तया महद् दुष्कार्यं कृतम् । अनुचितया त्वरया । सा पुनर्विवाहमकरोत् । न तत् सुकार्यं न च तस्य सुपरिणामो भविष्यति । मम हृदयं दीर्यतां यतो मया किमपि न वक्तव्यम् ।

(होरेषियः मार्सेल्लसः बेर्नार्डश्च प्रविशन्ति ।)

होरेषियः - प्रभो ! अभिवादये ।

हेम्लेटः - मुदितोऽस्मि कुशलिनस्तव दर्शनेन होरेषिय ! ननु भवान् होरेषियः ?

होरेषियः - होरेषियोऽस्मि भवतो दृढभक्तियुतः सदा सेवकश्च ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - सुमित्रमिति वद होरेषिय ! तत् सुवचनं भविष्यति । परन्तु किमर्थं विन्टेन्बर्गादागतोऽसि इह किं करोषि च ? मार्सेल्लस! भवानप्यत्रास्ति ?

मार्सेल्लसः - प्रभो ! अहमस्मि ।

हेम्लेटः - मुदितोऽस्मि तव दर्शनेन । (बेर्नार्ड प्रति) अभिवादये। (होरेषियं प्रति) होरेषिय ! विन्टेन्बर्गात् किमागतोऽसि ?

होरेषियः - विद्यालयादपगतोऽस्मि ।

हेम्लेटः - तव शत्रोरपि त्वां प्रतीदं वचनं न विश्वसिमि । अहं जानामि त्वं विद्यालयान्नापगच्छेः । किन्तु अस्मिन् एल्सिनोरे तव किं कार्यम् ? यावत् त्वमितः प्रतिगमिष्यसि तावत् त्वां शिक्षयिष्यामः भूरि मद्यपानम्।

होरेषियः - प्रभो ! तव पितुः प्रेतकार्यमुपस्थातुमहमागतोऽस्मि ।

हेम्लेटः - प्रार्थये सहाध्यायिन् ! अहं मन्ये त्वं मम मातुर्विवाहमुपस्थातुमागतः ।

होरेषियः - प्रभो ! ततः पश्चात् स विवाहः शीघ्रमभवत् । तत् सत्यम्।

हेम्लेटः - होरेषिय। तथा व्ययानां ह्रासः कृतः । श्राद्धभोजनाय भृष्टं मांसं विवाहभोजने शीतं परिवेषितम् । मम मनसि उद्वेगो जायते किमर्थमहं जीवन्नस्मि मम मातुर्द्वितीयविवाहदिने इति । होरेषिय असकृन्मे भाति अहं मम पितरं पश्यामीव ।

होरेषियः - प्रभो ! कुत्र ?

हेम्लेटः - होरेषिय ! मम भावनायाम् ।

होरेषियः - एकदाहं तमपश्यम् । स प्रसन्नः सुन्दरश्च राजा ।

हेम्लेटः - स महापुरुषः । सर्वेषु गुणेषु संपूर्णः । तादृशमन्यमहं पुनर्न

In Public domain. Digitization Muthulakshmi Research Academy

द्रक्ष्यामि ।

होरेषियः - प्रभो ! अहं चिन्तयामि तमहमपश्यं गतरात्रौ ।

हेम्लेटः - कमपश्यः ?

होरेषियः - प्रभो ! राजानं तव पितरम् ।

हेम्लेटः - राजानं मम पितरमपश्यः ?

होरेषियः - इदानीमेवातिविस्मितो न भव । श्रोतुमवहितो भवासम्भ्रमेण यावदहं कथयामीदमाश्चर्यमनयोः सुजनयोः साक्ष्ये ।

हेम्लेटः - अहो देवो मयि प्रीणातु । श्रावय माम् ।

होरेषियः - द्वयोरव्यवहितरात्र्योरिमौ सुजनौ मार्सिल्लेसः बेर्नार्डश्च रक्षणे स्थितौ राजानं तव पितरममिलतां मध्यरात्रे । तव पितृसदृशः कश्चिदाकारः आ शीर्षादापादं सज्जः सायुधस्तयोः पुरस्तादागतः । सवैभवपदक्रमेण तावतिक्रान्तश्च । आश्चर्येण भयेन च तौ पश्यतः स्म। स त्रिवारान् तयोः समीपादचलत् तावति समीपे यावति तौ तस्य दण्डेन स्पृशेत् । भयात् स्विन्नौ तौ नष्टवाचौ स्थितौ । इमां वार्तां तौ मां महति रहसि अकथयताम् । तृतीयायां रात्र्यां तयोः सह रक्षणेऽहं च स्थित आसम् । यथैताभ्यामुक्तं तथैवार्धरात्रे तथारूप एव यथा ताभ्यां वर्णितः स आकार आगतस्तयोः कथनं प्रतिपदं निश्चितं कुर्वन् । अहं तव पितरं जानामि । यथा ममैतौ हस्तौ परस्परसदृशौ तथा स आकारस्तव पितृसदृशः ।

हेम्लेटः - क्व स आगतः ?

मार्सेल्लसः - प्रभो ! तस्यां वेदिकायां यत्र वयं रक्षणकार्यं कुर्मः ।

हेम्लेटः - अपि त्वं तेन व्याहरः ?

In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - स्वामिन् ! व्याहरम् । तद्रूपं न प्रत्यवदत् । तथापि तथा अलक्ष्यत यथा सकृत् तदुन्नमितशिरो भाषितुं चेष्टामकरोत् । तस्मिन्नेव क्षणे कुक्कुटः अरावीत् । तेन शब्देन तदपक्रम्यादृश्यतां गतम् ।

हेम्लेटः - आश्चर्यमिदम् ।

होरेषियः - यथाहं जीवन् स्थितोऽस्मि तथेदं सत्यम् । इदं त्वं विज्ञाप्यः । इदमावयोः कर्तव्यमित्यस्माभिश्चिन्तितम् ।

हेम्लेटः - अवश्यं मया ज्ञातव्यम् । इदं तु मम मतिं विस्मापयति । अपि युवामद्य नक्तं रक्षणकार्यं करिष्यथः ?

मार्सेल्लसः बेर्नार्डश्चः - प्रभो ! करिष्यावः ।

हेम्लेटः - भवन्तो वदन्ति आ शीर्षादापादं धृतसन्नाहः ?

मार्सेल्लसः बेर्नार्डश्चः - प्रभो ! स आकारः आ शीर्षादापादं धृतसन्नाहः ।

हेम्लेटः - तर्हि तस्य मुखं न दृष्टं भवद्भिः ?

होरेषियः - दृष्टं प्रभो ! तस्य शिरस्त्राणं किञ्चिदुपरि कृतम् ।

हेम्लेटः - अपि तेन भ्रूभङ्गः कृतः ?

होरेषियः - तस्य मुखे कोपादधिकं दुःखं दृष्टम् ।

हेम्लेटः - किं स विवर्ण उतारुणः ?

होरेषियः - भृशं विवर्णः ।

हेम्लेटः - अपि स त्वामेवापश्यत् स्थिरैर्वीक्षणैः ?

होरेषियः - स्थिरैर्वीक्षणैर्मामेवैक्षत ।

हेम्लेटः - मया तत्र स्थातव्यमासीत् । एवमहमभिलषामि ।

होरेषियः - तदा त्वं विस्मयमग्नः स्याः ।

हेम्लेटः - तथ्यम् । विस्मयाविष्टः स्याम् । अपि स आकारश्चिरं

 In Public domain. Digitization Muthulakshmi Research Academy

स्थितः ?

होरेषियः - यावता कालेन शतं संख्या गण्यते साधारणत्वरया तावन्तं कालम् ।

मार्सेल्लसः बेर्नार्डश्च - ततश्चिरं स्थितः ।

होरेषियः - न तदा यदा मया दृष्टः ।

हेम्लेटः - तस्य श्मश्रूणि धूसराणि । एवं नु ?

होरेषियः - यथा जीवतस्तस्य दृष्टानि तथैव कालानि तत्र तत्र धूसराणि च।

हेम्लेटः - अद्य रात्र्यामहं च प्रतिपालयिष्यामि युष्माभिः सह । संभाव्यते स पुनरागमिष्यति ।

होरेषियः - निस्संशयं पुनरागमिष्यति ।

हेम्लेटः - यदि स आकारो मम पितृपादमनुहरति अहं तं संबोधयिष्यामि यद्यपि नरकद्वारं विवृतं भूत्वा मां प्रतिषेधयिष्यति । अहं सर्वान् युष्मान् विज्ञापयामि । एतावद् युष्माभिरिदं रहस्यं स्थापितम् । इतः परमपि निश्शब्दं मुद्रितं भवतु । यदद्य नक्तं भविष्यति तदपि रहस्ये स्थाप्यताम्। मयि युष्माकं प्रणयो वृथा न भविष्यति । स्वस्ति । भद्रमस्तु । तस्यां वेदिकायां युष्माभिः सह मम सम्मेलनं भविष्यति एकादशद्वादश होरयोर्मध्ये।

सर्वे - अस्माकं विधेयतां प्रकटयामो भवते स्वामिने ।

हेम्लेटः - भवत्सु मया प्रणयः कृतः । मयि भवतां प्रणयमपेक्षे । स्वस्ति।

(होरेषियः मार्सेल्लसः बेर्नार्डश्च निष्क्रान्ताः ।)

(स्वगतम्) सन्नद्धं मम पितुर्भूतम् । सन्नद्धम् ? क्वापि विश्वासघातं कृतं शङ्के । रात्रिरागच्छतु । तावन्मम मनः स्थिरं भवतु । भूम्यां

In Public domain. Digitization Muthulakshmi Research Academy

बह्वधस्तान्निखातान्यपि दुरितानि बहिर्गमिष्यन्ति मनुष्याणां दृक्पथे पतिष्यन्ति च । (निष्क्रान्तः।)

प्रथमः अङ्कः तृतीयं दृश्यम् ।

(पोलोनियसस्य गृहे कोष्ठः । प्रविशतः लेर्टेसः ओफीलिया च ।)

लेर्टेसः - सर्वाणि ममावश्यकवस्तूनि नावं प्रति नीतानि । आमन्त्रये। सोदरि ! यावत्कालं वायवः अनुकूला भवन्ति प्रयाणवाहनानि च चलन्ति तावल्लेखान् लिख ।

ओफीलिया - किं त्वं संधेक्षि ?

लेर्टेसः - अथ हेम्लेटं प्रति । त्वयि तस्य या काचित् प्रसन्नता दृश्यते सा यौवनप्रवर्तनपरिमिता । कामनया मनस्युद्भूतश्चलनशीलभावः । सुगन्ध-पुष्पमिव विकसितं नूतनं दृश्यते परन्तु न चिरं भवति । यद्यपि तत् प्रेम परिमलयुतं भवति तथापि स परिमलः सा सुन्दरता च निमेषादधिककालं न भवतः ।

ओफीलिया - न ततोऽधिकम् ?

लेर्टेसः - चिन्तय । न ततोऽधिकम् । यदा युवा प्रौढो भवति न स केवलं मांसराशिना देहप्रमाणेन च वर्धते । तस्य शरीरं यत् तस्यात्मनो मन्दिरं यदा वर्धते तदा तस्य मनसः प्रवर्तनमपि वर्धते । इदानीं स त्वयि प्रेम करोतु नाम । इदानीं त्वयि तस्य आशयः शोभनः स्यात् । तथापि त्वयावहितया भवितव्यम् । तस्योन्नतं स्थानं त्वयावगन्तव्यम् । कस्मिन्नपि कार्ये तस्य स्वेच्छा न भवेत् । तस्य संकल्पास्तस्य जन्मना नियताः । साधारणजनवद् यथा स इच्छति तथा कर्तुं न शक्नोति । तत्रेदमेव

 In Public domain. Digitization Muthulakshmi Research Academy

कारणं राज्यस्य क्षेमः सुस्थितिश्च तस्य कर्मानुसरतः । अतस्तस्येच्छा राज्यहितपरिमिता भवति यतो राज्यस्य स मुख्यः । तस्माद् यदि स वदति अहं त्वयि प्रेम करोमीति तदा त्वं विवेकमपेक्षसे येन जानीयास्तस्य वचनानि डेन्मार्कराजवचनपरिमितानीति । यदि त्वं तस्य प्रणयगानैर्मोहिता भूत्वा शीलसंपदं तस्मै समर्पयिष्यसि तदा तत् कियल्लज्जावहं भविष्यतीति चिन्तय । आत्मनो रक्षां कुर्वती भव । तव प्रणयं नियच्छ । तस्य कामस्याधीना न भव । त्वं किमपि अनुचितं न कुरु । तथापि तमेव चिन्तयन्ती आकाशे चन्द्रं पश्यन्ती यदि दीर्घकालं भवेस्तदपि त्वयि दुष्प्रभावं कुर्यात् । विकसनात् पूर्वं वसन्तकालपुष्पाणि नाशयन्ति कीटाः। सावधाना भव । भयेनात्मरक्षा भवति । पुरुषप्रसंगं विनापि यौवनमेव स्त्रिया मनो विकलयेत् । अतस्त्वयातीवात्मरक्षां कुर्वत्या भवितव्यम् ।

ओफीलिया - तव बोधनमहमनुसरामि । आत्मानं सततं प्रतिपालयामि। किन्तु हे मम सुभ्रातः! त्वं तथा न कुरु यथा केचन पापिनो गुरवः कुर्वन्ति । उन्नतप्रदेशक्रमणवत् श्रमयुतं सुशीलस्य मार्गं मम प्रदर्श्य तं मार्गं स्वयमुल्लङ्घ्य आत्मविनोदी मा भव ।

लेर्टेसः - मां प्रति तव चिन्ता मास्तु । मया चिरायितम् । एष पिता आयाति ।

(पोलोनियसः प्रविशति ।)

अहं सुभगोऽस्मि । गमनसमयेऽस्याशीर्वचनं द्विः प्राप्नोमि ।

पोलोनियसः - लेर्टेस । इदानीमपि त्वमत्रासि । तेन लज्जितश्च नासि। त्वयेदानीं नावि भवितव्यम् । वायुरनुकूलो वाति । त्वं प्रतीक्ष्यसे । ममाशीस्त्वयि भवति । ममेमे उपदेशास्तव स्मृतौ स्थिराः सन्तु ।

In Public domain. Digitization Muthulakshmi Research Academy

तवालोचनानि मनसि सन्तु तव वचनेषु न प्रविशन्तु । सम्यगविचार्य किमपि न प्रारभस्व । मैत्रीं कुरु न तु सर्वसाधारणो भव । सुहृदो विचारय । तेषां निर्व्याजतां परीक्षस्व । तेषां समुचितानां मैत्रीं रक्ष । स स्नेहबन्धो न भिद्यताम् । न तु यं कमपि अपरिणतबुद्धिमनुभवशून्यं निकटमागतं मित्ररूपेण गृहाण । कलहं मा प्रविश । यदि तु प्रविष्टोऽसि तर्हि तथा निर्वर्तयस्व यथा तव शत्रुस्त्वत्तो बिभेति । सर्वस्य वचनं शृणु। तवाभिप्रायं तु कांश्चनैव प्रयच्छ । सर्वेषामभिप्रायान् गृहाण परन्तु निर्णयमात्मनि स्थापय । तव वस्त्राणां मूल्यं तव सकाशे स्थितं धनमनुसरतु। आडम्बरस्तु तेषु मास्तु । धृतं वस्त्रं पुरुषस्य गुणादिकं सूचयति। फ्रान्सदेशे वस्त्राणां प्रामुख्यमतिशेते । ऋणं न कुरु न च देहि। ऋणरूपेण दत्तं धनं प्रायेण नश्यति ग्रहीत्रा सह मैत्री च । ऋणग्रहणं मितधनव्ययशीलं शिथिलयति । आत्मानं न प्रतारय । आत्मना शुद्धो भव । तेन गुणेनान्यं कमपि न प्रतारयेः । सर्वेषामुपदेशानामुपरीमं स्मृतौ स्थापय । दिनमनुसृत्य यथा रात्रिरायाति तथा आत्मानं प्रति शुद्धप्रवर्तनेनान्यं प्रति शुद्धप्रवर्तनमनुसरति । स्वस्ति । ममाशिषो ममोपदेशानां साफल्यं कुर्वन्तु यथाकालम् ।

लेर्टेसः - स्वामिन् ! विनीतः सन् भवन्तमामन्त्रये ।

पोलोनियसः - अथ विलाम्बो मास्तु । गम्यताम् । सेवकाः प्रतीक्षन्ते।

लेर्टेसः - आमन्त्रये ओफीलिये ! त्वयि मम कृतानुपदेशान् मनसि स्थापय ।

ओफीलिया - तवोपदेशो मम मनसि तालबद्धोऽस्ति । तस्य कुञ्चिका तव सकाशेऽस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

लेर्टेसः - आमन्त्रये । (निष्क्रान्तः ।)

पोलोनियसः - ओफीलिये ! किमुक्तासि तेन ?

ओफीलिया - यदि तव प्रीतिः स्यात् तस्य वचनं प्रभुं हेम्लेटमुद्दिष्टम् ।

पोलोनियसः - तत् सुकृतम् । सुकाले उक्तासि । उक्तोऽस्म्यहं तस्य त्वया सहासकृन्मेलनमभवत् । त्वया च स विना संकोचं स्वेच्छयादृतः । यथाहमुक्तोऽस्मि यद्येवं तर्हि त्वामिदमनुशास्मि । मया वक्तव्यं त्वं तव स्थानं न वेत्सि । मम पुत्री सती स्वसुगुणानुरूपं त्वं न प्रवर्तसे । युवयोर्मध्ये किं प्रवर्तते ? सर्वं सत्यं वद ।

ओफीलिया - एषु दिनेषु स मत्सकाशे असकृत् प्रेम प्रकटयति ।

पोलोनियसः - प्रेम ! तन्मिथ्या । त्वमनुभवहीना बालिकेव भाषसे या न जानाति आसु स्थितिषु प्रवर्तनविधानम् । त्वं वदसि प्रेम प्रकटयतीति । किं त्वं तस्य प्रेमप्रतिपादनं विश्वसिषि ?

ओफीलिया - प्रभो न जानामि किं मया मन्तव्यम् ।

पोलोनियसः - तर्ह्यहमुपदिशामि । आत्मानं शिशुतुल्यमज्ञं मन्यस्व यतस्तस्य प्रेमप्रकटनं निर्व्याजं त्वया मतम् । किन्तु तन्निर्व्याजं नास्ति। आत्मनो गौरवमधिकं संभावय ।

ओफीलिया - प्रभो ! सर्वाणि तस्य प्रेमभाषणानि सम्मानसहितान्यासन्।

पोलोनियसः - सर्वं तन्मृषाजल्पितम् ।

ओफीलिया - किं च स सर्वं वचनं पवित्रशपथेन दृढमकरोत् ।

पोलोनियसः - ते शपथा वागुरा एवाज्ञानां बन्धनार्थम् । अहं जानामि यदा कामविकार उद्दीप्यते तदा जिह्वा शपथान् स्वैरं वदति । तासु वचनदीप्तिषु कान्तिरधिका भवति उष्णताल्पा च । आरम्भे एव ते नश्यन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

ते शपथाः सत्यः प्रेमग्निरिति त्वया न प्रमादः कर्तव्यः । अतः परं तेन सहानियता न प्रवर्तस्व । त्वया सह वर्तितुं तस्याभिलाषस्य वशवर्तिनी मा भूः । आत्मानं ततोऽधिकं संभावय । तस्य शपथेषु विश्वासं मा कुरु । अतः परं तेन सह समयं वृथा मा कुरु । सावधाना भव । इदमेव मम वक्तव्यम् । आगच्छ ।

ओफीलिया - प्रभो ! अहं भवन्तमनुवर्ते । (निष्क्रान्तौ ।)

प्रथमः अङ्कः चतुर्थं दृश्यम् ।

(दुर्गस्य पुरोभागे उन्नतप्रदेशः । हेम्लेटः होरेषियः मार्सेल्लसश्च प्रविशन्ति ।)

हेम्लेटः - वायुरतीव शीतो दशतीव ।

होरेषियः - अथकिम् । तीक्ष्णः ।

हेम्लेटः - का वेला सम्प्रति ?

होरेषियः - द्वादशात् किञ्चिन्न्यूना ।

मार्सेल्लसः - न न । द्वादशः प्रहारः कृतः ।

होरेषियः - एवं नु ? मया न श्रुतः । अतो वेला आसाद्यते यदा तद् भूतं चलति । (तूर्यध्वनयः । लोहगोलकद्वयं प्रयुक्तम् ।) किं तत् ?

हेम्लेटः - अस्यां रात्रौ राजा विनोदं करोति । सामूहिकपानविनोदो नृत्यं च भवतः । वाद्यसंगीतेन सह मद्यपानं प्रवर्तते ।

होरेषियः - किमयमत्राचारः ?

हेम्लेटः - अथकिम् । तथापीदं शृणु । अहमेतद्देशीयोऽस्मि । अस्य देशस्यायमाचारः । परन्तु अहं मन्ये अयमाचारस्त्याज्यो न तु आचरणीयः ।

In Public domain. Digitization Muthulakshmi Research Academy

अनेन विशृङ्खलपानविनोदेनान्ये देशा अस्मान् निन्दन्ति । अन्यदेशीया अस्मान् क्षीवान् कथयन्ति । अस्मद्देशस्य सुनाम्नि निन्दावाक्यानि लगयन्ति। अनेनास्माकं विख्यातसुकार्याणां यशो नश्यति । एवं खलु असकृद् भवति केषुचिन्मनुष्येषु कश्चिन्मौलिको दोषो भवति जन्मतो वा स्वयमनुशीलितो वा । केचन जनास्तेनैकेन दोषेणाङ्किता भवन्ति । स दोषस्तेषु भवति नैसर्गिको वा अकस्मात् प्राप्तो वा । स दोषस्तस्मिन् स्थितानन्यान् सुगुणान् दूषयति भवन्तु ते सुगुणाः सुबहवो विशुद्धाश्च । जनास्तं तेनैव दोषेण विमृशन्ति । तथा स एक एव दोषस्तस्य सुगुणान् शून्यतां नयति।

होरेषियः - पश्य प्रभो ! तदायाति ।

(भूतं प्रविशति ।)

हेम्लेटः - देवताः स्वर्गीयाः शक्तयश्चास्मान् रक्षन्तु । त्वं सुभूतं भव दुर्भूतं वा । तवागमनं स्वर्गादस्तु नरकाद् वा । त्वं द्वेषकारणेनागतं वा हितकारणेन वा । तवाकृतिः संदेहं जनयति । त्वां भाषितुमिच्छामि । अहं त्वां हेम्लेट इति राजन्निति पितरिति डेन्मार्काधिपते इति वदामि । प्रतिवचनं वद । मां संदेहे मा स्थापय । संदेहो मां हनिष्यति । इदं तु मां वद । तवास्थीनि शास्त्रोक्तविधानेन निखातानि । कथमावरणं विभेद्य बहिरागतानि ? यस्मिन् त्वं प्रशान्तः स्थापितः स समाधिः कथं विघटितः? कथं च त्वं बहिरागतः? किमिदं सर्वं कश्चास्मिन्नभिप्रायः ? तव देहो मृतः । कथं त्वं पूर्णं कवचं धृत्वा पुनश्च भूमिमागतश्चन्द्रे प्रकाशमाने रात्रिं भयमयीं करोषि च । अस्मान् मर्त्यप्राणिनश्चिन्ताभिः प्रहरसि या अस्माकमैहिकज्ञानस्य गहना दुर्बोधाश्च । किमिदं सर्वम् ? किमर्थं त्वमत्रासि ? अस्मत्तः किं कार्यमपेक्षसे ?

In Public domain. Digitization Muthulakshmi Research Academy

(भूतं हेम्लेटं प्रति संज्ञां करोति ।)

होरेषियः - तत् त्वां प्रति संज्ञां करोति आत्मानमनुसृत्य गन्तुम् । दृश्यते त्वामेव किमपि वक्तुमिच्छति ।

मार्सेल्लसः - पश्य । सौम्यं सगौरवं च तत् त्वामेकान्तस्थलं सह गन्तुं संज्ञां करोति । किन्तु तेन सह मा गच्छ ।

होरेषियः - नैव गच्छ ।

हेम्लेटः - यदि न गच्छामि तन्न भाषेत । अहं तदनुसरामि ।

होरेषियः - प्रभो ! मा गच्छ ।

हेम्लेटः - किं न गन्तव्यम् । तत्र भयकारणं नास्ति । अहं मम जीवितं क्षुल्लकं मन्ये । ममात्मा तु तद्भूतवन्मरणरहितः । भूतेन तस्मिन् किमपि कर्तुं न शक्यते । तत् पुनश्च मां प्रति संज्ञां करोति । अहं तदनुसरामि।

होरेषियः - यदि तत् त्वां समुद्रसमीपं गन्तुं प्रलोभयेत् ? अथवा पर्वतशिखरम् ? तत्र च कमपि भयंकराकारं धरिष्यति येन तव विवेको नशिष्यति उन्मादी च भविष्यसि । इमां संभाव्यतां चिन्तय ।

हेम्लेटः - भूतं मां प्रति संज्ञां करोत्येव । अहं तदनुसरामि ।

मार्सेल्लसः - प्रभो न गन्तव्यम् ।

हेम्लेटः - मां न निवारय ।

होरेषियः - मयानुशासितो भव । मा गच्छ ।

हेम्लेटः - दिष्टस्य वशं गतोऽस्मि । तन्मम आफ्रिकादेशसिंहस्य तुल्यं बलं ददाति । इदानीमपि भूतं मां संज्ञयाकारयति । मान्यौ! हस्तानपनयतम्! अपसरतम् । भूत ! पुरस्ताद् गच्छ । अहं त्वामनुसरामि ।

(भूतं हेम्लेटश्च निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - यदा तस्य ऊहो विजृम्भते तदा स उद्रिक्तो भवति ।

मार्सेल्लसः - अनुसरावस्तम् । इदानीं तस्याज्ञा नानुसरणीया ।

होरेषियः - अहं तमनुसरामि । अस्य वृत्तस्य किं पर्यवसानं भविष्यति तदहं न जानामि ।

मार्सेल्लसः - दृश्यते डेन्मार्कदेशे किमपि जुगुप्सितं प्रवर्तते ।

होरेषियः - दैवशक्तयो दिष्टं निर्दिशेयुः ।

मार्सेल्लसः - तमनुसरावः । (निष्क्रान्तौ ।)

प्रथमः अङ्कः पञ्चमं दृश्यम् ।

(तस्मिन्नेव प्रदेशे अन्यत्र । भूतं हेम्लेटश्च प्रविशतः ।)

हेम्लेटः - कुत्र मां नयसि ? वद । इतः परं न गच्छामि ।

भूतम् - मां शृणु ।

हेम्लेटः - शृणोमि ।

भूतम् - एष कालः । मया प्रतिगन्तव्यम् । नरकाग्नावात्मसमर्पणं कर्तव्यम् ।

हेम्लेटः - बत बत ! वराकोऽसि भूत ।

भूतम् - मयि दयां न कुरु । सावधानः शृणु यत् ते प्रकाशयामि ।

हेम्लेटः - वद । मया तव वचनं श्रोतव्यम् ।

भूतम् - श्रुत्वा मयि कृतस्यापराधस्य प्रतिकारः कर्तव्यः ।

हेम्लेटः - किं वदसि ?

भूतम् - अहं तव पितुर्भूतमस्मि । इदं मम विहितम् । कञ्चित् कालं भूम्यां नक्तं पादचारेण मया गन्तव्यम् । अग्निमयनरके दिवा उपवासः

In Public domain. Digitization Muthulakshmi Research Academy

कर्तव्यः । भूम्यां मम जीवितकाले कृतानां पापानां प्रायश्चित्तपूर्तिपर्यन्तमेवं कर्तव्यम् । नरके बह्व्यः कथाः सन्ति । यदि त्वं ताः कथाः ज्ञास्यसि तव मनः पीड्यते रक्तं घनीभवति नेत्रे भुवि पतेताम् । परन्तु मयि प्रतिषेधोऽस्ति येन न प्रकाशयामि । इमां तु कथां शृणु । यदि तव प्रिये पितरि प्रेमासीत् तर्हि शृणु ।

हेम्लेटः - हे भगवन् !

भूतम् - तस्यातिदारुणाया निन्द्याया हत्यायाः प्रतिकारं कुरु ।

हेम्लेटः - हत्या ?

भूतम् - हत्या सदा दारुणा भवति । इयं तु हत्या परमदारुणा ।

हेम्लेटः - शीघ्रं वद । क्षिप्रं प्रतिकारं करिष्यामि ।

भूतम् - हृष्टोऽस्मि । त्वं प्रतिकर्तुं सिद्धोऽसि । शृणु तावत् । एवं कथितमारामे निद्राणोऽहं सर्पेण दष्ट इति । एवं कल्पितया मम मृतिकथया पूर्णो डेन्मार्कदेशः प्रतारितः । अयि अभिजात युवन् ! मयेदं कथनीयम् । स सर्पो यस्तव पितरमदशत् सम्प्रति राजकिरीटं धरति ।

हेम्लेटः - मम सा शङ्का अस्ति । रे मम पितृव्य !

भूतम् - स नृशंसः कामुको व्यभिचारी दुष्टनिपुणवचनैराकर्षणबहुमानैश्च मम पत्नीं वशीकृतवान् । निपुणवाच आकर्षणबहुमानानि च शप्तानि भवन्तु यदि तानि प्रतारणसमर्थानि । हा हेम्लेट ! कियान् सः अपकर्षः! मत्सकाशात् सा तं हताशमगच्छत् । आ विवाहशपथात् मम तस्यां प्रेमासीत् बहु मान्यम् । कस्मिन्नपि गुणे लक्षणे वा स न मम समः । उच्यते श्रेष्ठः सुगुणः प्रयत्नेनापि न कलुषीक्रियते इति । परन्तु विषयसुखेच्छावती व्यक्तिः सुप्रेम भृशमनुभूय च कामपङ्के लगति । किन्तु

 In Public domain. Digitization Muthulakshmi Research Academy

त्वरा कर्तव्या । प्रातरासन्नम् । कथां संक्षिपामि । तदा मध्याह्ने आरामेऽहं सुप्त आसम् । स मम दैनिकक्रमः । तदा तव पितृव्यस्तस्य कालस्यानुकूलतामुपयुज्य मामुपगम्य मम कर्णयोस्तद् घोरं विषमपातयत् । तद् विषं शीघ्रं शरीरे प्रसरति हन्ति च । तथा निद्राणोऽहं जीवितेन वियोजितः किरीटेन भार्यया च । इदं सर्वं कृतं मम भ्रात्रा । मयि मृत्युः शीघ्रमपतत्। मम कदाचित् कृतस्य पापस्य पश्चात्तापमपि कर्तुं मम समयो नासीत् । असज्जितोऽहमकस्माद् देवसकाशं प्रेषितः । कृतैः पापैर्भरितोऽहं देवसन्निधिं प्रेषितः । महादारुणमिदम् । त्वमेव विचारय । यदि तव मयि पुत्रसहजसंभावनास्ति तर्हि अदण्डितमेतन्न विसृज । डेन्मार्कराजशय्या कामेन व्यभिचारेण च न मलिनीभवतु । तथापि प्रतिकारं कुर्वन्नपि मातरं प्रति तव द्वेषो मास्तु । तां प्रति तव मनसि अपकारकल्पना मास्तु । देवहस्तयोस्तां विसृज । सा आत्मन्येव पीडामनुभवतु कृतपापकर्मणे । स्वस्ति । ह्रसितकान्तयः खद्योताः प्रभातासन्नतां सूचयन्ति । स्वस्त्यस्तु तव । मां स्मर।

(भूतं निष्क्रान्तम् ।)

हेम्लेटः - हे सर्वा देवशक्तयः ! भूमे ! किमन्यदस्ति मया विलपितुम्। किं नरकमप्यावाहयामि ? भृशमिदं लज्जावहम् । मा दीर्यतां मम हृदयम्। मम स्नायनः सपदि वृद्धा न भवन्तु । मां दृढं धरन्तु । किमवदः? मां स्मरेति ? वराक ! भूत ! त्वां स्मरामि । यावत् स्मृतिर्मम व्याकुले मस्तिष्के निहिता भवति तावत् त्वां स्मरामि । मम मस्तिष्कादगणनीयान् निरर्थकान् विषयान् पुस्तकविज्ञानं च विलोपयिष्यामि । यौवने लोकं परिशील्य स्थापितान् विषयान् त्यजामि । तवाज्ञैव मम मस्तिष्कगोचरे भवति सर्वानन्यानल्पविषयान् विहाय । स्वर्गेण तुभ्यं शपे । हे दुर्हृदये

 In Public domain. Digitization Muthulakshmi Research Academy

महिले ! हे स्मयमानदुष्टघातक । अहं मम ज्ञानपुस्तके लेखित्वेदं स्थापयामि । मन्दहासं कुर्वन् कुर्वन्नपि कश्चिद् दुरात्मा भवेत् । (लिखति) ज्ञातमिदानीम्। पितृव्य ! एषोऽसि त्वम् । एष स कालः । मम पितुर्वचनं निर्वर्तयितुम् ।

होरेषियः - (नेपथ्ये) प्रभो प्रभो !

मार्सेल्लसः - (नेपथ्ये) प्रभो ! हेम्लेट !

होरेषियः - (नेपथ्ये) देवस्तं रक्षतु ।

मार्सेल्लसः - (नेपथ्ये) तथास्तु ।

होरेषियः - (नेपथ्ये) प्रभो ! प्रभो !

हेम्लेटः - आगच्छागच्छ । एषोऽस्मि ।

(होरेषियः मार्सेल्लसश्च प्रविशतः ।)

मार्सेल्लसः - मान्य ! प्रभो ! कथमस्ति भवान् ?

होरेषियः - का वार्ता ? प्रभो !

हेम्लेटः - विस्मयभरिता ।

होरेषियः - वद वद । प्रभो ! वद ।

हेम्लेटः - न न । त्वं प्रकटयेः ।

होरेषियः - न । प्रभो ! शपथं करोमि ।

मार्सेल्लसः - अहमपि ।

हेम्लेटः - किं वक्तव्यम् ? परन्तु त्वया रहस्यं रक्षितव्यम् ।

होरेषियः मार्सेल्लसश्च - आवां शपथं कुर्वः ।

हेम्लेटः - डेन्मार्के द्रोहिणो न भवन्ति । एष तु सुमहाद्रोही ।

होरेषियः - प्रभो ! इदं वक्तुं भूतेन समाधेर्बहिर्नागन्तव्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - सत्यं वदसि । अतः श्रमं त्यक्त्वा वयं परस्परं हस्तचालनं कृत्वा पृथग् भवामः । युवामात्मनः कार्याणि कुरुतम् । अहं गत्वा प्रार्थनां करिष्यामि ।

होरेषियः - प्रभो ! अर्थहीनानि भ्रान्तानीमानि वचनानि ।

हेम्लेटः - यदि भवतोर्विप्रियं मया कृतं सत्यं तत्र मम खेदो भवति ।

होरेषियः - प्रभो ! भवतावयोरपराधो न कृतः ।

हेम्लेटः - मुनिना पेट्रिक्केनाहं शपे मम वचनेष्वपराधोऽस्ति । इदं भूतं यदस्माभिर्दृष्टं मया वक्तव्यम् अपकाररहितं निर्व्याजं च । यदि युवां ज्ञातुमिच्छथः किं वृत्तमावयोर्मध्ये इति सा काङ्क्षा नियम्यताम् । इदानीं तु युवां मम सुमित्रे विद्वांसौ सैनिकौ च । ममेमामभ्यर्थनां कुरुतम् ।

होरेषियः - किं तत् प्रभो !

हेम्लेटः - युवाभ्यां दृष्टं भूतमुद्दिश्य न किमपि वदतम् ।

होरेषियः मार्सेल्लसश्च - आवां न वक्ष्यावः ।

हेम्लेटः - एवं शपथः क्रियताम् ।

होरेषियः - प्रभो ! दैवेन शपे ।

मर्सेल्लसः - अहमपि शपे ।

हेम्लेटः - मम खड्गेन शप ।

मार्सेल्लसः - आवाभ्यां शपथः कृतः ।

हेम्लेटः - मम खड्गस्य सम्मुखं शपथं कुरुतम् ।

भूतम् - (नेपथ्यात्) शपथं कुरुतम् ।

हेम्लेटः - हे भूत ! त्वमपि प्रचोदयसि । हे निर्व्याज ! शृणु । शपथं शृणु ।

 In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - प्रभो ! शपथवचनं वद ।

हेम्लेटः - यद् युवाभ्यां दृष्टं तदुद्दिश्य किमपि न वक्तव्यम् । मम खड्गस्याभिमुखं शपथं कुरुतम् ।

भूतम्ः - (नेपथ्यात्) शपथं कुरुतम् ।

हेम्लेटः - अत्र चान्यत्र च । स्थलान्तरं गच्छामः । (परिक्राम्यन्ति ।) मान्यौ ! मम खड्गे हस्तान् निधाय शपथं कुरुतम् । यद् भवद्भयां श्रुतं तन्नैव वदिष्यथः ।

भूतम्ः - (नेपथ्यात्) शपथं कुरुतम् ।

हेम्लेटः - साधु कृतं वृद्ध ! त्वं भुवि शीघ्रं चलसि । सुमित्रे ! पुनश्चलामः।

होरेषियः - हे भगवन् अपूर्वमिदम् ।

हेम्लेटः - अत एवापूर्वस्यागतस्येव स्वागतं कुरुतम् । होरेषिय ! स्वर्गे भुवि च बहवो विषयाः सन्ति ये तव विज्ञानेन नावगम्यन्ते । किन्तु । आगच्छतम् । पूर्ववत् पुनः शपथं कुरुतं यथा देवस्य दया युवां रक्षिष्यति। मम प्रवर्तनं भृशं विलक्षणं विचित्रं च भवतु । सम्भाव्यते अहं विचित्रप्रवर्तनो भविष्यामि । तदा युवाभ्यां हस्तचालनं वा शिरःकम्पो वा न कर्तव्यः । आवां जानीवः । यद्यावयोरिच्छासीत् तदावाभ्यां ज्ञातमेव स्यादित्यादिवचनं न वक्तव्यम् । अहं भवतोर्ज्ञातो नास्मि । एवं भवद्भयां प्रवर्तितव्यम् । एवं शपथः क्रियताम् । भगवतः कृपा युवयोः सहायतां करोतु ।

भूतम्ः - (नेपथ्यात्) शपथं कुरुतम् ।

(तौ शपथं कुरुतः ।)

हेम्लेटः - हे विश्रान्तिरहितभूत ! इदानीं विश्राम्य । हे साधुजनौ ।

 In Public domain. Digitization Muthulakshmi Research Academy

प्रणयेन सहाहं भवतोः कृतज्ञोऽस्मि । इदानीं सह गच्छामः । इयं वार्ता वाग्रहिता तिष्ठतु । एष कालः सुव्याकुलोऽस्ति । इदं मम दुर्भाग्यमस्ति । अहं जात इदं समीचीनं कर्तुम् । आगच्छतम् । सह गच्छामः ।

(निष्क्रान्ताः ।)

द्वितीयः अङ्कः : प्रथमं दृश्यम् ।

(पोलोनियसस्य गृहे प्रकोष्ठः । पोलोनियसः रेनाल्डश्च प्रविशतः ।)

पोलोनियसः - रेनाल्ड ! इदं धनं तस्मै देहि इमान् लेखांश्च ।

रेनाल्डः - प्रभो ! अवश्यं दास्यामि ।

पोलोनियसः - भो ! सुजन ! रेनाल्ड ! यदि त्वं तेन सह मेलनात् पूर्वं तस्य शीलं प्रति सावधानानुयोगान् करिष्यसि तर्हि तव कार्यं विज्ञतया सह करिष्यसि ।

रेनाल्डः - प्रभो ! अहं तत् कर्तुं संकल्पयामि ।

पोलोनियसः - बाढं तत् सुकार्यम् । इदमवधेहि । प्रथमं विचारय पेरिसे निवसन्तो डेन्मार्कदेशजनाः कीदृशाः ? कथं ते जीवन्ति ? के ते? कियद् धनं तेषां सकाशे भवति । क्व तेषां निवासः? कीदृशस्तेषां समाजः ? विनोदे ते कियद् धनं व्यययन्ति ? एवंविधवक्रानुयोगेन परोक्षप्रश्नैश्च त्वं ज्ञास्यसि ते मम पुत्रं जानन्तीति । एवं कृत्वा तव कार्यं सुकरिष्यसि प्रत्यक्षविचारापेक्षया । अहं तं दूरादेव जानामीति छलव्यवहारं कुरु । एवं वदेः अहं तस्य पितरं जानामि तस्य मित्राणि च तं स्वल्पमेव जानामीति । अपि मां शृणोषि रेनाल्ड ?

In Public domain. Digitization Muthulakshmi Research Academy

रेनाल्डः - सम्यक् शृणोमि प्रभो !

पोलोनियसः - तमहं स्वल्पमेव जानामि नातीवेति वद । एवमपि वदेः। यं प्रति त्वं पृच्छसि स लेर्टेसः प्रमादी इति वदन् तस्मिन् कानिचन कल्पितव्यसनानि आरोपय । परन्तु अवहितो भव कल्पितव्यसनारोपणं परिमितमस्तु । तानि कल्पितव्यसनानि यौवनेन स्वेच्छाजीवनेन च जातानि सन्तु यानि साधरणानि न तु तानि तस्य शीलमपकुर्वन्तु ।

रेनाल्डः - प्रभो ! यथा द्यूतम् ।

पोलोनियसः - अथकिम् । मद्यपानम् । क्रीडाखड्गैर्युद्धक्रीडा, शपथग्रहणं कलहः इत्यादयः । परन्तु । परन्तु किमहमिदानीं वदामि ?

रेनाल्डः - शपथग्रहणं कलहः इत्यादयः । परन्तु इति ।

पोलोनियसः - परन्तु निपुणं कुरु तस्मिन् दोषारोपणम् । स्वेच्छाजीवनेन असमग्रशिक्षणजातबुद्धिप्रकोपेण वा जातः स दोष इति वद यो युवसु साधारणः ।

रेनाल्डः - किन्तु प्रभो ।

पोलोनियसः - त्वं प्रष्टुमिच्छसि किमेवं कर्तव्यं मयेति ।

रेनाल्डः - अथकिम् । प्रभो ज्ञातुमिच्छामि ।

पोलोनियसः - एवं कृत्वा मम पुत्रस्य शीलं प्रवर्तनं च सम्यग् ज्ञास्यसि । किमवगच्छसि ममाभिप्रायम् ?

रेनाल्डः - प्रभो ! अवगच्छामि ।

पोलोनियसः - तस्य स्वभावं स्वयं परीक्षस्व ।

रेनाल्डः - प्रभो ! एवं करिष्यामि ।

पोलोनियसः - स आत्मनो विनोदं करोतु ।

 In Public domain. Digitization Muthulakshmi Research Academy

रेनाल्डः - प्रभो ! करोतु ।

पोलोनियसः - स्वस्ति ।

(रेनाल्डो निष्क्रान्तः । ओफीलिया प्रविशति ।)

ओफीलिये ! को विशेषः ?

ओफीलिया - प्रभो अहमतिमात्रं त्रासितास्मि ।

पोलोनियसः - देवो रक्षतु । केन ?

ओफीलिया - प्रभो ! अहं मम कोष्ठे सीव्यन्ती आसम् । प्रभुर्हेम्लेट आगतः । तस्योपरिवस्त्रं सम्यगबद्धम् । शिरोवेष्टनं नासीत्। पादाच्छादनं मलिनमबद्धं जानुभ्यां स्रस्तं च । स विवर्णः । तस्य जानुनी कम्पमाने । स शोकमग्नवद् दृष्टः । तत्र प्रवर्तमानां बीभत्सतां कथयितुं स नरकादागत-वन्मम सम्मुखमागतः ।

पोलोनियसः - त्वयि प्रेम्णा उन्मत्तः ?

ओफीलिया - नाहं जानामि प्रभो ! अहं तु तस्य तत्स्थितेर्भीतास्मि ।

पोलोनियसः - किमुक्तं तेन ?

ओफीलिया - स मां मणिबन्धे गृहीत्वा दृढग्रहेणापीडयत् । ततः कानिचन पदानि पश्चाद्गमनेन गत्वान्यं हस्तं फाले न्यस्य मम मुखस्य परिशीलनं तथाकरोत् यथा स तत् चित्रयति । ततः स किञ्चिद् विचिन्त्य मम हस्तं गृहीत्वा किञ्चित् कम्पयित्वा त्रिः शिरःकम्पं कृत्वा गाढं निशश्वास । तेन निश्वासेन तस्य सर्वं शरीरमकम्पत । तदा स मरिष्यन्निव दृष्टः । एतत् कृत्वा स माममुञ्चत् । भुजोपरि शिरः परावर्त्यापश्यन् पश्चात् पादक्रमणमकरोत् । एवं कोष्ठान्निर्गतश्च । अन्त्यं क्षणं यावत् स मां पश्यन्नेवासीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः - मया सहागच्छ । अहं राजसकाशं गच्छामि । एष प्रेमोन्मादः। अस्य तीव्रप्रकम्प आत्मघातं प्रति नयेत् प्रचण्डकार्याणि कर्तुं प्रेरयेत् । कोऽपि मनःक्षोभः अस्मत्स्वभावं गृहीत्वा एवमेव करोति । अपि त्वमेषु दिवसेषु तेन सह परुषभाषणमकरोः ?

ओफीलिया - प्रभो ! नाकरवम् । किन्तु भवत आदेशेन मया तस्य लेखाः निराकृताः मेलनं चाननुज्ञातम् ।

पोलोनियसः - तत् तस्मिन्नुन्मादमकरोत् । इदानीमहमनुशोचामि स मया अधिकश्रद्धया न परिशीलितः । मया चिन्तितं स त्वया सह प्रेमक्रीडामेव करोति त्वां विनाशयितुं चेच्छतीति । सा मम शङ्का निन्द्या। वार्धके वयमात्मनो विज्ञानं स्थितादधिकं मन्यामहे युवानः अल्पज्ञाना इति च । एहि राजानं गच्छावः। इदं निवेदयितव्यम् । इदं श्रुत्वा राज्ञो राज्ञ्याश्च विप्रियं भवेन्नाम । अनुक्त्वा यदि रहस्यं स्थापयावस्तदा तेनाधिकः क्लेशो भवेत् । (निष्क्रान्तौ ।)

द्वितीयः अङ्कः : द्वितीयं दृश्यम् ।

(दुर्गे प्रकोष्ठः । तूर्यध्वनिः । राजा राज्ञी रोसेन्क्रान्जः गिल्डेन्स्टेर्नः सेवकाश्च प्रविशन्ति ।)

राजा - स्वागतं रोसेन्क्रान्ज गिल्डेन्स्टेर्न ! न केवलं वयं भवन्तौ द्रष्टुमिच्छामः । युवयोः सकाशे अस्माकं कार्यमस्ति । अत एव युवां शीघ्रमाहूतौ । श्रुतं स्याद् युवाभ्यां हेम्लेटे विचित्रं परिवर्तनं जातम् । अहं तत् परिवर्तनं वदामि यतः अन्तरङ्गे बहिरङ्गे च स पूर्ववन्नास्ति । तस्य हेतुः पितुर्मरणादन्यो नास्तीति ममाभिप्रायः । पितुर्मरणमेव तं तथा

 In Public domain. Digitization Muthulakshmi Research Academy

व्याकुलयत् । युवां तेन सह संगतावास्तं बाल्यदिनेभ्योऽपि । यौवने च तेन सह संगतावास्तम् । तस्य स्वभावं प्रवर्तनं च जानीथः । अतो युवामस्मद्भवने कञ्चित् कालं वसतमित्यभ्यर्थये । युवाभ्यां सह वासेन तस्य विनोदो भवतु । किं च तस्य मानसिकबाधाया यदि विशेषकारणमस्ति अस्माकमज्ञातं तदपि ज्ञायतां युवाभ्याम् । ज्ञातस्य चिकित्सा कार्या ।

राज्ञी - सुजनौ ! हेम्लेटो भवन्तावुद्दिश्य बह्ववदत् । भवद्भ्यामन्यौ द्वौ पुरुषौ न स्तः याभ्यां सह हेम्लेटः अधिकसंबद्धः । यदि प्रीत्या सौजन्येन हितेच्छया च भवन्तौ कञ्चित्कालमस्माभिः सह वसेतां तर्हि अस्माकं सहायता भविष्यति । तदा युवयो राजसकाशाद् राजोजितकृतज्ञतासमर्पणं भविष्यति ।

रोसेन्क्रान्जः - राज्ञा राज्ञ्या चावयोराज्ञा देया अभ्यर्थनातिरेकेणास्मिन् कार्ये ।

गिल्डेन्स्टेर्नः - आवां भवतोर्विधेयौ स्वः । युष्मदाज्ञया आवयोः सेवां भवतोः पादेषु समर्पयिष्यावः ।

राजा - उपकृतं युवाभ्याम् ।

राज्ञी - युवयोः कृते अस्माकं कृतज्ञता भवतु । सद्यः अस्माकं पुत्रो दृश्यतां यस्मिन् बहु परिवर्तनं जातम् ।

(सेवकान् पश्यन्ती) इमौ हेम्लेटसकाशं नयत ।

गिल्डेन्स्टेर्नः - आवयोः संगत्या कार्यैश्च तस्योपकारो भवतु ।

राज्ञी - तथास्तु ।

(रोसेन्क्रान्जो गिल्डेन्स्टेर्नः केचन सेवकाश्च निष्क्रान्ताः ।

पोलोनियसः प्रविशति ।)

In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः - प्रभो ! नार्वेराजं प्रति प्रेषितौ दूतौ सुवार्तया सह निवृत्तौ ।

राजा - भवान् सर्वदा सुवार्तामानयति ।

पोलोनियसः - महाराज! अहमिदं सुनिश्चितं वदामि । इदं राजसन्निधौ ममावश्यकर्तव्यम् । यथा मम मनसो भगवति पवित्रः संबन्धो भवति तथा मम सेवाया राज्ञि च । अहं विश्वसिमि हेम्लेटस्योन्मादस्य सत्यं कारणं मया ज्ञातम् । यथाहं राज्यस्य विषयान् जानामि तथा हेम्लेटस्योन्मादकारणं च ।

राजा - इदं मया श्रोतव्यम् । उत्सुकोऽस्मि ।

पोलोनियसः - प्रथमं दूतौ भवत्सकाशं प्रवेश्येताम् । अस्यानन्दकर-वार्तायाः पश्चान्ममावगतविषयश्रवणानन्दोऽपि भवतु ।

राजा - भवान् तावादाय प्रवेशयितुमर्हति ।

(पोलोनियसो निष्क्रान्तः ।)

प्रिये ! गेर्ट्रूडे ! स वदति तव पुत्रस्य व्याधेः कारणं तेन ज्ञातमिति ।

राज्ञी - अहं विश्वसिमि । अन्यत् कारणं नास्ति । इदमेव मुख्यं कारणम् । पितुर्मरणमावयोः शीघ्रविवाहश्च ।

राजा - भवतु । निपुणं परीक्षामहे ।

(पोलोनियसः वोल्टिमन्डेन कार्नीलियसेन च सह पुनः प्रविशति ।)

स्वागतं सुमित्रयोः । वोल्टिमन्ड ! मम बन्धोर्नार्वेराजस्य सकाशात् कां वार्तामानयसि ?

वोल्टिमन्डः - स भवते परमसम्मानान् शुभाकाङ्क्षाश्च प्रेषयति । अस्माकं दौत्यवाक्यं श्रुतवानेव स दूतान् प्रैषयत् भ्रातृव्यस्य सकाशं

 In Public domain. Digitization Muthulakshmi Research Academy

सेनानां प्रबलीकरणमवस्थापयितुम् । सः अचिन्तयत् सेनाप्रबलीकरणं पोलानां प्रतीति । तं विषयं सुपरिशील्याजानात् स सेनासन्नाहो भवतां प्रतीति । आत्मनो रोगो जरा दुर्बलता च तस्य कार्यस्य कारणमिति सखेदं ज्ञात्वा स आज्ञां प्रैषयत् फोर्टिन्ब्रासस्य ग्रहणे । एवं कृते फोर्टिन्ब्रासो राजाज्ञाया विधेयोऽभवत् ! स पितृव्यसकाशे प्रतिज्ञामकरोत् भवन्तं महाराजं प्रति युद्धसन्नाहान् कदापि न करिष्यामीति। नार्वेराजस्तस्मिन् प्रीतोऽभवत् । तस्मै त्रिसहस्रक्रौनानां वार्षिकधनवितरणनिर्णयमकरोत् । अनुज्ञां च ददौ तेन संपादितान् सैन्यान् पोलान् प्रति उपयोक्तुम् । एष प्रमाणलेखः अभ्यर्थनेन सह (पत्रं ददाति) दत्तः । भवान् प्रीतो भवतु भवतां भूभागमध्येन तस्मै आक्रमणाय सेनाप्रयाणस्यानुमतिं ददातु इति । तस्य सकाशाद् भवते क्षेमं प्रतिजानीते यथास्मिन् लेखे निर्दिष्टम् ।

राजा - वयं प्रीताः स्मः । यथासमयं लेखं सावधानं पठिष्यामः अनुरूपमुत्तरं दास्यामः । इदानीं भवतोः सुकृतस्य दौत्यस्य कृते अभिनन्दनं वाचयामः । भवन्तौ विश्राम्येताम् । नक्तमस्माकं सहभोजनविशेषो भवतु। भवतोः स्वागतमस्तु ।

(वोल्टिमन्डः कार्नीलियसश्च निष्क्रान्तौ ।)

पोलोनियसः - एष व्यवहारः सुखान्तो जातः । आर्य राजन् । आर्ये राज्ञि । भाषणे संक्षेपः प्रशस्यते । वृथाभाषणेन कालस्य नाशो न कर्तव्यः। राजत्वं कीदृशं सेवाधर्मः कः केन हेतुना दिनं दिनं भवति रात्रिः रात्रिर्भवति कालः कालो भवति इतीदृशस्य भाषणस्यान्तो न भवति । विषयस्य संक्षेपऋजुकथनं विज्ञतायाः सारो भवति । दीर्घभाषणं वचनव्ययः शैलीव्ययश्च । अहं संक्षेपेण वदामि । मान्यो भवत्पुत्र उन्मत्तः । अहं

In Public domain. Digitization Muthulakshmi Research Academy

वदामि स उन्मत्त इत्येकेन पदेन । उन्मादः क इति यदि लक्षणव्याख्या कर्तव्या तर्हि उन्माद एव उन्माद इति वक्तव्यं भवति नान्यत् । किन्तु अलमनेन विचारेण ।

राज्ञी - विषयो भवतु । अलं वाक्प्रदर्शनेन ।

पोलोनियसः - आर्ये अहं प्रतिजानामि । वाक्प्रदर्शनं न करोमि । तस्योन्मादविषये भ्रमो नास्ति । खिद्यते तत् सत्यम् । खिद्यते स उन्मत्तः। अलमनेन वचनेन । नाहं शैलीविन्यासं करोमि । अतः सिध्यति स उन्मादी । इदानीमस्माकमिदमेव कर्तव्यं तस्योन्मादस्य कारणं ज्ञातव्यम्। उन्मादो मनःस्वास्थ्यलोपस्य कार्यं भवति न तु कारणम् । अतस्तस्य मनःस्वास्थ्यलोपस्य केनापि कारणेन भवितव्यम् । सम्प्रत्येषा स्थितिः । सुविचार्यताम् । मम एका पुत्री अस्ति । सा मम भवति तस्या विवाहात् पूर्वम् । अत इदानीं सा पुत्री मम । सा मम विधेया स्वकर्तव्यज्ञा च । सा ममेदमदात् । यदाहं तद् वाचयामि तदा भवन्तौ निर्णयं कुर्याताम् । (वाचयति) ममात्मस्थितायै देवतामूर्तये दर्शने दर्शने नेत्रोत्सवकारिण्यै सुन्दर्यै ओफीलियायै। दर्शने दर्शने इत्यनावश्यकम् । भवतु । श्रूयताम् । तस्या धवलक्रोडे इत्यादीनि वाक्यानि ।

राज्ञी - अपि स लेखो हेम्लेटादागत ओफीलियायै ?

पोलोनियसः - आर्ये व्यग्रा मा भूः । अहं वाचयामि ।

संदेहः स्यात् तारकास्वस्ति वह्निः
संदेहः स्यात् संचलत्यर्यमेति ।
सत्यं ब्रूतेऽसत्यमित्यस्तु शङ्का
शङ्का मास्तु त्वय्यहं प्रेमपूर्णः ॥

हेम्लेटः In Public domain. Digitization Muthulakshmi Research Academy

अयि प्रिये ! ओफीलिये ! अहं पद्यरचनायामनिपुणः । मम निश्वासान् परिदेवनानि च कथं पद्येषु निदधानि ? इदं तु निस्संदेहम् । त्वयि मम सुगाढं प्रेमास्ति । अयि श्लाघ्यतमे विश्वसिहि । स्वस्ति । प्रियतमे ! अहं तवास्मि यावत् श्वसिमि । हेम्लेटः ।

कर्तव्यज्ञा विधेया च मम पुत्री मह्यमिदं सर्वमदर्शयत् । किं च सा मामवदत् तस्यासकृत्प्रेमप्रकटनम् ।

राजा - तस्याः प्रतिवचनं कीदृशम् ?

पोलोनियसः - मयि कोऽभिप्रायो भवतः ?

राजा - विश्वसनीयो मान्यश्चेति ।

पोलोनियसः - अहं तादृश इति संतोषेण प्रवर्ते । यदा तयोर्मध्ये तत् सोद्वेगप्रेम वर्धते स्म - मयेदं वक्तव्यं - मम सकाशे मम पुत्र्या वचनात् पूर्वमेव मया तद् दृष्टम् । आर्येण महाराजेन आर्यया महाराज्ञ्या च मामुद्दिश्य किं चिन्तितं स्यात् यदि मया स विषय उपेक्षितः अथवा रहसि तस्य प्रोत्साहः कृतः अथवाहमेव तयोर्मध्यवर्ती आसम् ? न न । झटिति मया तन्निरोध आरब्धः । युवतिर्मम पुत्री मया एवमुक्ता । प्रभुर्हेम्लेटः युवराजः । स तव कुटुम्बप्रमाणात् सर्वथा अधिकः। एतत् प्रेमकार्यं पुरस्तान्न गच्छतु इति । किं च सा मयोपदिष्टा हेम्लेटस्य दर्शनं परिहर। तेन प्रेषितान् संदेशान् वा बहुमानानि वा न गृहाणेति । तया ममोपदेशः अनुसृतः । स तया प्रत्याख्यातः । कथनं संक्षिपामि । तेन स विषण्णो जातः । भोजनमत्यजत् । रात्रिषु जागर्ति । तेन तस्य दुर्बलता जाता । अस्थिरमना अभवत् । क्रमेणोन्मादी परिणतः । तस्मात् सः असंबद्धं ब्रूते येन वयं विषीदामः ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - (राज्ञीं प्रति) अपीदं सत्यं मन्यसे ?

राज्ञी - भवेत् । अवश्यं भवेत् ।

पोलोनियसः - किं स कालः कदाप्यासीत् अहं ज्ञातुमिच्छामि यदा मया स्पष्टमुक्तं तत्तथेति तदन्यथाभवत् ?

राजा - नाहं जानामि तादृशमवसरम् ।

पोलोनियसः - (आत्मनः शिरः स्कन्धं च निर्दिशन्) यदि ममोक्तं यथास्थितादन्यद् भवति तर्हि मम शिरः स्कन्धादपनयेः । यदि सत्यं ज्ञातुं शक्यते तदहमधिगच्छामि भवतु तद् भूमध्येऽपि निलीनम् ।

राजा - अस्मिन् विषये कथं वयं सत्यं ज्ञास्यामः ?

पोलोनियसः - भवान् जानाति एतेषां कोष्ठानां मार्गे हेम्लेटः कदाचित् चतस्रो होराः पद्धयां चलति ।

राज्ञी - अथकिम् । स चलति ।

पोलोनियसः - तस्मिन् समये मम पुत्रीमहं तस्य सकाशं प्रेषयिष्यामि। भवानहं च जवनिकायाः पश्चान्निलीनौ भविष्यावः । तयोर्मेलनं परिशीलयिष्यावः । यदि तस्य तस्यां प्रेम नास्ति यदि च तेन कारणेन तस्य मतिर्न नष्टा तर्हि अहं राज्ञो मन्त्री न भविष्यामि कृषिं करिष्यामि शकटानामधिपतिर्वा भविष्यामि ।

राजा - इमं प्रयोगं करिष्यावः ।

राज्ञी - पश्य पश्य दुःखितः स युवा पठन्नायाति ।

पोलोनियसः - कृपया भवन्ताविदं स्थानं विसृजताम् । अहं तस्य स्थितिं परीक्षे ।

(राजा राज्ञी सेवकाश्च निष्क्रान्ताः । पठन् हेम्लेटः प्रविशति ।)

In Public domain. Digitization Muthulakshmi Research Academy
हेम्लेटः प्रभो ! हेम्लेट ! भवान् कथमस्ति ?

हेम्लेटः - सुस्थितोऽस्मि । देवस्य कृपा ।

पोलोनियसः - अपि प्रभुर्मामभिजानाति ?

हेम्लेटः - सुष्ठु जानामि । त्वं मत्स्यविक्रेतासि ।

पोलोनियसः - प्रभो ! त्वं भ्रान्तोऽसि ।

हेम्लेटः - तर्ह्यहमभिलषामि मत्स्यविक्रेतृवत् त्वमपि अमायी भवेः ।

पोलोनियसः - भवान् वदति प्रभो अमायी इति ।

हेम्लेटः - अथकिमार्य ! अमायी नामास्मिन् लोके दशसहस्रेषु जनेषु एको भवेत् ।

पोलोनियसः - प्रभो ! सत्यमिदम् ।

हेम्लेटः - मृते शुनि सूर्यातपो मा पततु । अपि तव पुत्री अस्ति ?

पोलोनियसः - प्रभो ! अस्ति मम पुत्री ।

हेम्लेटः - सा बहिर्मा चलतु । अवहितो भव ।

पोलोनियसः - (स्वगतम्) किमिदम् । इदानीमपि मम पुत्रीमुद्दिश्य वदति । किन्तु स मां प्रथमं नाभ्यजानात् । मां मत्स्यविक्रयिणमवदत् । एष दूरं गतः । अत्र सत्यं वक्तव्यम् । यौवने अहमपि प्रेम्णाहत आसम्। इमां स्थितिमहमपि प्राप्तप्रायश्च । पुनरनेन सह भाषणं करोमि । (हेम्लेटं प्रति) प्रभो ! किं पठसि ?

हेम्लेटः - पदानि पदानि पदानि ।

पोलोनियसः - को विषयः ?

हेम्लेटः - कयोर्मध्ये ?

पोलोनियसः - पुस्तकस्य विषयमहं वदामि प्रभो !

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - सर्वमिदमसत्यम् । एष धूर्तो रचयिता वदति सर्वेषां वृद्धानां पलितानि श्मश्रूणि भवन्ति । तेषां मुखानि वलिनानि भवन्ति । नेत्राभ्यां मलिनद्रवः पतति । ते मतिहीना दुर्बलकटिप्रदेशाश्च। सर्वमिदं सत्यमहं दृढं विश्वसिमि । परन्तु सर्वमिदं पुस्तकारोपितं किं कर्तव्यम् ? आर्य ! अहं जानामि त्वमहमिव युवा भवितुमिच्छसि । तत् शक्यं यदि त्वं कर्कटवत् पश्चाद् गन्तुं शक्नोषि ।

पोलोनियसः - (स्वगतम्) एष उन्मादः । तथापि तस्य वचनेषु सुविहितविचारोऽस्ति । (हेम्लेटमुद्दिश्य) अपि भवानितः किञ्चिद-भ्यन्तरमागच्छति ?

हेम्लेटः - कुत्रागन्तव्यम् ? किं मया मम समाधिः प्रवेष्टव्यः ?

पोलोनियसः - (स्वगतम्) इदं ध्रुवमसंबद्धम् । अस्य कानिचन वचनानि विज्ञानसंपन्नानि सन्ति । उन्मादस्य कदाचिदेषा निपुणता भवति । तर्कयुता मतिमन्तोऽपि यानभिप्रायान् वक्तुं न शक्नुवन्ति तान् ते वदन्ति। अहमिदानीमितो गच्छामि । अस्य मम पुत्र्या सहाकस्मान्मेलनं कारयिष्यामि। (हेम्लेटं प्रति) मान्य प्रभो तवानुमतिं गृहीत्वाहं साधयामीदानीम् ।

हेम्लेटः - आर्य ! गम्यताम् ।

पोलोनियसः - स्वस्ति ।

हेम्लेटः - (स्वगतम्) एते चित्तक्लान्तिजनका वृद्धाः ।

(रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशतः ।)

पोलोनियसः - अपि युवां प्रभुं हेम्लेटं द्रष्टुमागतौ ? एषोऽत्र ।

रोसेन्क्रान्जः - शुभमस्तु ।

(पोलोनियसो निष्क्रान्तः ।)

 In Public domain. Digitization Muthulakshmi Research Academy

गिल्डेन - मान्य ! प्रभो !

रोसेन - मम प्रियतम प्रभो !

हेम्लेटः - मम श्लाघ्यौ सुहृदौ ! गिल्डेन्स्टेर्न रोसेन्क्रान्ज ! अपि भवन्तौ कुशलिनौ ?

रोसेन् - आवां ते जना इव स्वः ये प्रायेण सुखिनः ।

गिल् - आवां सुखिनौ किन्तु नात्यन्तम् । भाग्यवन्तौ किन्तु नात्यन्तभाग्यशालिनौ ।

हेम्लेटः - साधारणसुखजीविनौ युवाम् । का वार्ता ?

रोसेन् - न कापि प्रभो ! इयमेव वार्ता लोकः अमायी संजातः ।

हेम्लेटः - तर्हि लोकान्त आसन्नः । किन्तु इयं वार्ता असत्या । भवन्तौ विशेषं पृच्छामि । युवाभ्यां किं कृतं येन युवामत्र प्रेषितौ कारागृहे ।

गिल् - प्रभो ! कारागृहे ?

हेम्लेटः - डेन्मार्कदेशः कारागृहमस्ति ।

रोसेन् - तर्हि विश्वमपि कारागृहम् ।

हेम्लेटः - तन्महाकारागृहम् । तस्मिन् बहवः कोष्ठा बहूनि बन्धनस्थलानि च भवन्ति । एषु स्थलेषु डेन्मार्कदेशो निकृष्टतमः ।

रोसेन - आवामेवं न चिन्तयावः ।

हेम्लेटः - भवतु । तव कृतेऽयं कारागृहं नास्ति । वस्तुतो लोके किमपि सदसद् वा नास्ति । तव चिन्तने सदसद् वा भवति । मम तु अयं डेन्मार्कदेशः कारागृहम् ।

रोसेन् - तर्हि तवाकाङ्क्षा तवेमां चिन्तनां कारयति । इदं कारागृहमिति। एष देशस्तवाकाङ्क्षापूरणाय लघुः ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - लघुः ? अहं कस्मिंश्चिल्लघुप्रदेशे तिष्ठन् अनन्तस्थलस्य प्रभुमात्मानं चिन्तयेयम् । परन्तु अहं दुस्स्वप्नैर्बाधितोऽस्मि ।

गिल् - ते स्वप्नाश्चाकाङ्क्षासूचना एव ।

हेम्लेटः - भवतु भवतु । अत्र एल्सिनोरे युवयोः किं कार्यम् ?

रोसेन् - भवन्तं द्रष्टुमागतौ । अन्यत् कारणं नास्ति ।

हेम्लेटः - अहं भिक्षोरधिको नास्मि । भवतोरागमनेन मम संतोषमपि वक्तुमसमर्थोऽस्मि । मम संतोषोऽस्ति परन्तु सः अकिञ्चित्करः । किन्तु इदमुच्यताम् । किं युवामाकारितावुत स्वेच्छयागतौ ? संशयो मास्तु सत्यमुच्यताम् ।

गिल्डेन् - प्रभो ! किं वक्तव्यमावाभ्याम् ?

हेम्लेटः - यत् किमपि मम प्रश्नस्य प्रतिवचनम् । स्वीक्रियतां युवामाकारितौ । युवयोर्मुखविकारा मनोगतं सूचयन्ति । मनोगतं मुखे अप्रसार्य मनस्येव निगूहितुं युवयोर्वञ्चनासामर्थ्यं नास्ति । अहं जानामि तेन सुराज्ञा राज्ञ्या च भवन्तौ प्रोषितौ ।

रोसेन् - किमर्थं प्रभो ?

हेम्लेटः - मम बोधनं कर्तुम् । परन्तु ममेयमभ्यर्थना युवयोः सकाशे। अस्माकं स्नेहेन वयोऽनुरूपतया प्रेमबन्धेन सर्वेणान्येनार्थनेन च मां निर्व्याजं वदत किं युवामाकारितावुत न ?

रोसेन् - (गिल्डेन्स्टेर्नं प्रति शनैः) त्वं किं वदसि ?

गिल्डेन् - प्रभो ! आवामाकारितौ ।

हेम्लेटः - अहं वदामि किमर्थं प्रेषितौ । तेन राज्ञा राज्ञ्या च सह युवयो रहस्यभाषणं मम सकाशे प्रकाशयितुमवसरो न भवेत् । एषु दिनेषु

हेम्लेटः In Public domain. Digitization Muthulakshmi Research Academy
यद्यपि कारणं न जानामि तथापि मम हास्यप्रियता नष्टा । क्रीडाः व्यायामं चात्यजम् । सर्वं विश्वं निष्फलं शून्यं दृश्यते। सुन्दर आकाशः सूर्यस्य स्वर्णकान्तिभिरलंकृतो मम दृश्यते रोगमयवायुवत् । ततोऽधिको नास्ति। मानवो नाम देवस्य परिपूर्णा कल्पना । उदात्तः विचारसमर्थः अपरिमितचिन्तनशाली आकारे चलने च विस्मयकरः । देवतावत् क्रियाशाली अवगमनसमर्थश्च । मानवात् किमपि सुन्दरतरं नास्ति । सर्वान् जन्तून् वयमतिशेमहे । तथापि ममाभाति के वयम् ? धूलिमात्रम्। पुरुषे वा स्त्रियां वा कस्मिन्नपि मानवे मम हर्षो नास्ति । युवां स्मितं कुरुथः । युवयोश्चिन्तनमन्यथा स्यात् ।

रोसेन् - प्रभो ! नाहं किमपि चिन्तयामि ।

हेम्लेटः - तर्हि किं त्वया हसितम् ?

रोसेन् - अहं चिन्तयन्नासं यदि जनेषु तवावेक्षा नास्ति तर्हि अत्रागच्छद्भिर्नटैस्तव मनसः अशान्तिरेव भवेत् । आगच्छतोरावयोः पथि नटानां समितिरासीत् । ते त्वां विनोदयितुमागच्छन्ति।

हेम्लेटः - राजपात्रधारिणः स्वागतमस्तु । तमहं यथार्थराजवत् परिगणयामि । वीरः खड्गं फलकं च चालयेत् । प्रेमिणो निःश्वासानां पारितोषिकं भविष्यति । विचित्रपात्रवेषधारी तस्य भागं प्रशान्तं पूरयतु । विदूषकः सर्वान् हासयिष्यति । स्त्रीपात्रं यदिच्छति तद् वदतु । नो चेत् नाटकस्यावसानं भवेत् । का समितिरायाति ?

रोसेन् - ते विषादनटा नगरात् । त्वया प्रशंसितपूर्वाः ।

(नटानामागमनं प्रकटयन् तूर्यध्वनिः ।)

गिल्डेन् - नटा आगताः ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - मान्यौ रोसेन्क्राञ्जगिल्डेन्स्टेन्नौं ! स्वागतं युवयोः एल्सिनोरे। एतावदिदमनुक्तमिदानीं वदामि । नटा आगताः । ममादरस्तेष्वेव न तु युवयोरिति न मन्तव्यम् । युवां स्वागतेन मयादृतौ । इदं तु वक्तुमिच्छामि। यो मम पितृव्यः पिता च या मम माता पितृव्या सा च तौ मम विषये भ्रान्तौ ।

गिल्डेन् - कस्मिन् विषये प्रभो ?

हेम्लेटः - अहं सदा उन्मादी नास्मि । प्रायेणाहं सर्वं जानामि विवेचयामि च ।

(पोलोनियसः प्रविशति ।)

हेम्लेटः - श्रूयतां गिल्डेन्स्टेर्न ! रोसेन्क्राञ्ज । पश्यतं तमागच्छन्तम्। स महान् शिशुः ।

रोसेन् - उक्तं खलु वृद्धो द्वितीयं शैशवं पुनः प्रविशतीति ।

हेम्लेटः - अयमायाति नटानुद्दिश्य मां कथयितुम् ।

पोलोनियसः - प्रभो ! इयं वार्ता भवते ।

हेम्लेटः - ममापि वार्तास्ति यद् भवते कथयितव्या । यदा रोसियसो महान् नटो रोम्नगरे आसीत् ।

पोलोनियसः - प्रभो ! नटा आगताः ।

हेम्लेटः - तदा सर्वे नटाः खरानारुह्यागताः ।

पोलोनियसः - इमे सर्वोत्तमा नटाः । विषादनाटकस्य प्रहसननाटकस्य च । चारित्रिकस्य ग्रामीणस्य च नाटकस्य । एतेषां मिश्रनाटकस्य । पौराणिकस्य प्रणयस्य च ते उत्तमाः ।

हेम्लेटः - पुरा इस्रेल्देशे जेफ्तो नाम न्यायाध्यक्ष आसीद् यस्यैका

 In Public domain. Digitization Muthulakshmi Research Academy

सुन्दरी पुत्री आसीद् यस्यां तस्य महद् वात्सल्यमभवत् ।

पोलोनियसः - (स्वगतम्) पुनर्मम पुत्रीमेव कथयति ।

हेम्लेटः - विरमामि भाषणात् । पश्यत पश्यत ।

(केचन नटाः प्रविशन्ति ।)

स्वागतं नटानाम् । सर्वेषां स्वागतम् । भवतां दर्शनेन सम्मोदं प्राप्नोमि। त्वं पुरा मम मित्रमासीः । इदानीं तव मुखे श्मश्रु विकसितम् । (स्त्रीवेषेण स्थितं नटं प्रति) हे तरुणि ! नायिके। भवती उच्चैस्तरा जाता । किं च उन्नते उपानहौ धरसि । परन्तु तव कण्ठध्वनिः कर्कशो मास्तु । भवतु भवतु । भवतां भाषणानि शीघ्रं श्रोष्यामः (पोलोनियसं प्रति) आर्य ! एतेषां सुखनिवासादिकं क्रियताम् । तेषां प्रति सुप्रवर्तनं कर्तव्यम् । पश्चादस्मान् प्रति ते किं वक्ष्यन्ति तत् चरित्रे तिष्ठति । मरणानन्तरमस्मान् प्रति दुष्टकथनं भवतु नाम । जीवतामस्माकं दुर्यशो मास्तु ।

पोलोनियसः - प्रभो ! तेषां यथार्ह गौरवं करिष्यामि ।

हेम्लेटः - हतविधे ! ततोऽधिकं तेषां दीयताम् । लोके सर्वस्य यदि यथार्हः सम्मानः क्रियते तर्हि सर्वस्ताडनमर्हेत् । गौरवेण औदार्येण तेषां सम्मानो भवतु । ते अन्तः प्रवेश्यन्ताम् ।

(प्रथमं नटं विहायान्ये नटा पोलोनियसश्च निष्क्रान्ताः ।)

(प्रथमनटं प्रति) मित्र ! अपि त्वं गोन्जेगस्य हत्या इति नाटकं प्रयुङ्क्षे ?

प्रथमो नटः - प्रभो ! प्रयुञ्जे ।

हेम्लेटः - तर्हि श्वो नक्तं तद् द्रक्ष्यामः । किञ्च । यद्यहं द्वादश वा षोडश वा अधिकाः पङ्क्तीः कृत्वा तस्मिन् संयोक्ष्यामि किं ताः कण्ठस्थाः

In Public domain. Digitization Muthulakshmi Research Academy

कुरुथ श्वः प्रदर्शनार्थम् ?

प्रथमो नटः - प्रभो । करोमि ।

हेम्लेटः - भवतु । तं प्रभुमनुसर । किन्तु तं प्रति मा हस ।

(प्रथमो नटो निष्क्रान्तः ।)

सुहृदौ ! युवाभ्यां सह मम मेलनं पुनर्भवतु । एल्सिनोरे स्वागतम् ।

रोसेन् - प्रभो !

हेम्लेटः - स्वस्ति ।

(रोसेनक्राञ्जगिल्डेनस्टेर्नौ निष्क्रान्तौ ।)

(स्वगतम्) इदानीमहमेक एवास्मि । निकृष्टं मम जीवितम् । अयं नटः प्रबलमात्मनि अन्येषां भावान् प्रवेशयति । अस्मांश्च विश्वासयति । स विवर्णो जातः अश्रूणि व्यहरत् भावावेशेन तस्य कण्ठो विच्छिन्नः । कथानुसारेण यत्किमपि करोति च । यदर्थं स सर्वमिदं करोति तन्नास्ति। हेकूबा । का हेकूबा तस्य ? हेकूबायाः स कः यस्याः कृते स विलपति? मम कारणमस्ति । तथाप्यहं किं करोमि ? शौर्यहीनः खलोऽस्म्यहम् । स्वप्नं पश्यन्निव विषण्णः परिभ्रमामि प्रतीकारप्रयत्नमकुर्वन्। यस्य प्राणा अपहृतास्तस्य राज्ञः कृते मम कापि वक्तव्या क्रिया नास्ति। किमहं भीरुः ? अथवा दुर्वृत्तः ? यदि कश्चिन्मामेवं कथयेत् ? किं तदहमङ्गीकुर्याम्? क्रूर ! दुर्वृत्त ! घातक ! त्वयि प्रतिकारः कर्तव्यः । अहं शूरोऽस्मि । मम प्रियः पिता गूढं हतः । स्वर्गस्था नरकस्थाश्च शक्तयः प्रतिकारं कर्तुं मां प्रोत्साहयन्ति । परन्तु अहं किं कुर्वन्नस्मि ? वीथीषु कलहायमाना दुष्टस्त्रीवत् सर्वान् शपन् स्थितोऽस्मि । हत्याया वाङ् नास्ति । तथापि विस्मयं कुर्वती सा कथमपि वदति । एतैर्नटैर्मम

हेम्लेटः In Public domain. Digitization Muthulakshmi Research Academy

पितुर्हत्यायाः सदृशं किमपि कारयामि पितृव्यस्य सम्मुखम् । तस्य मुखविकारान् दृष्ट्वा मनोगतं तर्कयिष्यामि । ततः किं कुर्यामहं जानामि । तद् भूतं यन्मया दृष्टं पिशाचोऽपि भवेत् । मम पतनमिच्छता तेन भूतेन तथोक्तं स्यात् । भूतस्य वचनादन्यत् साक्ष्यं ममावश्यकम् । अनेन नाटकेन तस्य मनोगतं प्रकटितं भविष्यति ।

(निष्क्रान्तः ।)

तृतीयः अङ्कः प्रथमं दृश्यम् ।

(दुर्गे प्रकोष्ठः । राजा राज्ञी पोलोनियसः ओफीलिया रोसेनक्राञ्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति ।)

राजा - किं युवां केनापि परोक्षविधानेन ज्ञातुं न शक्नुथः स किमेवं प्रचण्डं प्रवर्तते जीवितस्य प्रशान्तान् दिवसान् भयोत्पादकेनोन्मादेन पूरयति च ?

रोसेन् - मम मनः क्षुब्धमिति सः अङ्गीकरोति । न तु कारणं वदति।

गिल्डे - किं चास्माकं प्रश्नानामुत्तरं वक्तुं स नेच्छति । तस्य मनःक्लेशं प्रति अस्माकमनुयोगान् निपुणं परिहरति ।

राज्ञी - भवन्तौ प्रति तस्य कीदृशं प्रवर्तनमभवत् ?

रोसेन् - बहु शोभनमभवत् ।

गिल्डे - परन्तु तत् स्वैरं नासीत् । बलादिव स प्रावर्तत ।

रोसेन् - स नौ किमपि नापृच्छत् । आवयोः प्रश्नान् तु निस्संकोचं प्रत्यवदत् ।

राज्ञी - कस्मिंश्चिद् विनोदे तं प्रवर्तयितुं किं भवद्भ्यां प्रयतितम् ?

In Public domain. Digitization Muthulakshmi Research Academy

रोसेन् - मान्ये ! केचन नटा इत आगच्छन्तः आवाभ्यां मार्गे अतिक्रान्ताः। हेम्लेट आवाभ्यां नटानामागमनमुक्तः । श्रुत्वा स हर्षचिह्नानि प्रादर्शयत् । नटा आगताः । चिन्तयामि अद्य रात्रौ तस्य पुरस्तात् नाटकप्रदर्शनमादिष्टम् ।

पोलोनियसः - सत्यमिदम् । हेम्लेटेनाहमर्थितोऽस्मि राजानं राज्ञीं च नाटकं प्रेक्षितुमाह्वातुम् ।

राजा - नाटके तस्यादरं श्रुत्वा हृष्टोऽस्मि । मान्यौ ! तस्येदं लक्षणं वर्धयतम् । इदं नाटकं तस्मिन् सुप्रवर्तताम् ।

रोसेन् - प्रभो ! करिष्यावः ।

(रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च निष्क्रान्तौ ।)

राजा - प्रिये गेर्ट्रूडे ! त्वमपि अस्मान् त्यज । वयमिदं रहस्यसंविधानमकुर्म । हेम्लेट इत आयाति । तदा तस्य ओफीलियया सह यदृच्छया समावेशो भवति । अहमस्याः पिता च कोष्ठे निलीनौ भूत्वा तस्य प्रवर्तनं द्रक्ष्यावः । तत् कर्तुमावां प्रभवावश्च । एवं कृत्वा निश्चिनुवः किं तस्य बाधा प्रेमोद्भूता उत नेति ।

राज्ञी - अहं गच्छामि । ओफीलिये ! तव सौन्दर्येण हेम्लेटस्योन्मादो जातः । तव सुगुणैः स यथावद् भविष्यतीत्यपेक्षे येन युवयोरुभयोः श्रेयो भविष्यति ।

ओफीलिया - आर्ये एवमहमप्यपेक्षे ।

(राज्ञी निष्क्रान्ता ।)

पोलोनियसः - ओफीलिये इतस्तावत् । (राजानं प्रति) आवामत्र निलीनौ भवावः । (ओफीलियां प्रति) प्रार्थनापुस्तकात् पठन्ती भव। तथा

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः
त्वमत्रैका स्थिता दृश्यसे । एवं भवति च । वयं जनाः कदाचिद् दैवभक्ता भवामः स्वानि दुष्कर्माणि निगूहितुमपि ।

राजा - (स्वगतम्) सत्यमिदं वचनम् । एभिर्वचनैर्ममापराधभावाः प्रचलिताः। सुन्दरवचनेषु अहं बहु कुरूपकार्यं निगूहामि । ममान्तःकरणे महान् भारोऽस्ति ।

पोलोनियसः - श्रूयते तस्यागमनम् । प्रभो ! अपसरावः ।

(राजा पोलोनियसश्च निष्क्रान्तौ । हेम्लेटः प्रविशति ।)

हेम्लेटः - (स्वगतम्) इयं समस्या । ममेदानीं किं श्रेयः ? जीवितमुत-मरणम् ? किमुदारं कार्यम् ? दुर्दैवान्मयि निपातितानां क्लेशानां सहनमुत तान् प्रतिरुध्य विनाशनम् ? मरणं नाम दीर्घनिद्रा । तस्यां निद्रायां सर्वाः शिरोवेदनाः अगण्यानि कष्टानि मनोवेदनाश्च नश्यन्ति यैर्वयं मर्त्याः पीड्यामहे । व्यक्तमिदमस्माकमभिलषणीयम् । मरणमिति निद्रा । निद्रायां स्वप्ना भवन्ति । अत्रास्ति क्लेशः । सर्वा लोकव्याकुलताः संक्षोभांश्च विहाय मृत्युं प्राप्य मृताः कान् स्वप्नान् प्राप्स्यामः को जानाति ? इदं विचार्यम् । अनेनैव विचारेण वयं जीवितक्लेशाननुभवन्तो भवामः । नो चेत् जीविते प्राप्तानवमानान् कः सहेत ? अधिकानामुपालम्भान् कुपिता-नामवमानान् विफलप्रेम्णो वेदनाः आवश्यककार्येषु आपतितो विलम्बः अधिकारिणां निष्ठुरत्वं गुणहीनानां सकाशाद् गुणवतां प्राप्तं दुराचरणं चेदं सर्वं कः सहेत यदा एकेन छुरिकाप्रहारेण सर्वस्मादेतस्मादात्मानं मोचयेत् ? श्रमकरे जीविते स्विन्नो भवन् सीत्कारं कुर्वन् को भवेत् यदि तस्य भयं न भवेन्मरणानन्तरं किं दारुणं भवेदिति । मरणं नामाज्ञातो देशो यस्मात् कस्यापि निवर्तनं न भवति । तस्मान्मरणविषये अस्माकं

In Public domain. Digitization Muthulakshmi Research Academy

भीतिर्भवति दुःस्थितीः सहमाना जीविते प्रवर्तनमिच्छामः । मरणाद् भीतिरस्मान् भीरून् करोति । अधिकचिन्तनेनास्माकं स्वाभाविकं शौर्यं दुर्बलं भवति । सद्यः करणीयानि कार्याण्यन्यथा भवन्ति नश्यन्ति च । किन्तु । अहो ! एषा सुन्दरी ओफीलिया । (प्रकाशम्) हे सुन्दरि! प्रार्थनासमये मम पापानां मुक्तये प्रार्थनां कुरु ।

ओफीलिया - अयि प्रभो ! कथमस्ति भवानद्यत्वे ?

हेम्लेटः - प्रीतोऽस्म्यनेनानुयोगेन । प्रीतोऽस्मि ।

ओफीलिया - प्रभो। मम सकाशे त्वया दत्तानि कानिचन बहुमानवस्तूनि सन्ति । चिरादहं तानि प्रतिसमर्पयितुं चिन्तयामि । कृपया गृह्यन्ताम् ।

हेम्लेटः - नाहम् । मया तव किमपि न दत्तम् ।

ओफीलिया - प्रभो त्वं सुतरां जानासि त्वमदाः । तैः सह लेखानप्यलिखः । रम्यैस्तैर्लेखैर्बहुमानानि बहुमततराणि अभवन् । इदानीं तानि निरर्थकानि संजातानि । अतः प्रतिगृहाण । शोभनान्यपि बहुमानानि निरर्थकानि भवन्ति दातृषु अन्यथा प्रवर्तमानेषु ।

हेम्लेटः - अपि त्वं शीलवती ?

ओफीलिया - किं वदति भवान् ?

हेम्लेटः - अपि त्वं सुन्दरी ?

ओफीलिया - किं वदति भवान् ?

हेम्लेटः - यदि त्वं शीलवती असि सुन्दरी च तर्हि तव शीलं सौन्दर्यप्रभावात् त्वां रक्षतु इति मयोक्तम् । आस्तामिदम् । पुरा मम त्वयि प्रेम अभवत् ।

ओफीलिया - भवता मयि स विश्वासः कृतः ।

 In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - विश्वासस्तवाकर्तव्य आसीत् । सर्वे वयं मूलतो दुर्गुणाः स्मः यद्यपि गुणवन्तो भवितुं प्रयतामहे । मम त्वयि प्रेम नासीत् ।

ओफीलिया - तथा ह्यहं वञ्चिता ।

हेम्लेटः - तस्माद् ब्रह्मचारिणी भव । संतानं मा जनय । यदि संतानं जनयिष्यसि ते पापानि करिष्यन्ति । अहं सुजन एवास्मि । परन्तु मया दुष्कार्याणि कृतानि । मम मात्रा मम प्रसूतिरकर्तव्या आसीत् । अहमुद्धतः दुष्कार्यं चिकीर्षुः ऐश्वर्यप्रेप्सुरस्मि । मम चिकीर्षितानि दुष्कर्माणि ममालोचनान्यतिशेरते । तानि कर्तुं मम समयो नास्ति । किमर्थं मादृशा भूम्याकाशयोर्मध्ये चेष्टन्ते न जाने । अस्मासु सर्वः पातकी । अस्मासु कस्मिन्नपि मा विश्वसिहि । ब्रह्मचारिणी भव । तव पिता कुत्रास्ति ?

ओफीलिया - प्रभो ! गृहे ।

हेम्लेटः - स तत्रैवास्तु । तत्रैवाविवेककार्याणि करोतु । साधयाम्यहम्।

ओफीलिया - हे भगवन् ! तं रक्ष ।

हेम्लेटः - यदि त्वं परिणयेस्तर्हि तवेममाक्रोशं विवाहबहुमानं ददामि। त्वं मल्लिकावद् विमला भव । तुषारवत् शुभ्रा स्याः । तदापि तव दुष्कीर्तिर्भवति । तस्माद् ब्रह्मचारिणी भव । स्वस्ति । यदि तु त्वया विवाहः कर्तव्यस्तर्हि कञ्चिन्मूढं परिणय । विवेकिनो जना जानन्ति त्वं तान् प्रतारयेरिति । स्वस्ति ।

ओफीलिया - (स्वगतम्) स्वर्गस्था दोवता इमं पूर्ववत् कुर्वन्तु ।

हेम्लेटः - यूयं स्त्रियः बह्वात्मालंकरणं कुरुथ । देवेन युष्माकमेकं मुखं दत्तं तद् यूयं परिष्कारेणान्यथा कुरुथ । नृत्यन्त्य इव सविलासं चलथ । नाहमिदं सहे । अनेन मम मतिर्भ्रमति । अहं प्रकटयामि अतः परं

 In Public domain. Digitization Muthulakshmi Research Academy

विवाहा न सन्तु । ये पूर्वं कृतविवाहास्ते सह सन्तु एकं द्वयं विहाय । अन्ये सर्वे केवला भवन्तु । त्वं ब्रह्मचारिणी भव ।

(हेम्लेटो निष्क्रान्तः ।)

ओफीलिया - (स्वगतम्) कीदृशो महामना आसीदेष इतः पूर्वमिदानीं कीदृशो निकृष्टः ! तस्मिन्नासन् सुजनस्य शोभा विदुषो वाक्चमत्कारः सैनिकस्य बलं च । स आसीदस्माकं देशस्य रत्नम् । व्यक्तं स राजासनस्य दायाद आसीत् । स सर्वैः श्लाघितः अनुकृतश्च । इदानीं स नीचैः पतितः । अहं तु तस्य मधुरसंमोहनवचांसि पूर्वं श्रुत्वा इदानीं परमदुःखितास्मि । तस्य बुद्धिः सुमधुरगानं कृत्वा संप्रति कटुशब्दान् करोति । यौवने स्थितस्य तस्यासमानदर्शनमुदारप्रवर्तनं चोन्मादेन विनाशितम् । तस्य पूर्वस्थितिं जानती अहमिदानीं बहु दुःखितास्मि ।

(राजा पोलोनियसश्च पुरस्तादागतौ ।)

राजा - प्रेम ? तस्य मनोभावेषु प्रेम न प्रचलति । यद्यपि तस्य वचनानि कदाचित् सुघटितानि न सन्ति तथापि तेषु उन्मादलक्षणं नास्ति । तस्य मनसि किमपि नैराश्यमस्ति । केनापि शोकेन तद् वर्धते। यदि तद् बहिः पतेत् तदा अत्याहितं भवेत् । मया शीघ्रकार्यनिर्णयः कृतः। तमिङ्गलन्डं प्रेषयामि । ते अस्मभ्यं धनं धारयन्ति । तत् प्राप्तव्यम् । दिष्ट्या समुद्रप्रयाणेन नूतनदेशदर्शनेन च तस्येमान्यालोचनान्यपगच्छेयुर्यानि कथमपि तस्य मनसि सुस्थितानि । अस्यां कार्ययोजनायां तव कोऽभिप्रायः ?

पोलोनियसः - अनया कार्यसिद्धिर्भवेत् । तथाप्यहं विश्वसिमि तस्योन्मादस्य मूलकारणमस्ति असिद्धं प्रेम । अयि ! ओफीलिये !

 In Public domain. Digitization Muthulakshmi Research Academy

त्वया कथनीयं नास्ति प्रभुणा हेम्लेटेनोक्तम् । सर्वं श्रुतमावाभ्याम् । प्रभो! यदिच्छसि तत् कुरु । नाटकानन्तरं तस्य माता राज्ञी तमेकमुपस्थाप्य तस्य मनोगतं पृच्छतु । निलीनोऽहं श्रोष्यामि । यदि सा तद् रहस्यं न ज्ञास्यति तर्हि तमिङ्ग्लन्डं प्रेषय अन्यद् वा कुरु तव चिन्तितम् ।

राजा - एवं करिष्यामः । यदा मुख्या जना उन्मादलक्षणानि दर्शयन्ति तेषामवेक्षणं कर्तव्यम् । (सर्वे निष्क्रान्ताः ।)

तृतीयः अङ्कः द्वितीयं दृश्यम् ।

(तत्रैवैका शाला । हम्लेटो नटाश्च प्रविशन्ति ।)

हेम्लेटः - यथा मयोपदिष्टास्तथा भाषणमाचरत श्राव्यकण्ठेन मृदुविधानेन । नगरे प्रकटनकर्तार इव उच्चैर्मा कुरुत । बहून् हस्तक्षेपान् मा कुरुत । कांश्चन एव कुरुत शनैः । रङ्गभूम्यां यदा वात्यावदुद्विग्ना भवथ तदा स्मरत तमुद्वेगं परिमितं कर्तुं मृदुं च। भावानुकूलं नटनं भवतु।

प्रथमो नटः - आर्य ! भवत उपदेशाननुसरिष्यामः ।

हेम्लेटः - परन्तु भृशं विनीता वा मा भवत । कथं कर्तव्यमिति भवद्भिरेव ज्ञातव्यम् । भावनटनयोः परस्परानुकूलता अपेक्ष्यते। नटनं सर्वथा स्वाभाविकमस्तु । विदूषकाः स्वकल्पितं मा वदन्तु ।

प्रथमो नटः - आर्य ! पूर्वदोषाः प्रायेणास्माभिर्विशोधिताः ।

हेम्लेटः - दोषान् साकल्येन परिहरत । सर्वं सुप्रयुक्तं भवतु ।

(नटा निष्क्रान्ताः । पोलोनियसः गिल्डेन्स्टेर्नः रोसन्क्रान्जश्च प्रविशन्ति।)

आर्य। अपि राजा प्रदर्शनमुपतिष्ठति ?

In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः - स उपतिष्ठति राज्ञी च ।

हेम्लेटः - नटा उच्यन्तां त्वरितुम् ।

(पोलोनियसो निष्क्रान्तः ।)

अपि भवन्तौ नटानां सज्जीभवने सहायौ भवेतम् ?

रोसेन् - अवश्यं प्रभो ।

(रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च निष्क्रान्तौ ।)

हेम्लेटः - भो होरेषिय ।

(होरेषियः प्रविशति ।)

होरेषियः - प्रभो ! एषोऽस्मि तव सेवायाम् ।

हेम्लेटः - होरेषिय । त्वं श्रेष्ठो मम परिचितेषु ।

होरेषियः - प्रभो ।

हेम्लेटः - इमानि त्वां प्रति चाटुवचनानीति मा चिन्तय । त्वत्सकाशात् किमपि प्राप्तुमिदं न वदामि । केवलप्रियप्रवर्तनेनावश्यकवस्तूनि प्राप्नोषि तथा जीवसि च । तस्य तव सकाशात् प्रियवचनान्युक्त्वा किं प्राप्नुयाम्? यदा प्रभृत्यहं स्वेच्छया मित्रवरणमकरवं तदा प्रभृति त्वं वृतो यतस्त्वं जीवितं यद् यद् ददाति तत्तद् गृह्णासि कृतज्ञतया सह शुभमशुभं वा । धन्यास्ते ये मानसिकोद्वेगं विवेकेन सह मिश्रयन्ति उचितप्रमाणेन येन भाग्यदेवतायाश्चापल्यं प्रतिरुन्धन्ति । दर्शय मम तं येन मनोविकारा नियमितास्तमहं त्वद्वन्मम सन्निहितं कुर्याम् । किन्तु मया बहु भाष्यते । इदानीमेष विषयः । अद्य नक्तं किमपि नाटकं प्रदर्श्यते राज्ञः सकाशे । तस्मिन्नेकं दृश्यं मम पितुर्मरणवृत्तवद् भवति यत् त्वं मयोक्तः । यदा तद् दृश्यमारभ्यते तदा मम पितृव्यं सूक्ष्मं परीक्षस्व । तदा यदि

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः तस्यापराधरहस्यं प्रकाशितं न भवति तदा तद् भूतं केवलः पिशाचः । मम ऊहा भ्रमाः । तं निपुणं परीक्षस्व । अहमपि तं स्थिरं द्रक्ष्यामि । पश्चादावामुभौ अभिप्रायविनिमयं करिष्यावः ।

होरेषियः - चोरमिव तं निपुणं निरीक्षिष्ये ।

हेम्लेटः - ते आयान्ति । मया किमपि न भाषितव्यम् । उपविश ।

(तूर्यध्वनिः । राजा राज्ञी पोलोनियसः ओफीलिया रोसेन्क्रान्जः गिल्डेन्स्टेर्नः प्रभवः सेवकाः उल्मुकहस्ता राजरक्षकाश्च प्रविशन्ति।)

राजा - मम भ्रातृव्यो हेम्लेटः कथमस्ति ?

हेम्लेटः - बाढं कुशली । वायुं भक्षयामि । ममोदरं वायुना भरितम् ।

राजा - नाहं जानामि किं त्वं वदसि ।

हेम्लेटः - तानि उक्तानि । मम मुखान्निर्गतानि । (पोलोनियसं प्रति) मान्य ! यदा विद्यालये आसीः किं तदा त्वं कस्मिन्नपि नाटके भूमिकामगृह्णाः ?

पोलोनियसः - सत्यमहमगृह्णाम् । अहं श्लाघ्यो नटः परिगणितः ।

हेम्लेटः - कां भूमिकां त्वमनटः ?

पोलोनियसः - जूलियसस्य सीजरस्य भूमिकामनटम् । रोमनगरे जूपिटरदेवतामन्दिरेऽहं हतः । ब्रूटसेनाहं हतः ।

हेम्लेटः - तन्महद् दुष्कृत्यम् । अपि नटाः सिद्धाः ?

रोसेन् - प्रभो ! सिद्धाः । ते त्वां प्रतीक्षन्ते ।

राज्ञी - प्रिय ! हेम्लेट । इत आगच्छ । मम सकाशे उपविश ।

हेम्लेटः - अनुगृहीतोऽस्मि मातः ! तथापि अत्र सुन्दरतरं स्थानमस्ति। (ओफीलियायाः समीपं गच्छति ।)

In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः - (राजानं प्रति) अपि भवान् पश्यति तत् ?

हेम्लेटः - (ओफीलियां प्रति) अप्यहं तवाङ्के उपविशेयम् ?

ओफीलिया - अङ्के ?

हेम्लेटः - पार्श्वे ।

ओफीलिया - उपविशतु ।

(हेम्लेटः ओकीलियायाः पार्श्वासने उपविशति ।)

प्रभो ! इदानीं त्वमुल्लासी दृश्यसे ।

हेम्लेटः - कः ? अहम् ?

ओफीलिया - प्रभो । भवान् ।

हेम्लेटः - अहं हास्यगीतकारोऽस्मि । लोके सर्वेणोल्लासिना भवितव्यम्। सः अन्यथा न भवतु । पश्य मम मातरमुल्लसितां मृतस्य मम पितुः केवलं होराद्वयानन्तरम् ।

ओफीलिया - प्रभो चत्वारो मासा गताः ।

हेम्लेटः - तावान् दीर्घः कालः ? तस्मादहं विलापवस्त्राणि परित्यज्य सुन्दरवस्त्राणि धरेयम् । मृतस्य द्वौ मासौ गतौ तावतापि स न विस्मृतः?

(तूर्यध्वनिः । वाग्रहितनाटकप्रदर्शनमारब्धम् । राजा राज्ञी च प्रविशतः। प्रेम्णा परस्परमुपगूहेते । सा अवनता तस्य कामविकारं प्रतिरुणद्धि । स तामुन्नमय्य तस्या गले स्वस्य शिरो न्यस्यति । स पुष्पराशौ शेते । सा तं सुप्तं दृष्ट्वा गच्छति । अन्य आगच्छति । तस्य शिरसः किरीटमपनयति चुम्बति च । निद्रितस्य तस्य कर्णे विषं पातयति गच्छति च । राज्ञी प्रत्यागम्य राजानं मृतं दृष्ट्वा सोद्रेकं रोदिति । त्रिभिः क्रीतरोदकैः सह घातक आगम्य दुःखं नटति । शवो नीतः । घातक उपहारान् दत्त्वा

 In Public domain. Digitization Muthulakshmi Research Academy

राज्ञ्याः प्रणयसम्मतिं याचते । किञ्चित्कालं सा अनिच्छन्ती प्रसन्ना भूत्वा तस्य प्रणयमङ्गीकरोति ।)

(नटा निष्क्रान्ताः ।)

ओफीलिया - प्रभो किमिदम् ?

हेम्लेटः - इदं कुचेष्टितं हास्यं च ।

ओफीलिया - इदं मौनप्रदर्शनं नाटकस्य संक्षेपो भवेत् ।

(नाटकपरिचयकर्ता नटः प्रविशति ।)

हेम्लेटः - एष सर्वं वक्ष्यति । नटा रहस्यं रक्षितुं न शक्नुवन्ति । सर्वं वदन्ति ।

ओफीलिया - अप्येष वक्ष्यति तस्य मौनप्रदर्शनस्याभिप्रायम् ?

हेम्लेटः - सर्वं वक्ष्यति ।

ओफीलिया - नाटकं पश्यामः ।

प्रस्तावना

नटः - वयं विनयेनाभ्यर्थयामहे क्षमिणो यूयमस्माकं विषादनाटकं पश्यतेति ।

(प्रस्तावनाकरो नटो निष्क्रान्तः । राज्ञ्या राज्ञश्च पात्रधारिणौ नटौ प्रविशतः ।)

नटो राजा - त्रिंशद्वारान् भूसमुद्रौ परिवृत्य सूर्यस्य रथोऽगच्छत् । गृहीतकान्त्या चन्द्रस्त्रिंशत्कृत्वो द्वादशवारान् विश्वस्योपरि प्राकाशत। त्रिंशद्वर्षाणि गतानि । प्रेम्णावयोर्हृदये संयोजिते । आवयोर्हस्तौ पवित्रविवाहेन बद्धौ ।

नटराज्ञी - सूर्यचन्द्रौ सुबहूनि प्रयाणानि पुनः पुनः कुरुतामावयोरन्न्योऽ

 In Public domain. Digitization Muthulakshmi Research Academy

न्यप्रणयिनोः स्थितयोः । किन्तु अहं विषण्णास्मि । भवान् पूर्ववत् सहर्षो नास्ति । आतुरोऽस्ति । तस्मादहं सहर्षा नास्मि । परन्तु एतेन तव मनो विकलं न भवतु । स्त्रियाः प्रेम्णा सह भयं च भवति । उभे न भवतः सह वा भवतः । मयि तु यावत् प्रेमास्ति तावद् भयं चास्ति । यदा प्रेम महद् भवति तदा लघवो विषया भयं जनयन्ति । लघुविषयेषु जातानि भयानि प्रेम्णो महत्त्वं सूचयन्ति।

नटो राजा - किन्तु प्रिये ! सत्यमिदं मया त्वं त्यक्तव्या । अनतिकाले च । मम शरीराङ्गानि सम्यक् कर्म न कुर्वन्ति । ममानन्तरं त्वमस्मिन् सुजगति पश्चाज्जीविष्यसि प्रशंसिता कृतप्रणया च । कश्चिन्मद्वत् सुमनास्तव पतिर्भविष्यति ।

नटराज्ञी - हा ! शेषं वाक्यं मा वद । यत् त्वं वदसि तद् द्वितीयं प्रेम द्रोहादन्यन्न भवेत् । यदि द्वितीयं पतिं परिणेष्यामि तर्हि मां शप । यदि काचिद् द्वितीयवारं परिणयति सा प्रथमपतेर्हत्यां कृतवतीव भवति ।

हेम्लेटः - (स्वगतम्) इदं बहुकर्कशं वचनम् ।

नटराज्ञी - द्वितीयविवाहस्य कारणं भवति धनं लाभश्च । न तु प्रेम। यदा मम द्वितीयः पतिः शय्यायां मां चुम्बिष्यति तदाहं मृतं मम पतिं पुनर्हनिष्यामि ।

नटो राजा - अहं जानामि सम्प्रति त्वमेवं चिन्तयसि । किन्तु जनानां चिन्तनं परिवर्तते । प्रबला अपि अस्माकमभिप्रायाः कालेन दुर्बला भवन्ति। अपक्वं फलं वृक्षे लग्नं तिष्ठति पक्वं पतति। उद्विग्नक्षणेषु आत्मनि कृताः प्रतिज्ञाः शक्तिं त्यजन्ति गते उद्वेगे । महद् दुःखं वा सुखं वा अस्मान् कर्मणि प्रेरयेत् । पश्चाद् यदा दुःखं सुखं वा निर्गच्छति तदा सा

 In Public domain. Digitization Muthulakshmi Research Academy

प्रेरणा न तिष्ठति । क्षणे सुखं दुःखं भवति दुःखं सुखं वा । अस्मिन् जगति न कोऽपि शश्वद् भवति । प्रणया अस्माकं भागधेयेन परिवर्तन्ते। अस्मिन् विस्मयो नास्ति । इदमेतावदप्यव्यक्तं प्रेम भागधेयाधीनं वा भागधेयं प्रेमाधीनं वेति । यदा कश्चिन्महापुरुषः स्थानात् पतति पश्य कथं तस्यानुचरास्तं त्यजन्ति । यदा च कश्चिद् दरिद्र उन्नतस्थानमारोहति स तान् सुहृदः करोति ये पूर्वं तमद्विषन् । प्रेम विश्वसनीयं नास्ति । धनिनः सर्वदा मित्राणि भवन्ति । धनहीनः सर्वं सुहृदं शत्रुं करोति धनार्थमुपगच्छन्तम् । ममाभिप्रायं पुनर्वदामि । अस्मदाकाङ्क्षा अन्या भागधेयमन्यच्च । अस्माकमाशाः सन्तु । अस्माकं प्राप्याणि भागधेयाधीनानि भवन्ति । इदानीं त्वं चिन्तयसि नाहं पुनर्विवाहिता भविष्यामीति । तत् चिन्तनं मरिष्यति यदा तव प्रथमः पतिर्मरिष्यति ।

नटराज्ञी - भूमिर्ममाहारं न ददातु । आकाशो मम कान्तिं न ददातु। दिवा नक्तं वा मम विनोदो मास्तु । विश्रान्तिर्मास्तु । मम विश्वासा आशाश्च नश्यन्तु । कारागृहान्धकारो मामाविशतु । मम सर्वो हर्षः शोको भवतु । मम शान्तिर्मास्तु अस्मिन् जीविते वा जीवितात् पश्चाद् वा यद्यहं विधवा भूत्वा पुनः पत्नी भविष्यामि ।

हेम्लेटः - (स्वगतम्) शोभना प्रतिज्ञा । यदि सा प्रतिज्ञाभङ्गं करिष्यति?

नटो राजा - प्रिये ! शुद्धेन मनसा त्वयेयं प्रतिज्ञा कृता । मामेकं त्यज किञ्चित्कालम् । मम मनो व्याकुलं भवति । स्वप्तुमिच्छामि। इदं दीर्घं दिनं मम निद्रायां गच्छतु ।

(नटो राजा स्वपिति ।)

In Public domain. Digitization Muthulakshmi Research Academy

नटराज्ञी - स्वपिहि । गाढं स्वपिहि । आवयोर्मध्ये कापि विपद् मास्तु। (नटराज्ञी निष्क्रान्ता ।)

हेम्लेटः - (राज्ञीं प्रति) मान्ये अपीदं नाटकं तवाभिरुचितम् ?

राज्ञी - राज्ञी बहून् शपथानकरोत् ।

हेम्लेटः - सा वचने स्थास्यति ।

राजा - अपि त्वं कथावस्तु जानासि ? अप्यस्मिन् किमप्यसभ्यमस्ति?

हेम्लेटः - न न केवलं हास्यम्

राजा - नाटकस्य नाम किम् ?

हेम्लेटः - मूषिकग्रहणम् । नाम श्रुत्वा विस्मयो मास्तु । इदं कथावस्तु मूषिकग्रहणवद् भवति । इदं नाटकं वयन्नानगरे कृतां हत्यामुद्दिशति । तस्य पालकस्य नाम गोन्जेगः । पत्नी बेप्टिष्टा । इदानीमेव द्रक्ष्यथ । इदं दुर्वृत्तकथानाटकम् । परन्तु कथावस्तुकृते अस्माकं का चिन्ता ? अस्माकं मनांसि विमलानि । एषा कथा अस्मान् न संबध्नाति । दोषिणो मनः क्षुभ्यतु । वयमकलुषिता नाटकं पश्यामः ।

(लूसियानसः प्रविशति ।)

एष लूसियानसो राज्ञो बन्धुः ।

ओफीलिया - भवान् निपुणो व्याख्याता ।

हेम्लेटः - यद्यहं त्वां तव प्रियं च सहितौ प्रणयवशौ पश्येयं तर्हि युवयोः संभाषणं वदेयम् ।

ओफीलिया - भवान् सोपहासः ।

हेम्लेटः - प्रचलतु नाटकम् । वेदिकायां स्थित । घातक । विलम्बं मा कुरु । वयं हत्यां प्रतीक्षामहे ।

 In Public domain. Digitization Muthulakshmi Research Academy

लूसियानसः - दुष्टा आलोचनाः सिद्धौ हस्तौ समर्थं विषमनुकूलः कालश्च । न कोऽपि मां द्रष्टुं शक्नोति च । इदं विषं मायामन्त्रतन्त्राधिष्ठात्र्या हेकेटया त्रिरभिमन्त्रितं शप्तं च। हे विष ! तव मायामुपयुङ्क्ष्व अस्य प्राणानपहर ।

(विषं नटस्य राज्ञः कर्णयोः पातयति ।)

हेम्लेटः - पश्यत । तेन तत्रैवारामे राज्ञि विषं प्रयुक्तं राज्यं प्राप्तुम्। राज्ञो नामास्ति गोन्जेगः । प्रथममियं कथा रचिता सुन्दरया इटलीभाषया। इदानीं पश्यामः कथं स घातको गोन्जेगस्य भार्यायाः प्रेम लभते ।

(राजा उत्थितः ।)

ओफीलिया - राजा उत्तिष्ठति ।

हेम्लेटः - किमेष आयुधध्वनिमात्रेणोद्विजते ?

राज्ञी - प्रभो ! कथम् ?

पोलोनियसः - नाटकं विरम्यताम् ।

राजा - दीपः । इतो दीपः । मां बहिर्नयत ।

पोलोनियसः - दीपाः दीपाः । दीपा आनीयन्ताम् ।

(सर्वे निष्क्रान्ता हेम्लेटं होरेषियं च विहाय ।)

हेम्लेटः - **गच्छतु विलपतु मृगः क्षतः**

क्रीडतु स सुखम् अक्षतो यदि ।
केचिज्जाग्रति स्वपन्ति चान्ये
एषा नूनं लोकस्य गतिः ॥

होरेषिय ! अप्यहं कस्मिंश्चिन्नाटकसमाजे नटस्थानं प्राप्नुयाम् ?

होरेषियः - प्राप्स्यसि ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - अयि होरेषिय ! नूनं तस्य भूतस्य वचनं सत्यम् । अपि दृष्टस्त्वया नाटकस्य प्रभावः ?

होरेषियः - प्रभो ! मया सुदृष्टः ।

हेम्लेटः - विषप्रयोगं दृष्ट्वा स उत्थितः । अपि त्वया लक्षितः ?

होरेषियः - सुष्ठु लक्षितः ।

हेम्लेटः - राज्ञे नाटकं नारोचत । स गतः । भवतु । अहं संगीतं श्रोतुमिच्छामि । गायका आयान्तु ।

(रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशतः ।)

गिल् - प्रभो ! अहं भवन्तं किंचिद् वक्तुमागतोऽस्मि ।

हेम्लेटः - किं किंचित् ? पूर्णां कथां वक्तुमर्हसि ।

गिल् - मान्य ! राजा ....

हेम्लेटः - का वार्ता राज्ञः ?

गिल् - स स्वभवनं गतो विकलमनाश्च ।

हेम्लेटः - विकलमनाः ? किं मद्यपानेन ?

गिल्डे - न न । स कुपितः ।

हेम्लेटः - इदं त्वया शीघ्रं वैद्यो वाच्यः । नाहम् । यद्यहं तस्य चिकित्सां कुर्यां स कुपिततरो भवेत् ।

गिल्डे - प्रभो ! प्रकृतं विषयमनुसर ।

हेम्लेटः - एवमस्तु । वद ।

गिल्डे - तव माता राज्ञी विकला भूत्वा त्वां द्रष्टुमिच्छति । एतद् वक्तुमहमागतोऽस्मि ।

हेम्लेटः - तव स्वागतमस्तु ।

 In Public domain. Digitization Muthulakshmi Research Academy

गिल्डे - तव सौजन्यवचनानि विषयं प्रति न सन्ति । यदि भवानसंदर्भ-वचनं विहाय समीचीनं वदति तर्हि तव मातुरभिमतं वदामि । अन्यथा क्षन्तव्योऽहं प्रतिगच्छामि अकृतकार्यः ।

हेम्लेटः - अहं तत् कर्तुं न शक्नोमि ।

गिल्डे - किं कर्तुं प्रभो ।

हेम्लेटः - असंदर्भवचनं विहाय समीचीनवचनं ममाशक्यम् । मम मतिर्व्याकुला । तथापि यथा त्वमिच्छसि तथा यथाशक्ति ऋजूनि प्रतिवचनानि ददामि । मम मातुः सेवां करिष्यामि । विषयं वद ।

रोसेन् - तव प्रवर्तनेन सा भृशं विस्मिता ।

हेम्लेटः - अहं विस्मयकरः पुत्रोऽस्मि यतो मया मम माता विस्मिता। किन्तु तस्या विस्मयमनुसृत्य किमभवत् ? वद ।

रोसेन् - सा त्वया सह भाषितुमिच्छति । तव शयनगृहगमनात् पूर्व-मेव तद् भवतु ।

हेम्लेटः - अहं विधेयोऽस्मि । भवतु सा मम माता दशवारान् । अपि तव वक्तव्यमस्ति अन्यत् ?

रोसेन् - प्रभो ! पूर्वमहं तव इष्ट आसम् ।

हेम्लेटः - इदानीमपि । आभ्यां हस्ताभ्यां प्रतिजानामि ।

रोसेन् - प्रभो ! तव मनःक्लेशस्य किं कारणम् ? यदि तव संतापं मित्राणि न कथयसि तर्हि तव स्वेच्छायाः संयमो भवेत् ।

हेम्लेट - मम किमपि सुभविष्यं नास्ति ।

रोसेन् - कथमेवं वदसि यदा राजैव वदति त्वं दायादोऽसि डेन्मार्क-सिंहासनस्येति ?

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेट - अथकिम् । किन्तु त्वमिमां लोकोक्तिं जानासि तृणेषु वर्धमानेषु अश्वः क्षुधया पीड्यते इति । इयं बहुप्राचीना लोकोक्तिर्जीर्णा च ।

(नटा वाद्यैः सह प्रविशन्ति ।)

हे वाद्यसंगीतकाराः ! एकं वाद्यं पश्यामि ।

(वेणुं गृह्णाति ।) (गिल्डेन्स्टेर्नं प्रति)

किमेवं ममात्यन्तनिकटे भवसि मामाक्रमितुमिव ?

गिल्डेन् - प्रभो ! सेवाधर्मेणातिक्रान्तमर्यादोऽस्मि । त्वां प्रति ममापेक्षैवात्र कारणम् ।

हेम्लेटः - अहं सम्यङ नावगच्छामि । किमिमं वेणु त्वं वादयसि ?

गिल्डेन् - प्रभो ! न शक्नोमि ।

हेम्लेटः - प्रयतस्व ।

गिल्डेन् - न शक्नोमि ।

हेम्लेटः - अभ्यर्थये ।

गिल्डेन् - अहं सुतरां न जानामि ।

हेम्लेटः - सुलभमसत्यभाषणमिव । रन्ध्राणामुपरि अङ्गुलीः स्थापय वायुं च पूरय । संगीतधारा उत्पद्यते । इमानि रन्ध्राणि ।

गिल्डेन् - किन्तु संगीतनियमनं कर्तुं न शक्नोमि । मम नैपुण्यं नास्ति ।

हेम्लेटः - अहमिदानीं वदामि मां लघुवस्तुवत् पश्यथः । वेणुरन्ध्राणीव मम मनःस्थानानि ज्ञात्वा मयि वादननैपुण्यं प्रयोज्य मम रहस्यं बहिराध्मातुं प्रयत्नं कुरुथः । मयि वाद्ये बहु संगीतमस्ति । किन्तु बहिष्कर्तुं भवन्तौ न शक्नुतः । स्यामहं किमपि वाद्यं मयि बहुः संगीतप्रयत्नः क्रियतां च

 In Public domain. Digitization Muthulakshmi Research Academy

परन्तु मत्तः संगीतोत्पादनं न भविष्यति ।

(पोलोनियसः प्रविशति ।)

आर्य ! भवति देवस्याशिषः सन्तु ।

पोलोनियसः - प्रभो राज्ञी त्वया सहाव्यवहितं भाषितुमिच्छति ।

हेम्लेटः - अपि पश्यसि मेघं दृश्यमानमुष्ट्रवत् ?

पोलोनियसः - सत्यम् । तदुष्ट्रवदस्ति ।

हेम्लेटः - मम तु नकुलवद् दृश्यते ।

पोलोनियसः - तस्य पृष्ठभागो नकुलवदस्ति ।

हेम्लेटः - अथवा तिमिङ्गिलवत् ।

पोलोनियसः - अथकिम् । तिमिङ्गिलवत् ।

हेम्लेटः - अहं मातरं शीघ्रं पश्यामि ।

(स्वगतम्) ते मम विषयेषु प्रवेष्टुं बहु प्रयतन्ते । शीघ्रं गच्छामि ।

पोलोनियसः - अहं तां वदामि ।

हेम्लेटः - शीघ्रमेव ।

(पोलोनियसो निष्क्रान्तः ।)

भोः सुहृदः । मामसहायं विसृजत ।

(हेम्लेटं विना अन्ये सर्वे निष्क्रान्ताः ।)

रात्रावस्मिन् समये भूतानि बहिरायान्ति । समाधयो विवृता भवन्ति । नरकदुर्गन्धो बहि : प्रसरति । अहं कवोष्णं रक्तं पिबेयम् । भयंकरकार्याणि कुर्यां यैर्जना दिवापि कम्पेरन् । किन्तु मया माता द्रष्टव्या । हे मनः ! तव निसर्गस्वभावं मा त्यज । नीरोराजस्यात्मा मां न प्रविशतु । अहं क्रूरो भवेयं न तु स्वभावविरुद्धः । कठोरं वदेयं न तु साहसं कुर्याम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मम जिह्वामनसोर्वैविध्यं भविष्यत्यस्मिन् कर्मणि । तीक्ष्णानि पदानि प्रयोक्ष्ये। मम वचनैस्तस्याः पीडा भवतु न तु मम कर्मणा ।

(निष्क्रान्तः ।)

तृतीयः अङ्कः तृतीयं दृश्यम् ।

(राजा रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति ।)

राजा - तस्मिन् मम प्रीतिर्नास्ति । किं च । यदा स उन्मादी भवति तदा तस्य स्वेच्छासंचरणं सक्षेमं न भवति । तस्माद् भवन्तौ सिद्धौ भवताम् । अहमकस्मात् कार्यनिश्चयं करिष्यामि स च इङ्गलन्डं प्रयास्यति भवद्भयां सह । एवमनियतं वर्तमाने हेम्लेटे मम राजस्थितेर्विपत् स्यात्। तस्योन्मादो दिने दिने वर्धते च ।

गिल्डेन् - आवां सिद्धौ भवावः । इदमावयोः पवित्रं कर्तव्यम् । अस्मिन् कार्ये प्रमादोऽस्ति । तथापि महाराजस्य भवतो राज्ये निवसतां बहुजनानां क्षेमायेदं कर्तव्यम् ।

रोसेन् - विवेकमुपयुज्यात्मा रक्षितव्यः । यस्य क्षेमं बहूनां क्षेमा आश्रयन्ति स सर्वथा रक्षणीयः । राज्ञो मृत्या बहूनां मृतयो भवन्ति यथा आवर्तेन सह समीपस्था बह्वोऽपि अधो नीयन्ते । यदा राजा शुचा निश्वसिति स एक एव न निश्वसिति । तेन सह सर्व राज्यं निश्वसिति।

राजा - प्रयाणसन्नद्धौ स्याताम् । स्वैरं वर्तमानमिदमस्माकं भयकारणमस्माभिर्नियन्तव्यम् ।

रोसेन्, गिल्डेन् - आवां त्वरावहे ।

(रोसेन्क्रान्जगिल्डेन्स्टर्नौ निष्क्रान्तौ । पोलोनियसः प्रविशति ।)

 In Public domain. Digitization Muthulakshmi Research Academy

पोलोनियसः - प्रभो ! स मातुर्गृहं गच्छति । अहं जवनिकानां पश्चान्निलीनो भूत्वा मातापुत्रयोर्मध्ये प्रवर्तमानं श्रोष्यामि । अहं त्वां निस्संशयं वदामि सा तस्मिन् कठिनं व्यवहरिष्यति । त्वयोक्तं सूक्तं च कश्चिदन्यो निलीनो भूत्वा तयोः संभाषणं शृणोतु इति यतो मातापुत्रयोः संबन्धस्तौ संयोजयति । राजन् ! आमन्त्रये। शयनात् पूर्वं भवन्तं वक्ष्यामि यन्मया ज्ञास्यते ।

राजा - प्रियप्रभो ! कृतज्ञोऽस्मि ।

(पोलोनियसो निष्क्रान्तः ।)

(स्वगतम्) मम पातकं दुर्गन्धभरितम् । तस्य दुर्गन्धो गगनं स्पृशति। पुरा काले भ्रातुः प्रथमा हत्या कृतासीत् । तदा यः शापस्तस्मिन् पतितः स मयि च पतति । अहं प्रार्थनां कर्तुं प्रबलमिच्छामि किन्तु न शक्नोमि। शक्तिमत्तरो ममापराधो मम प्रार्थनेच्छामाक्रमते । यथा कस्यचिद् बुद्धिर्विरुद्धाशययोर्मध्ये छिन्ना भवति तथाहं न जानामि कथं प्रार्थना प्रारब्धव्या । तस्मात् कालं च वृथा करोमि । यद्यपि ममायं सुदुष्टो हस्तो भ्रातू रक्तेन सुष्ठु सिक्तः स्यात् तथापि किं स्वर्गे करुणा नास्ति पर्याप्ता तत् सर्वं प्रक्षालयितुं परिशुद्धं च कर्तुम् ? यदि पापस्य प्रतिकारं कर्तुं न शक्नोति तर्हि करुणायाः किं प्रयोजनम् ? किं प्रयोजनं स्यात् प्रार्थनाया यदि तस्या इमौ द्वौ गुणौ न भवतः पापकार्यान्निवारणं कृतपापस्य क्षमाकरणं वा । यदि स्यात् तर्हि अहं स्वर्गं प्रति पश्येयम् । मया पापं कृतं गतकाले । तद् गतम् । परन्तु अहं न जानामि कीदृशी प्रार्थना मामुपकरिष्यति । मया कृतां बहुदूषितां हत्यां क्षमस्वेति किमहं वदेयम्? तन्ममानुपयुक्तं भवेद् यतः अहमिदानीं हत्याफलान्यनुभवामि । मम

In Public domain. Digitization Muthulakshmi Research Academy

किरीटं ममैश्वर्यकाङ्क्षां मम राज्ञीं च । अपि कश्चित् पापफलमनुभवन् पापकर्मणे क्षम्येत ? अस्मिन्नसत्याचरणमये लोके अपराधो बहूपायैर्न्याय-निर्णयादात्मानं मोचयेत् । स्वर्गे तथा न भवति । स्वर्गे वञ्चना न भवति। तत्र सर्वं कर्म यथार्थतया प्रकटितं भवति तथा च निर्णीयते । तत्रास्मासु बलात्कारो भवति अस्मत्पापानां सर्वेषां सम्पूर्णप्रकटनाय । तदाहं किं कुर्याम् ? मम तत्र कथं मोचनं भविष्यति ? अप्यहं पश्चात्तापप्रयोजनं द्रक्ष्यामि ? किं पश्चात्तापस्यासाध्यमपि भवेत् ? किं तु किं प्रयोजनं भवेत् यदा कश्चित् पश्चात्तापं कर्तुं न शक्नोति ? का नाम ममेयं दुःस्थितिः ? हे दुष्टहृदय ! हे बद्धात्मन् ! हे आत्मानं मोचयितुं प्रयतमानः अधिकं बद्ध ! देवा मम सहायाः सन्तु । अहं प्रयत्नं कुर्याम्। मम जानुनी ये संवृते न भवतः इदानीं प्रणामार्थं ते संवृते भवताम् । मम हृदयं यल्लोहतन्त्रीभिर्निर्मितं सद्योजातशिशोरस्थीनीव मृदु भवतु । एतावतापि मम सुपरिणामः स्यात् ।

(राजा किञ्चित् पश्चात् क्रान्त्वा जानुभ्यां नमति । हेम्लेटः प्रविशति।)

हेम्लेटः - (स्वगतम्) इदानीमहमेनं सुलभं हन्याम् । एष प्रार्थनां करोति। (कृपाणं कोशादुद्धरति ।) किन्तु यद्यहं तमिदानीं हन्यां स स्वर्गं गमिष्यति। किं तथा मम प्रतिकारो भवेत् ? इदं चिन्तनीयम् । द्रोही मम पितरमहन्। पितुरेकपुत्रोऽहं तत्प्रतिकाररूपेण तं द्रोहिणं स्वर्गं प्रेषयामि । तेन मम पिता हतः कृतापराधलेशभरितः । वैशाखमासपुष्पवत् पूर्णविकासयुताना-मात्मपापानां कृते पश्चात्तापं प्रकटयितुं तस्यावसरो नासीत् । दैवसकाशे स्थितं तस्य चरित्रं किमिति कोऽपि न जानाति । किन्तु यथास्माकमूहो भवति तथा तत् तस्य भूयसा प्रतिकूलं भवेत् मरणात् पूर्वं प्रार्थनाकरणा-

 In Public domain. Digitization Muthulakshmi Research Academy

भावात् । एष घातक इदानीमात्मनः पापानां कृते प्रार्थनां करोति । प्रार्थनाकारणेन स्वर्गं गन्तुमिदानीमेष सर्वथा अर्हः। तमिमं हत्वा मम प्रतिकारः कथं भवेत् ? न न । मम कृपाणः पुनः कोशं प्रविशतु । (खड्गं कोशं प्रवेशयति) प्रतीक्षतां चान्यसमयं युक्ततरम् । यदा स मद्यपानमत्तः अथवा निद्रावशः कोपाविष्टः निन्द्यरतिसुखश्रान्तसुप्तः द्यूतासक्तस्तत्र विवदमानः अथवा अन्यत् कर्म कुर्वन् यत् तस्यात्मनः स्वर्गगमनस्य किमपि कारणं न स्यात् । तदा स ग्राह्यः अधः पातयितव्यश्च येन पापपूर्णस्तस्यात्मा नरकं गच्छेत् । मम माता मां प्रतीक्षते । मया दत्तोऽयं विरामस्तव पापदिनानि किञ्चिद् दीर्घीकरोति ।

(निष्क्रान्तः ।)

(राजा उत्थाय पुरस्तादायाति ।)

राजा - (स्वगतम्) मम वचनानि उत्पतन्ति । चिन्तनानि भुवि तिष्ठन्ति । निर्व्याजचिन्तनरहितानि वचनानि स्वर्गं न नयन्ति ।

(निष्क्रान्तः ।)

तृतीयः अङ्कः : चतुर्थं दृश्यम् ।

(तत्रैवान्यः प्रकोष्ठः । राज्ञी पोलोनियसश्च प्रविशतः ।)

पोलोनियसः - स इदानीमेवागच्छति । निश्चयं तस्योपालम्भं कुरु । तं वद तस्य चपलचेष्टा अनियता असहनीयाश्चेति । राजा भृशं कुपितः। राज्ञी भवती कुपितस्य राज्ञस्तस्य च मध्ये स्थिता । अहमत्र निलीनो भवामि । तं प्रति स्पष्टं निस्संशयं च भाषस्व ।

हेम्लेटः - (नेपथ्यात्) मातः मातः मातः ।

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञी - चिन्ता मास्तु । यथा वदसि तथा करोमि । इदानीं निलीनो भव । शृणोमि तस्यागमनम् ।

(पोलोनियसो जवनिकान्तरितो निलीनः । हेम्लेटः प्रविशति ।)

हेम्लेटः - मातः । सम्प्रति को विशेषः ?

राज्ञी - हेम्लेट ! त्वया तव पितरं प्रति महदपराद्धम् ।

हेम्लेटः - मातः ! त्वया मम पितरं प्रति महदपराद्धम् ।

राज्ञी - संयतो वद । वाचालः प्रतिवदसि ।

हेम्लेटः - त्वं मां कुमत्या पृच्छसि न च जानासि ।

राज्ञी - हेम्लेट ! किमिदं किमिदम् ?

हेम्लेटः - का समस्या इदानीम् ?

राज्ञी - अपि त्वं जानासि काहम् ? उत विस्मृतोऽसि ?

हेम्लेटः - दैवेनाहं शपे । न विस्मरामि । त्वं राज्ञी असि । पत्युर्भ्रातुः पत्नी । मम माता । नाहं त्वां मातरमिच्छामि तथापि त्वं मम मातासि ।

राज्ञी - तर्हि अन्यानाह्वयामि ये त्वां वदेयुः ।

हेम्लेटः - न न । उपविश । स्थानात् मा चल । त्वां दर्पणं दर्शयामि। तस्मिन् पश्यात्मनः अन्तरङ्गम् ।

राज्ञी - किं करिष्यसि ? त्वं मां न हंसि खलु । हा ! मम रक्षास्तु।

पोलोनियसः - (जवनिकापश्चाद्भागात् ।)

हा ! रक्ष्यताम् रक्ष्यताम् रक्ष्यताम् ।

हेम्लेटः - किं तत् ? मूषिकः ? निश्चयमेष हत इदानीम् । (कृपाणेन जवनिकायां विध्यति । पोलोनियसं हन्ति च ।)

पोलोनियसः - (जवनिकापश्चाद्भागात्) हा हा । अहं हतोऽस्मि ।

 In Public domain. Digitization Muthulakshmi Research Academy

राज्ञी - बत बत किं कृतं त्वया ?

हेम्लेटः - नाहं जानामि । कः सः ? राजा ?

राज्ञी - मतिहीनं क्रूरं कर्म ।

हेम्लेटः - क्रूरं कर्म ? मातः ! यथा राज्ञो हननं तस्य भ्रात्रा सह विवाहश्च । तादृशम् ?

राज्ञी - राज्ञो हननम् ?

हेम्लेटः - मातः । तदेव मम वचनम् ।

(जवनिकामपसार्य पोलोनियसं पश्यति ।)

हे कृपण ! साहसिन् ! परकार्यान्तर्गत ! मूर्ख ! स्वस्ति । शुभास्ते पन्थानः सन्तु । त्वं त्वत्तः अधिकः तव प्रभुरिति मया चिन्तितम् । यत् त्वमर्हसि तत् त्वया प्राप्तम् । इदानीं जानीहि परकार्येषु व्यापारः प्रमादकर इति । (मातरं प्रति) हस्तेन हस्तस्य पीडनं त्यज । उपविश । इदानीमहं तव हृदयं पीडयामि यदि तस्मिन् मृदुत्वं नामास्ति । यदि च तव पापजीवितविधानेन तत् कठिनं न परिणतमभिप्रायाणामगम्यं च ।

राज्ञी - किं मया कृतमित्येवं मां रूक्षं वक्तुं धाष्टर्यं करोषि ?

हेम्लेटः - तत् कर्म तादृशमस्ति यल्लज्ञां नम्रतां च नाशयति धर्मं दम्भं करोति निर्मलं प्रेम गर्हितां कामक्रीडां ख्यापयति विवाहप्रतिज्ञाः द्यूतशपथवन्मृषा करोति च । त्वयैतत् कर्म कृतं येन विवाहात् तस्य सारः अपनीतः धर्मः केवलवागाडम्बरः कृतः । तव कर्मणा आकाशो भूमिं दृष्ट्वा लज्जयारुणो भवतीव । तव कर्मणेयं निबिडा घना भूमिर्विवर्णा दुःखितेव दृश्यते ।

राज्ञी - किं तन्मम कर्म यस्योपोद्घात एव मेघगर्जनवदस्ति ?

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - इतः पश्येमे चित्रे द्वयोर्भ्रात्रोः प्रतिकृती । तयोरिमं पश्य कञ्चिद् देवं भुवि अवतीर्णमिव । पश्येमं सूर्यवत् कामवदिन्द्रवद् दृश्यमानम्। एष तव पूर्वः पतिः । इममपरं पश्य तवेदानीं पतिं रोगग्रस्तधान्यगुच्छवद् दृश्यमानं पार्श्वगुच्छेऽपि रोगं संक्रामयन्तम् । अपि तव नेत्रे स्तः ? कथं त्वमिमान् पर्वतनितम्बानुत्सृज्य पङ्किलभूमिमवतीर्णा ? इदं त्वं नार्हसि प्रेमेति वक्तुम् । तव वयसि प्रेमभावो दुर्बलो मनो विवेकमनुसरति च । कः स तव विवेको येन त्वं महापुरुषं पतिं विस्मृत्येमं हीनं समाश्रिता ? यया त्वं प्रवर्तसे सा मतिस्तवैवास्तु किन्तु सा जडीकृता । भ्रष्टमतिरपि त्वमनयोर्द्वयोर्भेदं ज्ञातुं शक्नोषि। किन्तु कः पिशाचस्त्वामेवं प्रलोभ्या-वञ्चयत् ? बत ! धिक् धिक् ।

राज्ञी - अयि हेम्लेट! अभ्यर्थये । अलं वचोभिः । इदानीमहं ममान्तरङ्गं पश्यामि । तत्राहं कृष्णान् सुस्थितान् कलङ्कान् पश्यामि ये क्षालयितुं न शक्यन्ते ।

हेम्लेटः - किन्तु त्वमेवमेव वर्तसे विषयमग्ना प्रियं मधुरं च भाषमाणा दुष्टशय्यायां प्रेम कुर्वती ।

राज्ञी - अलमलम् । तव वचांसि छुरिका इव मम श्रवणयोः प्रविशन्ति। प्रिय हेम्लेट ! अलं वाग्भिः ।

हेम्लेटः - आधुनिकस्तव पतिर्घातकः खलः अधमः । एष तव प्रथमपते-र्दशमभागे विंशतितमभागसदृशोऽपि नास्ति । राज्ञां मध्ये एष विदूषक इव दृश्यते । स चोरो यो राजकिरीटमचोरयत् ।

राज्ञी - विरम विरम ।

हेम्लेटः - सम्प्रति राजा सन् यश्च जनमध्ये विकृतपुरुष इव दृश्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

(भूतं प्रविशति ।)

भोः ! स्वर्गस्था देवाताः ! मां रक्षत । हे दयाशालिन् प्रभो! अहं तव किं कार्यं कुर्याम् ?

राज्ञी - बत बत ! एष उन्मादी जातः ।

हेम्लेटः - अपि त्वमागतोऽसि मन्दं तव पुत्रमुपालब्धुं वृथोद्वेगवशो भूत्वा तव पवित्राज्ञां यो न करोति ? वद ।

भूतम् - मा विस्मर । प्रतीकारकार्ये तव मन्दचेष्टामुत्तेजयितुमागतोऽस्मि । किन्तु पश्य तव मातरं निश्चेष्टाम् । सा विस्मिता मा भवतु । तथा तां रक्ष । दुर्बलमनुष्येषु भावावेशः प्रबलं प्रवर्तते । हेम्लेट ! तया सह भाषणं कुरु ।

हेम्लेटः - आर्ये ! कथमस्ति भवती ?

राज्ञी - त्वं कथमसि ? त्वं शून्ये वायौ स्थिरं पश्यसि शून्यं प्रति भाषसे । तव व्याकुला दृष्टयो भयं जनयन्ति । नतास्तव केशा उत्थिता भवन्ति । प्रिय पुत्र ! शान्तो भव । तप्तं मनः शीतलं कुरु । अनिमिषः सन् किं तत्र पश्यसि ?

हेम्लेटः - तमेव तमेव । पश्य कथं स पश्यति । तस्य दृशः कान्तिहीना व्याकुलाश्च भयं जनयन्ति । तस्येयमाकृतिस्तस्य दैन्यस्य कारणं च शिला अपि उद्बोध्य प्रचालयेताम् । हे भूत ! मा मां निरीक्षस्व । तव शोकचेष्टया ममोग्रकर्तव्यं परिवर्तयेः । तदा मम कर्तव्यं कर्तुं मम प्रेरणा न भवति । मया रक्तं पातयितव्यम् । किन्तु अश्रूणि मुञ्चामि ।

राज्ञी - कमुद्दिश्य भाषसे ?

हेम्लेटः - किं त्वं तत्र किमपि न पश्यसि ?

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञी - सर्वाणि वस्तूनि पश्यामि । नान्यत् ।

हेम्लेटः - किं त्वं किमपि न शृणोषि ?

राज्ञी - आवां भाषमाणौ शृणोमि । नान्यत् किमपि ।

हेम्लेटः - पश्य पश्य । कथं स निभृतमपयाति । मम पिता । जीवता धृतानि वस्त्राण्येव धृत्वा । पश्य पश्य । स गच्छति । बहिर्द्वारं क्राम्यति।

(भूतं निष्क्रान्तम् ।)

राज्ञी - सर्वमिदं तवोहकल्पनम् । उन्मादस्तादृशान् भ्रमान् कल्पयति।

हेम्लेटः - उन्मादः ? मम धमनी तवेव स्पन्दते । अतस्त्वयि यावन्मति-स्थैर्यमस्ति मयि च तावदस्ति । मयोक्तानि वचनानि उन्मादजातानीति मा तर्कय । मयि परीक्षा क्रियताम् । यद्यन्मयोक्तं तत्तत् पुनर्वदामि । उन्मादी तथा न कुर्यात् । यदि त्वं स्वर्गस्य करुणामभिलषसि तर्हि तव मनो न प्रलोभय तव पापं नास्ति ममोन्माद एव मामेवं वाचयतीति । एवं कृत्वा त्वं तव मनोमलं बहिरावृणोषि परन्तु तदन्तरङ्गे वर्धते । स्वर्गस्याभिमुखं स्थित्वा कृतं पापं स्वीकुरु । कृतस्य पश्चात्तापमनुभव । अत ऊर्ध्वं पापकार्याणि मा कुरु । क्षमस्व मम सदाकाङ्क्षां या त्वामिहाभिभाषते । अस्मिन् मलिनदुष्काले सदाचारेण दुराचारस्य क्षमा याचितव्या । किमपि सुकार्यं कर्तुं सज्जनैर्दुर्जनाः प्रार्थनीयाः ।

राज्ञी - हा हेम्लेट । त्वया मम हृदयं द्विधाकृतम् ।

हेम्लेटः - तर्हि तयोर्दुष्टार्धं त्यज । अन्यभागेन शुद्धतरजीवनं नय । अहं त्वामामन्त्रये । तव शुभा रात्रिर्भवतु । किन्तु मम पितृव्यस्य शय्यां मा प्रविश । यदि तव सदाचारो नास्ति तर्हि सदाचारसंपन्नेवात्मानं प्रदर्शय। अभ्यासवशाद् यद् वयं कार्याणि कुर्मः तत् कदाचिद् दुष्टम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

तेन दोषभावं विना दुष्कार्याणि क्रियेरन् । अद्य नक्तं मम पितृव्यं परिहर । अनन्तरवारं तत् कर्म तव सुलभतरं भविष्यति । अभ्यासेन स्वभावपरिवर्तनमपि कर्तुं शक्यते । प्रयत्नेन दुर्गुणान् त्यक्तुं समर्थो भवेत् । पुनस्त्वामामन्त्रये । यत् कृतं तत्कृते पश्चात्तापमनुभव । तदाहं तवाशिषो याचिष्ये । (पोलोनियसं निर्दिशन्) अस्य प्रभोः कृते तु अहं दुःखितोऽस्मि। परन्तु एष दैवनिर्णयो दृश्यते यदहमस्य मृत्योः कारणम-भवम् । अस्माकं व्यवहारेषु स बलात् प्रविष्टस्ततो मया एष दण्डितश्च। सत्यमिदम् । तथापीदं मम मनसि स्थिरं स्थास्यति । अस्य देहं क्वापि स्थापयामि । मया कृताया अस्य मृतेः फलमहमनुभवामि । पुनश्चाहं वदामि तवेयं रात्रिः शुभा भवतु । उचितस्थले दयां स्थापयितुमनुचितस्थले क्रौर्यं कर्तव्यम् । इतोऽप्यधिकदुष्कार्याणि भविष्यन्ति । मान्ये अन्यत् किञ्चिदस्ति वक्तव्यम् ।

राज्ञी - किं मम कर्तव्यम् ?

हेम्लेटः - किमपि कुरु । इदं तु मा कुरु । मद्यपानमत्तो राजा त्वां शय्यायां पुनर्विलोभयेत् । बहूनि प्रियवचनानि ब्रूयात् । अहमुन्मादी नास्मि। सर्वमिदं मम नटनमिति तवाङ्गीकारं प्राप्तुं प्रयतेत ।

राज्ञी -इदं निश्चयमवगच्छ । मम मुखात् तादृशं किमपि वचनं न निस्सरेत् ।

हेम्लेटः - मया इङ्गलन्डो गन्तव्यः ।

राज्ञी - विस्मृतं मया तत् । तन्निश्चितम् ।

हेम्लेटः - बद्धा लेखाः । द्वे मम पाठशालामित्रे तत् कार्यं कुरुतः । तयोर्मम तावान् विश्वासोऽस्ति यावान् तीक्ष्णदंष्ट्रासर्पयोः । तौ मां नेष्यतः।

In Public domain. Digitization Muthulakshmi Research Academy

तौ मयि कपटकार्यं कर्तुमिच्छतः । मयापि काचन प्रतिक्रिया कर्तव्या। इदानीमहमस्य देहं पार्श्वकोष्ठे स्थापयामि । मातः ! शुभां रात्रिं नय। एष राजकीयवेत्ता यः सदा वाचाल आसीत् स इदानीं मूकः संजातः। आयाहि वृद्ध ! तवान्तं करिष्यामः । मातः ! शुभास्तु रात्रिः ।

(राज्ञी निष्क्रान्ता । पोलोनियसस्य शवं कर्षन् हेम्लेटो निष्क्रान्तः ।)

चतुर्थः अङ्कः : प्रथमं दृश्यम् ।

(दुर्गे प्रकोष्ठः । राजा राज्ञी रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च प्रविशन्ति ।)

राजा - (राज्ञीं प्रति) तव हृदयान्तरान्निःश्वासा बहिरागच्छन्ति । केनापि कारणेन भवितव्यम् । त्वया वक्तव्यम् । कारणं ज्ञातव्यम् । तव पुत्रः कुत्रास्ति ?

राज्ञी - इदं स्थलमावयोर्दीयतां कञ्चित्कालम् ।

(रोसेनक्रान्जः गिल्डेन्स्टेर्नश्च निष्क्रान्तौ ।)

बत बत । अद्य रात्रौ मया दृष्टं वक्तुं मम जिह्वा महान्तं क्लेशमनुभवति।

राजा - गेर्ट्रूडे ! हेम्लेटस्य का स्थितिः ?

राज्ञी - स उन्मादी अस्ति । आधिक्यार्थं परस्परं स्पर्धमानौ वायु-समुद्राविव सोऽस्ति उन्मादी । जवनिकायाः पश्चात् स कञ्चन चलनशब्दमशृणोत् । उन्मादावेशेन कृपाणं निस्सार्य मूषिकः मूषिक इति वदन् नष्टमतिरदृष्टं मान्यं तं वृद्धमहन् ।

राजा - अहो ! सुघोरमिदं पापम् । यद्यहं तत्रासमहं हतः स्याम् । तस्य स्वेच्छा सर्वेषामस्माकमपायकरी । तव मम सर्वस्य च। बत ! इमां

 In Public domain. Digitization Muthulakshmi Research Academy

घोरहत्यां प्रति किं वक्तुं शक्यते अस्माभिः ? तस्मिन् कर्मणि मम संबन्धो जनैरनुमीयते। यदि मयेदृशं पूर्वं तर्कितं तदा मयायमुन्मादी युवा निर्बद्धः स्थापितः स्यात्। स बहिःस्थलेषु विसृष्टो न स्यात्। परन्तु आवां प्रेमबद्धौ। एषु व्यतिकरेषु युक्ततमकार्यावगमने आवयोर्मतिर्नाभवत्। यथा केनचिदसह्यव्याधिपीडितेन स व्याधिर्गुप्तो रक्षितः स्यात् आत्मन आरोग्यनाशश्च कृतः स्यात् तथावाभ्यां कृतम्। इदानीं स कुत्र गतः ?

राज्ञी - स गतः पोलोनियसस्य मृतदेहं निष्कर्षितुम्। इदानीं स मृतदेहस्योपरि विलपति। एवं स उन्मादेऽपि सुगुणं प्रकाशयति।

राजा - गेर्ट्रूडे ! आगच्छ। यावत् सूर्यः पर्वतशिखरं स्पृशेत् ततः पूर्वमेव नावा तं प्रेषयावः। तदन्तरे वयं युक्त्या राजशक्त्या चेदं पातकं स्वीकुर्वः आच्छादयामश्च। भो गिल्डेन्स्टेर्न (रोसोनक्रान्जगिल्डेन्स्टेर्नौ पुनः प्रविशतः।) सुहृदौ। कांश्चन सहायान् प्राप्नुतम्। उन्मादोद्रिक्तो हेम्लेटः पोलोनियसं हत्वा तस्य देहं मातुः कोष्ठादकर्षत्। गत्वा तं पश्यत। तेन सह मृदु भाषणं भवतु। मृतदेहं पूजायतनमानयत। इयं मम प्रार्थना। कालो वृथा न क्रियताम्।

(रोसेन्क्रान्जगिल्डेन्स्टेर्नौ निष्क्रान्तौ।)

गेर्ट्रूडे आयाहि। बहुविवेकिनः सुहृद आह्वयामः। ते जानन्तु इमामाकस्मिकसमापत्तिम्। एवं कृते वयमस्मानस्मादपराधाद् रक्षामः। परिवादो लोके व्याप्नोति कर्तारमवश्यं लगति च। यथा स परिवादः अस्मान् न स्पृशेत् परितः प्रसरेद् वायौ क्षयेत् तथा कुर्मः। एहि मया सह। मम मनो द्विधा भिद्यते दुःखेन भयेन च।

(राजा राज्ञी च निष्क्रान्तौ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः अङ्कः : द्वितीयं दृश्यम् ।

(दुर्गे अन्यः कोष्ठः । हेम्लेटः प्रविशति ।)

हेम्लेटः - मृतदेहः सुरक्षितस्थले निक्षिप्तः ।

रोसेन्गिल्डेनौ - (नेपथ्यात्) हेम्लेट ! प्रभो ! हेम्लेट !

हेम्लेटः - कोऽयं शब्दः? को वदति हेम्लेट हेम्लेट इति ? हा! इमावायातः।

(रोसेन्गिल्डेनौ प्रविशतः ।)

रोसेन्ः - प्रभो ! किं कृतं त्वया मृतदेहेन ?

हेम्लेटः - स धूल्या सह मया मिश्रितः । यतः स धूल्या निर्मितः ।

रोसेन् - ब्रूहि यत्रास्ति सः । आवां ततः पूजायतनं नयावः ।

हेम्लेटः - विश्वासो मास्तु ।

रोसेन् - कस्मिन् विश्वासः ?

हेम्लेटः - अहं युवयोर्वचनमनुसरिष्यामि न मम बुद्धिमिति विश्वासो मास्तु । किं च वार्ताहरेण पृष्टो राजकुमारोऽहं किं प्रतिवचनं दद्याम् ?

रोसेन् - प्रभो ! अपि मां वार्ताहरं मन्यसे ?

हेम्लेटः - यूयं राजानुग्रहेण राजनियोगैर्बहुमानैश्च जीवथ । यथा बृहद्वानरो मुखकोणे बीजानि न्यस्यति तथा राजा सेवकान् समीपे स्थापयति । उपयुङ्क्ते च ।

रोसेन् - प्रभो ! त्वया वक्तव्यं कुत्रास्ति स मृतदेहः । आवाभ्यां सह राजसकाशमागन्तव्यं च ।

हेम्लेटः - देहो राजसन्निधावस्ति । किन्तु राजा देहसन्निधौ नास्ति।

 In Public domain. Digitization Muthulakshmi Research Academy

राजा च किंचन वस्तु ।

गिल्डेन् - प्रभो ! त्वं वदसि राजा किंचन वस्त्विति । एवं नु ?

हेम्लेटः - अमुख्यं किंचन वस्तु । मां तस्य सकाशं नयतम् । जम्बुको निलीनः । तमन्विष्यामः । (निष्क्रान्ताः ।)

चतुर्थः अङ्कः तृतीयं दृश्यम् ।

(दुर्गे अन्यः कोष्ठः । राजा परिजनश्च प्रविशन्ति ।)

राजा - मया जनाः प्रेषितास्तं द्रष्टुं शवः कुत्रास्तीति ज्ञातुं च। स्वेच्छया वर्तमान एष प्रमादावहः । तथापि तस्मिन् न्यायनिर्णयं प्रयोक्तुं न शक्नुमः । जनबाहुल्यस्य तस्मिन् प्रीतिरस्ति । तस्मिन् तेषामभिप्रायः प्रीत्या दर्शनेन भवति न तु विवेचनेन । एवं स्थिते अपराधिनि पातितं दण्डनमेव ते विमृशेयुर्न तु तस्यापराधम् । एवं स्थिते सर्वो व्यवहारः सक्षेमः अनुद्वेगश्च कर्तव्यः । बहु विचार्य निर्णीय स मया इतः प्रेषणीयः। चिकित्सातिक्रान्तानां रोगाणां साहसेन प्रतिकारः कर्तव्यः ।

(रोसेन्क्रान्जः प्रविशति ।)

किं वृत्तम् ?

रोसेन् - प्रभो । कुत्र मृतदेहो निक्षिप्तः स मां नावदत् बहु पृष्टोऽपि।

राजा - स कुत्रास्ति ?

रोसेन् - स बहिरस्ति अस्माभिरवेक्ष्यमाणो भवदाज्ञां प्रतीक्षमाणः।

राजा - स इत आनीयताम् ।

रोसेन् - हे गिल्डेन्स्टेर्न ! तं प्रभुमानय ।

(हेम्लेटः गिल्डेन्स्टेर्नश्च प्रविशतः ।)

In Public domain. Digitization Muthulakshmi Research Academy

राजा - हेम्लेट ! ब्रूहीदानीं कुत्रास्ति पोलोनियसः ।

हेम्लेटः - भोजने ।

राजा - भोजने ? कुत्र ?

हेम्लेटः - न तत्र यत्र स भुङ्क्ते प्रत्युत यत्र स भुज्यते । राजकीय कृमीणां समाजस्तस्मिन् कार्यं करोति । वयं कृमीन् पोषयामः कृमयोऽस्मान् पोषयन्ति । स्थूलो राजा कृशो याचकश्च कृमीणां भोजनं भवतः । एकस्मिन् भोजनफलके द्वे पात्रे ।

राजा - बत बत । पोलोनियसः कुत्र ?

हेम्लेटः - स्वर्गे । तव जनान् प्रेषय । निर्धारणं कुरु । यदि तव जनस्तं तत्र न पश्यति त्वमेव तस्यान्वेषणं कुरु नरके । यदि तमस्मिन् मासे तव जना नाधिगच्छन्ति तर्हि दुर्गन्धं प्राप्य उपरि शालायां पश्यन्तु।

राजा - (कांश्चन सेवकान् प्रति) गच्छत । तं तत्रान्विष्यत ।

हेम्लेटः - त्वरा मास्तु । गच्छत । स तत्र वर्तेत ।

(सेवका निष्क्रान्ताः ।)

राजा - हेम्लेट ! वयं तव क्षेममभिलषामः । तव क्षेमः अस्माकं बहुप्रियः । तथैव यत् त्वया कृतं तस्मिन्नस्माकं दुःखं भवति । अत इदानीं ममेदमावश्यकम् । यावत् शक्यते तावच्छीघ्रं त्वामितः प्रेषयामि । सिद्धो भव । नौस्त्वां प्रतीक्षते । तव इङ्ग्लन्डप्रयाणाय सर्वाणि योजनानि कृतानि ।

हेम्लेटः - इङ्ग्लन्डम् ?

राजा - अथकिम् ।

हेम्लेटः - तत् प्रशस्तम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

राजा - यदि अस्माकमभिप्रायस्ते ज्ञातस्तर्हि तत् प्रशस्तं जानासि ।

हेम्लेटः - काचित् संरक्षिणी देवता अस्ति या सर्वमिदं पश्यति । भवतु । अहं सिद्धोऽस्मि इङ्ग्लन्डं प्रति । प्रियमातः आमन्त्रये ।

राजा - हेम्लेट ! अहं तव प्रियः पिता ।

हेम्लेटः - मम माता । पिता पुरुषः माता पत्नी च । तावेकीभूतौ । तस्मात् त्वं मम माता च । अस्तु । इङ्ग्लन्डं प्रति सिद्धोऽस्मि।

(निष्क्रान्तः ।)

राजा - तमनुपदमनुसरतम् । यावच्छक्यं तावच्छीघ्रं स नावं प्रविशतु। तथा स चोद्यताम् । कालहरणं मास्तु । एतन्नक्तमेव तमितः प्रेषयेयम् । त्वर्यताम् । अस्मिन् कार्ये सर्वं निर्णीतं सिद्धं च । त्वरा क्रियताम् ।

(रोसेनगिल्डेनौ निष्क्रान्तौ ।)

(स्वगतम्) हे इङ्ग्लन्डराज ! यदि तव मयि प्रीतिरस्ति.... तव मयि प्रीतिर्भवितव्या..... यत इङ्ग्लन्डे त्वयि पुरास्माभिः कृतां क्षतिमद्यापि त्वमनुभवसि । तस्मात् तव मयि भयमस्ति आदरश्च । तस्मात् त्वं मम लेखान् नोपेक्षिष्यसे । तेषु लेखेषु त्वमनुशिष्टो हेम्लेटं सद्यो हन्तुम् । इङ्ग्लन्डराज ! तत् कुरु । स मम मस्तिष्कं ज्वरवत् क्षोभयति । चिकित्सा त्वया कार्या । यावत् तन्न क्रियते तावन्मम सुखं न भवति यद्यपि ममान्यानि भागधेयानि भवेयुः ।

(निष्क्रान्तः ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः अङ्कः : चतुर्थं दृश्यम् ।

(डेन्मार्कदेशे काचित् समभूमिः । फोर्टिन्ब्रासः नायकश्च प्रविशतः क्रमचलनं कुर्वत्या सेनया सह ।)

फोर्टिन्ब्रासः - गच्छ नायक । ममाभिनन्दनानि डेन्मार्कराजं वद । स उच्यतां पूर्वं दत्तया तस्यानुमत्या फोर्टिन्ब्रासस्तस्य देशस्यान्तर्गतमार्गेण सैनिकानां क्रमणं करिष्यतीति । त्वं जानासि कुत्र वयं समाविशामः । यदि महाराजो मत्सकाशात् किमप्यभिलषति तदस्माकं कर्तव्यमिति विज्ञापय ।

नायकः - प्रभो ! तदहं करिष्यामि ।

फोर्टिन्ब्रासः - तस्मात् स्वकार्ये व्यापृतो भव ।

(नायकं विहायान्ये सर्वे निष्क्रान्ताः । हेम्लेटः रोसेन्क्रान्जः गिल्डेन्स्टेर्नः अन्ये च प्रविशन्ति ।)

हेम्लेटः - आर्य ! कस्येमाः सेनाः ?

नायकः- मान्य ! ता नार्वेदेशादागच्छन्ति ।

हेम्लेटः - किं कार्यमत्र तासाम् ? अप्यहं प्रष्टुं शक्नुयाम् ?

नायकः - कस्मिंश्चित् पोलन्डदेशभागे तासामुपयोगो भविष्यति ।

हेम्लेटः - कश्च सर्वसैन्याधिकारी ?

नायकः - वृद्धस्य नार्वेराजस्य भ्रातृव्यः फोर्टिन्ब्रासः ।

हेम्लेटः - किं त्वं पोलन्डदेशस्य प्रधानभागं प्रति उत कमप्युपान्तभागं प्रति गच्छसि ?

नायकः- आर्य ! सत्यं वक्तव्यम् । अतिशयकथनं मास्तु । वयं कमप्यल्पभूभागं प्राप्स्यामः । अस्माकं कोऽपि लाभो न भविष्यति किन्तु

 In Public domain. Digitization Muthulakshmi Research Academy

कीर्तिर्भविष्यति । यदि स भूभागः कृष्यर्थं विक्रीयेत नाहं तमल्पेनापि मूल्येन क्रीणीयाम् । नार्वेदेशस्य वा पोलन्डदेशस्य वा स भूभागः अकिञ्चित्करः ।

हेम्लेटः - तर्हि पोलन्डदेशीयास्तं भूभागं न रक्षिष्यन्ति ।

नायकः - रक्षिष्यन्ति । तत्र सैन्यानि प्रबलीकृतानि ।

हेम्लेटः - (स्वगतम्) द्विसहस्त्रं मनुष्या विंशतिसहस्त्राणि डकेट्नाणकानि चास्य लघुविवादांशनिर्णयस्य कृते संघर्षारम्भं करिष्यन्ति । इदमैश्वर्यस्य राशीभावस्य दीर्घनिरन्तरप्रशान्तेश्च फलम् । अन्तर्गतव्रणवदयं कलहो भवति । स व्रणः स्फुटति हन्ति च किन्तु कोऽपि न जानाति कारणम् । (प्रकाशम्) मान्य ! उपकृतोऽस्मि अनया वार्तया ।

नायकः - साधयामस्तावत् । (नायको निष्क्रान्तः ।)

रोसेन् - प्रभो ! इत आगन्तुं प्रसीद ।

हेम्लेटः - क्षणेनागच्छामि । मां विना प्रस्थानमुपक्रम्यताम् ।

(हेम्लेटं विना सर्वे निष्क्रान्ताः ।)

(स्वगतम्) सर्वाणि मम दृष्टानि मां निन्दन्ति प्रतिकारे मां प्रोत्साहयन्ति च यस्मिन्नहं मन्दोऽस्मि । को नाम स पुरुषो यः केवलं भुङ्क्ते स्वपिति च । स मृगः । न ततोऽधिकः । भगवतास्माकं मेधा दत्ता । पुरोदृष्टिर्दत्ता । ग्रहणशक्तिर्दत्ता । विवेको दत्तः । किमर्थमिमानि सर्वाणि दत्तानि ? अनुपयुक्तानि वृथा स्थातुं किम् ? का मम मनःस्थितिः ? जन्तुवद् विस्मरणम् उत भीरुवद् दोलायमानता येनाहमिमां समस्यां बहु चिन्तयामि यस्मिन् चिन्तने चतुर्थभागो विज्ञता त्रयो भागा भीरुत्वं च सन्ति । नाहं जानामि किमर्थमहं जीवन्नस्मि इदं कर्तव्यमिति चिन्तयन् चिन्तयन् ।

In Public domain. Digitization Muthulakshmi Research Academy

यत् कर्तव्यं तत् कर्तुं मम कारणमस्ति संकल्पोऽस्ति बलमस्ति साधनानि च सन्ति। यथाहमधस्ताद् भूमिं पश्यामि तथा स्पष्टं मया तत् कर्तव्यमिति। दृश्यतामियं सेना। इयं महती सेना नीयते सुकुमारेण यूना राजकुमारेण यस्योत्साहो महत्याकाङ्क्षयोत्तेजितः। स उत्साहः अदृष्टं फलमपहसति। भङ्गुरं मरणधर्मं जीवितं सर्वमपायवशं मरणवशं दैवाधीनं च करोति। सर्वमिदं स करोति कस्यचिद् भूभागस्य कृते। महत्त्वं नाम महाकारणं विना कर्मणि अप्रवर्तनं नास्ति। यदा आत्मप्रतिष्ठा रक्षितव्या तदा स्वल्पेऽपि विषये युद्धं कर्तव्यमेव। अतः सम्प्रति मम का स्थितिः ? मम पिता हतः। माता दूषिता। ते उभे कारणे मम विवेकं संरम्भं च प्रोत्साहयतः। किन्तु अहं किमपि न करोमि। यदहं पुरस्तात् पश्यामि तन्मम लज्जाकरम्। विंशतिसहस्राणि पुरुषान् मुमूर्षून् पश्यामि। ते मरणमाह्वयन्ति यशसः कृते यन्मिथ्या। ते कस्यचिद् भूभागस्य कृते योत्स्यन्ते यस्तैः स्थातुमपि न पर्याप्तः। तेषां मृतशरीराणि स्थापयितुमपि नालम्। हा हा। इतः प्रभृति मम चिन्तनानि रक्तमयानि सन्तु। नो चेत् तानि व्यर्थानि भवेयुः।

(निष्क्रान्तः।)

चतुर्थः अङ्कः : पञ्चमं दृश्यम्।

(एल्सिनोरदुर्गे प्रकोष्ठः। राज्ञी होरेषियः कश्चित् पुरुषश्च प्रविशन्ति।)

राज्ञी - नाहं तया सह भाषणं करिष्यामि।

पुरुषः - सा भाषणं कर्तुमाग्रहं करोति। सा ध्रुवमुन्मादिनी। यस्तां

 In Public domain. Digitization Muthulakshmi Research Academy

पश्यति स दयते ।

राज्ञी - सा किमिच्छति ?

पुरुषः - सा पितरमुद्दिश्य बहु भाषते । सा वदति लोके सर्वत्र दुश्चेष्टितानि सन्तीति । कासेन कण्ठं स्पष्टं करोति । उरस्ताडयति । स्वल्पविषयेषु कुप्यति । असंबद्धं ब्रूते । तस्या वचनानि अर्थहीनानि सन्ति। तथापि तस्या असंबद्धप्रलापानां समन्वयं कृत्वा श्रोतारः अभिप्रायं गृह्णन्ति । तस्याः शिरःकम्पैश्चेष्टाभिश्च ते जानन्ति तेषु वचनेषु कश्चिद् भावोऽस्तीति। कः स भाव इति निश्चितं न ज्ञायते । तथापि सा कमपि शोकं प्रकटयति ।

होरेषियः - यदि भवती तां प्रति भाषते तद् युक्तं भवति । नो चेत् तस्या वचनैः शङ्कापूर्णानां दुरूहा भवेयुः ।

राज्ञी - सा प्रविशतु ।

(पुरुषो निष्क्रान्तः ।)

(स्वगतम्) मम मनः पीडितम् । पापं मनः पीडयति । एवं पीडितस्य मम मनसः स्वल्पोऽपि विषयो विपत्करो दृश्यते । कृतः अपराधः मूढसंशयानुत्पादयति । यद्यपि तान् संशयान् परिहर्तुं प्रयत्नः क्रियते तथापि ते संशया उद्भवन्ति ।

(उन्मादिनी ओफीलिया प्रविशति ।)

ओफीलिया - डेन्मार्कस्य सुन्दरी राज्ञी कुत्रास्ति ?

राज्ञी - ओफीलिये ! किं करोषि ?

ओफीलिया - (गायति)

In Public domain. Digitization Muthulakshmi Research Academy

कथं विभेदं वदसि त्वमङ्गने

प्रियस्य तेऽन्यस्य च कस्यचित् शुभे ।

मम प्रियो मस्तकवेष्टनं धरेत्

स यात्रिको यष्टिमुपानहौ च ॥

राज्ञी - बत बत । प्रिये ! गीतस्य कोऽर्थः ?

ओफीलिया - अपि त्वं किमपि पृच्छसि ? श्रूयतामिदम् । (गायति)

मृतः स वनिते नूनं निश्चितं स मृतो गतः ।

शिरस्स्थाने बालतृणं पत्स्थाने चैत्यमस्ति च ॥

राज्ञी - ननु ओफीलिये !

ओफीलिया - कृपया श्रूयताम् ।

मृतस्य छदनं हिमवत् शुक्लम् ।

(राजा प्रविशति ।)

राज्ञी - प्रभो ! इमां पश्य दयनीयाम् ।

ओफीलिया - (गायति)

रम्यैः पुष्पैस्तदपि विकीर्णम् ।

न त्यक्तस्तैर्गतः समाधिं

सह तैः पुष्पैः सहाश्रुपातैः ॥

राजा - बाले कथमस्ति भवती ?

ओफीलिया - सक्षेमास्मि । देवस्तवाशिषो वदतु । उच्यते कस्यचित् पुत्री केनापि कुकार्येण उलूकी परिणता । वयं के इति इदानीं जानीमः। किं भविष्याम इति न जानीमः । देवोऽस्तु सह भवद्भिर्भोजनसमये ।

राजा - सा मृतं पितरमुद्दिश्य वदति ।

 In Public domain. Digitization Muthulakshmi Research Academy

ओफीलिया- अथेमां चर्चां विसृजामः। यदि कश्चित् पृच्छति किमिदमिति एवं वद।

उक्त्वा प्रणयवचांसि बहूनि

कन्याहं तव कोष्ठं नीता।

प्रियवचनैः परवशतां प्राप्ता

आगता बहिरकन्या भूत्वा॥

राजा - मुग्धा ओफीलिया। कदा प्रभृत्येषा एवमस्ति ?

ओफीलिया - अहमाशासे सर्वं सुखं परिणंस्यति। अस्माभिः सहनं कर्तव्यम्। परन्तु मम विलापो भवत्येव। मम भ्राता इदं ज्ञास्यति। अहं तव सूपदेशस्य कृतज्ञास्मि। आयाहि शकटचालक। सर्वेषां शुभास्तु रात्रिः। (निष्क्रान्ता।)

राजा - तामनुपदमनुसर। सश्रद्धं तां परिपालय।

(होरेषियो निष्क्रान्तः।)

इदं महाशोकस्य दुष्फलम्। पितुर्मरणमेवास्य कारणम्। गेर्ट्रूडे ! यदा शोक आपतति तदा स शत्रुगूढपुरुषवदेको नापतति। सेनावत् संघीभूयापतति। प्रथमं तस्याः पिता हतः। तव पुत्रः अपनीतः। तत्र कारणं तस्य प्रचण्डकार्याणि। जनेषु व्याकुलता जाता। पोलोनियसस्य मृतिविषये तेषां संशया जाता मिथोगूढभाषणानि च। अस्माभिः सम्यगचिन्तयित्वा त्वरया तस्य निखननं कृतम्। तस्य यथाविधि प्रेतकार्यं न कृतम्। ओफीलियाया मतिर्भ्रष्टा। तस्या भ्राता फ्रान्सदेशाद् रहसि प्रत्यागतः। स विस्मयावहाः कथाः शृणोति। चिकीर्षितं रहसि स्थापयति। सन्ति च कथाकल्पनाचतुरा ये तस्य कर्णयोः पितृमरणविषये दुष्टवार्तावचनेन

 In Public domain. Digitization Muthulakshmi Research Academy

विषं पातयन्ति । सम्यक्साक्ष्यस्याभावात् ते अस्मान् निन्देयुः । गेर्टूडे । एषु आघातेषु एकोऽपि मां हन्तुमलम् । मयि तु बहवो निपतन्ति।

(नेपथ्ये शब्दः ।)

राज्ञी - बत ! कोऽयं शब्दः ?

राजा - कुत्र मम रक्षिणः ? ते मम द्वारं रक्षन्तु ।

(पुरुषः प्रविशति ।)

किं खलु इदम् ?

पुरुषः - राजन् ! आत्मानं रक्ष । समुद्रो वेलां न तावता वेगेनाक्राम्यति यावता युवा लेर्टेसस्तव प्रभुत्वं प्रति जनसमूहं नयन्नापतति । सनातनाचारः सम्प्रदायश्च तैर्विस्मृतौ । वयं लेर्टेसं राजानमिच्छाम इति ते उच्चैर्वदन्ति। ते शिरोवेष्टनानि उपरि प्रक्षिपन्ति । हस्तानुत्क्षिपन्ति । उच्चैराक्रोशन्ति च । लेर्टेसो राजा भवति लेर्टेसो राजेति ।

राज्ञी - हा हा ! ते दोषिणं विहायास्मान् प्रति निपतन्ति ।

(नेपथ्ये शब्दः ।)

राजा - कवाटा भग्नाः ।

(नेपथ्ये शब्दः । लेर्टेसः प्रविशति सायुधः पौरैरनुगतः ।)

लेर्टेसः - कुत्रास्ति स राजा ? (पौरान् प्रति) जना बहिस्तिष्ठत ।

पौराः - न न । वयं प्रविशामः ।

लेर्टेसः - कृपया प्रतीक्ष्यताम् । अहं राजानमभियुञ्जे ।

पौराः - भवतु । वयं प्रतीक्षामहे ।

(पौरा निष्क्रान्ताः ।)

 In Public domain. Digitization Muthulakshmi Research Academy

लेर्टेसः - साधु कृतम् । द्वारं रक्षत । (राजानं प्रति) हे दुष्टराज ! मम पितरं मे देहि ।

राज्ञी - शान्तिं कुरु । लेर्टेस ! शान्तिं कुरु ।

लेर्टेसः - अहं मान्यात् पितुर्मान्यायां मातरि जातोऽस्मि । नाहं दुर्जातः। इदानीं शान्तिर्ममासाध्या ।

राजा - लेर्टेस ! कथमेवं मां प्रत्युद्रिक्तोऽसि ? गेर्ट्रूडे ! न तं निवारय । अहं क्षतो भवेयमिति भयं मास्तु । देवकरुणा राजानं रक्षति येन राजापकर्तारस्तं न हिंस्युः । लेर्टेस ! कथं त्वमेवं कुपितोऽसि ? गेर्ट्रूडे ! स स्वैरं वदतु । वद । लेर्टेस ! वद ।

लेर्टेसः - मम पिता कुत्रास्ति ?

राजा - स मृतः ।

राज्ञी - स राज्ञा न हतः ।

राजा - पृच्छतु सः । सर्वं स पृच्छतु ।

लेर्टेसः - कथं स मृतः ? संदिग्धप्रतिवचनमहं न मर्षयामि । अहं राजविधेयतां त्यजामि । विश्वासप्रतिज्ञां जहामि । मनसा करुणया च मम संबन्धो नास्ति । इह लोके परस्मिंश्च लोके मम का गतिर्भविष्यतीत्यहं न श्रद्दधामि । यद् भवेत् तद् भवतु । मया तु मम पितुर्मृतेः पूर्णरूपेण प्रतिकारः कर्तव्यः ।

राजा - कस्त्वां प्रतिकारकरणान्निवारयेत् ?

लेर्टेसः - न कोऽपि । यदिच्छेयं तत् कुर्याम् । यानि मम सकाशे साधनानि सन्ति तान्यहं सावधान उपयुञ्जे । परिमितान्यपि तानि मां सान्तं नयेयुः ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - प्रिय ! लेर्टेस ! त्वं ज्ञातुमिच्छसि कथं तव पिता मृत इति। प्रतिकारं कर्तुमिच्छसि । तस्मिन् कर्मणि किं त्वं तव पितुर्मित्रं शत्रुं च समं करिष्यसि यथा कश्चिद् द्यूतकारो लाभं नष्टं चात्मसात् करोति ?

लेर्टेसः - शत्रुष्वेव मम प्रतिकारो भविष्यति नान्यस्मिन् ।

राजा - अपि त्वं ज्ञातुमिच्छसि के शत्रवः ?

लेर्टेसः - मित्राणां कृते मम हस्तौ विवृतौ ।

राजा - इदानीं त्वं सुपुत्रवद् भाषसे सुपुरुषवच्च । अहं तव पितुर्मरणे अनपराधी अस्मि महता शोकेन पीडितश्च । तत् ते स्पष्टं करिष्यामि।

नेपथ्ये पौराः - आगच्छतु सा ।

लेर्टेसः - कः स शब्दः ?

(ओफीलिया पुनः प्रविशति ।)

उष्णता मम मस्तिष्कं शोषयतु । कटून्यश्रूणि मम नेत्रे अन्धे कुर्वन्तु। दैवेनाहं शपे तवोन्मादस्य प्रतिकारः पूर्णरूपेण करिष्यते । हे वैशाखमासजपापुष्प ! प्रियबाले ! प्रियसोदरि ! ओफीलिये ! हे भगवन्! अपीदं संभवं युवत्या मतिर्वृद्धस्य जीवितवद् भङ्गुरा ? मानवस्वभावः प्रेमभावशोभनो भवति । एवं स्थिते प्रेम्णः अवसाने मत्याश्च विपद् भवति यथा मम सोदरी पितरि मृते नष्टमतिर्जाता ।

ओफीलिया - (गायति) ।

स नीतः शवयानेन कृत्वा मुखमनावृतम् ।
समाधौ तस्य बाष्पाणां वृष्टिरेवाभवत् तदा ॥

गच्छ गच्छ । स्वस्ति ।

लेर्टेसः - बत बत सोदरि । नष्टमतिरपि एभिर्वचनैर्मां प्रतिकाराय

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः सुष्ठु चालयसि ।

ओफीलिया - गृहाण । इमानि जपापुष्पाणि तव । इमानि मल्लिकापुष्पाणि तव । गृहाणेमानि पाटलापुष्पाणि । त्वमिमानि चम्पकपुष्पाणि गृहाण । (गायति)

गतः स नायाति पुनः नायाति हि मृतो हि सः ।
हिमवत् श्मश्रवः श्वेताः शिरः पूर्णं तु धूसरम् ।
स निर्गतो निर्गतः सः विलपामो वृथा वयम् ॥
देवस्य करुणा भवतु तस्यात्मनि ।
सर्वेषु जनेषु देवस्य करुणा भवतु । स्वस्ति ।

(निष्क्रान्ता ।)

लेर्टेसः - कथमिदं देवः पश्यति तूष्णीं च तिष्ठति ?

राजा - लेर्टेस । अस्मिन् शोके अहं त्वया सहास्मि । अथवा गच्छ । विद्वत्तमानि मित्राणि वृणु । शृण्वन्तु ते । तव मम च मध्ये निर्णयं कुर्वन्तु। यदि ते अस्मासु अपराधं पश्येयुः प्रत्यक्षं परोक्षं वा तदा वयमस्माकं किरीटं राज्यं सर्वं च समर्पयिष्यामस्तव प्रतिकारार्थम् । यदि ते अस्मानपराधिनो न पश्येयुस्तर्हि क्षमयास्मान् शृणु । सह वयं तव प्रतिकाराय विधानं कल्पयिष्यामः ।

लेर्टेसः - ममेदं सम्मतम् । तस्य मरणविधानं रहस्यनिखननं समाधेरुपरि कस्यापि गौरवचिह्नस्यास्थापनं विलापविधेरनिर्वर्तनं च कथमभवन्? सर्वस्यास्य विमर्शः कर्तव्यः । तस्य मरणविधानं मया प्रबलं प्रष्टव्यम् ।

राजा - तथा करिष्यसि । तव प्रतिकाराग्रहः अपराधिनि पततु ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - IV - 6

साधयामस्तावत् ।

(सर्वे निष्क्रान्ताः ।)

चतुर्थः अङ्कः : षष्ठं दृश्यम् ।

(दुर्गे अन्यः प्रकोष्ठः । होरेषियः सेवकश्च प्रविशतः ।)

होरेषियः - के ते ये मां व्याहरिष्यन्ति ?

सेवकः - नाविकाः । वदन्ति ते भवते लेखाः सन्तीति ।

होरेषियः - आगच्छन्तु ते ।

(सेवको निष्क्रान्तः ।)

नाहं जानामि जगतः कस्माद् भागान्मम लेखः प्राप्यते प्रभुं हेम्लेटं विना ।

(नाविकाः प्रविशन्ति ।)

प्रधानो नाविकः - देवस्तव शुभं करोतु ।

होरेषियः - तवापि ।

प्रधानो नाविकः - यदेच्छति तदा देवो मम शुभं करिष्यति । अयमस्ति लेखस्तव। एष इङ्ग्लन्डं गच्छतो राजदूतस्य सकाशात् प्राप्तः । तव नाम होरेषिय इति मम ज्ञातम् । एष लेखस्तव ।

(स होरेषियस्य लेखं प्रयच्छति ।)

होरेषियः - (पठति) होरेषिय । तवैतल्लेखपठनानन्तरं नाविका इमे राजदर्शनं प्राप्नुवन्तु । तेषां सकाशे राज्ञे लेखाः सन्ति । समुद्रे वयं द्वे दिने एवास्म । महाशक्तिमता समुद्रचोरसंघेन वयमनुसृताः । वयं तैरतिक्रान्ताः । यथाशक्ति अस्माभिः शौर्योचितं युद्धं कृतम् । तस्मिन्

In Public domain, Digitization Muthulakshmi Research Academy
युद्धे मया तेषां नावि उत्प्लुतम् । तत्क्षणं तैरस्माकं नौस्त्यक्ता । तथाहमेक एव तैर्बद्ध आसम् । तैर्मयि दयया व्यवहृतम् । परन्तु ते स्वानपराधान् जानन्ति । मत्तस्ते प्रत्युपकारमिच्छन्ति । मया प्रेषिता लेखा राजानं प्राप्नुवन्तु । त्वं मम सकाशमागच्छ यावच्छक्यं तावच्छीघ्रम्। त्वं मया रहसि किञ्चन वक्तव्यः । तत् त्वां बहुविस्मितं करिष्यति । लेखेन तत् सर्वं त्वां प्रापयितुमशक्यम् । इमे सुजना नाविकास्त्वामानेष्यन्ति मम सकाशम् । रोसेन्क्रान्जः गिल्डेन्स्टेर्नश्च नावा इङ्गलन्डं गतौ । तौ प्रति मया बहु वक्तव्यम् । स्वस्ति । यमात्मीयं भवान् जानाति सः।

हेम्लेटः । (नाविकान् प्रति) आगच्छत । अहं युष्मान् राजसकाशं नयामि। राज्ञा सह व्यवहारं शक्यशीघ्रतया निर्वहत मां च तस्य सकाशं नयत यस्मादिमे लेखा युष्माभिरानीताः ।

(सर्वे निष्क्रान्ताः ।)

चतुर्थः अङ्कः सप्तमं दृश्यम् ।

(दुर्गे अन्यः कोष्ठः । राजा लेर्टेसश्च प्रविशतः ।)

राजा - ध्रुवमिदं सम्प्रति तवान्तःकरणमस्मान् सर्वस्माद् दोषाद् विमोचयति । त्वं मां मित्रं संभावयसि । त्वया श्रुतमवगतं च येन तव पिता हतस्तेन मम हत्या उद्दिष्टा ।

लेर्टेसः - एवं दृश्यते । किन्तु इदमुच्यताम् । कथं त्वया एतेषां महापराधानां दण्डनं न कृतं येषां दण्डनं वधो भवति । आत्मनः क्षेमार्थं विवेच्य तत् तव कर्तव्यमासीत् ।

राजा - सत्यम् । तत्र द्वे विशेषकारणे स्तः । ते तव वीक्षणे दुर्बले

In Public domain. Digitization Muthulakshmi Research Academy

स्यातां मम तु प्रबले । राज्ञी तस्य माता तस्मिन् महानुरागवती अस्ति। अथाहम् । एष मम सुगुणः स्याद् दुर्गुणो वा । एषा मम जीवितेनात्मना च सुसंबद्धा । यथा ग्रहः स्वकक्षामतिरिच्य न चलति तथाहं तां विहाय न भवामि । पौरेषु प्रकटनं कृत्वा तस्य दण्डनं मया न कृतमित्यत्रेदं द्वितीयं कारणम् । जनानां तस्मिन् महत् प्रेमास्ति । तेषां तस्मिन्ननुरागे तस्य कृता अपराधा मज्जन्ति केनापि मन्त्रप्रयोगेणेव तस्य घोरा अपराधाः सुगुणाः परिवर्तेरन् । तस्य दण्डनार्थं मया चिकीर्षितानि कार्याणि मम विरुद्धानि भवेयुः । तस्य बहुजनप्रियताकारणेन स तु अक्षतो भवेत् ।

लेर्टेसः - तस्मान्मम मान्यः पिता मृतः सोदरी उन्मादं नीता । यदि प्रशंसास्तां पूर्वस्थितिं प्राप्नुयुस्तर्हि तादृशी अन्या पुरा वा अधुना वा न स्यात् । किन्तु मम प्रतिकारः अवश्यं भविष्यति ।

राजा - एतस्मिन् विषये तव चिन्ता मास्तु । त्वया न चिन्त्यतां वयं निर्वीर्या निरुत्साहा अतिक्रमणं सहामहे इति इदमलक्षितं विसृजाम इति। अस्मिन् विषये त्वमधिकं श्रोष्यसि । तव पितरि मम प्रेमासीत् । तवेदं पर्याप्तं स्यात् ।

(दूतः प्रविशति ।)

का वार्ता त्वयानीता ?

दूतः - प्रभो ! हेम्लेटात् लेखौ । अयं तव अयं राज्ञ्याः । (लेखौ राज्ञे प्रयच्छति ।)

राजा - हेम्लेटात् ? केनानीतौ ?

दूतः - नाविकैः । एवमुक्तम् । मया ते न दृष्टाः । क्लाडियेन मे दत्तौ। नाविकेभ्यस्तेन तौ प्राप्तौ ।

In Public domain. Digitization Muthulakshmi Research Academy

राजा - लेर्टस ! त्वमपि शृणुया लेखयोर्विषयान् । (दूतं प्रति) गम्यताम् ।

(दूतो निष्क्रान्तः ।)

(पठति) महोदार । महाराज । अहं विज्ञापयामि अहं तव देशं प्राप्तोऽस्मि एक एव तवानुमतिं याचे श्वो भवतः पुरस्तादात्मानं निवेदयिष्यामि। तदा त्वयानुमतस्त्वां कथयिष्यामि ममाकस्मिकं विचित्रं च प्रत्यागमनम्। हेम्लेटः ।

किमिदम् ? अप्यन्ये च प्रत्यागताः ? अपीयं प्रतारणा स्यान्न तु सत्यम् ?

लेर्टसः - अपि भवान् तस्य हस्तलेखमभिजानाति ?

राजा - एष हेम्लेटस्य हस्तलेखः । स लिखति एक एवेति । अपि त्वं मां बोधयितुं शक्नोषि किमिदमिति ?

लेर्टसः - प्रभो ! अहं विस्मितोऽस्मि । किन्तु । आगच्छतु सः । मम मनसि स्थितां दुर्बलकाङ्क्षां स उत्तेजयति । अहमत्रास्मि तमभिमुखं वक्ष्यामि च त्वया कृतम् इति ।

राजा - लेर्टस ! यदीदं सत्यं तर्हि त्वया तदवश्यं कर्तव्यम् । परन्तु अपि त्वं मम सुमतिं गृह्णासि ?

लेर्टसः - गृह्णामि प्रभो यदि त्वं शान्तिं प्रति मां बलान्नेतुं नेच्छसि ।

राजा - अहं तवानुबोधं करोमि येन पूर्णः प्रतिकारो भविष्यति । यदि स प्रत्यागतः पुनर्गन्तुं नेच्छति च तमेकस्मिन् कर्मणि नियोक्ष्यामि यस्मिन् स निश्चयं मरिष्यति । तद् विधानमहं मनसा विचारयामि प्रकल्पयामि च । तस्य मरणे कस्यापि दोषो न भविष्यति तस्य माता च तस्य

 In Public domain. Digitization Muthulakshmi Research Academy

मरणमाकस्मिकं मन्येत ।

लेर्टेसः - प्रभो ! तवानुबोधं स्वीकरोमि । तस्मिन् कार्ये तु मयि तस्य मरणकारणं भवतु ।

राजा - तदवश्यं भविष्यति । तव गमनानन्तरं त्वामुद्दिश्य बहु कथनं प्रचलितं तच्च हेम्लेटस्य सम्मुखम् । तव बहवो गुणाः प्रशंसिताः । सर्वेण तव गुणसमुदायेन स नोत्तेजित एकेन विना । मम तु मतौ स गुणः अल्पार्घः ।

लेर्टेसः - प्रभो कः स गुणः ?

राजा - अल्पः स गुणः किन्तु यूनः शोभते । यत् परिधानं यूनः शोभते किं तन्मध्यवयसो युज्यते ? मासद्वयात् पूर्वमत्रागतः कश्चिन्महानिपुणः अश्वारोहः । अहं तमपश्यम् । सः अश्वचालने इन्द्रजालमिव करोति ।

लेर्टेसः - अपि स नार्मन्डिदेशीयः ?

राजा - नार्मन्डिदेशीयः ।

लेर्टेसः - ध्रुवं स लेमन्डः ।

राजा - स एव ।

लेर्टेसः - तमहं सुष्ठु जानामि ।

राजा - कृपाणप्रयोगे तव नैपुण्यं तेन बहुधा प्रशंसितम् । तां प्रशंसां श्रुतवतो हेम्लेटस्य त्वयीर्ष्या जाता प्रबला चावर्तत । सः अपेक्षते स्म त्वं फ्रान्सात् प्रत्यागच्छेस्तेन सह लघ्वीं कृपाणक्रीडास्पर्धां कुर्याः।

लेर्टेसः - प्रभो ! इदानीं सा कथा किमर्था ?

राजा - लेर्टेस ! अपि पितरि तव प्रेमास्ति उत केवलं दुःखं

In Public domain. Digitization Muthulakshmi Research Academy
प्रदर्शयसि? तव दुःखं मनोभावरहितं प्रदर्शनमेव किम् ?

लेर्टेसः - किमेवं पृच्छसि ?

राजा - पितरि तव प्रेमविषये मम संदेहो नास्ति। परन्तु मया दृष्टं कालेन प्रेम हीयते। तस्माद् यत् कर्तुमिच्छामस्तत् क्षिप्रं कार्यम्। जीविते बह्वयो दुर्बलताश्च भवन्ति। सम्प्रति हेम्लेटो निवृत्तः। इदानीं त्वं तव पितुः पुत्र इति न केवलया वाचा किन्तु कर्मणा कथं निरूपयिष्यसि ?

लेर्टेसः - देवालये तस्य कण्ठं खण्डयिष्यामि।

राजा - कस्मिन्नपि स्थाने घातकस्य रक्षा न भवतु। प्रतिकारस्य सीमानो न सन्तु। किन्तु लेर्टेस त्वं तव गृह एव तिष्ठ। प्रतिनिवृत्तो हेम्लेटो ज्ञास्यति त्वामत्र स्थितम्। कांश्चन जनान् संपादयिष्यामो ये तव सामर्थ्यं प्रशंसयिष्यन्ति। वयं युवां द्वौ सम्मेलयिष्यामः। युवयोर्मध्ये वयं पणान् करिष्यामः। हेम्लेटः अस्मिन् विषये अवधानं न करिष्यति न शङ्किष्यते च। त्वं तं कृपाणं गृह्णीया य आवृतधारो न भवेत्। एकेन प्रहारेण तव पितृहत्यायाः प्रतिकारं कुर्याः।

लेर्टेसः - तदहं करिष्यामि। किं च तां धारां विषलिप्तां करिष्यामि। तस्य विषस्य महान् प्रभावो भविष्यति। लोके स्थितं किमप्यौषधं तं न रक्षेत्। स्वल्पयापि चर्मणि क्षत्या स मरिष्यति।

राजा - इदमितोऽपि विचार्यम्। कदा कथमिति निश्चयं करिष्यामः। यदीदं विधानं कथमपि भग्नं भविष्यति जनैर्ज्ञास्यते च तर्हि वरमिदं न कृतम्। अतः अनेन विधानेन सहान्यदपि विधानमावश्यकम्। यदि प्रथमविधानं कथमपि विफलं भविष्यति तर्हीदं सिध्येत्। (क्षणं चिन्तयित्वा) एवमस्तु। वयं तवोपरि पणं करिष्यामः। क्रीडां श्रमावहां कुरु। हेम्लेटः

 In Public domain. Digitization Muthulakshmi Research Academy

पानीयमपेक्षिष्यते । तस्मै एकं चषकं सिद्धं कारयिष्यामि । यदि कथमपि स तव विषलिप्तकृपाणक्षतिं न प्राप्स्यति तर्हीदं पानं तं हनिष्यति । किन्तु। कः शब्दः ?

(राज्ञी प्रविशति ।)

प्रिये राज्ञि ! कथं तवागमनम् ?

राज्ञी - एका विपदन्यां विपदमन्वेति । विपदः शीघ्रमायान्ति च । लेर्टेस ! तव सोदरी सरसि निमग्ना ।

लेर्टेसः - सरसि ? कुत्र ?

राज्ञी - तत्राल्पस्रोतसि । पत्रैः पुष्पैश्च मालां कृत्वा वृक्षशाखायामवलम्बयितुमुद्गता । शाखा भग्ना सा च स्रोतस्यपतत् पुष्पैः सह। जले निमज्जन्ती सा आत्मनो विपदमजानतीव पुरातनगीतान्यगायत् । जलं तु तामाकर्षत् ।

लेर्टेसः - सा जले निमग्ना ।

राज्ञी - निश्चयेन ।

लेर्टेसः - अभाग्ये ओफीलिये ! तवात्यधिकं जलमस्ति । अतः अश्रूणि न मुञ्चामि । परन्तु विलापः अस्माकं स्वभावलक्षणेषु अन्यतमः । स्वभावः प्रवर्तनीयः यद्यपि तेनास्माकं लज्जा भवेत् । अश्रुपाते अवसिते वयं पुनः पुरुषोत्साहं प्राप्स्यामः। आमन्त्रये राजन् ! मया प्रचण्डभाषणं कर्तव्यं किन्तु अश्रुषु तद् भाषणं मग्नम् । (लेर्टेसः निष्क्रान्तः ।)

In Public domain. Digitization Muthulakshmi Research Academy

राजा - तमनुसरावः । महता कष्टेन स मया शान्तः कृतः । इदानीं स पुनश्चोत्तेजित इति मम शङ्का । एहि तमनुसरावः ।

(निष्क्रान्तौ ।)

पञ्चमः अङ्कः : प्रथमं दृश्यम् ।

(एल्सिनोरे श्मशानम् । विदूषकौ समाधिखनकौ प्रविशतः खनित्रादिभिः सहितौ ।)

प्रथमः - आत्मघातिन्या अस्याः किं ख्रैस्टीयं निखननं क्रियते ?

द्वितीयः - अहं वदामि क्रियते । कालं वृथा न कुरु । समाधिं सिद्धं कुरु। आत्मघातपरीक्षाधिकारिणोक्तं सा ख्रैष्टीयान्त्यक्रियामर्हतीति ।

प्रथमः - किन्तु कथमेतत् ? इदं पश्य । तत्र जलम् । अत्र मनुष्यः। यदि जलं मनुष्यं प्रति आयाति तत् साधारणमरणं भवति । यदि मनुष्यो जलं प्रति गच्छति स आत्मघात एव भवति । त्वं किं वदसि ?

द्वितीयः - किमावयोर्विवादेन ? स निर्णयः । त्वरया खननं कुरु । समाधिं सिद्धं कुरु । (निष्क्रान्तः ।)

(हेम्लेटो होरेषियश्च दूरात् प्रविशतः ।)

प्रथमो विदूषकः - (खनन् गायति ।)

यौवने मयि प्रेम जातं
मधुरमिति तन्मनसि ध्यातम् ।
परिणयः खलु चिन्तितो बहु
नास्ति भार्या प्रेम मिथ्या ॥

हेम्लेटः - कीदृशोऽयं पुरुषः समाधिं खनन् गायति ?

 In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - समाधिखननं तस्य नित्यकृत्यम् । तस्मात् खनन् स किमपि न चिन्तयति गायति च ।

हेम्लेटः - एवं खलु । ये कर्म न कुर्वन्ति ते एव चिन्तापरा भवन्ति ।

प्रथमो विदूषकः - **जरा प्रविष्टा शनैः शनैर्मा**
मामगृह्णान्मामगृह्णात् ।
मृतानां देशमनयत् प्रसभं
मृतानां देशं प्रसभमनयत् ॥

(स एकं कपालं क्षिपति ।)

हेम्लेटः - अस्य कपालस्य पुरा जिह्वा आसीत् गातुं शक्नोति च स्म। इदानीमेष खनकस्तं भुवि क्षिपति । को जानाति स कपालः कस्यापि कपटप्रबन्धयोजकस्य स्यात् यो देवमपि प्रतारयेत् ।

होरेषियः - प्रभो ! सत्यम् ।

प्रथमो विदूषकः - (गायति)

भूविदारणं तथा खनित्रम्
वसनमेकमप्यावरणम् ।
भूम्यां गर्तं चैकं नूनम्
अर्हत्यतिथिः सुमहानेषः ॥

(सः अन्यं कपालं क्षिपति ।)

हेम्लेटः - अयमन्यः । अयं कस्यचिन्न्यायवादिनः स्यात् । क्वेदानीं तस्य न्यायवाक्चातुर्यं न्यायविज्ञानं च । स इदानीमिमं समाधिखनकं सहते येन स भूम्यां क्षिप्तः न च तं प्रति अभियोगं करोति ।

(प्रथमो विदूषकः अन्यं कपालं क्षिपति ।)

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - एष कश्चिद् भूस्वामी स्यात् । तस्य काले तेन बहवो भूभागाः क्रीताः । बहूनि क्रयविक्रयपत्राणि तस्य सकाशे आसन् । अन्यानि च बहूनि तत्संबद्धपत्राणि तस्यासन् । सर्वस्यास्य क्रयविक्रयस्यायमन्तो यदिदानीं तस्य शिरो मृदा पूरितम् ।

होरेषियः - प्रभो ! तथ्यं तत् ।

हेम्लेटः - अयं समाधिः कस्य कृते खातः ?

प्रथमविदूषकः - आर्य ! मम कृते ।

हेम्लेटः - सत्यं तव कृते । त्वं तस्मिन्नसि ।

प्रथमविदूषकः - तव कृते नास्ति यतस्त्वं बहिरसि । सत्यमेष मम।

हेम्लेटः - न न । त्वमसत्यं वदसि । समाधिर्मृतस्य कृते खन्यते न तु जीवतः । कस्य कृते त्वमिमं समाधिं खनसि ?

प्रथमविदूषकः - मान्य । पुरुषस्य कृते न खनामि ।

हेम्लेटः - तर्हि कस्याः कृते ?

प्रथमविदूषकः - भगवान् तस्या आत्मनः शान्तिं ददातु ।

हेम्लेटः - हे खनक ! कियान् कालस्तव समाधिखननस्य ?

प्रथमविदूषकः - यदास्माकं पूर्वराजो हेम्लेटः फोर्टिन्ब्रासं पराजयत तदा प्रभृत्यहं समाधीन् खनामि ।

हेम्लेटः - स कियान् कालः ?

प्रथमविदूषकः - एतन्न जानासि ? तस्मिन् दिने युवा हेम्लेटो जातः। स एवेदानीमुन्मादी वर्तते इङ्ग्लन्डं प्रेषितश्च ।

हेम्लेटः - कथं स उन्मादी अभवत् ?

प्रथमविदूषकः - मतिनाशेन ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - कस्मिन् विषये ?

प्रथमविदूषकः - अत्रैव डेन्मार्के । अहमत्रास्मि आ बाल्यात् ।

हेम्लेटः - समाधौ निखातस्य कियान् कालो भवेत् निलीनतायाः ?

प्र वि - केचन जीवन्त एव शिथिलप्राया भवन्ति । ते शीघ्रं विलीयन्ते। साधारणतया अष्ट वा नव वा वर्षाणि भवन्ति विलीनतायाः।

हेम्लेटः - अयं कपालः कस्य ?

प्र वि - कस्यचिदुन्मादिनः । एकदा स मम शिरसि मद्यमपातयत्। अयमपरः कपालो योरिक्कस्य यो राज्ञो विदूषक आसीत् ।

हेम्लेटः - अयम् ?

प्र वि - तथ्यमयम् ।

हेम्लेटः - पश्यामि तावत् । (कपालं गृह्णाति) एष योरिक्कः । होरेषिय ! इममहमजानाम् । एष हास्यचतुरो बुद्धिसंपन्नश्च । स मां पृष्ठेन सहस्त्रवारराननयत् । इदानीं तु तस्य कपालो मम मनसि विकारं जनयति । योरिक्क ! कुत्रेदानीं तव हास्यवचनानि । इदानीं तव कपालविवरे एकापि हास्योक्तिर्नास्ति । गच्छ कस्याश्चित् सुन्दर्या गृहम्। तां वद । बहुप्रयत्नेनालङ्कृतस्यापि तव मुखस्यैष एव परिणामो भविष्यतीति। श्रुत्वा सा हसतु । होरेषिय ! इदं मम वद ।

होरेषियः - प्रभो ! किम् ?

हेम्लेटः - अपि त्वं मन्यसे महान् अलेग्जेन्डरश्च मृत एवं विकारकपालोऽभवदिति ?

होरेषियः - एवमेव ।

हेम्लेटः - एवं दुर्गन्धश्च ? (कपालं भूम्यां न्यस्यति ।)

In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - प्रभो ! एवमेव ।

हेम्लेटः - सर्वेषामस्माकमन्तत इयमेव नीचा गतिर्भविष्यति । एवमेव महाराजः सीजरश्चाभवत् । किन्तु अपसरावः । राजा आगच्छति ।

(ततः प्रविशन्ति श्रेण्यां पुरोहिताः ओफीलियाया मृतदेहः लेर्टेसः राजा राज्ञी अन्ये च ।)

एते राजा राज्ञी राजसभाभिजनाश्च । कमनुसरन्ति ते ? विरलः समूहः। तर्क्यते मृतो मृता वा आत्मघातमकरोत् । दृश्यते धनिककुटुम्बम्। निभृतं प्रेक्षावहे ।

(हेम्लेटो होरेषियश्चापसरतः ।)

लेर्टेसः - कानन्यान् संस्कारान् तस्या यूयं करिष्यथ ?

हेम्लेटः - स लेर्टेसः । युवा चाभिजातश्च । श्रूयताम् ।

लेर्टेसः - कानन्यान् संस्कारान् तस्या यूयं करिष्यथ ?

पुरोहितः - अनुमताः संस्कारा अस्माभिः कृताः । तस्या मरणं संदेहास्पदम् । राजाज्ञया तस्या निखननमत्र क्रियते । नो चेत् अपवित्रभूम्यां क्रियेत । बहुविधाः शिलास्तस्या उपरि क्षेप्तव्याः स्युः । तथापि तस्याः कृते घण्टा रणिता । कन्याया इव पुष्पमाला दत्ताः । सा पवित्रभूम्यां स्थाप्यते । उपरि पुष्पाणि कीर्यन्ते ।

लेर्टेसः - नान्यः संस्कारः ?

पुरोहितः - न कोऽप्यन्यः । यदि अन्येषामिवास्या अपि मरणगीतं गायेम तर्हि अन्येषां मृतात्मनामपवित्रकरणं भवेत् ।

लेर्टेसः - तां भूम्यां स्थापयत । तस्याः शरीरात् सुन्दराणि पुष्पाण्युद्भविष्यन्ति । हे अशिष्टपुरोहित ! ममेदं वचनं शृणु । मम सोदरी स्वर्गे

In Public domain. Digitization Muthulakshmi Research Academy

शुभकरी देवता भविष्यति । त्वं नरके आक्रोशन् निवत्स्यसि ।

हेम्लेटः - (होरेषियं प्रति) हा ! सुन्दरी ओफीलिया ।

राज्ञी - सुन्दरपुष्पाणि सुन्दरबालायै । स्वस्ति । (पुष्पाणि विकिरति।) त्वं मम हेम्लेटस्य भार्या भविष्यसीति ममाशा आसीत् । तव विवाहशय्यायां पुष्पाणि विकिरिष्यामीति मया चिन्तितं न तु तव समाधौ ।

लेर्टेसः - दुःखं पीडा च तस्य दुष्टस्य शिरसि त्रिवारान् पतेतां त्रिंशद्वारांश्च यस्य दुष्कार्यं तव चतुरमतिं व्यनाशयत् । निखननं किंचिद् धार्यतां यावदहं तां पुनश्चोपगूहामि । (समाधौ स्कन्दति ।) इदानीं जीवतो मम मृतायास्तस्याश्चोपरि समं मृत् पात्यताम् ।

हेम्लेटः - (पुरस्तादागम्य) यस्य शोको दुःखवाक्यानि च गगने ग्रहानपि निरुध्य स्थापयन्ति तान् विस्मितान् श्रोतॄन् कुर्वन्ति सोऽहं हेम्लेटोऽस्मि । (स समाधौ स्कन्दति ।)

लेर्टेसः - तवात्मा पिशाचाधीनोऽस्तु ।

(हेम्लेटलेर्टेसयोर्बाहूबाहवि भवति ।)

हेम्लेटः - एवं प्रार्थना न कार्या यथा त्वया कृता । अपसारय तव हस्तौ मम कण्ठात् । कोपेऽहं नास्मि शीघ्रो न च साहसिकश्च । तथापि मयि कश्चिद् विपत्करगुणोऽस्ति । तस्मात् स्वक्षेमाय सावधानो भव । हस्तमपसारय ।

राजा - तौ वियोजय ।

राज्ञी - हेम्लेट ! हेम्लेट !

सर्वे - आर्याः ! आर्याः !

होरेषियः - प्रभो ! शान्तो भव ।

In Public domain. Digitization Muthulakshmi Research Academy

(सेवकैस्तौ पृथक् कृतौ । तौ समाधेर्बहिरागच्छतः ।)

हेम्लेटः - अहमनेन सहास्मिन् विषये युद्धं करिष्यामि यावन्मम नेत्रयोर्दर्शनशक्तिर्भविष्यति ।

राज्ञी - पुत्र ! केन कारणेन ?

हेम्लेटः - मम ओफीलियायां प्रेमाभवत् । चत्वारिंशत्सहस्राणि भ्रातरस्तेषां पूर्णप्रेम्णा सह मम तुल्या न भविष्यन्ति । सर्वे यूयं तस्याः कृते किं कुर्यात ?

राजा - लेर्टेस ! उन्मादी सः ।

राज्ञी - देवः प्रीतो भवतु । तं मा कोपय ।

हेम्लेटः - ओफीलियायाः कृतेऽहं विलपामि योत्स्ये आत्मानं विदारयिष्यामि बहुकटुं द्रवं पास्यामि च । जीवन्नपि तया सह निखननं गच्छेयम्।

राज्ञी - एष उन्मादः । कञ्चित्कालमेवं प्रलपति पुनः शान्तो भवति।

हेम्लेटः - आर्ये ! मयि भवन्तः किमेवं प्रवर्तन्ते ? भवतु । यथाहमिच्छामि तथा प्रवर्ते । (निष्क्रान्तः ।)

राजा - होरेषिय । तमुपतिष्ठ ।

(होरेषियो निष्क्रान्तः ।)

(लेर्टेसं प्रति) सहिष्णुर्भव । स्मर गतरात्रावावाभ्यां कृतां कल्पनाम् । तां शीघ्रमाचरिष्यामः । गेर्ट्रूडे ! केचन जनास्तव पुत्रं प्रतिपालयन्तु । ओफीलियायाः समाधेरुपरि स्मारकनिर्माणं भविष्यति । सम्प्रत्यस्माकं

In Public domain. Digitization Muthulakshmi Research Academy

शान्तिरस्तु । (निष्क्रान्ताः ।)

पञ्चमः अङ्कः : द्वितीयं दृश्यम् ।

(हेम्लेटहोरेषियौ प्रविशतः ।)

हेम्लेटः - श्रुता सा कथा त्वया । शेषां वदामि । मम प्रयाणकथां कथयामि । अपि स्मरसि तत्पूर्वविषयान् ?

होरेषियः - स्मरामि प्रभो !

हेम्लेटः - मम मनसि संघर्षवदासीद् येन मम निद्रा न प्राप्ता । मम स्थितिर्निगलबद्धादपि निकृष्टतरा दृष्टा । तदा मया साहसं कृतम् । साहसस्य बहुमानः कर्तव्यः । इदं विदितमस्तु । यदास्माकं सर्वाणि विधानानि विफलानि भवन्ति तदा कदाचित् साहसं विजयते । इदमस्मान् बोधयति सत्सु अस्मत्प्रयत्नेषु अस्ति काचिदज्ञाता शक्तिर्यास्मान् कार्यसिद्धिं प्रति चालयतीति ।

होरेषियः - सत्यमिदम् ।

हेम्लेटः - मम प्रयाणकोष्ठादहमुद्गतः । प्रयाणवस्त्रं धृत्वा अन्धकारे निर्गतोऽभवम् । अन्विष्य तां पोट्टलिकां प्रापम् । मम स्थानं पुनरगच्छम्। आत्मक्षेमविषये भयेनान्यसंदेहान् व्यस्मरम् । साहसेनाहं तदुद्घाट्य तस्मिन्नपश्यम् । होरेषिय ! राज्ञो विश्वासघातः ! स्पष्टादेशः ! बहुहेतुवाद-समेतः ! डेन्मार्कदेशस्य इङ्गलन्डस्य च क्षेमरक्षणं तेन कार्येण । मयि दुष्टत्वारोपणम्! अन्ततः लेखपठनानन्तरं मम शिरःखण्डनस्यादेशः ।

होरेषियः - एवमादेशः ? अपि शक्यम् ?

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - एष राजलेखः । यदा तव कालो भवेत् तदा पठितुमर्हसि । इदानीं शृणु मया किं कृतम् ।

होरेषियः - कृपयोच्यताम् ।

हेम्लेटः - तथाहं दौष्ट्येनावृतः । किं कार्यमित्यतीवविचारणात् पूर्वमेव मया कार्यमुपक्रान्तम् । अन्यं लेखमलिखम् । अपि ज्ञातुमिच्छसि किं मया लिखितम् ?

होरेषियः - ज्ञातुमिच्छामि ।

हेम्लेटः - इङ्गलन्डडेन्मार्कयोर्मैत्री उभयोर्देशयोः प्रेमविवृद्धिः मैत्रीवृद्धिः शान्तिविवृद्धिरित्यादीनि उदारवचनानि लिखितानि । इमं लेखं पठित्वैव लेखवाहकावुभावपि अकस्माद् हन्तव्यौ स्वपापाभ्युपगमायापि तयोः समयमदत्त्वा इति च ।

होरेषियः - स लेखः कथं मुद्रितः ?

हेम्लेटः - अस्मिन्नपि व्यवहारे देवो मामनयत् । मम सकाशे मम पितुर्मुद्रासहितमङ्गुलीयकमस्ति । तद् डेन्मार्कराजमुद्रावद् भवति । स लेखो मया कृतहस्ताक्षरः पूर्वलेखवत् पुटीकृतः मुद्राङ्कितस्तत्स्थाने निहितश्च । कस्यापि संदेहो न जातः । अनन्तरदिने समुद्रे युद्धमभवत्। पश्चात् किमभवत् तत् त्वं जानासि ।

होरेषियः - एवं गिल्डेन्स्टेर्नरोसेन्क्रान्जौ नाशं गतौ ।

हेम्लेटः - ताभ्यां स्वविनाशः अभ्यर्थितः । मम मनसि तयोर्मरणस्य कृते संतापो नास्ति । आत्मन एव छलेन तयोर्विनाशः प्राप्तः । प्रबलशत्र्वोर्मध्ये पतिता अवरजना एवमेव पीड्यन्ते ।

होरेषियः - कियन्नामास्य राज्ञो दुष्टत्वम् !

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - इदानीं त्वं किं चिन्तयसि ? तस्य विनाशो मम कर्तव्यः। यो मम पितरं राजानमहन् मम मातरमदूषयत् यश्च मम सिंहासनस्य मम च मध्येऽतिष्ठत् स मया न क्षन्तव्यः । अपि त्वं न मन्यसे मनसि संकोचं विहाय मया स हन्तव्य इति । किमहं शप्तो न भवेयं यदीमं दुष्टं जीवन्तं विसृजाम्यधिकपापं कर्तुम् ?

होरेषियः - इङ्ग्लन्डराजात् स शीघ्रं ज्ञास्यति किं तत्राभवदिति।

हेम्लेटः - तन्मध्यकालो मया तदर्थमुपयोक्तव्यः । मनुष्यस्य जीवनं भृशमस्थिरम् । कश्चिदङ्कान् गणयन् एकम् इति यावद् वदति तावन्म्रियेत। होरेषिय ! लेर्टेसं प्रति मया दुष्प्रवर्तितम् । तदर्थमनुशोचामि । स शोकेऽस्ति । तं प्रति सुप्रवर्तनं करिष्यामि । परन्तु तस्यातिशोकप्रदर्शनेनाहं कोपोद्रिक्त आसम् ।

होरेषियः - कस्तत्र ?

(हस्तेन शिरोवेष्टनं गृहीत्वा आस्रिकः प्रविशति ।)

आस्रिकः - डेन्मार्कं प्रत्यागतस्य प्रभोः स्वागतम् ।

हेम्लेटः - प्रीतोऽस्मि । (होरेषियं प्रति अपवार्य) अपीमं कीटं जानासि?

होरेषियः - (हेम्लेटं प्रति अपवार्य) प्रभो ! न जानामि ।

हेम्लेटः - (होरेषियं प्रति अपवार्य) अज्ञात्वा त्वं सुभगोऽसि । ज्ञात्वा त्वं पापीव भवेः । अस्य सुमहती भूमिरस्ति समृद्धसस्या । तस्मादेष सर्वत्र गौरवं विन्दति । एष वाचालः । परन्तु धनवान् ।

आस्त्रिकः - प्रियप्रभो ! यदि भवानव्यापृतोऽस्ति तर्हि राजसकाशात् वार्तां कथयामि ।

हेम्लेटः - अवश्यं गृह्णामि । सोत्साहं गृह्णामि वार्ताम् । किन्तु तव

In Public domain. Digitization Muthulakshmi Research Academy
शिरोवेष्टनस्य हस्तेन ग्रहणमनावश्यकम् । शिरसि स्थाप्यताम् ।

आस्त्रिकः - अथकिम् । अस्ति उष्णता ।

हेम्लेटः - एवं न । अहं वदामि । अतीव शीतः । शीतो वायुर्वाति ।

आस्त्रिकः - प्रभो ! अतीव शीतः ।

हेम्लेटः - किन्तु अहं निर्वातताममनुभवामि ।

आस्त्रिकः - प्रभो ! निर्वातः । कथमिति वक्तुं न शक्नोमि । राजा मन्मुखेन त्वां वदति कृपाणप्रयोगे तव नैपुण्ये पणः कृत इति । इयं वार्ता।

हेम्लेटः - मान्य ! (तस्य शिरोवेष्टनं हस्तेन सूचयति ।)

आस्त्रिकः - सत्यम् । ममैव सुखार्थं शिरोवेष्टनं शिरसि भवतु । (शिरोवेष्टनं शिरसि स्थापयति ।) मान्य ! एषु दिनेषु लेर्टेसः प्रत्यागतः। अभिजातस्य तस्य श्लाघ्या गुणाः सन्ति रम्यं प्रवर्तनं च । आर्यवृत्तः ।

हेम्लेटः - अहं जानामि । सर्वथा स सुपुरुषः ।

आस्त्रिकः - कृपाणप्रयोगे स निपुणः । उच्यते तस्मिन् सः असमानः।

हेम्लेटः - किं तस्यायुधम् ?

आस्त्रिकः - कृपाणः छुरिका च ।

हेम्लेटः - वद वद ।

आस्त्रिकः - महाराजस्तव पक्षे पणमकरोत् । युवयोः कृपाणचालनप्रयोग-स्पर्धायां स त्वां त्वत्तस्त्रिभिरधिकान् प्रहारान् न करिष्यति द्वादश द्वादश प्रहारप्रयत्नेषु । यदि तव सम्मतं भवति तर्हीयं स्पर्धा सपदि कर्तव्येति ।

हेम्लेटः - यद्यहं नाङ्गीकरोमि ?

आस्त्रिकः - भवतः सम्मत्यैवेयं स्पर्धा भवेत् ।

हेम्लेटः - भवतु । शालामागमिष्यामि । यदि तस्य च सम्मतं भवति

In Public domain. Digitization Muthulakshmi Research Academy

राजा च चिन्तनं न परिवर्तयति तर्हि जेतुं प्रयतिष्ये राजार्थम् । यदि न शक्ष्यामि मम कश्चिदवमानो भविष्यति केचन विरलप्रहाराश्च ।

आस्त्रिकः - अपीमं संदेशं वदेयं राजानम् ?

हेम्लेटः - उच्यताम् ।

आस्त्रिकः - प्रभोः सेवा । (निष्क्रान्तः ।)

हेम्लेटः - लोके आस्त्रिकसदृशाः केचन भवन्ति ये बहुधा उपचार-वचनानि वदन्ति । एतेन मातुः स्तनोऽपि प्रशंसितः स्यात् पानात् पूर्वम्। अस्मिन् युगे तु एतेषामादरो भवति ।

(कश्चित् प्रभुः प्रविशति ।)

प्रभुः - प्रभो ! यूना आस्त्रिकेण महाराजः संदेशं प्रैषयत् । आस्त्रिकेण महाराज उक्तो भवान् शालायां प्रतीक्षिष्यते इति । राजा ज्ञातुमिच्छति यदि भवान् लेर्टेसेन स्पर्धितुमिच्छति उत कालान्तरे ?

हेम्लेटः - मम कार्याणि स्थाप्यन्ते । राज्ञो विनोदो भवतु । यदि राज्ञः सम्मतिः स्यात् अहमिदानीं सिद्धोऽस्मि । अन्यदा वा यदि तदाहं क्षमः स्याम् ।

प्रभुः - राजा राज्ञी सर्वे चागच्छन्ति ।

हेम्लेटः - प्रीतोऽस्मि ।

प्रभुः - राज्ञी इच्छति स्पर्धायाः पूर्वं त्वया लेर्टेसं प्रति सौजन्यं प्रदर्शनीयमिति ।

हेम्लेटः - राज्ञी मम सदुपदेशं ददाति ।

(प्रभुर्निष्क्रान्तः ।)

होरेषियः - प्रभो ! भवानस्यां स्पर्धायां पराजेष्यते ।

In Public domain, Digitization Muthulakshmi Research Academy

हेम्लेटः - नाहमेव चिन्तयामि । तस्य फ्रान्सगमनात् पश्चादहमभ्यासं कुर्वन्नासम् । पणो ममानुकूलः । किन्तु मम मनसि काचिदशान्तिरस्ति। भवतु । तामहं न गणयामि ।

होरेषियः - यदि भवन्मनसि अशान्तिरस्ति तर्ह्यहं स्पर्धां निवारयामि। गत्वा वक्ष्यामि प्रभुर्हेम्लेटः सिद्धो नास्तीति ।

हेम्लेटः - न न । शकुनानि प्रति ममावज्ञास्ति । देवः सर्वं नियच्छति। यदि चटकः पतति स भगवतः संकल्पः । यदि किञ्चनाद्य भवति तदद्यैव भवति न भाविनि काले । यदद्य न भवति भाविनि काले तद् भवेत् । अस्माभिः सिद्धैर्भवितव्यम् सर्वस्मै । कोऽपि नरः अन्ते किमपि सह न नयति । यदि तत् पूर्वमेव त्यज्यते किं नश्यति ? यद् भवति तद् भवतु।

(निष्क्रान्तौ ।)

(राजा राज्ञी लेर्टेसः प्रभवः आस्त्रिकः तूर्यभेरीकृपाणमद्यैः सह सेवकाश्च प्रविशन्ति । हेम्लेटहोरेषियौ पुनः प्रविशतः ।)

राजा - हेम्लेट इतस्तावत् । मया दत्तमिमं हस्तं गृहाण । (राजा हेम्लेटलेर्टेसयोर्हस्तौ योजयति ।)

हेम्लेटः - अहं तव क्षमामभ्यर्थये । त्वां प्रति मयापराधः कृतः । परन्तु सर्वो जानानि त्वया श्रुतं च स्यात् मम मतौ व्याकुलतास्ति । येन मम कर्मणा तव कोपो जातस्तन्मया न कृतं मम मतिव्याकुलतया कृतम् । हेम्लेटस्य शत्रुस्तस्य मतिभ्रमणम् । अतोऽहं क्षन्तव्यः ।

लेर्टेसः - तव वचनैर्ममोपशमो भवति । तथापि मम प्रतिकारनिश्चयः प्रबलः । ततः पूर्वमिदं तवोक्तं मम स्वीकृतमस्तु ।

हेम्लेटः - सूक्तं त्वया । दीयतामावृतकृपाणो मम ।

In Public domain. Digitization Muthulakshmi Research Academy

लेर्टेसः - ममापि दीयताम् ।

हेम्लेटः - लेर्टेस ! अनिपुणं मां प्रति तव नैपुण्यं निशान्धकारे नक्षत्रवत् प्रकाशिष्यते ।

लेर्टेसः - मामपहससि ।

राजा - आस्त्रिक ! तयोरावृतकृपाणौ प्रयच्छ । हेम्लेट ! अपि जानासि नियमान् ?

हेम्लेटः - प्रभो ! जानामि । महाराज ! भवान् दुर्बलपक्षेऽस्ति ।

राजा - त्वं जेष्यसि । अयं मम विश्वासः । लेर्टेसेनाधिकः अभ्यासः कृतः । तस्मात् त्वयि पक्षपातः स्थापितः । जेतुं तेन त्रयः प्रहारा अधिकाः कर्तव्याः ।

(आस्त्रिकस्तयोरावृतकृपाणौ ददाति ।)

लेर्टेसः - अयमधिकभारः । अन्यं पश्यामि ।

(स विषलिप्तमनावृतकृपाणं गृह्णाति ।)

हेम्लेटः - अयं मम युज्यते । अप्येतेषां कृपाणानामायामः समः ?

आस्त्रिकः - प्रभो ! समः ।

राजा - मद्यचषकाणि स्थाप्यन्ताम् । यदि हेम्लेटः अतिशेते तर्हि गुलिकास्फोटो भवतु । तूर्यध्वनयो भेरीध्वनयश्च भवन्तु । तेन ज्ञात्वा भुशुण्डिविस्फोटा भवन्तु । एवं भूम्याकाशयोर्ज्ञातं भवतु । अथ उपक्रम्यताम्। निर्णेतारो निपुणं परिशीलयन्तु ।

हेम्लेटः - मान्य ! उपगच्छ ।

लेर्टेसः - प्रभो ! उपगच्छ ।

(तौ क्रीडतः ।)

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - एकः ।

लेर्टेसः - न ।

हेम्लेटः - निर्णेतारो वदन्तु ।

आस्त्रिकः - स्पष्टम् । सा हतिः ।

लेर्टेसः - भवतु । पुनः ।

राजा - क्षणं विरामोऽस्तु । पानं मम दीयताम् । हेम्लेट ! इदं महार्घं मौक्तिकं ते दीयते । अहं तव विजयार्थं पिबामि । त्वमपि पिब ।

(तूर्यध्वनिर्गोलकध्वनिश्च ।)

हेम्लेटः - इदानीं न पिबामि । स्थाप्यतां तावत् । एषा आवृत्तिः समाप्यताम्। (तौ क्रीडतः ।) अन्या हतिः ।

लेर्टेसः - निस्संशयं स्पर्शः । अहमङ्गीकरोमि ।

राजा - आवयोः पुत्रो विजयते ।

राज्ञी - एष स्थूलः । श्वसितुं क्लिश्नाति च । हेम्लेट ! मम करवस्त्रं गृहाण । फालं मार्जय । राज्ञी तव विजयार्थं पिबति ।

हेम्लेटः - आर्ये !

राजा - गेर्ट्रूडे ! मा पिब ।

राज्ञी - अहं पिबामि । प्रभो ! पिबामि तावत् (पिबति ।)

राजा - (स्वगतम्) तत् विषमिश्रितम् । बत ! पीतमेव तत् तया ।

हेम्लेटः - अहमिदानीमेव न पिबामि ।

लेर्टेसः - प्रभो ! अहं तमिदानीं प्रहरामि ।

राजा - नाहमेवं मन्ये ।

लेर्टेसः - (स्वगतम्) अहं यत् कर्तुमिच्छामि तन्ममात्मविरुद्धम् ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः - लेर्टेस ! आगच्छ तृतीयावृत्तये । त्वं दृढनिश्चयेन न क्रीडसि। पूर्णया शक्त्या कुरु । मां लघुं न मन्यस्व ।

लेर्टेसः - आगच्छ । (तौ क्रीडतः ।)

आस्त्रिकः - एष कस्यापि न प्रहारः ।

लेर्टेसः - एष त्वां प्रहरामि ।

(लेर्टेसो हेम्लेटे क्षतिं करोति । तदा जाते तुमुले तयोः कृपाणयोर्विनिमयो भवति । हेम्लेटो लेर्टेसस्य हस्तात् कृपाणमाकृष्य गृह्णाति लेर्टेसो हेम्लेटस्य कृपाणं तथैव गृह्णाति । तेन विषलिप्तकृपाणेन हेम्लेटो लेर्टेसे क्षतिं करोति । विषलिप्तेनानावृतकृपाणेन हेम्लेटः ततः पूर्वमेव क्षतः । तथा उभयोरपि विषलिप्तकृपाणक्षती संजाते ।)

राजा - पृथक्क्रियेताम् । तौ कोपपूर्णौ ।

हेम्लेटः - आगच्छेदानीम् ।

(राज्ञी पतति ।)

आस्त्रिकः - राज्ञी उपचर्यताम् ।

होरेषियः - उभावपि रक्तं स्रवतः । प्रभो ! कथमसि ?

आस्त्रिकः - लेर्टेस ! कथमसि ?

लेर्टेसः - आस्त्रिक ! अहं ममैव दुष्टकर्मणा हतोऽस्मि ।

हेम्लेटः - राज्ञ्याः का स्थितिः ?

राजा - उभौ रक्तं स्रवन्तौ दृष्ट्वा सा मूर्छिता ।

राज्ञी - न न । इदं पानम् । प्रिय हेम्लेट ! मयि विषं प्रयुक्तम् । (म्रियते ।)

हेम्लेटः - बत बत । कवाटास्तालबद्धाः क्रियन्ताम् । द्रोहिणमहम्-

In Public domain. Digitization Muthulakshmi Research Academy

न्विष्यामि । (आस्त्रिको निष्क्रान्तः ।)

लेर्टेसः - हेम्लेट । अहं द्रोही । त्वं हतः । लोके किमप्यौषधं तव सहायतां न करिष्यति । त्वमर्धहोराया अधिककालं न जीविष्यसि । सम्प्रति स विषलिप्तकृपाणस्तव हस्तेऽस्ति । सः अनावृतो विषलिप्तश्च। स कपटो मयि निपतितः । एषोऽत्र पतितोऽस्मि न पुनरुत्थानाय । तव मातरि विषप्रयोगो जातः । अथाहं किमपि वक्तुं न शक्नोमि । राजा पातकी ।

हेम्लेटः - कृपाणधारा विषलिप्ता ? तस्मात् हे विष ! त्वं तव योग्यं कार्यं कुरु । (राजानं कृपाणेन क्षिणोति ।)

सर्वे - द्रोहः । द्रोहः ।

राजा - रक्षन्तु मां सुहृदः । अहं केवलं क्षतोऽस्मि ।

हेम्लेटः - कामुक ! घातक ! दुष्ट डेन ! इदं विषमिश्रितं पानं पिब। किं चिन्तयसि ? किं युवयोर्मेलनं भुवि समाप्यते इति ? मम मातरमनुसर।

(हेम्लेटो बलाद् राजानं विषमद्यं पाययति । राजा म्रियते ।)

लेर्टेसः - तस्य समुचितं दण्डनं कृतम् । तद् विषं तेनैव मिश्रितम् । इदानीमावां परस्परं क्षमावहे । मान्य ! हेम्लेट! मम मृतेर्मम पितुर्मृतेश्च त्वं कारणं नासि । अहं तव मृतेः कारणं नास्मि । (स म्रियते ।)

हेम्लेटः - देवस्त्वां मम मृतिकारणान्मोचयति । अहं त्वामनुसरामि । होरेषिय ! अहं म्रिये । हतराज्ञि ! स्वस्ति । भो विवर्णाः कम्पमाना निर्वचना इमां विपदं पश्यन्तो जनाः ! मृत्युर्मां निबध्नाति । यदि मम समयोऽस्ति किञ्चिद् वदेयम् । होरेषिय ! त्वं जीवसि । सर्वं जनं वद यदभवत् । सर्वेषां संशयान् निवारय ।

In Public domain. Digitization Muthulakshmi Research Academy

होरेषियः - अहं जीविष्यामीति मा चिन्तय । मम संस्कृतिः प्राचीनास्ति। आधुनिकी नास्ति । विषमयपानीयं शिष्टमस्ति ।

हेम्लेटः - न न । साधो ! होरेषिय ! यदि त्वं न भविष्यसि जनानां मम कथां को वक्ष्यति ? यदि तव मयि प्रेमास्ति तर्हि अस्मिन् दुष्टजगति कष्टदिनानि कञ्चित्कालं नय ।

(दूरे सेनाभटपदक्रमणसंगीतध्वतिः । गोलकास्फोटध्वनिः ।)

के इमे युद्धध्वनयः ?

(आस्त्रिकः प्रविशति ।)

आस्त्रिकः - युवा फोर्टिन्ब्रासः पोलन्डाद् विजयी निवर्तित इङ्ग्लन्डदूतान-भिनन्दन् गोलकान् प्रयोजयति ।

हेम्लेटः - अहं म्रिये । होरेषिय ! इदं शक्तिमद् विषं मामाक्रमते । इङ्ग्लन्डाद् वार्ता श्रोतुमहं जीवितो न भवामि । मम तु निश्चयः फोर्टिन्ब्रासो डेन्मार्कस्य राजा भविष्यति । म्रियमाणस्य मम तस्य समर्थनमस्ति । एवं तं वद । इमानि सर्वाणि वृत्तानि च वद । शेषो निश्शब्दः । (म्रियते ।)

होरेषियः - उदात्तं मन एवं विदीर्णम् । प्रिय ! युवराज ! स्वस्ति । देवतानां समूहास्त्वां सुप्तं गायन्तु । कोऽयं भेरीध्वनिः ?

(नेपथ्ये पदक्रमणम् । फोर्टिन्ब्रास इङ्ग्लन्डदूता अन्ये च प्रविशन्ति ।)

फोर्टिन्ब्रासः - किमिदमहं पश्यामि ?

होरेषियः - किं द्रष्टुमिच्छसि ? यदि विषादमयमाश्चर्यकरं च दृश्यं द्रष्टुमिच्छसि तर्हि त्वमुचितस्थानमागतोऽसि । अत्रैव तिष्ठ ।

फोर्टिन्ब्रासः - मृतानामयं राशिः संपूर्णहत्यां प्रकटयति । भो गर्वितमृत्यो! क उत्सवस्तव परस्मिन् लोके सिद्धोऽस्ति यदेकप्रहारेणात्र बहवो हताः ?

In Public domain. Digitization Muthulakshmi Research Academy

दूतः - भयंकरमिदं दृश्यम् । वयं दूता इङ्गलन्डाद् विलम्बेनागताः । यैर्वयं श्रोतव्यास्ते कर्णा इदानीं बधिराः सन्ति । वयमागतास्तं वक्तुं तवादेशः कृतः । रोसेन्क्रान्जः गिल्डेन्क्टेर्नश्च मृतौ । किन्तु कुतः अस्माकमभिनन्दनानि भवेयुः ?

होरेषियः - (राजानं निर्दिशति) न तस्मान्मुखाद् यद्यपि स जीवन् स्याद् युष्मानभिनन्दितुम् । तयोर्मृतिं प्रति तेन स आदेशो न दत्तः । परन्तु भवान् पोलन्डयुद्धेभ्यो भवन्त इङ्गलन्डाच्च समुचिततमसमये आगता अस्मिन् रक्तमये कर्मणि स्थिते। अत इमानि शरीराणि उन्नतप्रदेशे स्थाप्यन्तां येन सर्वजनदर्शनं भवति । अहं जनान् वदामि कथमिमानि वृत्तनि प्रवर्तितानि । कामुकरक्तमयघोरकृत्यानि सहसा निर्णया अकस्मात् हत्या वञ्चनामरणानि अस्वाभाविककारणम् अन्ततः दुष्टकल्पनानि यानि प्रयोक्तृष्वेव निपतितानि । अहं तानि सर्वाणि कथयिष्यामि सत्यविवरणैः सह ।

फोर्टिन्ब्रासः - शीघ्रमार्याः समागच्छन्तु । अहं तु दुःखितस्सन् मम भागधेयं स्वीकरोमि । अस्मिन् राज्ये मम साम्प्रदायिकाधिकाराश्च सन्ति। तानिदानीं स्वायत्तान् करोमि ।

होरेषियः - अस्मिन्नपि विषये मम वक्तव्यमस्ति यथा हेम्लेटेनोक्तोऽस्मि । अतो हेम्लेटस्य सम्मतमिदमपि शीघ्रं क्रियताम् । जनानां मतय इदानीं शोकपूर्णाः सन्ति । एवं कृत्वा कुप्रयोगादीन् निवारयामः।

फोर्टिन्ब्रासः - चत्वारः सेनानायका हेम्लेटं सैनिकवद् वहन्तु वेदिकायां स्थापयन्तु । दत्तश्चेदवकाशस्तेनात्मा महान् राजा निरूपितः स्यात् । सैन्यसंगीतं भवतु । सैन्यविधयो भवन्तु ये तस्य वीरगुणान् वदेयुः । शवा

In Public domain. Digitization Muthulakshmi Research Academy

उद्ध्रियन्ताम् । इदं दृश्यं रणक्षेत्रे युज्यते । अत्र तु राजसभायां सर्वमिदं दुर्वृत्तं दृश्यते । बहिर्गच्छ । सैनिकान् वद गोलकाः प्रयोज्यन्तामिति हेम्लेटस्य सम्मानार्थम् ।

(सर्वे निष्क्राम्यन्ति देहान् वहन्तः । गोलकाः प्रयुक्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः क्लियोपेट्रा च

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः क्लियोपेट्रा च

पात्राणि

Mark Antony	मार्कः एन्टोनिः ।	इटली परिपालक त्रयम् ।
Octavius Caesar	आक्टेवियसः सीजरः ।	
Lepidus	लेपिडसः ।	
Sextus Pompeius	सेक्स्टसः पम्पेयसः । पाम्पिः ।	
Domitius Enobarbus	डोमिषियसः इनोबार्बसः ।	एन्टोनेः सुहृदः।
Ventidius	वेन्टिडियसः ।	
Eros	ईरासः ।	
Scarus	स्कारसः ।	
Demetrius	डिमिट्रियसः ।	
Philo	फैलः ।	
Mecenas	मेसिनसः ।	सीजरस्य सुहृदः।
Agrippa	अग्रिप्पः ।	
Dolabella	डोलबेल्लः ।	
Proculeius	प्रोक्युलियसः ।	
Thyreus	थैरियसः ।	
Gallus	गेलसः ।	
Menas	मेनसः ।	पाम्पेयसस्य सुहृदः।
Menecratus	मेनिक्रेटसः ।	
Varrius	वार्रियसः ।	

In Public domain. Digitization Muthulakshmi Research Academy

Taurus	टारसः । सीजरस्य सेनानायकः
Canidius	केनिडियसः । एन्टोनेः सेनानायकः
Silius	सिलियसः । कश्चित् सेनानीः
Euphronius	युफ्रोनियसः । सीजरं प्रति एन्टोनेर्दूतः ।
Alexas	अलेक्सासः
Seleucus	सेल्यूकसः
Diomedes	डेयोमेडिसः
Dercetas	डेर्सिटासः
A soothsayer	दैवज्ञः
	सैनिकाः दूताः सेवकाः
Cleopatra	क्लियोपेट्रा ईजिप्टस्य राज्ञी एन्टोनेः प्रेयसी च ।
Octavia	आक्टेविया । सीजरस्य स्वसा एन्टोनेर्भार्या
Charmian	छार्मियाना
Iras	ऐरासा
Mardian	मर्डियाना षण्डः
	क्लियोपेट्रायाः परिजनः ।

पूर्वकथा - क्लियोपेट्रा ईजिप्टस्य राज्ञी आसीत् । रोमनसाम्राज्य-परिपालकेन जूलियसेन सीजरेण सह तस्याः प्रणय आसीत् । स रोमनगरे हतः ब्रूटसकेशियसादिभिः । मार्कः एन्टोनिः आक्टेवियसः सीजरः लेपिडसश्च सम्मिल्य ब्रूटसादीन् हत्वा रोमनराज्यपालका बभूवुः। तेषु एन्टोनिः मुख्यः । पश्चात् एन्टोनिः अलेग्जेन्ड्रियां गतः । तत्र स क्लियोपेट्रया वशीकृतः । स पत्नीं विहाय क्लियोपेट्रया सहाभवत् ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः क्लियोपेट्रा च

प्रथमः अङ्कः प्रथमं दृश्यम् ।

(अलेक्जेन्ड्रियानगरे क्लियोपेट्रायाः सौधे कोष्ठः ।
डिमिट्रियसः फैलश्च प्रविशतः ।)

फैलः - बत ! अस्माकं नायकस्य मोहावेशः अवधिमतिक्रान्तः । युद्धसन्नद्धसैन्यानां संख्यां शक्तिं च परीक्षमाणस्य स्थितस्य तस्य नेत्रे साक्षाद् युद्धदेवताया इव पुरा दीप्ते आस्ताम् । सम्प्रति ते किञ्चन पिङ्गलवर्णं मुखं द्रष्टुं तत्परतां भजतः । पुरा महायुद्धेषु वीरस्य तस्य हृदयं कवचस्य वक्षःफलकं भित्त्वा उदीर्णमभवत् । तदेवेदानीं कस्याश्चिदीजिप्टदेशीयायाः कामाग्निं प्रशमयद् निरुद्विग्नं धमति ।

(तूर्याणां ध्वनिः । एन्टोनिः क्लियोपेट्रा तस्याः परिचारिकाः अनुसरतां श्रेणिः क्लियोपेट्रां वीजयन्तः षण्डाश्च प्रविशन्ति ।)

पश्य । एते आगताः । सुपरीक्षस्व तम् । पश्यसि च प्रपञ्चपरिपालकत्रये अन्यतमं कांचन कुस्त्रियं परिचरन्तं प्रवर्तमानम् ।

क्लियोपेट्रा - यदिदानीं त्वं वदसि यदि तत् सत्यं प्रेम तर्हि तस्य परिमाणं वद ।

एन्टोनिः - यस्य परिमाणं भवति तत् प्रेम वराकं भवति ।

क्लियोपेट्रा - अहं ज्ञातुच्छामि कियत् तव प्रेम कियच्च तस्य परिमाणमिति ।

एन्टोनिः - तर्हि त्वया भूम्याकाशावतिक्रमितव्यौ ।

In Public domain. Digitization Muthulakshmi Research Academy

(सेवकः प्रविशति ।)

सेवकः - प्रभो रोमनगराद् वार्ता मयानीता ।

एन्टोनिः - रोमनगरवार्ता मां व्यथयिष्यति । संक्षेपेण वद ।

क्लियोपेट्रा - न न । वार्तां शृणु एन्टोने । तव पत्नी फूल्विया त्वयि कुपिता स्यात् । अल्पश्मश्रुमुखेन यूना सीजरेण किञ्चनाज्ञापत्रं तव प्रेषितं स्यात् सत्वरमिदं कुरु एतत् कुरु तद्राज्यमाक्रमस्वान्यद् विमोचय ममादेशं कुरु नो चेत् त्वयि दण्डो निपतिष्यतीति ।

एन्टोनिः - प्रिये ! किं मामपहससि ?

क्लियोपेट्रा - दृश्यते भवानत्र स्थातुं न शक्नोत्यतः परम् । ईजिप्टं त्यजेति त्वमादिष्टोऽसि सीजरेण । अत एन्टोने वार्तां शृणु । अपि फूल्विया आदिशति उत सीजरः ? अहं वदामि उभाविति । अतो दूताना-कारय । यथाहमीजिप्टस्य राज्ञीति सत्यं तथा त्वमसि सीजरस्याज्ञाकरः यतः शृण्वन् लज्जसे । अथवा तीक्ष्णभाषिणी सा फूल्विया त्वामुपालभते। दूतानाकारय ।

एन्टोनिः - रोमनगरं टैबरनद्यां मज्जतु । सुमहद् रोमनसाम्राज्यसौधं निपततु । मम स्थानमिह भवति । साम्राज्यानि मृद्विकारमात्राणि । मृन्मयीयं भूमिर्मनुष्यान् जन्तूंश्च समं पुष्णाति । भूम्यामाधिपत्यं प्राप्य वयं जन्तुभ्यः अधिका न भवामः । महत्त्वं नाम जीविते इदं भवति । लोके किमपि मिथुनमुदात्तं भवतु । अन्योऽन्यसंबद्धं च भवतु । अहमिदं प्रकटयामि। लोके आवयोस्तुल्यौ प्रेयसीप्रियौ न स्तः । यदीदं सत्यं नास्ति तर्ह्यहं दण्ड्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियोपेट्रा - (स्वगतम्) असत्यमिदम् । किमयं फूल्वियां परिणीतः प्रेम विना ? अहमस्य वचांसि विश्वसिमीव प्रवर्ते । (प्रकाशम्) एन्टोने ! अपि सत्यं वदसि ?

एन्टोनिः - सर्वथा सत्यम् । क्लिोयोपेट्रायां सन्निहितायामत्र स्वल्पमप्य-सत्यं न भवति । अथ यतः प्रेमनिर्मग्नतां वयं गाढमिच्छामस्तत आवयोः कालो वृथा मा भवतु अप्रियोद्वेगकरसंभाषणैः। कमपि विनोदं विना क्षणोऽप्यावयोर्न गच्छतु । को विनोदोऽस्ति अद्य रात्रौ ?

क्लियोपेट्रा - दूतानां वार्ताः शृणु ।

एन्टोनिः - मा तावत् । कलहप्रिये । राज्ञि ! सर्वं त्वयि संपद्यते । उपालम्भो हास्यं विलापः सर्वोऽप्युद्वेगस्त्वयि श्लाघ्यो गुणो भवति । अद्य कमपि दूतं न पश्यामि । त्वया सह भवामि । अद्य नक्तमावां नगरवीथीषु संचारं कृत्वा जनानां प्रवर्तनानि परिशीलयावः । मम राज्ञि ! आगच्छ । ह्यो रात्रौ त्वयैवेदमभिलषितम् । (दूतं प्रति) मा किमपि वद ।

(परिजनसहितौ एन्टोनिः क्लियोपेट्रा च निष्क्रान्तौ ।)

डिमिट्रियसः - दृश्यते सीजरे एन्टोनेर्गौरवं नास्ति । तस्य वार्तामपि न शृणोति ।

फैलः - मान्य ! कदाचिद् एन्टोनिर्यदा स्वगुणेभ्यो भ्रश्यति तदैवं प्रवर्तते ।

डिमिट्रियसः - रोमनगरे जना एवमेव वदन्ति एन्टोनिं प्रति । तदहम-सत्यमचिन्तयम् । परन्तु सत्यमेव तत् । आशासे श्वः स प्रवर्तनेन श्रेयान् भविष्यति । (निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः अङ्कः द्वितीयं दृश्यम् ।

(तस्मिन्नेव सौधे अन्यः कोष्ठः । छार्मियाना ऐरासा अलेक्सासः दैवज्ञश्च प्रविशन्ति ।)

छार्मियाना - प्रभो अलेक्सास ! प्रिय अलेक्सास! सकलसद्गुणपूर्ण अलेक्सास ! यद्यद् विशेषणमिच्छसि तत्तद्विशेषणसमेत अलेक्सास! कुत्रास्ति स दैवज्ञो यस्त्वया बहु प्रशंसितो राज्ञ्याः सकाशे ?

अलेक्सासः - हे दैवज्ञ !

दैवज्ञः - किमभिलषितम् ?

छार्मियाना - एष सः ? मान्य । अपि भवान् रहस्यविषयान् जानाति?

दैवज्ञः - लोकरहस्येषु कानिचिदहं द्रष्टुं शक्नोमि ।

अलेक्सासः - पाणितलं दर्शय तस्मै ।

(इनोबार्बसः प्रविशति ।)

इनोबार्बसः - पर्याप्तं मद्यमानीयताम् । अद्य क्लियोपेट्राया आरोग्यार्थं पातव्यम् ।

छार्मियाना - मान्य ! मम भावि पश्य । तत् सुभाग्यं कुरु ।

दैवज्ञः - अहं भाग्यं न करोमि । किं भविष्यतीति ज्ञात्वा वदामि ।

छार्मियाना - तर्हि मम भविष्यत् सुभाग्यं पश्य ।

दैवज्ञः - भवती इतोऽपि दर्शनीयतरा भविष्यति ।

छार्मियाना - अहं स्थूला भविष्यामीति तस्याभिप्रायः ।

ऐरासा - न न । यदा त्वं वृद्धा भविष्यसि तदा मुखे वर्णकं लगयिष्यसि सुन्दरतरा द्रक्ष्यसे च ।

In Public domain. Digitization Muthulakshmi Research Academy

छार्मि - सुदैवान्मम मुखे वलयो न भवन्तु ।

अलेक्सासः - दैवज्ञस्यापहासो मा क्रियताम् । श्रद्धया श्रूयतां तस्य वचनम् ।

छार्मि - सर्वो मौनं तिष्ठतु ।

दैवज्ञः - त्वं यावत् प्रेम दद्यास्ततो न्यूनं प्राप्नुयाः ।

छार्मि - हतविधे ! सा दुर्गतिर्मम न भवतु । यदि भवेत् तर्हि मद्यपानेन लोकं विस्मरिष्यामि ।

अलेक्सासः - श्रूयतां श्रूयतां सः ।

छार्मि - शोभन दैवज्ञ । किमपि निस्संशयं सुभाग्यं मम वद । एकस्मिन् दिने मम विवाहो भवतु त्रिभी राजभिस्तेषां वैधव्यं च मम भवतु। पञ्चाशत्तमे वयसि मम पुत्रो भवतु तं च महाराजो हेरोडः स्वस्य प्रभुं स्वीकरोतु । मम हस्ते इदं भाग्यं पश्य येन मम विवाहो भविष्यति आक्टेवियसेन सीजरेण येनाहं मम स्वामिन्या समाना भविष्यामि ।

दैवज्ञः - त्वं तव स्वामिनीमतिरिच्य जीविष्यसि ।

छार्मि - तन्मम सुभाग्यम् ।

दैवज्ञः - भाविनः अपेक्षया तव गतं सभाग्यतरमभवत् ।

छार्मि - तर्हि मम संततिरौरसी न भविष्यति । कति पुत्रा मम भविष्यन्ति कति पुत्र्यश्च ? कृपया वद ।

दैवज्ञः - यदा यदा इच्छसि यदि त्वं तदा तदा पुत्रं पुत्रीं वा प्राप्स्यसि तर्हि तव दशलक्षसंतानो भविष्यति ।

छार्मि - अपेहि । एवं वक्तुं कीदृशोऽसि त्वं दैवज्ञः ? भवतु । ऐरासाया भावि वद ।

 In Public domain. Digitization Muthulakshmi Research Academy

अलेक्ससः - सर्वे वयं ज्ञास्यामः स्वं स्वं भाग्यम् ।

इनोबार्बसः - अद्य नक्तं मम भावि यथा प्रायेणात्र सर्वस्य तथा मद्यपानं शय्याप्रवेशश्च ।

ऐरासा - इदं मम पाणितलं पश्य । अपि पश्यसि तासु पाणितलरेखासु मम पातिव्रत्यं यदि किमप्यन्यद् भाग्यं नास्ति ।

छार्मि - जलपूर्णायां नैलनद्यां यावती दुर्भिक्षसूचना भवति तावत्येवास्याः पाणितले पातिव्रत्यसूचना भवेत् ।

ऐरासा - अपेहि मम उन्मत्तसखि ! त्वं किं जानासि ?

छार्मि - वद वद । अस्याः साधरणं भावि वद ।

दैवज्ञः - युवयोर्भाग्ये सर्वथा समे ।

ऐरासा - कथम् ? विस्तरेण वद ।

दैवज्ञः - उक्तमेव ।

ऐरासा - अस्या अपेक्षया मम स्वल्पमपि अधिकं सुभाग्यं वद ।

छार्मि - दैवमस्माकं कुचिन्तनानि अपनयतु । अलेक्ससस्य भावि वद।

ऐरासा - स तादृशीं परिणयतु यां स शय्यायां न प्रीणीयात् ।

इनो - तूष्णीं भवन्तु सर्वे । एष आयाति एन्टोनिः ।

छार्मि - न न । एषा राज्ञी ।

(क्लियोपेट्रा प्रविशति ।)

क्लियो - अपि मम प्रभुः एन्टोनिर्दृष्टः ?

इनो - स्वामिनि ! न दृष्टः ।

क्लियो - किं सः अत्र नासीत् ?

छार्मि - देवि ! नासीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - स सोल्लास आसीत् । किन्तु अकस्माद् रोमनगरं प्रति चिन्तापरो जातः । इनोबार्बस । पश्य कुत्रास्ति सः । तमत्रानय । अलेक्सासः कुत्र ?

अलेक्सासः - भवति ! एषोऽस्मि तव सेवायाम् । एष प्रभुरायाति ।

क्लियो - वयं तमिदानीं न द्रक्ष्यामः ।

(सर्वे क्लियोपेट्र्या सह निष्क्रान्ताः । एन्टोनिः प्रविशति प्रथमदूतेन सेवकैश्च सह ।)

दूतः - तव भार्या फूल्विया प्रथमं युद्धं गता ।

एन्टोनिः - मम भ्रातरं लूसियसं प्रति ?

दूतः - अथकिम् । किन्तु तत् शीघ्रमवसितम् । तत्रोत्पन्नैः कार्यैस्तयोर्मैत्री आवश्यकी जाता । सीजरं प्रति स्वसेनानां संघटनं ताभ्यां कृतम् । किन्तु प्रथमयुद्धे विजयिना सीजरेण तौ इटलीदेशाद् विद्रावितौ ।

एन्टोनिः - तद् दुर्वृत्तम् । किमतोऽपि दुर्वार्तास्ति तव सकाशे ?

दूतः - यो दुर्वार्तामानयति स निन्द्यते ।

एन्टोनिः - यदि सा दुर्वार्ता मूर्खं कातरं वा संबध्नाति । यद् गतं तद् गतम् । गतं मां न बाधते । यदा कश्चित् सत्यं वदेत् भवतु तद् घोरं तदहमवश्यं शृणुयां प्रियवार्तावत् ।

दूतः - इयमन्या गम्भीरा वार्ता । लेबैनसः स्वपार्थियसेनाभिः सह सर्वमासियाभूखण्डं वशे कृतवान् यूफ्रेटसानदीं यावत् । तस्य विजयपताका सिरियामारभ्य लिडियां यावद् अयोनियां यावदाक्राम्यत् । यदा तु ......

एन्टोनिः - यदा तु एन्टोनिः । इदमेव खलु त्वं विवक्षसि ? स्पष्टं वद। जनवाक्यमपरुषं न कुरु । रोमनगरे क्लियोपेट्रां प्रति जनैर्यदुच्यते तदेव

 In Public domain. Digitization Muthulakshmi Research Academy

वद । फूल्वियाया रूक्षनिन्दाभाषणं यथावद् वद । मम दोषानुपालभस्व । स्वेच्छया वद । तव वचनेषु सत्यं भवतु द्वेषश्च भवतु । कार्येषु प्रमादो नाम सुलभः । दोषदर्शनेन प्रयोजनं भवति । तिष्ठतु तावद् भवान् ।

प्रथमो दूत - अहमस्मि भवतः सेवायाम् । (स निष्क्रान्तः ।)

एन्टोनिः - का वार्ता सैस्यन्नगरात् ?

प्रथमः सेवकः - सैस्यनाद् दूतः । अपि कश्चिदस्ति ?

द्वितीयः सेवकः - अस्ति । स भवतः प्रवेशानुज्ञां प्रतीक्षते ।

एन्टोनिः - स प्रविशतु ।

(द्वितीयः सेवको निष्क्रान्तः ।)

(स्वगतम्) मयायमीजिप्टराज्ञीबन्धस्त्रोटनीयः । नो चेन्मम मोहावेशो मां विनाशयिष्यति ।

(द्वितीयो दूतः प्रविशति लेखं गृहीत्वा ।)

का तव वार्ता ?

द्वितीयो दूतः - तव भार्या फूल्विया मृता ।

एन्टोनिः - क्व सा मृता ?

द्वितीय दूतः - सैस्यने । एष लेखस्तस्या व्याधेर्विवरणं कथयति । तव संबद्धानन्यान् मुख्यविषयांश्च । (लेखमेन्टोनेः प्रयच्छति ।)

एन्टोनिः - मां विसृज ।

(द्वितीयो दूतो निष्क्रान्तः ।)

(स्वगतम्) महोदारचेता वनिता अस्माल्लोकान्निर्गता । एवंविधा तस्या मृतिर्मयापेक्षिता च । यदास्माभिः किंचन तिरस्कृत्य त्यज्यते पश्चात् प्रायशस्तदेवास्माभिः पुनरपेक्ष्यते । स्थितयः परिवर्तन्ते । यदस्माकमद्य

In Public domain. Digitization Muthulakshmi Research Academy

विनोदं जनयति तदेव पश्चाद् बाधां करिष्यति। मृतायास्तस्या इदानीमहं सुगुणान् प्रशंसामि। मयैव तस्या मृतिरभिलषिता स्यात् सम्प्रति तु सा पुनर्जीविता इष्यते। अस्याः सम्मोहकर्या राज्ञ्या वशीभावादात्मा मया मोक्तव्यः। मयात्र वृथास्थितेन बह्व्यः समस्या उत्पाद्यन्ते या मम ज्ञाताभ्यः अधिकतराः स्युः। इनोबार्बस! अपि त्वमत्रासि ?

(इनोबार्बसः पुनः प्रविशति।)

इनोबार्बसः - प्रभो ! किमिष्यते ?

एन्टोनिः - मयेतः सपदि गन्तव्यम्।

इनो - तर्ह्यत्र सर्वाः स्त्रियः शोकेन मरिष्यन्ति।

एन्टोनिः - मया तु गन्तव्यम्।

इनो - यदि तव तावद् गुरुतमं कार्यमस्ति गमनमावश्यकतमं च तर्हि गम्यताम्। यदि क्लियोपेट्रा अस्या वार्ताया लेशमपि श्रोष्यति तर्हि सा सपदि मरिष्यति। विंशतिवारान् तां मर्तुमुद्युक्तामपश्यमितः अल्पैः कारणैः। मन्ये मृत्युस्तस्याः शक्तिमान् प्रियः यस्याश्लेषस्य सा सपदि वशीभवति।

एन्टोनिः - तस्याश्छलनचातुर्यं न कोऽप्यूहितुं शक्नोति।

इनो - बत। प्रभो ! नैवम्। तस्या उद्वेगाः परिशुद्धप्रेमसारमया भवन्ति। तस्या निःश्वासाः केवलवायुरिति अश्रूणि जलमात्रमिति अस्माभिर्वक्तुं न शक्यते। तानि जगति उत्पन्नानि दुर्दिनानि वर्षासारांश्चातिशेरते। तस्या उद्वेगो नटनं नास्ति। सहजो मानसिकश्च।

एन्टोनिः - यद्यहं कदापि तां नाद्रक्ष्यं मम श्रेयः अभविष्यत्।

इनो - तर्हि त्वं लोके बहुविस्मयकरवस्तुदर्शनाद् वञ्चितः स्याः। तव लोकयात्रा असमग्रफला स्यात्।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - फूल्विया मृता ।

इनो - किं किम् ?

एन्टोनिः - फूल्विया मृता ।

इनो - फूल्विया ?

एन्टोनिः - अथकिम् । सा मृता ।

इनो - मा विषीदतु भवान् । इदानीमन्यां युवतिं परिणेतुं शक्नोति। गताया वृद्धायाः पत्न्याः कृते विषादेनालम् ।

एन्टोनिः - तया तत्र संक्षोभकार्याणि कृतानि । अतो मयेदानीं तत्र भवितव्यम् ।

इनो - किन्तु त्वयात्र प्रचालितानि कार्याणि सन्ति । प्राधान्येन क्लियोपेट्र्या सह प्रवर्तनम् । तत् त्वयात्र स्थितेनैव भवति।

एन्टोनिः - अलमेतैर्वाचालभाषणैः । अस्माकं कार्याधिकृता उच्यन्तां मम चिकीर्षितम् । राज्ञीमहं सविवरणं वक्ष्यामि मम त्वरायाः कारणं गन्तुं तस्या अनुमतिं च प्राप्स्यामि । फूल्वियाया मरणमेव न । अन्ये च मुख्यविषया मां तत्र गन्तुं प्रेरयन्ति त्वरयन्ति च । मित्राणां सकाशात् लेखाश्चागता गृहमागन्तुं मामर्थयन्तः । आगतेन मया सह रोमनगरे ते कार्यविधानं प्रकल्पयिष्यन्ति च । सेक्स्टसः पाम्पिः सीजरं स्पर्धते समुद्रे आधिपत्यं च प्राप्नोत् । अस्माकं चपलबुद्धयः प्रजा अर्हस्य नायकस्य विधेयतामुत्सृजन्ति विलम्बेन वा प्राप्नुवन्ति । ते गतस्य महतः पाम्पेरुत्कर्षमिदानीं तस्य पुत्रे सेक्स्टसे स्थापयितुमारभन्ते । यशसा प्रभावेण च स इदानीमेवोन्नतः । महत्तरश्च शौर्येणोत्साहेन । स इदानीं प्रपञ्चे योधाग्रणीः संजायते । यदि तस्य प्रभाव इतोऽपि वर्धते तर्हि रोमनसाम्राज्यस्य

In Public domain. Digitization Muthulakshmi Research Academy

स्थितेरप्यपायो भवेत् । सर्वान् ममानुचरान् ज्ञापय ममाभिलाषमविलम्बेन ईजिप्टाद् गन्तुम् ।

इनो - एवं करोमि । (निष्क्रान्तौ ।)

प्रथमः अङ्कः तृतीयं दृश्यम् ।

(तत्रैव । क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति ।)

क्लियो - कुत्रास्ति सः ?

छार्मि - इतो गतः पुनर्न मया दृष्टः ।

क्लियो - (अलेक्सासं प्रति) पश्य क्वास्ति सः । तेन सह कोऽस्ति । किं च स करोति। न स जानातु मया प्रेषितं त्वाम् । यदि स व्यग्रोऽस्ति वद तं मां नृत्यन्तीम् । यदि स हृष्टोऽस्ति वद तं मामकस्मादस्वस्थाम्। शीघ्रमिदं कृत्वा प्रत्यागच्छ ।

(अलेक्सासो निष्क्रान्तः ।)

छार्मि - देवि ! यदि तस्मिन् गाढप्रणयिनी असि तर्हि सदृशं प्रेम तस्मात् प्राप्तुं तवेदं न समुचितं विधानम् ।

क्लियो - यदि न ममेदं समुचितं कार्यं तर्हि किं मया करणीयम् ?

छार्मि - स यथेच्छं स्वकार्याणि करोतु । कस्मिन्नपि तस्य विरोधं मा कुरु ।

क्लियो - मूढाया अस्ति तवायमुपदेशः । यद्येवं कुर्यां तर्हि स मम न भवेत् ।

छार्मि - अतीव तस्य निरोधं मा कुरु । पुनः पुनः कार्यनिरोधकं प्रति

In Public domain. Digitization Muthulakshmi Research Academy

द्वेषो जायते । एष आगत एन्टोनिः ।

(एन्टोनिः प्रविशति ।)

क्लियो - (स्वगतम्) इदानीमहमस्वस्थतां व्यग्रतां च नटामि ।

एन्टोनिः - इदानीं सखेदमहं मम चिकीर्षितं वदामि ।

क्लियो - प्रिये ! छार्मियाने ! पतन्तीं मां गृहाण । इतो मां नय । अधिका मम व्यथा मानवमात्रस्यासहनीया ।

एन्टोनिः - प्रियतमे ! देवि !

क्लियो - प्रार्थये । किञ्चिद्दूरे तिष्ठ ।

एन्टोनिः - किं जातम् ?

क्लियो - तव मुखं वीक्ष्याहं जानामि त्वां कापि सुवार्ता प्राप्ता । सा स्त्री तव भार्या किं वदति ? सर्वथा तस्याः सकाशं गच्छ । बाढं कृतं स्याद् यदि तवात्रागमनमेव तया प्रतिषिद्धमभवत् । तदा मया त्वमत्र निरुद्ध इति सा न वदेत् । त्वयि मम प्रभावो नास्ति । त्वं तस्या अधीनोऽसि ।

एन्टोनिः - देवाः सत्यं जानन्ति ।

क्लियो - कापि राज्ञी अहमिव न प्रतारिता कदापि । एवं भवतीत्यहं जानामि चारम्भात् ।

एन्टोनिः - क्लियोपेट्रे ।

क्लियो - मया नैव चिन्तनीयं त्वं ममासि मय्येवानुरक्तोऽसीति च । तव प्रणयशपथैरासनेषूपविष्टाः स्वर्गस्था देवा अपि चलिताः स्युः । फूल्वियां प्रति त्वमलीकोऽसि । कृतमात्रभग्नान् तव शपथान् यदि विश्वसिमि तर्हि उन्मादिनी भवेयम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - प्रियतमे देवि !

क्लियो - प्रार्थये मां त्यक्तुं कमपि व्याजं मा पश्य । साधयामीति वद गच्छ च । यदि त्वं स्थातुमभिलषसि तदा भाषणं भवेत् । तदा त्वया शपथः कृतो ममौष्ठयोरमरत्वमस्तीति मम भ्रुवोः स्वर्गसौख्यमस्तीति च। तदा मम सर्वं तव स्वर्गतुल्यमासीत्। इदानीमपि मम सर्वाणि शरीरलक्षणानि तान्येव । अथवा तानि तथा कीर्तयन् योधाग्रणीस्त्वं तदा असत्यवचनाग्रणी-रासीः ।

एन्टोनिः - किमिदं भाषणं देवि ?

क्लियो - मयेदानीं धैर्येण पौरुषेण च वक्तव्यम् । किन्तु मम एतौ गुणौ न स्तः ।

एन्टोनिः - देवि शृणु । इदानीं तत्र स्थितिं समीक्ष्य मया तत्र गन्तव्य-मस्ति । परन्तु मम तत्र स्थितिर्नातिदीर्घा स्यात् । तस्मिन्नपि काले मम मनस्त्वत्सकाशे भविष्यति । अस्माकमिटलीदेशः अन्तर्युद्धेन क्षुब्धः । सेक्स्टसः पाम्पिः समुद्रमार्गेण रोमनगरमासादयति । यदा द्वौ पक्षौ परस्परं विरुन्धस्तदा जनेषु चाभिप्रायविभेदो भवति । दुर्बलः पक्षो द्विष्यते । स एव सबलो भूत्वा प्रीयते । पुरा पाम्पिं प्रति जनानां निरादर आसीत् । स एवेदानीं बहुजनैराद्रियते । स प्रसिद्धस्य पाम्पेः पुत्र इति च तत्रैकं कारणम् । किं च तत्र गन्तुं मम व्यक्तिगतं च कारणमस्ति । फूल्विया मृता । अतो मम गमने तव व्याकुलता मास्तु । विश्वासेन मम गमनमनुमन्यस्व ।

क्लियो - यद्यपि वयसा मम विवेको न जातस्तदापि बालेवाज्ञा नास्मि। नाहं विश्वसिमि तव वचनं फूल्विया मृतेति । अपि फूल्विया मृता ?

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - मम प्रियतमे ! देवि ! सा मृत्ता । पश्येमं लेखम् । (लेखं दर्शयति) यथासमयं पठितुमर्हसि च तया कृतं राजकीयसंक्षोभम् । सान्तं पठ जानीहि च क्व कदा च सा मृता ।

क्लियो - असत्यं तां प्रति तव प्रेम । कुत्र सन्ति तां प्रति तव दुःखाश्रूणि ? फुल्वियाया मरणवार्तामिव मम च मरणवार्तां त्वं ग्रहीष्यसि।

एन्टोनिः - अलं विवादेन । शृणु तावन्मम गमनाभिप्रायकारणानि । मम गमनं वा अगत्वा स्थितिर्वा त्वयि तिष्ठति । नैलनद्या उपरि प्रकाशमानेन सूर्येणाहं शपे अहं गमिष्यामि तव सैनिकः सेवकश्च । योद्धुं गमिष्याम्यथवा सर्वं विहाय स्थास्यामि । अन्यतरं किं कुर्यां वद ।

क्लियो - छार्मियाने ! मम कञ्चुकं विश्लथं कुरु । मम चेतना नश्यति । मास्तु मां प्रति तवोद्वेगः । अहं क्षणे रुग्णा भवामि। पुनः क्षणे स्वस्था च भवामि यदि एन्टोनिर्मयि प्रणयी भवति ।

एन्टोनिः - प्रिये देवि ! अलमेभिर्वचनैः । त्वयि मम प्रेम विश्वसिहि । विश्वासेन वियोगपरीक्षानुमतिं प्रयच्छ ।

क्लियो - असत्यम् । त्वं फुल्वियार्थे विलपसि त्वदर्थमिमान्यश्रूणीति मां वदसि । त्वं नटने प्रवीणोऽसि । असत्ये सत्यभ्रमं कल्पयसि ।

एन्टोनिः - मामितोऽपि मा कोपय । मम खड्गेन शपे ।

क्लियो - पश्य छार्मियाने पश्य । एष वीरः कोपमभिनयति ।

एन्टोनिः - अहं त्वां त्यजामि । असाध्य इदानीमात्मनिग्रहः ।

क्लियो - विस्तरो मास्तु । वचांसि परिमितानि सन्तु । इदानीमावयोर्वियोगो भवति । तत् स्थीयताम् । आवयोः प्रणयः अभवत्। तदपि स्थीयताम् । इदमेवाहं वक्तुमिच्छामि । बत बत । मया विस्मृतं किमहं

In Public domain, Digitization Muthulakshmi Research Academy

वक्तुमिच्छामि । यथा एन्टोनिर्मां व्यस्मरत् तथैवाहमपि मम विवक्षां विस्मरामि।

एन्टोनिः - असंबद्धं तव भाषणम् ।

क्लियो - क्षमस्व । क्षमस्व । मम प्रेमोद्वेगभाषणं तवासंबद्धप्रलापो जातः । तव व्यक्तिगता ख्यातिस्तव ईजिप्टत्यागस्य कारणमस्ति । ममासंबद्धभाषणं त्वां न विकलयतु । देवाः सह त्वया सन्तु । तव खड्गो विजयी भवतु । सर्वत्र तव विजयोऽस्तु ।

एन्टोनिः - गच्छावस्तावत् । देवि ! इत इतः । पृथग्भूतावावां मनसा सहितौ भवावः । अत्र स्थिता त्वं मया सहागच्छसि । इतस्त्वरया गच्छन्नहं त्वया सह भवामि । (निष्क्रान्ताः ।)

प्रथमः अङ्कः चतुर्थं दृश्यम् ।

(रोम्नगरे सीजरस्य गृहम् । लेखं पठन् आक्टेवियसः सीजरः लेपिडसः सेवकाश्च प्रविशन्ति ।)

सीजरः - लेपिडस ! पश्येमं लेखम् । अनेन त्वं जानीया अस्माकं महासहचरमेन्टोनिं प्रतीदानीं मम द्वेषः केवलो मनोविकारो नास्तीति । अलेग्जेन्ड्रियात इयं वार्ता । मत्स्यग्रहणं मद्यपानं रात्रिषु विशेषभोजनं च। एवं गच्छति तस्य कालः । निरन्तरं क्लियोपेट्र्या सहितः स स्त्रीतुल्यः संजातः । अस्माकं दूतान् स नाशृणोत् । राज्ये आवां तस्य सहचराविति च स न मन्यते । स समस्तपुरुषदोषाणां संग्रहोऽस्ति ।

लेपिडसः - अहं न विश्वसिमि तस्मिन् विद्यमाना दोषास्तस्य सर्वान् सुगुणान् प्रत्याख्यान्तीति । तस्य सुगुणानां मध्ये एते दुर्गुणा व्यक्तं

In Public domain. Digitization Muthulakshmi Research Academy
दृश्यन्ते यथा रात्रावाकाशस्यान्धकारे नक्षत्रणि स्पष्टं दृश्यन्ते । एते दोषास्तस्य जन्मसिद्धा न तु प्राप्ताः । स तान् परिवर्तयितुं न शक्नोति।

सीजरः - त्वमधिकक्षमावानसि । अङ्गीक्रियतां नामेदं न महत् पापं स मृतस्य टालेमेः पत्न्यां क्लियोपेट्रायां कामी अस्ति । उत्सवेषु महाधनव्ययं करोति हीनजनैः सह मद्यपानं करोति मद्यपानमत्तो मध्याह्ने वीथीषु पतन् गच्छति स्वेदपूर्णदेहैर्दासैः सह सन्निहितो वर्तते च । स्यादेतैर्दोषैः सर्वथा अस्पृष्टः पुरुषो विरलः । परन्तु यदावामत्र कार्यभारेण पीडितौ स तत्र विविधैर्विनोदैर्दिनानि गमयतीति न सहनीयम् ।

(प्रथमो दूतः प्रविशति ।)

लेपिडसः - इयमधिका वार्ता ।

प्रथमो दूतः - तवादेश आचरितः । आर्य ! सीजर ! होरायां होरायां वार्तास्त्वां प्राप्स्यन्ति । समुद्रे पाम्पिः प्रबलोऽस्ति । केवलं भयेन ये त्वया सहासन् ते इदानीं प्रीत्या तेन सह सन्ति । ते चिन्तयन्ति किल पाम्पिं प्रतिं त्वया युक्तः समुदाचारो न कृत इति ।

सीजरः - जनो नाम चपलचित्तः । प्रवाहे पतितः पर्ण इव इतस्ततो नीयते ।

(द्वितीयो दूतः प्रविशति ।)

द्वितीयो दूतः - सीजर ! इयं वार्ता श्रूयताम् । मेनेक्रेटा मेनाश्चेति समुद्रचोराः सन्ति स्वसाहसकर्मभिः सुज्ञाताः । ते विविधनौभिः समुद्रे संचरन्ति । इटलीं प्रति बहुवारानाक्रमणं तैः कृतम् । अस्माकं समुद्ररक्षकास्तान् निरोद्धुमशक्तास्तेषां स्मरणादेव विवर्णमुखा भवन्ति । एते शक्तिसंपन्ना युवानः समुद्रचोराः पाम्पिना सह भविष्यन्ति । एते चोराः

In Public domain. Digitization Muthulakshmi Research Academy

समुद्रे प्रविष्टमात्रां सर्वां नावं वशीकर्तुं समर्थाः । एवं पाम्पेर्नामोच्चारण-मात्रमेव महाशक्तिसंपन्नमस्तीदानीम् ।

(द्वितीयो दूतो निष्क्रान्तः ।)

सीजरः - एन्टोने ! त्यज तव मद्यपानोत्सवान् । मोदेनस्यावरोधे त्वया हिर्षियसः पन्सश्च हतौ । तथापि त्वं पराजितो निर्गमितश्च। तदा त्वमाहाराभावात् पीडितोऽभवः । आ बाल्यात् त्वं सुकुमारो वर्धितः । तथापि सर्वं तत् त्वमसहथाः ।मलिनं जलमपिबो यस्मादरण्यमृगा अपि अपगच्छेयुः । अरण्यवृक्षफलान्याहारमकरोः । हिमावृतायां भूम्यां हरिणा इव वृक्षाणां त्वचमखादः । कथितं च आल्पपर्वतेषु त्वया विचित्रजन्तुमांसं भक्षितम् । सर्वमिदं मयेदानीं कथितं तवौन्नत्यं ब्रूते । सर्वामिमां दुःस्थितिमनुभूयापि त्वं कृशो नाभवः।

लेपिडसः - शोच्यमिदानीं स एवं प्रवर्तते ।

सीजरः - लज्जा तस्मिन्नुद्भवतु शीघ्रं तं रोमं प्रेषयतु । बहुः कालो गतो यदावां ससैन्यौ युद्धभूम्यामभवाव । शीघ्रं युद्धचर्चां कुर्वः। निष्क्रियेष्वस्मासु पाम्पिर्विजृम्भते ।

लेपिडसः - सीजर । श्वो वक्ष्यामि अस्य युद्धस्य कृते समुद्रे भूम्यां च मम सैन्यबलं कियदिति अन्यूनानतिरिक्तम् ।

सीजरः - तावदहमपि मम सैन्यबलं गणयामि । साधयावस्तावत् ।

लेपिडसः - प्रभो शुभं भवतु । यदि वार्ताः स्युरहं वक्तव्यः ।

सीजरः - अवश्यमवश्यम् । तन्मम कर्तव्यम् । (निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः अङ्कः पञ्चमं दृश्यम् ।

(अलेग्जेन्ड्रियानगरे क्लियोपेट्रायाः सौधम् । क्लियोपेट्रा छार्मियाना ऐरासा मर्डियाना च प्रविशन्ति ।)

क्लियो - छार्मियाने !

छार्मि - देवि !

क्लियो - प्रयच्छ मे निद्राजनकं तदौषधम् ।

छार्मि - देवि ! किमर्थम् ?

क्लियो - इमं दीर्घकालं निद्रास्यामि यदा मम एन्टोनिरसन्निहितः ।

छार्मि - अतीव तं चिन्तयति भवती ।

क्लियो - किं मम मनसो विरुद्धं वदसि ?

छार्मि - देवि ! अहं विश्वसिमि न तत् तव मनसो विरुद्धम् ।

क्लियो - मर्डियाने !

मर्डि - देवि ! किमिच्छसि ?

क्लियो - इदानीं तव गानं न शृणोमि । छार्मियाने ! इदानीं स कुत्र स्यात् ? किं स स्थितः ? उपविष्टः ? चलति ? अश्वारूढोऽस्ति ? एन्टोनिं वहन्नश्वः सुखोऽस्ति । हे अश्व ! तं सम्यग् वह । अपि जानासि कं त्वं वहसि ? त्वं वहसि तं यो वहति सर्वां भूमिम् । शत्रुप्रहर्तारं स्वजनरक्षकं त्वं वहसि । अहमूहे स इदानीं मां स्मरति शनैर्वदति कुत्रास्ति मम नैलनदीसर्प इति । स मामनेन नाम्ना व्याहरति । तस्य निरन्तरस्मरणेन मम वेदना भवति हर्षश्च । तस्यासन्निधानं मां भृशं व्याकुलयति । एन्टोनेः पूर्वं मम द्वौ प्रियावास्ताम् । विशालफालस्य राज्ञो

In Public domain. Digitization Muthulakshmi Research Academy

जूलियसस्य सीजरस्याहं सुप्रियासम् । पश्चात् नेयसस्य पाम्पेः प्रणयिनी आसम् । स मम मुखं निर्निमेषं पश्यति स्म ।

(अलेक्सासः प्रविशति ।)

अलेक्सासः - ईजिप्टस्य राज्ञि ! अभिनन्दनानि स्वीकुरु ।

क्लियो - त्वं मार्कः एन्टोनिर्नासि । तथापि तस्मादागतोऽसि । तस्मात् त्वयि तस्य महत्त्वस्य लेशो भवति । कथमस्ति वीरो मार्क एन्टोनिः ?

अलेक्सासः - महाराज्ञि ! निर्गच्छन् स इदमकरोत् । प्रकाशमानमिदं मौक्तिकमचुम्बत् भवत्यै चाप्रेषयत् । अवदच्च माम् । प्रियमित्र ! इदमुच्यतां राज्ञी । विधेयो रोमदेशीय इदं मौक्तिकं प्रेषयति भवत्यै क्लियोपेट्रायै । अस्य लघूपहारप्रदानस्य निष्कृतिरूपेणास्याः सिंहासनस्यैश्वर्यं वर्धयाम्यन्य-राज्यैः । उच्यतां सा सर्वे प्राग्देशास्तां राज्ञीं वक्ष्यन्ति । एवमुक्त्वा स सशिरःकम्पं सगाम्भीर्यं युद्धाश्वमारोहत् । सः अश्वः उच्चैरहेषत । यदि मया प्रतिवचनं कृतं स्यात् तत् तस्य जन्तोः शब्दे अश्रुतं स्यात् ।

क्लियो - किं स गम्भीर उत सोल्लासः ?

अलेक्सासः - शीतोष्णऋतुमध्यकालवत् स आसीत् । न गम्भीरो न च सोल्लासः ।

क्लियो - अहो मनोविकाराणां समता । सौम्ये ! छार्मियाने ! पश्य । निपुणं पश्य । स गम्भीरो नासीत् । यतः सः अनुयायिभिः सोल्लासो दर्शनीयस्ततः स न गम्भीरः । स न हृष्टश्च । यतस्तस्य मोदकारणेन सह तस्य सर्वं चिन्तनमीजिप्टे स्थितं ततः स सोल्लासो नासीत् । स मध्यस्थ आसीत् । हर्षो वा गम्भीरता वा किमपि तस्मिन् शोभते । अपि मम दूतास्त्वया दृष्टाः ?

In Public domain. Digitization Muthulakshmi Research Academy

अलेक्सासः - मान्ये ! आसादिताः । विंशतिर्दूताः पृथक् पृथक् प्रेषिताः । किमर्थमेवं दूतपरम्परास्त्वया प्रेषिताः सत्वरम् ?

क्लियो - यस्मिन् दिने एन्टोनिसकाशे दूतसंप्रेषणामहं विस्मरामि तद् दिनमशुभदिनं भविष्यति । यस्तस्मिन् दिने जनिष्यते स याचको मरिष्यति। छार्मियाने ! इत इतः शीघ्रम् । आनय कागदं मसीं च । सौम्य! अलेक्सास ! इत आगच्छ । छार्मियाने किमहं जूलियसे सीजरे इयती प्रणयिनी आसम् ?

छार्मि - आः ! अतिशोभनः सीजरः ।

क्लियो - पुनरेवं मा वद । यदि वदेस्तव श्वासावरोधो भविष्यति । वद अतिशोभनः एन्टोनिरिति ।

छार्मि - महाविक्रमी सीजरः ।

क्लियो - दैवेन शपे । त्वां मुखे ताडयिष्यामि यदि पुनः सीजरम् एन्टोनिना समत्वेन वदसि । मम प्रिय एन्टोनिरसदृशः ।

छार्मि - क्षमस्व देवि ! इमानि श्लाघावचांसि तवैव पुनरुच्यन्ते मया।

क्लियो - तदाहं प्रथमयौवने आसम् । अनुभवहीना अनुद्विग्ना च । आनय पत्रं मसीं च । प्रतिदिनं तस्मै शुभकामनां प्रेषयिष्यामि । मम राज्यात् सर्वान् जनान् दूतान् प्रेषयिष्यामि ।

(निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयः अङ्कः प्रथमं दृश्यम् ।

(मेस्सिनाप्रदेशे पाम्पेर्गृहम् । पाम्पिः मेनिक्रेटसः मेनसश्च युद्धसन्नद्धाः प्रविशन्ति ।)

पाम्पिः - यदि देवा न्यायं कुर्वन्ति तर्हि न्यायकार्यकर्तॄणां जनानां तेषां सहायता भवति ।

मेनसः - पाम्पे ! इदं जानीहि । यदि देवाः प्रदाने विलम्बं कुर्युर्न तावता तैः प्रत्याख्यातमिति ।

पाम्पिः - वयं देवान् प्रार्थयामः । किन्तु तस्मिन् काले अस्माकमभिलषितस्य वस्तुनः प्रामुख्यं हीयते ।

मेनसः - यदस्माकं हितं तद् वयं सम्यङ् न जानीमः । बहुशः प्रार्थयामहे च तदर्थे येन दत्तेनास्माकं विपद् भवेत् । विवेकिनो देवा अस्माकं हितायैवास्माकं प्रार्थनाः प्रत्याख्यान्ति ।

पाम्पिः - वयं जेष्यामः । इदं तथ्यम् । जना मयि प्रीताः । समुद्रो मम वशेऽस्ति । मम शक्तिर्वर्धते । अचिरे काले सा परां काष्ठां प्राप्स्यति । मार्कः एन्टोनिः ईजिप्टे विनोदे मग्नः । स तस्मात् प्रदेशाद् बहिर्न प्रचलति योद्धुम् । सीजरो धनार्थं जनान् निष्पिनष्टि । तथा तेषामनिष्टो भवति । लेपिडस एन्टोनिसीजरयोरुभयोश्च चाटुकारोऽस्ति तौ च तं प्रियं वदतः । परन्तु तस्य तयोः अपेक्षा नास्ति तयोरपि तस्मिन् ।

मेनसः - सीजरलेपिडसौ रणभूमिं प्रविष्टौ तयोश्चास्ति बलीयसी सेना ।

पाम्पिः - कुत्र त्वयेदं श्रुतम् ? इदमसत्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मेनसः - आर्य ! सिल्वियसात् श्रुतम् ।

पाम्पिः - स स्वप्नायते । अहं जानामि तौ रोमे स्त एन्टोनिं प्रतीक्षमाणौ। हे विलासिनि क्लियोपेट्रे ! सर्वाणि प्रणयाकर्षणानि गतवयसस्तव सौन्दर्यस्य नूतनत्वं ददतु । कापि माया तव सौन्दर्येण मेलनं प्राप्नोतु । कामोद्रेको युवयोर्वर्धताम् । कामुकः स पानगोष्ठीषु निर्मज्जतु मद्येन तस्य सर्वं ज्ञानं जडं भवतु । बहुस्वादूनि खाद्यानि तस्य बुभुक्षां सदा तीक्ष्णीकुर्वन्तु । एवं भक्षयन् स्वपंश्च स स्वमान्यतारक्षणं भूयो भूयो व्याक्षिपतु कालेन सर्वं विस्मृतं भवतु नश्यतु च ।

(वार्रियसः प्रविशति ।)

का वार्ता वार्रियस ?

वार्रियसः - मयानीता वार्ता सत्या । मार्कः एन्टोनिः रोममागच्छति यस्मिन् कस्मिन्नपि समये । ईजिप्टान्निर्गतस्य तस्य पर्याप्तः कालो गतो येन रोमं प्रविशेत् ।

पाम्पिः - मेनस ! इयमुद्वेगकरी वार्ता । कामी मद्यपानप्रियश्च स स्वल्पस्यास्य युद्धस्य कृते युद्धभूमिं प्रविशेदिति न मया चिन्तितम् । तस्य युद्धसामर्थ्यं सीजरलेपिडसयोः सामार्थ्यस्य द्विगुणं भवति । तथापि अस्माकं सामर्थ्यं प्रति अस्माकमभिप्राय उन्नततरोऽस्तु । कामविनोदनिर्मग्नं तं टोलेमेर्विधवायाः परिष्वङ्गाद् बहिराकर्षदस्माकं विप्लवः ।

मेनसः - नाहं मन्ये सीजरस्य एन्टोनेश्च स्नेहयुतः समावेशो भविष्यतीति। एन्टोनेर्भार्या कतिचिद्दिनपूर्वं मृता । सा सीजरं प्रति शत्रुत्वकार्यमकरोत् । एन्टोनेर्भ्राता च सीजरं विरुध्यायुध्यत । किन्तु तस्मिन्नेन्टोनेः प्रेरणा न स्यात् ।

In Public domain. Digitization Muthulakshmi Research Academy

पाम्पिः - एतानि लघूनि वैरुध्यानि । मां प्रति शत्रुत्वं गुरुतरम् । तस्मात् लघुवैरुद्ध्यं विहाय तेषामेकीभावो भवेदपि । भवेन्न वा न शक्यते वक्तुम् । यदि तान् प्रति अस्माकं विरोधो नास्ति तर्हि तेषां परस्परकलहो भवेत् । न वक्तुं शक्यते अस्मान् प्रति शत्रुत्वेन तेषां कियत् संघटनं स्यात् । यथा देव इच्छति तथा भवतु । सम्प्रति अस्माकं जीवितानि सैन्यशक्तेः सम्यगुपयोगमाश्रयन्ति । मेनस ! आगच्छ ।

(ते निष्क्रान्ताः ।)

द्वितीयः अङ्कः द्वितीयं दृश्यम् ।

(रोमनगरे लेपिडसस्य गृहम् । इनोबार्बसः लेपिडसश्च प्रविशतः ।)

लेपिडसः - भद्रमुख ! इनोबार्बस ! त्वयेदं सुकार्यं कर्तव्यम् । इदं कार्यं त्वयि शोभिष्यते च । सीजरेण सह भाषणे तव नायको मृदुरस्तु स्नेहयुतश्च । एवं स त्वया प्रार्थनीयः ।

इनो - अहं तं प्रार्थयिष्ये आत्मनः अनुरूपं भाषणं कर्तुम् । किन्तु यदि सीजरस्तमुद्रेचयिष्यति तदा एन्टोनिरुच्चैस्तरं वदिष्यति । मम प्रभोरेन्टोनेः सीजरसकाशे वाक्संयमः अनावश्यकः ।

लेपि - परस्परकलहानामयं न समयः ।

इनो - यस्मिन् समये यो विषय उद्भवति तस्मिन् समये तस्य भाषणं युज्यते ।

लेपि - किन्तु मुख्यविषयेषु सत्सु लघुविषया उपेक्षणीयाः ।

इनो - न तु यदा लघुविषयाः प्रथमं प्रस्तूयन्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

लेपि - भवान् केवलकोपेन भाषते । अहं प्रार्थये । गताः कलहा गताः। तेषामवशेषा इदानीं न पुनः संचालनीयाः । एष आयाति आर्य एन्टोनिः ।

(एन्टोनिः वेन्टिडियसश्च प्रविशतः ।)

इनो - एष आयाति सीजरः ।

(सीजरः मेसिनसः अग्रिप्पश्च प्रविशन्ति अन्यपार्श्वात् ।)

एन्टोनिः - यदि विभेदानिह अपाकरिष्यामस्तर्हि पार्थियां प्रति प्रस्था-स्यामः । अपि शृणोषि वेन्टिडियस ?

सीजरः- मेसिनस ! न जानामि यत् त्वं पृच्छसि । अग्रिप्पं पृच्छ ।

लेपिडसः - आर्याः सुहृदः अयमस्माकं समावेशो महता कारणेन भवति। स्वल्पा विषया अस्मान् न विभेदयन्तु । विभेदानां चर्चा क्रियतां सौम्यवचनैः। क्रोधः कार्यनाशको न भवतु ।

एन्टोनिः - समुचितं भाषितम् । एवमस्तु । यदि वयं युद्धसन्नद्धाः सेनाग्रे भवेम तदाप्यहमेवमेव कुर्याम् ।

(तूर्यध्वनिः ।)

सीजरः - स्वागतं रोमनगरे ।

एन्टोनिः - प्रीतोऽस्मि ।

सीजरः - उपविश्यताम् ।

एन्टोनिः - उपविशतु भवान् ।

(सर्वे उपविशन्ति ।)

एन्टोनिः - श्रुतं मया मम कृतैः कैश्चित् कार्यैर्भवान् रुष्टः । किन्तु तेषु तव कोपकारणं नास्ति । अथवा तेषु कार्येषु तव संबन्धो नास्ति ।

सीजरः - अहं हास्यकारणं भवेयं यदि विना कारणं कुपितो भवेयं

In Public domain. Digitization Muthulakshmi Research Academy

क्षुल्लकैः कारणैर्वा विशेषतस्त्वां प्रति । त्वां प्रति निन्दावचनस्य मम का आवश्यकता ?

एन्टोनिः - सीजर ! ईजिप्टे मम स्थितेः कस्तव संबन्धः ?

सीजरः - रोमनगरे मम स्थितेस्तव कः सम्बन्धः ? तथा ईजिप्टे तव स्थितेर्न मम कोऽपि संबन्धः । परन्तु ईजिप्टे निवसता त्वया मां प्रति विरोधकार्यं यदि क्रियते तर्हि तत्र मया विचारः कर्तव्यः ।

एन्टोनिः - विरोधकार्यमिति किम् ?

सीजरः - त्वं जानासि किमत्राभवत् । तेन मम वचनमवगच्छसि च। तव भार्या भ्राता च मां प्रति अयुध्येताम् । त्वदर्थं ताभ्यां युद्धं कृतम् । तस्य युद्धस्य त्वमेव कारणम् ।

एन्टोनिः - तव चिन्तनं न सम्यक् । मम भ्रात्रा युद्धे कदापि मम नाम नोपयुक्तम् । अस्मिन् विषये मया विचारः कृतः । तवैव जनैरेवमुक्तम् । यस्त्वां प्रति युध्यते स मां च प्रति युध्यते यत आवयोः समं कारणम् । यस्तवाधिकारमभियुङ्क्ते स मह्यमापि द्रुह्यति । इदं लेखैस्तव विशदीकृतम्। अतो मम भ्रातुः प्रवर्तनेन मां प्रति तव कोपः अनुचितः ।

सीजरः - त्वं मम विचारमधिक्षिपसि । त्वं सत्यं न जानासि । येन केनापि कथितेन निर्णयं करोषि ।

एन्टोनिः - न न । ध्रुवमहं जानामि । त्वां प्रति युद्धं नाम मां प्रति च युद्धम् । कथमहं तत् कुर्याम् ? अथ मम भार्या । मम भार्यासदृशी सोत्साहा भार्या तव चास्तु । तदा त्वं जानीया लोके तृतीयभागस्य पालननिर्वहणं सुलभं न तु तादृशभार्यापालनम् ।

इनो - अस्माकं सर्वेषां तादृश्यो भार्या भवन्तु । तदा पुरुषाः स्त्रियश्च

In Public domain. Digitization Muthulakshmi Research Academy
सह युद्धं गच्छेयुः ।

एन्टोनिः - विवेकवत्यापि तया कृते संक्षोभे ममाधिकारो नासीत् । तव क्लेशो जात इत्यहं खिन्नोऽस्मि । तत्र मम व्यतिकरस्तु नास्ति ।

सीजरः - यदा त्वमलेग्जेन्ड्रियायां विनोदनिर्मग्न आसीस्तदा मया लेखाः प्रेषिताः । परन्तु मम लेखास्त्वया न दृष्टा मम दूताश्चावमता निष्कासिताश्च ।

एन्टोनिः - मान्य! तदा तव दूतो मम प्रवेशानुमतिकरणात् पूर्वमेवाकस्मात् प्रविष्टः । त्रिभिः राजभिः सह समावेशं कृत्वाहं प्रत्यागतो विशदमना नासम् । किन्तु अपरस्मिन् दिने सर्वं तत् तमहमवदम् । तस्य क्षमा मया तथा अभ्यर्थितेव । अतः अयं विषयः अस्माकं विवादकारणं मास्तु ।

सीजरः - आवयोः परस्परसम्मता अङ्गीकारास्त्वया उल्लङ्घिताः । मया तथा न कृतम् ।

लेपिडसः - मन्दं मन्दं सीजर !

एन्टोनिः - लेपिडस ! वदतु स यथेच्छम् । स मम गौरवमधिक्षिपति। मम गौरवं मम पवित्रमस्ति । वद सीजर ! वद । आवयोः कः अङ्गीकारो मया उल्लङ्घितः ?

सीजरः - यदा अभ्यर्थितो भवेयं तदा आयुधानि सहायतां च दास्यामीति त्वयाङ्गीकृतम् । उभे च त्वया निराकृते ।

एन्टोनिः - उपेक्षितम् । न प्रत्याख्यातम् । तदा विनोदनिर्मग्नोऽहं विस्मृतलोक आसम् । आत्मन एवात्मा अज्ञातवदासीन्मम । एतदर्थमहं शोचामि । अनेनाभ्युपगमेन मम महत्त्वं न हीयते । ऋजुप्रवर्तनं महत्त्वलक्षणं भवति । मामीजिप्टाद् बलात्कृत्य बहिरानेतुं फूल्वियात्र संक्षोभः कृतः।

In Public domain, Digitization Muthulakshmi Research Academy

निरपराधः सन्नहं तत्र कारणमभवम् । एतदर्थं भवतां क्षमामभ्यर्थये। एतदर्थमहं मम महत्त्वस्य किञ्चिन्न्यूनतामङ्गीकरोमि ।

लेपिडसः - सुजनभाषणं कृतम् ।

मेसिनसः - अथ परस्पराक्षेपा न सन्तु । सर्वे ते विस्मर्यन्ताम् । एवं कृत्वा कालोचितस्य सम्मेलनस्यावश्यकतां प्रदर्शयत ।

लेपिडसः - सुभाषितं मेसिनस !

इनो - अथवा सम्प्रति युवयोः स्नेहोऽस्तु । प्रथमं पाम्पिः प्रतिकर्तव्यः। तत् कृत्वा यदा किमप्यन्यत् कार्यं न भवेत् तदा पुनरयं परस्परविवादः क्रियताम् ।

एन्टोनिः - त्वं सैनिकमात्रः । न किमपि वद ।

इनो - मया विस्मृतप्रायम् । सत्येन मौनं स्थातव्यमिति ।

एन्टोनिः - महासभायाः प्रकोपनं मा कुरु । तूष्णीं तिष्ठ ।

इनो - भवतु भवतु । निर्वचनोऽहं शिलेव तिष्ठामि ।

सीजरः - यदयं वक्ति तत् सत्यम् । भाषणविधानमेवास्मान् तुदति । आवयोर्विभेदाः सन्तीति सत्यम् । आवयोः प्रवर्तनं भिन्नम्। कार्याणि भिन्नानि । एवं स्थिते आवयोर्मैत्री चिरस्थायिनी कथं भवेत् ? संघटनार्थं कश्चिद् बन्ध आवश्यकः । यदि कश्चित् तादृशः स्यात् तमहं लोके अन्विष्यामि ।

अग्रिप्पः - सीजर ! अप्यहं वक्तुं शक्नोमि ?

सीजरः - अग्रिप्प ! वद वद ।

अग्रिप्पः - मातृपाश्र्वात् तव स्वसा अस्ति प्रशंसनीया आक्टेविया । महान् मार्क एन्टोनिः सम्प्रति भार्यारहितः ।

In Public domain. Digitization Muthulakshmi Research Academy

सीजरः - इदं मा वद। यदि क्लियोपेट्रा शृणुयात् तर्हि तव साहसवचनस्य महती निन्दा भवेत्।

एन्टोनिः - सीजर। अहं न विवाहितः। वदतु अग्रिप्पः।

अग्रिप्पः- युवयोः स्थिरस्नेहाय सहस्थितये बान्धव्याय मनसोरेकीकरणाय च एन्टोनिः आक्टेवियां परिणयतु। सौन्दर्येण सा उत्तमं पुरुषमर्हति। तस्या सुगुणा असमानाः। अनेन विवाहेन सर्वे स्वल्पा मत्सरा नशिष्यन्ति अधिकभयानि चापगमिष्यन्ति। इदानीमसत्यवार्ता अर्धसत्यवार्ताश्च मनोवैकल्यं जनयन्ति। युवयोरुभयोस्तस्याः प्रेम भविष्यति युवां च सन्निहितौ भविष्यथः। युवयोर्जनानां च प्रेम भविष्यति। क्षम्यतां मम वचनम्। अहमुभयोर्भवतोः सेवाबद्धोऽस्मि। इदं किञ्चित्कालात् सुविचार्य मयोक्तम्। सद्यो मनसि उद्भूतं नास्ति।

एन्टोनिः - अपि सीजरो वदेत्?

सीजरः - उक्तस्य वचनस्य एन्टोनेरभिप्रायमज्ञात्वा सीजरो न किमपि वदेत्।

एन्टोनिः - यद्यहं वदामि अग्रिप्प! एवं भवतु इति तर्हि अग्रिप्पस्य का शक्तिरस्ति एतन्निर्वोढुम्?

सीजरः - सीजरस्य प्रभावः तस्य तां शक्तिं दास्यति। आक्टेवियां दातुं सीजरस्याधिकारस्तत् कार्यं निर्वक्ष्यति।

एन्टोनिः - इदं दृश्यते अनुकूलं सुकार्यम्। अस्य निरोधं कर्तुमहं नैव चिन्तयामि। गृहाण मम पाणिम्। शोभनमिदं कार्यं क्रियताम्। अस्मात् क्षणादावयोर्बन्धुत्वप्रेम आवयोर्मनसी प्रभावयतु अस्माकं कार्यकल्पनानि च।

In Public domain, Digitization Muthulakshmi Research Academy

सीजरः - गृह्यतां मम पाणिः । अहं मम स्वसारं ते ददामि । मम तस्यां यत् प्रेमास्ति तदतिरिच्य कस्यापि भ्रातुः स्वसरि न भवेत् । मम स्वस्रा कारणेनावयो राज्ययोरेकता भवतु आवयोर्मनसोरन्योऽन्यप्रेम कदापि पुनर्न निपततु ।

लेपिडसः - तथास्तु । शुभं भवतु ।

एन्टोनिः - मया कदापि न चिन्तितं पाम्पिं प्रति मया खड्गः प्रयोक्तव्यो भवेदिति । अचिरगते काले स मां प्रति असाधारणसौजन्येन प्रावर्तत । तदर्थं स मया प्रीतिं वक्तव्यः । एवमकुर्वन्नहमसुभगो भविष्यामि । पश्चात् तु तं प्रति विरोधं करिष्यामि ।

लेपिडसः- कालो नास्ति । शीघ्रमस्माभिः पाम्पिराक्रमितव्यः । नो चेत् सः अस्मानाक्रमिष्यते ।

एन्टोनिः - कुत्रास्ति स इदानीम् ?

सीजरः - मिसेनमपर्वतसमीपे ।

एन्टोनिः - कियत् तस्य भूसेनाबलम् ?

सीजरः - महत् वर्धमानं च । समुद्रस्तु पूर्णरूपेण तस्याधीनः ।

एन्टोनिः - एवं नु ? इदमस्माभिः पूर्वमेव ज्ञातव्यमासीत् । इदानीं युद्धाय त्वरामहे । सैन्यसन्नाहात् पूर्वमस्माभिर्निश्चितं कार्यं कृतमस्तु ।

सीजरः - प्रमोदेन साकम् । त्वामाह्वये । इदानीमेव त्वां मम स्वसुः सकाशं नयामि ।

एन्टोनिः - लेपिडस ! भवानपि सहास्माभिर्भवतु ।

लेपिडसः - आर्य । एन्टोने । अवश्यम् ।

(तूर्यध्वनिः । सीजरः एन्टोनिः लेपिडसश्च निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

मेसिनसः - (इनोबार्बसं प्रति) आर्य ! ईजिप्टादिह तव स्वागतम् ।

इनो - मेसिनस ! भवान् सीजरस्य सन्निहितोऽस्ति । मान्य मित्र अग्रिप्प !

अग्रिप्पः - भद्र ! इनोबार्बस !

मेसिनसः - इदमस्माकं हर्षकरम् । व्यवहारः सुकृतः । ईजिप्टविशेषान् श्रोतुमिच्छामि ।

इनो - बहवो विशेषाः । भोजनोत्सवाः । पानगोष्ठ्यः । वयं दिनेषु सुप्ता रात्रिषु जागरूकाश्च भूयो भूयः । एवमस्माभिर्दिनान्यवमान्य रात्रयः प्रकाशिताः ।

मेसिनसः - श्रूयते सा क्लियोपेट्रा बहुविशिष्टा ।

इनो - सिड्नेसनदीसमीपे एन्टोनिक्लियोपेट्र्योः प्रथममेलनमभवत्। तदैव क्लियोपेट्र्या एन्टोनिर्वशीकृतः ।

अग्रिप्पः - तदा सा बहुशोभमाना आसीदिति श्रुतम् । अपीदं सत्यम्?

इनो - अहं कथयामि । सा विहारनावि उपविष्टा । जले सा नौः सिंहासनवत् प्राकाशत । नावः पश्चाद्भागः स्वर्णनिर्मितः । वातवस्त्रं नीललोहितवर्णं सुगन्धभरितम् । स सुगन्धो वायुना व्याप्तः । नौकादण्डा रजतनिर्मिताः । वेणुनादमनुसृत्य तेषां दण्डानां जले चालनमभवत् । तदा पश्चात्प्रवहज्जलं संगीतपारवश्यभरितमदृश्यत । क्लियोपेट्राया रूपं कथयितुं पदानि न समर्थानि । सा स्वर्णवस्त्रनिर्मितायामुपकार्याया-मासीत् । वीनसचित्रमतिशयाना सा स्थिता । तस्याः पार्श्वयोर्द्वौ बालौ स्थितौ मन्दहासं कुर्वन्तौ मन्मथाविव । तौ विविधवर्णव्यजनाभ्यां तामवीजयतां शरीरस्य शीतलतां कर्तुम् । परन्तु तेन व्यजनवायुना

In Public domain. Digitization Muthulakshmi Research Academy

तस्या मृदुकपोलयोः सोष्मप्रकाशः प्राप्तो येन तयोः शरीरशीतलीकरण-प्रयत्नः परास्तः ।

अग्रिप्पः - अतिशोभनं स्वागतम् एन्टोनेः ।

इनो - तस्या दास्यो बह्व्यः अप्सरोवेषधारिण्यस्तस्या वीक्षणैरेवाज्ञां प्रतीक्षमाणाः सविलासं नम्राः स्थिताः । तासां सविलासगमनैस्तत्र दृश्यं सुन्दरतरमभवत् । काचिद् दासी अप्सरोवद् दृश्यमाना नावमचालयत् । पुष्पसुकुमारैर्हस्तैर्निपुणं चालिता नौर्वायुना प्रेरिता पुरस्ताद् गता । तीरयोः स्थिता जना नावो व्याप्तं सुगन्धमाघ्राय विस्मिता अभवन् । नगरजनाः समूहैरागतास्तामेन्टोनिं चाभिनन्दितुम् । तदा एन्टोनिर्विपणिस्थले एक आसन्द्यामुपविष्टः स्थितः । तदा वायुरपि स्थितं स्थलं शून्यं कृत्वा क्लियोपेट्रां द्रष्टुं गन्तुमुद्युक्तवदभवत् ।

अग्रिप्पः - असाधारणा विस्मयकरी ईजिप्टवनिता ।

इनो - सा तीरं प्राप्यावतीर्णा । नक्तं भोक्तुमाह्वानं तस्यै प्रैषयदेन्टोनिः । सा तस्योत्तरं प्रैषयद् भवानेव ममातिथिर्भवतु भोजनेनेति । सविनयः अस्मत्प्रभुः एन्टोनिः कदापि कस्या अपि नेति न वदति । बहुकृतप्रयत्नेन नापितेनालंकृतः स भोजनोत्सवं गतः । भोजनस्य मूल्यरूपेण तस्यै मनो ददौ । तस्य नेत्रयोरेवोत्सवः अभवत् भोजनं तु अस्पृष्टम् ।

अग्रिप्पः - राज्ञी सा तरुणी ।

इनो - एकदा तामहमपश्यं मुख्यवीथ्यां चत्वारिंशद्वारान् कूर्दनं कृतवतीम् । सा व्यरमत् गतश्वासा पीडिता स्थिता । सा च स्थितिस्तस्याः सौन्दर्यं व्यवर्धयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

मेसेनसः - इदानीं सा एन्टोनिना त्यक्तव्या ।

इनो - तत्र मम महान् संदेहः । वयसा तस्या नूतनत्वं न हीयते। विविधैर्विलासैः सा सर्वदा नूतना दृश्यते । अतिपरिचयादुदासीनता जायते अन्यस्त्रीषु । यत्किमपि कुर्वती सा विलासिनी दृश्यते । कामुकीं तां पवित्रपुरोहिता आशीर्भिः समेधयन्ति ।

मेसेनसः - यदि सौन्दर्यं विज्ञानं सुशीलं च एन्टोनेर्मनस्तर्पयेयुस्तर्हि आक्टेवियां प्राप्य स सुभगोऽभवत् ।

अग्रिप्पः - साधयामस्तावत् । भद्र ! इनोबार्बस ! अत्र निवासकाले त्वं ममातिथिरसि ।

इनो - आर्य ! कृतज्ञोऽस्मि ।

(निष्क्रान्ताः ।)

द्वितीयः अङ्कः तृतीयं दृश्यम् ।

(रोमनगरे सीजरस्य गृहम् । एन्टोनिः सीजरः तयोर्मध्ये आक्टेविया च प्रविशन्ति ।)

एन्टोनिः - राज्यव्यवहारा मम कर्तव्यभारश्च कदाचित् त्वत्तो मां पृथक् करिष्यन्ति ।

आक्टेविया - तस्मिन् काले देवतानां पुरस्ताद् जानुनोः स्थिताहं त्वदर्थं प्रार्थनां करिष्यामि ।

एन्टोनिः - (सीजरं प्रति) शुभमस्तु तव । साधयामि तावत् । आक्टेविये! जनैः कथ्यमानान् मम दोषान् न विश्वसिहि । एतावन्मया नियतजीवनं न कृतम् । अतः परं तु मम जीवितं नियतं भविष्यति । प्रिये ! शुभमस्तु।

In Public domain. Digitization Muthulakshmi Research Academy

मान्य ! तव शुभमस्तु ।

सीजरः - शुभं भवतु ।

(सीजरः आक्टेविया च निष्क्रान्तौ । दैवज्ञः प्रविशति ।)

एन्टोनिः - हे दैवज्ञ ! किमागतोऽसि ईजिप्टात् ?

दैवज्ञः - ईजिप्टादागमनं मम दोषः । तव प्रथमो दोष ईजिप्टगमनम्। इदानीं दोषस्तत आगमनम् ।

एन्टोनिः - कारणं वद यदि समर्थोऽसि ।

दैवज्ञः - कारणं मम मनो जानाति । वक्तुं तु न शक्नोमि । एकं तु वदामि । शीघ्रमीजिप्टं पुनर्गच्छ ।

एन्टोनिः - कस्य भाग्यानि उच्चैस्तराणि भविष्यन्ति ? सीजरस्य उत मम ? इदं वद ।

दैवज्ञः - सीजरस्य । तस्मात् एन्टोने! तस्य समीपे न भव । स्वशक्तिर्या त्वां पर्यवेक्षते सा उदात्ता वीर्यसंपन्ना उन्नता असमाना च। किन्तु यत्र सीजरो न भवति तत्र तव सा एवंविधा । यदि त्वं तस्य समीपे भवसि तदा तव सा शक्तिश्चकिता विस्मिता च भवति । अतस्तस्मात् शक्यदूरे भव ।

एन्टोनिः - अलमलम् । अतः परं किमपि मा वद ।

दैवज्ञः - न कमपि वदामि । त्वामेव वदामि । यदि त्वं तं प्रति कामपि क्रीडां करिष्यसि त्वं पराजितो भविष्यसि । त्वं समर्थः । तथापि तस्य भागधेयमधिकम् । तस्य समीपे तव कान्तिः क्षयति । पुनरपि वदामि तस्य समीपे तवात्मशक्तिर्बिभेति । यदि स नास्ति तदा तवात्मशक्तिः पुनः समर्था भविष्यति ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - इदानीं त्वं गच्छ । वेन्टिडियसं वद तमहं किमपि वक्तुमिच्छामि । (दैवज्ञो निष्क्रान्तः ।) स पार्थियां गच्छति । विज्ञानाधिक्येन वा दैवयोगेन वा एष दैवज्ञो यद् वदति तत् सत्यमस्ति । अक्षा अपि दृश्यन्ते सीजरविधेयाः । क्रीडासु ममाधिकनैपुण्यं तस्याधिकभाग्यात् पराजितं भवति । तस्य वीरकुक्कुटा मम वीरकुक्कुटान् सर्वदा विजयन्ते । अत्र सर्वत्र मम पराजयो दृश्यते । अहम् ईजिप्टं गमिष्यामि । मया विवाहः कृतो नाम सीजरेण सह शान्तिं स्थापयितुं तथापि मम मनः प्राग्दिशायामस्ति ।

(वेन्टिजियसः प्रविशति ।)

आगच्छ । वेन्टिडियस। त्वया पार्थिया गन्तव्या । तवादेशाः सिद्धाः । मामनुसर । आदेशान् गृहाण । (तौ निष्क्रान्तौ ।)

द्वितीयः अङ्कः चतुर्थं दृश्यम् ।

(तत्रैव काचिद् वीथिः । लेपिडसः मेसिनसः अग्रिप्पश्च प्रविशन्ति ।)

लेपिडसः - अत्र विलम्बं मा कुरु । त्वरया तव नायकाननुगच्छ ।

अग्रिप्पः - मार्क एन्टोनिः सचुम्बनम् आक्टेवियामामन्त्रयिष्यते । आवां तमनुसरिष्यावः ।

लेपिडसः - स्वस्ति । धृतसैनिकवस्त्रौ युवां द्रक्ष्यामि ।

मेसनसः - दूरं गणयित्वा वदामि । त्वत्तः पूर्वं मिसेनपर्वतसमीपे भवावः।

लेपिडसः - अथकिम् । तव मार्गो लघुतरः । कार्यवशान्मम मार्गो वक्रः। मत्तो दिनद्वयपूर्वं यूयं तत्र भवेयुः ।

In Public domain. Digitization Muthulakshmi Research Academy

मेसिनसः अग्रिप्पश्च - आर्य शुभं भूयात् ।

लेपिडसः - स्वस्ति । (निष्क्रान्ताः ।)

द्वितीयः अङ्कः पञ्चमं दृश्यम् ।

(अलेव्जान्ड्रियायां क्लियोपेट्राया गृहम् । क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति ।)

क्लियो - संगीतमपेक्षे । प्रेमव्याकुलतारुग्णानां संगीतमेवौषधम् ।

अन्ये सर्वे - संगीतकारा आगच्छन्तु ।

(मर्डियाना प्रविशति ।)

क्लियो - संगीतं मास्तु । गत्वा बिलियर्डसं क्रीडामः । छार्मियाने! आगच्छ ।

छार्मि - मम हस्ते पीडास्ति । मर्डियानया सह क्रीड ।

क्लियो - मर्डियाने ! अपि त्वं मया सह बिलियर्डसं क्रीडिष्यसि ?

मर्डियाना - यथाशक्ति ।

क्लियो - यदि कश्चित् किंचन कर्तुं सपदि अङ्गीकरोति यद्यपि स सम्यक् न कुर्यात् तदापि स क्षन्तव्यः । किन्तु । मास्तु बिलियर्डसक्रीडा। मत्स्यग्रहणं करिष्यामः । मम मत्स्यग्रहणदण्डो दीयताम् । नदीं गच्छामः। तत्र दूरे संगीतं वाद्यते । अहं मत्स्यान् ग्रहीष्यामि । तान् जलादुद्धरन्ती एकैकमेन्टोनिमूहे । तं च वक्ष्यामि त्वामहमगृह्णामिति ।

छार्मि - सा महती क्रीडा । मत्स्यग्रहणे तेन सह तव पणोऽभवत् । एको विगाहकस्त्वया प्रेषित एन्टोनेर्बडिशे लवणितं मत्स्यं बन्द्धुम् । एन्टोनिना स औत्सुक्येनाकृष्टः ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - अथकिम् । न केवलं तदा । असकृत् । मया क्षोभितः स कुपितोऽभवत् । नक्तं तमहमप्रीणयम् । अपरेद्युः प्रातस्तस्मै भूरि मद्यमददाम् । स सुप्तः । तं मम वस्त्रैरावृत्य तस्य खड्गमहमधरं येन स फिलिप्पिरणे शत्रूनजयत् ।

(दूतः प्रविशति ।)

कुतस्त्वम् ? इटलीतः ? वार्ताः मम श्रवणयोः पातय । कालो गतः। वार्ता अपेक्षे ।

दूतः - आर्ये आर्ये ।

क्लियो - किम् ? एन्टोनिर्मृतः ? हे धूर्त । यद्येवं वदसि मां हंसि । यदि वदसि स कल्यः सुखी च तदा त्वदर्थमस्ति स्वर्णम् । किं च मम पाणौ चुम्बनं कुर्याः । प्रवेपमाना राजानो मम पाणिमचुम्बन् ।

दूतः - आर्ये प्रथमं सः अरोगः । प्रशान्तश्च ।

क्लियो - तवेदं स्वर्णम् । किन्तु एवं वदतस्तव कोऽभिप्रायः ? रोगदुःखादिभिर्मुक्तो मृत इति किम् ? यद्येवं तर्हि तत् स्वर्णं द्रवीकृत्य तव कण्ठे पातयिष्यामि यतस्तां दुर्वार्तां त्वमानयसि ।

दूतः - भद्रे ! आर्ये ! मां शृणु ।

क्लियो - वद वद । शृणोमि । किन्तु तव मुखे सुवार्ता न दृश्यते । यदि एन्टोनिः कल्यो हृष्टश्चास्ति किमर्थं त्वं पिशाचमुखो दृश्यसे?

दूतः - अपि भवती मम शृणुयात् ?

क्लियो - भाषणात् पूर्वमेव त्वां ताडयितुं ममेच्छा अभवत् । तथापि यदि वदसि एन्टोनिर्जीवति कल्यः सीजरेण स्नेहमकरोत् न तु सीजरस्य बन्दी अभवत् इति तर्हि तवोपरि कनकवर्षं मौक्तिकवर्षं च पातयेयम् ।

In Public domain. Digitization Muthulakshmi Research Academy

दूतः - देवि ! स कल्यः ।

क्लियो - बाढम् ।

दूतः - सीजरस्य मित्रं संजातः ।

क्लियो - त्वमसि सत्यभाषी ।

दूतः - तस्य सीजरेण स्नेहः पूर्वस्माद् दृढतरः ।

क्लियो - तव महद् धनं ददामि ।

दूतः - आर्ये ! तथापि -

क्लियो - किमिदं तथापीति ? नाहं सहे तद् वचनम् । तवोक्तां सर्वां सुवार्तां तदपनयति । तथापीतीदं वचनं लज्जाकरम् । कारागारादानीतो दुष्टः अपराधीव भवति तथापीति वचनम्। मित्र ! त्वया आनीतां सुवार्तां दुर्वार्तां सर्वां च मम श्रवणे पातय । त्वयोक्तम् एन्टोनिः सीजरस्य मित्रम् आरोग्ययुतः स्वेच्छया वर्तते इति च ।

दूतः - मान्ये ! स्वेच्छया वर्तते इति न मयोक्तम् । आक्टेवियया स संयुक्तः ।

क्लियो - किमर्थम् ?

दूतः - दाम्पत्यार्थम् ।

क्लियो - छार्मियाने ! अहं निर्विण्णास्मि ।

दूतः - आर्ये ! तस्य आक्टेवियया सह विवाहः अभवत् ।

क्लियो - घोरेण रोगेण तव पीडा भवतु ।

(तं ताडयति ।)

दूतः - आर्ये ! शान्तिं कुरु ।

क्लियो - किं वदसि ? इतो गच्छ । (पुनस्तं ताडयति ।) दुष्ट! नीच!

In Public domain, Digitization Muthulakshmi Research Academy

तव नेत्रे उत्कर्षामि । केशानुन्मूलयामि । (तं बहुधा कर्षति।) तव बहून् कशाप्रहारान् कारयिष्यामि ।

दूतः - मान्ये मया केवला वार्ता आनीता । मया विवाहो न कारितः।

क्लियो - वद वद तदसत्यमिति । त्वां धनिनं करिष्यामि । यदिच्छसि तद् दास्यामि ।

दूतः - मान्ये ! स विवाहितः ।

क्लियो - जाल्म ! त्वं जीवितुं नार्हसि । (छुरिकां गृह्णाति ।)

दूतः - न न । आर्ये ! किं करिष्यसि ? मया कोऽपि दोषो न कृतः। इदानीं मया पलायनं कर्तव्यम् । (दूतो निष्क्रान्तः ।)

छार्मि - देवि। आत्मानं स्थापय । सः अनपराधः ।

क्लियो - अपराधिभिः सह कदाचिदनपराधिनश्च दण्डनं प्राप्नुवन्ति। सर्व ईजिप्टदेशो नैलनद्यां मज्जतु। सर्वे सुप्राणिनः सर्पा भवन्तु । तं सेवकं पुनराकारय । सत्यमहमुन्मादिनी अस्मि । तथापि तमहं न दंक्ष्यामि । तं पुनराकारय ।

छार्मि - स भृशं भीतः । पुनर्नागच्छेत् ।

क्लियो - नाहं तं हिंसिष्यामि । (छार्मियाना बहिर्गच्छति ।) सेवकादीन् ताडयित्वाहं मम गौरवं ह्रासयामि । अहमेवापराधिनी यतो मया एन्टोनिरिटलीं गन्तुमनुमतः ।

(छार्मियाना दूतेन सह पुनः प्रविशति ।)

आर्य ! अत्रागच्छ । सत्यापि दुर्वार्ता न आनेतव्या । प्रिया वार्ता यथावत् कथनीया । दुर्वार्ता यथावन्न कथनीया । शनैः शनैः सा अवगमयितव्या ।

In Public domain. Digitization Muthulakshmi Research Academy

दूतः - मया मम कर्तव्यं कृतम् ।

क्लियो - अपि स विवाहितः ? विवाहित इति यदि त्वं पुनश्च वदसि तर्हि नूतनं दण्डनं तव न क्रियते ।

दूतः - आर्ये ! स विवाहितः ।

क्लियो - देवास्त्वां विनाशयन्तु । पुनस्तदेव वदसि ।

दूतः - किमिच्छति भवती ? अपि मया असत्यं वक्तव्यम् ?

क्लियो - हा ! मम राज्यस्यार्ध नद्यां निमज्जतु । सर्पैः पूर्णं भवतु । त्वामसत्यभाषिणमिच्छामि । गच्छ । इतो गच्छ । कामं त्वं मन्मथवत् सुन्दरो भव । तथापि तव मुखं मम बहु कुरूपम् । अपि सत्यमिदं स विवाहितः ?

दूतः - मां क्षमतां देवी ।

क्लियो - अपि सत्यमिदं स विवाहितः ?

दूतः - अहमपराधी नास्मि । परन्तु देवी मामपराधिनं करोति । त्वमेव मया सत्यभाषणं कारयसि पुनस्त्वमेव मां तदर्थं दण्डयसि । आक्टेवियया सह तस्य विवाहोऽभवत् ।

क्लियो - इदं गर्हणीयं यद् एन्टोनेर्दोषैस्त्वं दुष्टवद् दृश्यसे । त्वयानीता वार्ता बहुद्वेष्या मम । गच्छ । रोमनगरात् त्वयानीतानि वस्तूनि अधिकमूल्यानि मया न क्रेष्यन्ते । तानि तवैव सकाशे भवन्तु त्वां नाशयन्तु ।

(दूतो निष्क्रान्तः ।)

छार्मि - देवि ! शान्ता भव ।

क्लियो - यदा मया एन्टोनिः श्लाघितस्तदा सीजरो निन्दितः ।

In Public domain. Digitization Muthulakshmi Research Academy

छार्मि - देवि ! असकृत् ।

क्लियो - तस्य दुष्फलमिदानीमहमनुभवामि । इतो मां नयत । मम स्मृतिर्नश्यति । ऐरासे ! छार्मियाने ! मास्तु व्यथा । भद्र ! अलेक्सास ! गच्छ । तं दूतं पृच्छ । स वर्णयतु आक्टेवियाया रूपम् । तस्याः किं वयः ? कीदृशस्तस्याः स्वभावः । तस्याः केशानां को वर्णः ? शीघ्रमुत्त-राण्यानय । (अलेक्सासो निष्क्रान्तः।) एन्टोनिर्मम जीवितात् शश्वदप-गच्छतु । न न । छार्मियाने ! नापगच्छतु । स भयंकरो महावीरश्च। (मर्डियानां प्रति) गच्छ । अलेक्सासं वद । दूतः पृच्छ्यताम् । तस्या उन्नतिः कियती ? छार्मियाने ! मदर्थं दुःखिता भव । किन्तु तद् दुःखं मम न वद । नय मां मम कोष्ठम् । (निष्क्रान्ताः ।)

द्वितीयः अङ्कः : षष्ठं दृश्यम् ।

(मिसेनपर्वतसमीपे । भेरीणां ध्वनिः । एकस्मात् पार्श्वात् पाम्पिर्मेनसश्च प्रविशतः । अन्यपार्श्वात् सीजर एन्टोनिः लेपिडसः इनोबार्बसः मेसिनसः अग्रिप्पश्च प्रविशन्ति सैनिकाः पदक्रमेण गच्छन्तश्च ।)

पाम्पिः - मया केचिद् युष्मन्मुख्यजनाः स्थापितास्त्वया च केचिदस्मन्मुख्यजनाः । युद्धात् पूर्वं चर्चा भवतु उभयपक्षयोर्मध्ये ।

सीजरः - प्रथमं चर्चा युज्यते । अत एव तव विचारार्थमस्माकं प्रस्तावा अस्माभिः प्रेषिता युष्माकं विचारार्यम् । यदि विचारिता वयं ज्ञातुमिच्छामः कीदृशस्तेषां प्रभावः । अपि तैः प्रभावितः किं भवान् उद्यमाद् विरम्य बहून् यूनो वीरान् सिसिलीं प्रतिनेष्यति अन्यथा युद्धेऽत्र

In Public domain. Digitization Muthulakshmi Research Academy

मरिष्यतः करिष्यति?

पाम्पिः - अहं युष्माभिः त्रिभिः सह भाषणं कुर्याम् । त्रय एव यूयमस्य सर्वलोकस्य पालका भुवि देवस्य मुख्याः प्रतिनिधयश्च । मम पितुरद्यापि एकः पुत्रो जीवन् अस्ति केचन सुहृदश्च । एवं स्थिते नाहं जानामि केन कारणेन मम पितुर्मृतेः प्रतिकारो न कर्तव्यः । यस्य भूतं स्वहन्तारं सुजनं ब्रूटसं फिलिप्पिप्रदेशे भूयो भूयो दर्शनेन व्याकुलयत् तस्य जूलियसस्य सीजरस्य मृतेः प्रतिकारो युष्माभिः कृतस्तत्रैव । केन कारणेन स विवर्णमुखः केसियसः कूटरचनामकरोत् ? केन कारणेन सर्वमान्यो ब्रूटसः अन्ये च स्वतन्त्रतारक्षार्थमायुधान्यगृह्णन्? सीजरस्य रक्तेन नगरमसिञ्चन् ? ते ऐच्छन् सीजरश्च एकः पौरमात्रो भवतु न तु राजा वा देवो वा । अत एव मया महती नौसेना निर्मिता यस्या भारेण कुपितः समुद्रः फेनिलो भवति । अनया सेनया क्रूरं रोममहं दण्डयिष्यामि येन मम पितुर्विश्वासघातः कृतः ।

सीजरः - वद वद ।

एन्टोनिः - पाम्पे ! नौबलेन न त्वमस्मान् भाययसि । समुद्रे तवाभियोगं करिष्यामः । त्वं जानासि भूम्यामस्माकं सैन्यं तव सैन्यं बहुधा अतिशेते।

पाम्पिः - सत्यं भूम्यां मत्तस्तव संख्या अधिका यतो मम पितुर्गृहं भूमयश्च भवद्भिराक्रान्ताः । किन्तु कोकिलवद् भवन्तः किमपि स्वकीयं न निर्मान्ति । निवसत तासु भूमीषु यावच्छक्यते ।

लेपिडसः - प्रकृतमनुसरामः । अस्मत्प्रेषितं प्रस्तावं प्रति कस्तवाभिप्रायः ?

सीजरः - एष विषय इदानीम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - अयं प्रस्तावः । न अभ्यर्थना । अङ्गीकारे प्रयोजनानि पश्य।

सीजरः - यदि प्रत्याख्यासि युद्धेन किञ्चित् प्रयोजनमभिलषसि तर्हि दुष्फलितानि चिन्तय ।

पाम्पिः - युष्माकमयं प्रस्तावः । सिसिलिं सार्डिनियं च मे दत्थ । मया समुद्रः समुद्रचोररहितः कार्यः । किं च मया रोमाय गोधूमस्य नियतराशि-रुपहारः प्रेषणीयः । अङ्गीकृतेषु एतेषु नियमेषु वयं पृथग्भविष्यामः खड्गान् फलकानि चानुपयुज्य ।

सीजरः, एन्टोनिः, लेपिडसः - अयमस्माकं प्रस्तावः ।

पाम्पिः - भवन्तो जानन्तु अहमिमं प्रस्तावमङ्गीकर्तुमेवागतोऽस्मि । अत्रेमं विषयं वक्तुमिच्छामि एन्टोनिं प्रति । कामं स्वयमेवं वचनेन मम गौरवं हीयते तथापि वदामि । यदा तव भ्रातुर्युद्धमभवत् सीजरेण तदा तव माता आगता सिसिलीं मया च तस्याः सस्नेहमाश्रयः कल्पितः ।

एन्टोनिः - पाम्पे ! इदं मया श्रुतम् । कालान्मया तव कृतज्ञता वक्तव्या। सा इदानीं पूर्णरूपेण क्रियते ।

पाम्पिः - तर्हि दीयतां पाणिः । (तौ अन्योऽन्यं हस्तौ विचालयतः ।) त्वया सहात्र मेलनं मया न उदीक्षितम् ।

एन्टोनिः - प्राचि जीवितं विषयसुखमयम् । इदानीं त्वयि मया कृतज्ञता वक्तव्या । तत्रस्थस्य ममेहागमनं तवोद्यमेनैव त्वरायितम् । आगतस्य मम लाभश्च जातः ।

सीजरः - कालेन तवाकृतौ महान् परिणामो दृश्यते ।

पाम्पिः - स्यान्नाम जीवितक्लेशो मम मुखपरिवर्तनहेतुः । स तु मां नैव वशीकरोति ।

In Public domain. Digitization Muthulakshmi Research Academy

लेपिडसः - इहास्माकं समावेशः सुखमयः ।

पाम्पिः - एवमाशासे । लेपिडस ! एषोऽस्माकमङ्गीकारः । अभ्यर्थये एष लेखार्पितः क्रियतां सर्वैरस्माभिर्मुद्र्यतां च ।

सीजरः - तत् करिष्यामः ।

पाम्पिः - प्रथममस्माकं भोजनोत्सवो भवतु । प्रथमः कर्ता निर्णीयतां नामोद्ग्रहणेन ।

एन्टोनिः - पाम्पे ! अहं प्रथमं करोमि ।

पाम्पिः - न न । एन्टोने ! नामोद्ग्रहणं भवतु । प्रथमो वा चरमो वा भवेः। तव श्लाघ्य ईजिप्टपाकः सर्वथा प्रशंसितो भविष्यति । श्रुतं मया जूलियसः सीजरः शरीरवृद्धिं प्राप्नोत् ईजिप्टभोजनोत्सवैः ।

एन्टोनिः - त्वया बहु श्रुतम् ।

पाम्पिः - मया आक्षेपो न क्रियते ।

एन्टोनिः - कः संदेहः ?

पाम्पिः - एवं मया श्रुतम् । इदं च मया श्रुतम् एपोल्लोडरसः अवहत्।

इनो - अलमलम् । एपोल्लोडरसः अवहत् ।

पाम्पिः - का कथा ? अपि श्रोतुं शक्यते ?

इनो - एपोल्लोडरसः काञ्चन राज्ञीमास्तरणावृतां जूलियससीजरसकाशमवहत् ।

पाम्पिः - इदानीं त्वामभिजानामि । कथमस्ति भवान् सैनिक ?

इनो - अहमस्मि सुस्थितः । सुस्थितो भविष्यामि च । दृश्यन्ते चत्वारो भोजनोत्सवाः करिष्यमाणाः ।

पाम्पिः - गृह्यतां पाणिः । कदाप्यहं तव शत्रुर्नाभवम् । त्वां महान्तं

In Public domain. Digitization Muthulakshmi Research Academy

योद्धारमपश्यं तव श्लाघा च कृता ।

इनो - त्वयि मम मैत्री नाभवत् । किन्तु यदा मया तव श्लाघा कृता तदा तत्र दशगुणा श्लाघा कर्तव्या आसीत् ।

पाम्पिः - एवं निर्व्याजभाषी भव । तत् त्वयि युज्यते । (सर्वानुद्दिश्य) आह्वये युष्मान् नावोपरि ।

सीजरः एन्टोनिः लेपिडसश्च - त्वामनुसृत्य ।

पाम्पिः - आगच्छन्तु ।

(मेनसम् इनोबार्बसं च विहायान्ये निष्क्रान्ताः ।)

मेनसः - (स्वगतम्) पाम्पे ! कोऽयं संधिस्त्वया कृतः ? तव पितास्य सम्मतो न स्यात् । (इनोबार्बसं प्रति) मान्य! आवां परिचितपूर्वौ ।

इनो - अहं स्मरामि । समुद्रे आवयोर्मेलनमभवत् ।

मेनसः - अथकिम् ।

इनो - समुद्रे त्वया सुयुद्धं कृतम् ।

मेनसः - त्वया भुवि युद्धे ।

इनो - यदा कश्चिन्मां श्लाघते तद्विनिमयेन तमप्यहं श्लाघे । परन्तु सत्यमिदं मया भुवि सुयुद्धं कृतम् । वयमागता युष्माभिर्योद्धुम् ।

मेनसः - युद्धं मद्यपानसम्मेलनं परिणतम् । मार्क एन्टोनिरत्रागमिष्यतीति अस्माभिर्न चिन्तितम् । इदं वद । अपि तेन क्लियोपेट्रा ऊढा ?

इनो - मान्य ! सीजरस्य स्वसुर्नामास्ति आक्टेविया । न क्लियोपेट्रा।

मेनसः - अहं जानामि । सा केयसस्य मार्सेल्लसस्य भार्यासीत् ।

इनो - इदानीं सा मार्कस्य एन्टोनेर्भार्यास्ति ।

मेनसः - सत्यम् ?

In Public domain. Digitization Muthulakshmi Research Academy

इनो - एवमस्ति ।

मेनसः - तर्हि एन्टोनिसीजरयोर्मैत्री शाश्वती ।

इनो - को जानाति किं भविष्यति ?

मेनसः - कृतः स्यात् स विवाहो राजकीयकारणेन न तु तयोः प्रेम्णा।

इनो - परिणामो द्रष्टव्यः । आक्टेविया सुगुणा सुशीला नम्रा च ।

मेनसः - को नाम तादृशीं भार्यां न स्पृहयेत् ? अलमावयोरूहेन विचारेण च । तत्रैव गच्छावः ।

इनो - भवान् पुरस्ताद् गच्छतु । अहमनुपदमनुगमिष्यामि ।

(मेनसः निष्क्रान्तः ।)

इनो - (स्वगतम्) को नाम गुणवतीं सुशीलां नम्रां भार्यां न स्पृहयेत्? किन्तु यदि स स्वभावेनान्यः तदा न स्पृहयेत् यथा एन्टोनिः । स आत्मन ईजिप्टप्रेयस्याः सकाशं पुनर्गमिष्यति । आक्टेवियायाः शोकेन सीजरस्य कोपो भविष्यति । यदिदानीं तयोः स्नेहकारणमस्ति तदेव शत्रुत्वकारणं भविष्यति । यत्र तस्य मनोऽस्ति तत्र एन्टोनिः प्रणयप्रमोदं वेत्स्यति । अत्र तेन कृतो विवाहः समयानुकूलमात्रः । (निष्क्रान्तः ।)

द्वितीयः अङ्कः सप्तमं दृश्यम् ।

(मिसेनमनद्या अपरतीरे पाम्पेर्नावि । संगीतं श्रूयते ।
त्रयः सेवकाः प्रविशन्ति पानादिकं गृहीत्वा ।)

प्रथमः - इदानीमत्र ते आगच्छन्ति । केचित् पादयोः सम्यक् स्थातुमशक्ता इदानीमेव सन्ति प्रश्लथमूला वृक्षा इव । स्पृष्टमात्रास्ते पतेयुः ।

द्वितीयः - लेपिडसः अरुणवर्णवद् दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः - स्वस्य अन्येषां च मद्यं स पायितः ।

द्वितीयः - अलमलमिति वदन्नेव स बहु मद्यमपिबत् ।

प्रथमः - तेन तस्य विवेको नश्यति ।

द्वितीयः - कुत्रास्ति तस्य विवेकः ? यो महद्भिः सह सम्मेलनमाकाङ्क्षति तस्य विवेको नश्यति । यद्यहं शूलमुद्धर्तुं न शक्नोमि तदा वेतसमेव गृह्णामि यद्यपि तेन मम रक्षा न भवति ।

प्रथमः - राजकीयेषु उन्नतस्थाने भवन् यस्तत्रास्तित्वरहितो भवति सः अन्धसदृशो भवति । दृष्टिशून्ये तस्य नेत्रे मुखस्य विकारमेव जनयतः ।

(तूर्यध्वनिः । सीजरः एन्टोनिः लेपिडसः अग्रिप्पः मेसेनसः इनोबार्बसः मेनसः अन्ये च नायकाः प्रविशन्ति ।)

एन्टोनिः - (सीजरं प्रति) मान्य ! तथा ते कुर्वन्ति । भित्तिषु अङ्कैर्नैलनद्या अगाधतां गणयन्ति । तैरङ्कैस्ते जानन्ति दुर्भिक्षं भविष्यति सुभिक्षं वा । यदा नदी क्षयति तदा कर्षको बीजावापं करोति । किञ्चित्कालानन्तरं सस्यमुद्भवति ।

लेपिडसः - अपि तत्र विचित्राः सर्पा भवन्ति ?

एन्टोनिः - भवन्ति ।

लेपिडसः - मकरा इव सर्पा अपि नैलनदीपङ्के सूर्यकान्तिप्रसारेण उद्भवन्ति किल ?

एन्टोनिः - लेपिडस ! एवं खलु ।

पाम्पिः - मद्यमानीयताम् । लेपिडसस्यारोग्याय पिबामः ।

लेपिडसः - अहमस्वस्थोऽस्मि । तथापि पिबामि ।

In Public domain. Digitization Muthulakshmi Research Academy

इनो - निद्रां गच्छ । पुनः स्वस्थो भवेः ।

लेपिडसः - असंशयं श्रुतं मया टोल्मिभिर्निर्मिताः पिरमिडा बहु शोभन्ते इति ।

मेनसः - (पाम्पेः कर्णे) पाम्पे किञ्चित् ते वक्तव्यम् ।

पाम्पिः - (मेनसस्य कर्णे) मम कर्णे वद । किं वक्तुमिच्छसि ?

मेनसः - (पाम्पेः कर्णे) इममुत्सवं त्यज । मया सह रहसि किञ्चित् संभाषणं कुरु ।

पाम्पिः - (मेनसस्य कर्णे) इदानीं मास्तु । (प्रकाशम्) दीयतां मद्यं लेपिडसस्यारोग्याय ।

लेपिडसः - मकरस्याकृतिः कीदृशी भवति ?

एन्टोनिः - मकरस्याकृतिर्मकराकृतिरेव भवति । तस्य विशालता तस्यैव वैशाल्यं दैर्घ्यं तस्यैव दैर्घ्यं भवतः । स्वस्यैव पादैः स चलति। येनात्मनः पोषणं भवति तेन स जीवति । यदा चत्वारः अंशास्तं त्यजन्ति तदा तस्यात्मा अन्यदेहं प्रविशति ।

लेपिडसः - तस्य वर्णः कः ?

एन्टोनिः - तस्य वर्णस्तस्यैव ।

लेपिडसः - बहुविचित्रः स सर्पः ।

एन्टोनिः - नूनं विचित्रः । किं च तस्याश्रूणि आर्द्राणि ।

मेनसः - (पुनश्च पाम्पेः कर्णे वदति)

पाम्पिः - (मेनसस्य कर्णे) तूष्णीं तिष्ठ । (प्रकाशम्) कथं विलम्बः ? मद्यमपेक्ष्यते ।

मेनसः - (पाम्पेः कर्णे) मया तव कृतायाः सेवाया यदि मयि कश्चिदनुग्रहो

In Public domain. Digitization Muthulakshmi Research Academy
भवेत् तर्हि इत उत्थाय मया किञ्चिद् भाषणं कुरु ।

पाम्पिः - (मेनसस्य कर्णे) किं तवोन्मादो जातः ? किं वक्तुमिच्छसि? (उत्थाय मेनसेन सह किञ्चिदपसरति ।)

मेनसः - अहं सर्वदा तव शुभमभिलषामि ।

पाम्पिः - सत्यम् । त्वयाहं सुसेवितोऽस्मि । इदानीं किं वक्तुमिच्छसि? (अन्यान् प्रति) मान्याः ! विनोदं कुरुत । एषोऽहमागच्छामि ।

मेनसः - (पाम्पिं प्रति) अपि भवान् सर्वस्य प्रपञ्चस्य प्रभुर्भवितुमिच्छति ?

पाम्पिः - किं वदसि त्वम् ?

मेनसः - अपि भवान् सर्वस्य प्रपञ्चस्य प्रभुर्भवितुमिच्छति ? इदं पुनः पृच्छामि ।

पाम्पिः - कथं तद् भवेत् ?

मेनसः - इममभिप्रायं मनसि कुरु । अहमल्पः । तथापि सर्वमिमं प्रपञ्चं तुभ्यं ददामि ।

पाम्पिः - त्वं मत्तोऽसि ।

मेनसः - न न । पाम्पे। नाहं मद्यमपिबम् । भवान् भुवि शक्तिमत्तमो भवेत् यदि शक्तिमिदानीमुपयोक्तुं साहसं कुर्याः । समुद्रो भूश्च तव भविष्यतः यदि त्वं ग्रहीष्यसि ।

पाम्पिः - कथम् ? वद ।

मेनसः - एते त्रयस्तव नावि सन्ति येषामधीनोऽस्ति प्रपञ्चः । अहं रज्जुं खण्डयामि । नदीमध्ये तेषां कण्ठान् खण्डय । सर्वं तेषां तव भविष्यति ।

In Public domain. Digitization Muthulakshmi Research Academy

पाम्पिः - इदं त्वया कर्तव्यमासीत् मामनुक्त्वा । यदि मया क्रियते स द्रोहो भवेत् । त्वया कृतं तु सुसेवा स्यात् । लाभाद् यशो मम मुख्यतरम्। मामुक्त्वा त्वया दोषः कृतः । मामनुक्त्वा यदीदं कार्यं त्वया कृतं स्यात् तर्हि पश्चात् तव कार्यस्य सम्मतिर्मया कृता स्यात् । इदानीं तु तव चिकीर्षितमहं दूषयामि । त्यजेमामालोचनाम् । पिब मद्यम् । (उत्सवं पुनर्गच्छति ।)

मेनसः - (स्वगतम्) पाम्पे ! इदं तव वचनम् । अहं तु हीयमानस्य तव विश्वसनीयः सेवको न भवेयमतः परम् । यो भाग्यमिच्छति प्राप्तं भाग्यं न गृह्णाति स पुनर्न प्राप्नोति क्षणं तत् प्राप्तुम् ।

पाम्पिः - इदं पीयते लेपिडसस्यारोग्यार्थम् ।

एन्टोनिः - लेपिडस इतो नीयताम् ।

(लेपिडसः सेवकेन नीतः ।)

पाम्पिः - कृतमुत्सवेनाद्य । एष कालः पृथग्भावाय ।

(तूर्यध्वनिः भेरीध्वनिश्च । इनोबार्बसं मेनसं च विहाय सर्वे निष्क्रान्ताः।)

इनो - इदं मम शिरोवेष्टनम् । (शिरोवेष्टनमुपरि क्षिपति ।)

मेनसः - आगच्छ आगच्छ । मान्य ! वीर ! (निष्क्रान्तौ ।)

तृतीय अङ्कः प्रथमं दृश्यम् ।

(सिरियादेशे किंचन स्थलम् । वेन्टिडियसः सिलियसः अन्ये रोमदेशीया अधिकारिणः सैनिकाश्च विजयोत्साहेन चलन्तः प्रविशन्ति । पकोरसस्य मृतदेहस्तेषां पुरस्तान्नीयते ।)

वेन्टिडियसः - हे पार्थियाजनाः ! भवतां शरा अन्यानविध्यन् । इदानीं

In Public domain. Digitization Muthulakshmi Research Academy
मम भाग्यं मयि प्रसन्नम् । मार्कसस्य क्रेस्ससस्य हत्यायाः प्रतिकारो मया कृतः । युष्माकं राज्ञः पुत्रस्य शवः अस्मत्सैन्यस्य पुरस्तान्नीयते । हे राजन् ओरोडेस ! तव पुत्रः पकोरसः खण्डितः । एवं मार्कसस्य क्रेस्ससस्य मृतेः प्रतिकारो विहितः ।

सिलियसः - आर्य ! वेन्टिडियस ! तव खड्ग इदानीमपि पार्थियाजन-रक्तेन सिक्तोऽस्ति । ते पलायन्ते ।ताननुव्रज्य तत्र तत्र निलीनान् विदारय । तदा तव महानायक एन्टोनिस्त्वां विजयिनं रथे उपवेश्य पुष्पमालाभिरलंकृत्य नगरे चालयिष्यति ।

वेन्टिडियसः - भोः सिलियस ! मया पर्याप्तं कृतम् । नायकेन यदुक्तं तदेव करणीयमनुयायिना । अधिकेन कृतेनाधिकारिणः असूया भवेत् । कृतस्य कार्यस्य कीर्तिं प्राप्तुं यदि अधिकारी सन्निहितो न भवति तदा वरं तदकृतम् । सीजरेण एन्टोनिना च अनुयायिभिः कृतैर्निर्दिष्टकार्यैरेव प्रायेण यशः प्राप्तम् । अत्रैव मम स्थाने पुरा सोस्सियस आसीत् । स एन्टोनेः सेनानीरभवत् । स शीघ्रं यशः प्राप्नोत् । परन्तु स एन्टोने-रनिष्टः संजातः । युद्धे अधिकारिणमतीत्य यः कार्याणि कुर्यात् सः अधिकारिणः अधिको भवेत् । अभिवृद्ध्याकाङ्क्षा नाम सैनिकस्य गुणो भवेत् । तथापि अधिकारिणः अप्रीतिं जनयता तेन यशो न प्राप्तव्यम् । वरं तादृशं यशः अप्राप्तम् । अत्राहमितोऽधिककार्यं कर्तुं शक्नुयां येन एन्टोनेरधिकलाभो भवेत् । परन्तु तेन तस्याप्रीतिर्भवेत् । मम हानिश्च ।

सिलियसः - वेन्टिडियस ! तव विवेकोऽस्ति । विवेकं विना सैनिकस्तस्य खड्गस्य समो भवेत् । अपि लेखं प्रेषयसि एन्टोनेरिमं विषयमुद्दिश्य ?

In Public domain. Digitization Muthulakshmi Research Academy

वेन्टि - सविनयमहं तस्य वार्ता प्रेषयामि तव नामप्रभावेण मयेदं कृतमिति । अद्यत्वे इदमेव सम्मोहनवचोविधानम् । अहं लेखिष्यामि तव ध्वजेन तव सुवेतनभाग्भिः सैनिकैश्च वयं पूर्वमविजितं पार्थियाराजं निर्जित्य तानद्रावयाम इति ।

सिलियसः - सम्प्रति एन्टोनिः क्वास्ति ?

वेन्टि - स एथेन्सं गन्तुं कल्पयति । तस्मात् पूर्वमेवास्माभिस्तत्र भवितव्यम् । शक्यवेगेनास्माकं भारेण सह । (सैनिकानुद्दिश्य) चलत चलत । प्रगच्छत । (निष्क्रान्ताः ।)

तृतीयः अङ्कः : द्वितीयं दृश्यम् ।

(रोमनगरे सीजरस्य गृहे पुरस्तात् कोष्ठः । एकस्मात् पार्श्वात् अग्रिप्पः अन्यपार्श्वात् इनोबार्बसश्च प्रविशतः ।)

अग्रिप्पः - अपि आवुत्तश्यालौ पृथग्भूतौ ?

इनो - पाम्पिना सह तयोः कार्यमवसितम् । पाम्पिर्गतः । एते त्रयः समयपत्रं मुद्राङ्कितं कुर्वन्ति । रोमनगरं त्यक्तुम् आक्टेविया विलपति । सीजरः शोकेऽस्ति । लेपिडसो विमना वर्तते ।

अग्रिप्पः - लेपिडसो मान्यः ।

इनो - सुपुरुषः सः । सीजरे तस्य महती प्रीतिः ।

अग्रिप्पः - मार्कमेन्टोनिं स आराधयति ।

(तूर्यध्वनिः ।)

इनो - तूर्यध्वनिः प्रयाणवेलां सूचयति । आमन्त्रये आर्य अग्रिप्प ।

अग्रिप्पः - शुभमस्तु । स्वस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

(सीजरः एन्टोनिः लेपिडसः आक्टेविया च प्रविशन्ति ।)

एन्टोनिः - मान्य अलमनुगमनेन ।

सीजरः - ममाधिको भागस्त्वया नीयते । तं यथोचितं मानय । तथा मामपि मानय । स्वसः ! यथाहमाशासे तथा सुपत्नी भव । आर्य एन्टोने! सुशीला एषा आवयोः संधानबन्धः । स बन्धो दृढो भवतु नान्यथा ।

एन्टोनिः - तस्यां मम प्रेम विशङ्क्य मा मम मनस्तुद ।

सीजरः - मया यद् वक्तव्यं तदुक्तम् ।

एन्टोनिः - अन्विष्यापि व्यग्रतायाः कारणं त्वं न पश्येः । देवास्त्वां रक्षन्तु । रोमदेशीयान् त्वयि विधेयान् कुर्वन्तु । वयमिदानीं पृथग् भवामः।

सीजरः - प्रियतमे स्वसः । शुभमस्तु । मार्गस्तव सुखोऽस्तु आतपादिकमनुकूलं च ।

आक्टेविया - भ्रातः स्वस्ति ।

एन्टोनिः - अलमश्रुमोचनेन । आक्टेविये । हर्षं स्थापय ।

आक्टेविया - मम पूर्वस्य पत्युर्गृहमवेक्षस्व । किं च तव क्षेमवार्तां भूयो भूयः प्रेषय ।

सीजरः - एवं करिष्यामि । निरन्तरं त्वां स्मरामि । सुखं वर्तस्व ।

लेपिडसः - आकाशे सर्वाणि नक्षत्राणि तव प्रकाशं ददतु शुभमैश्वर्यं च ।

सीजरः - स्वस्ति स्वस्ति ।

एन्टोनिः - स्वस्ति । (तूर्यध्वनिः । निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयः अङ्कः तृतीयं दृश्यम् ।

(अलेग्जान्ड्रियायां क्लियोपेट्रायाः सौधम् । क्लियोपेट्रा छार्मियाना ऐरासा अलेक्सासश्च प्रविशन्ति ।)

क्लियो - कुत्र स दूतः ?

अलेक्सासः - भवत्याः सम्मुखमागन्तुं स पूर्णरूपेण भीतः ।

क्लियो - अतिशयोक्तिं मा वद ।

(स दूतः प्रविशति ।)

इत आगच्छ दूत ।

अलेक्सासः - आर्ये राज्ञि ! यदा त्वं कुपितासि तदा महाक्रूरोऽपि तव सम्मुखमागन्तुं बिभियात् ।

क्लियो - तस्य महाक्रूरस्य खण्डितं शिरः अहं प्राप्नुयाम् । किन्तु कथं तद् भवेत् ? मम एन्टोनिर्मम सकाशे नास्ति यस्तत् कुर्यात् मयाज्ञप्तः । (दूतं प्रति) इत उपसर ।

दूतः - मान्ये राज्ञि !

क्लियो - अपि त्वया दृष्टा आक्टेविया ?

दूतः - राज्ञि ! वक्तुं भीतोऽस्मि । तथापि वदामि । दृष्टा ।

क्लियो - कुत्र ?

दूतः - रोमनगरे । अभिमुखं सा दृष्टा । तदा सा भ्रातुरेन्टोनेश्च मध्ये आसीत् ।

क्लियो - अपि सा मत्समाना उन्नत्याम् ?

दूतः - मान्ये ! न । नैव ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - अपि तस्या भाषणं त्वया श्रुतम् ? किं सा उच्चैर्भाषते नीचैः ?

दूत - भाषणं मया श्रुतम् । सा नीचैर्भाषते ।

क्लियो - इदं लक्षणं न तस्या अनुकूलम् । तस्यां तस्य प्रेम न स्थास्यति ।

छार्मि - मान्ये! ईजिप्टदेवते! आक्टेवियायामेन्टोनेः प्रेम भवेदित्यसाध्यम् ।

क्लियो - छार्मियाने ! तव वचनमहमङ्गीकरोमि । नीचैर्भाषणं शरीरे वामनता च । किं तस्या गमने राज्ञ्या ओजः अस्ति ? स्मर पूर्वं त्वया दृष्टा राज्ञीः । स्मृत्वा वद ।

दूतः - तस्याश्चलने ओजो नास्ति । तस्याश्चलनं स्थितिर्वा उत्साह-हीना । सा प्रतिमावद् दृश्यते न तु जीवन्तीव ।

क्लियो - अपि सत्यं वदसि ?

दूतः - सत्यम् । मम दर्शनशक्तिरस्ति ।

छार्मि - निपुण एष दर्शने ।

क्लियो - सत्यम् । (दूतं प्रति) किं तस्या वयः ? अपि जानासि ?

दूतः - देवि ! सा विधवा आसीत् ।

क्लियो - विधवा आसीत्? छार्मियाने श्रुतं त्वया ?

छार्मि - देवि श्रुतम् ।

दूतः - अहं चिन्तयामि सा त्रिंशद्वर्षा ।

क्लियो - किमाकारं तस्या मुखम् ? अण्डाकारमुत वर्तुलम् ?

दूतः - वर्तुलमत एवानाकर्षकम् ।

क्लियो - तज्जडलक्षणम् । तस्याः केशाः किंवर्णाः ?

In Public domain. Digitization Muthulakshmi Research Academy

दूतः - पिङ्गलवर्णाः । तस्याः ललाटं नतम् ।

क्लियो - इदं स्वर्णं तव । मया पूर्वं कृतमवमानं विस्मर । त्वं पुनः रोमनगरं गमिष्यसि मम वचनेन मम कार्येण । त्वं समर्थो दृश्यसे । प्रयाणसन्नाहं कुरु । मम लेखः क्रियते ।

(दूतो निष्क्रान्तः ।)

छार्मि - प्रशंसनीय एषः ।

क्लियो - सत्यम् । प्रथमं तस्मिन् मया बलादकरणीयं कृतम् । यथा सोऽवदत् तथा आक्टेवियां प्रति चिन्ता अकार्या ।

छार्मि - देवि स्वल्पापि चिन्ता अकार्या ।

क्लियो - एष राजजनानपश्यत् । अतः स जानाति ।

छार्मि - देवि ! एष बहोः कालात् तव सेवायामस्ति ।

क्लियो - छार्मियाने अन्यदेकं च प्रष्टव्यमस्ति । किन्तु न तन्मुख्यम्। तं मम लेखनकोष्ठमानय । सर्वमनुकूलं भवेत् ।

छार्मि - देवि ! अवश्यम् । (निष्क्रान्ताः ।)

तृतीयः अङ्कः चतुर्थं दृश्यम् ।

(एथेन्सनगरे एन्टोनेर्गृहम् । एन्टोनिः आक्टेविया च प्रविशतः ।)

एन्टोनिः - न न । आक्टेविये ! एतावदेव न । एकं तु क्षन्तव्यम् । सहस्रमन्ये चापराधा एतादृशाः । सीजरः पाम्पिं प्रति नूतनं युद्धमकरोत्। स जनेभ्यः क्रियमाणानि उपयोगकार्याणि लेखार्पितानि कृत्वा जनसभायामपठत् । तस्मिन् मम नाम बहुविरलमपठत् यद्यपि साधिकारप्रकटनानि

 Public domain. Digitization Muthulakshmi Research Academy

सह कर्तव्यानि। यदा देशस्य मम कृतानि सेवाकार्याणि अवश्यं कथनीयानि भवन्ति तदा स तानि यावत् साध्यं तावदल्पीकरोति । तत्तत्कार्येषु यदा मम कृतं वक्तव्यं तदा स न वदति अथवा अनुक्तवद् वदति ।

आक्टेविया - प्रिय नाथ ! श्रुतं सर्वं मा विश्वसिहि । यदि स्यात् विश्वसनीयं तदपि कुपितो मा भव । यदि युवयोः परस्परासम्मतिर्भवति तर्हि मम दुःखं भवति । मध्येऽहं भवामि उभयोः कृते प्रार्थनां कुर्वती । देवा अपहसेयुस्तदा मां दृष्ट्वा पत्युर्भ्रातुश्च कृते प्रार्थनां कुर्वतीम् । मया किं वक्तव्यं पतिर्जयतु इति वा भ्राता जयतु इति वा ? मध्यस्था भूमिर्न भवति । एका प्रार्थना अन्यां प्रार्थनां मुधा कुर्यात् ।

एन्टोनिः - भद्रे ! आक्टेविये ! यत्र तव प्रार्थना समुचिता स्यात् तत्र प्रार्थनां कुरु । यद्यहं पराजितो भवेयं मम ख्यातिर्नश्येत् । यदि मम ख्यातिर्नश्यति तदा मम विनाशो भवति । वरमहं त्वया न संबद्धो न तु त्वया संबद्धः शाखारहितवृक्षवत् स्थितः । तथापि यथा त्वयापेक्षितं तथा भ्रातुः सकाशं गन्तुमर्हसि तेन सह व्यवहारभाषणं कर्तुम् । तदन्तरेऽहं सैन्यं संपादयामि तस्य सैन्यादधिकम् । गच्छ शक्यशीघ्रकाले । शीघ्रं तव प्रार्थनानां समाधानं भवतु ।

आक्टेविया - कृतज्ञास्मि नाथ ! दैवस्य शक्तिर्मां प्रविशतु । शक्तिहीनेषु शक्तिहीनतमाहं युवयोर्मध्यस्था भवेयम् । युवयोर्मध्ये युद्धं प्रपञ्चं विदारयेत्। हतानां सैनिकानां शरीराणि तन्मध्यस्थलं पूरयेयुः ।

एन्टोनिः - एष विवादः केन प्रारब्ध इति यदा त्वमवगच्छसि तदा तस्मिन् तव कोपं प्रवर्तय । आवयोर्दोषाः समा न भवेयुः । एकतरस्याधिक-दोषा भवेयुः । अतस्तव दर्शने आवयोः समत्वं न भवतु । तव प्रयाणस्य

In Public domain. Digitization Muthulakshmi Research Academy

संविधानानि कुरु । सहप्रयाणिकान् निरूपय । यथेच्छसि तथा व्ययं कुरु । (निष्क्रान्तौ ।)

तृतीयः अङ्कः पञ्चमं दृश्यम् ।

(तत्रैवान्यः कोष्ठः । इनोबार्बसः ईरासश्च प्रविशतः ।)

इनो - मित्र ! ईरास ! का वार्ता ?

ईरासः - विस्मयकरी वार्ता प्राप्ता एषु दिनेषु ।

इनो - का सा ?

ईरासः - सीजरो लेपिडसश्च पाम्पिं प्रति युद्धं प्राकटयताम् ।

इनो - ज्ञातपूर्वा एषा वार्ता । को विजयते ?

ईरासः - युद्धे लेपिडसः सीजरेणोपयुक्तः । अवसिते युद्धे नायकत्रयात् लेपिडसो बहिष्कृतः । विजयस्य ख्यातिस्तस्य स्वल्पापि न दत्ता । प्रत्युत तस्मिन् द्रोहारोपणं कृतम् । पाम्पिना सह तस्य तादृशो लेखविनिमय आसीदिति सः अभियोगः । सीजरस्य तेनाभियोगेनैव लेपिडसः कारायां बद्धः । अतो नायकत्रये दुर्बलस्तृतीयः कारायामस्ति । मरणमेव तं मोचयिष्यति ।

इनो - तस्मादिदानीं सर्वो लोको द्वयोर्मध्ये अस्ति । सीजरस्य एन्टोनेश्च मध्ये । तयोर्मध्ये युद्धं भविष्यति । एकतरस्य नाशेन तस्य युद्धस्यावसानं भविष्यति । एन्टोनिः कुत्रास्ति?

ईरासः - स गृहारामे चलति एवम् । (कोपमभिनयन् चलति) पथि पतितानि पर्णानि पादेन हन्ति । लेपिडस ! मूर्ख ! इत्युत्क्रोशति । अथ स भर्त्सयति यः पाम्पिमहन् तं हनिष्यामीति ।

Public domain. Digitization Muthulakshmi Research Academy

इनो - अस्माकं नौसेना सिद्धा ।

ईरासः - सा इटलीं गमिष्यति सीजरं योद्धुम् । डोमिषियस ! अधुना त्वां द्रष्टुमिच्छति एन्टोनिः । तवेदं मया प्रथमं वक्तव्यमासीत् ।

इनो - नौसेनायुद्धं विनाशकरं भविष्यति । भवतु । माम् एन्टोनि-सकाशं नय ।

ईरासः - मामनुसर । (निष्क्रान्तौ ।)

तृतीयः अङ्कः षष्ठं दृश्यम् ।

(रोमनगरे सीजरस्य सौधम् । अग्रिप्पः मेसनसः सीजरश्च प्रविशन्ति ।)

सीजरः - अलेग्जेन्ड्रियायां सः अस्मानदूषयत् । तेन न व्यरमत् । इदं चाभवत् । स क्लियोपेट्रा च विपणिवीथ्यां रजतावृतवेदिकायां स्वर्णासनयोरुपविष्टौ । सिजेरियनस्तयोरन्या अनौरसी संततिश्च तयोः पादस्थाने उपविष्टाः । एन्टोनिस्तस्या अधीनतायाम् ईजिप्टस्य निर्धारणमकरोत् । किं च तां सिरियाया अधस्ताद्भागस्य सिप्रसस्य लिडियायाश्च राज्ञीं प्राकटयत् ।

मेसिनसः - अपि तेनेदं जनसम्मुखे कृतम् ?

सीजरः - जनसम्मुखे । स प्राकटयत् तस्य पुत्रा राज्ञां राजानो भविष्यन्तीति । मेडियां पार्थियाम् आर्मीनियां च अलेग्जेन्डरायादात् । सिरियां सिलिसियां फेनीसियां च टोलेमेरदात् । क्लियोपाट्राया देवताया इवालंकरणमभवत् । कथितं च सा एवमेवोत्सवेषु आगच्छतीति ।

मेसिनसः - इयं वार्ता रोमनगरं प्रेष्यताम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रिप्पः - तस्य रोषप्रवर्तनेन रोमजना असहना जाताः । इदं श्रुत्वा ते तं निश्शेषं त्यजेयुः ।

सीजरः - जना जानन्ति । तेन कृता अधिक्षेपाश्च तेषां कथिताः ।

अग्रिप्पः - स कमधिक्षिपति ?

सीजरः - मामधिक्षिपति । सिसिलीदेशे अस्माभिर्वशीकृते सेक्स्टसस्य पाम्पेः संपद्राशौ आत्मनो भागो न दत्त इति स मामधिक्षिपति । काश्चन नावस्स मां तात्कालिकोपयोगार्थमददात् । ता मया न प्रतिप्रेषिताः । लेपिडसः अधिकारादपनीत इति तस्य सर्वा संपन्मयैव गृहीतेति चाधिक्षिपति ।

अग्रिप्पः - एतेषामधिक्षेपाणां समाधानं कर्तव्यम् ।

सीजरः - समाधानं प्रेषितम् । दूतो मार्गे अस्ति । मया उत्तरं दत्तम् । लेपिडसः क्रूरः संजातः अधिकारं दूषयति तस्मादधिकाराद् भ्रंशित इति । युद्धेषु मया स्वाधीनीकृतायां संपत्त्यां तस्य भागो नूनं भवति। तद्वत् तेन संपादितायां ममापि भागो भवति । आर्मीनिया अन्यानि च राज्यानि तेनाक्रान्तानि ।

मेसेनसः - स सम्मतो न भवति ।

सीजरः - तर्हि वयमपि तस्यानुयोगान् नाङ्गीकुर्मः ।

(आक्टेविया प्रविशति परिजनसहिता ।)

आक्टेविया - प्रभो ! सीजर ! ममाभिनन्दनानि ।

सीजरः - शोचनीयमिदं निराकृता आगतासि ।

आक्टेविया - अनुचितं वदसि त्वम् ।

सीजरः - तर्हि कथमेवमागतासि विना शब्दम् । सीजरस्य स्वसृवत्

 In Public domain. Digitization Muthulakshmi Research Academy

त्वं नागता । एन्टोनेर्भार्यायाः सेना अपेक्ष्यते सहाया । अश्वानां हेषास्तामागच्छन्तीं सूचयेयुरागमनाद् बहुपूर्वम् । मार्गे वृक्षा आरूढैर्वीक्षकैः पूरिता भवेयुः । जनसंदोहा उद्विग्नाः प्रतीक्षेरन् त्वां द्रष्टुम् । सैनिकैरुत्क्षिप्ता धूलिराकाशं स्पृशेत्। त्वं तु आगता कापि ग्रामीणा स्त्रीव या स्ववस्तूनि गृहीत्वा विक्रेतुं विपणिं गच्छति । प्रेमप्रकटनादहं निरुद्धः । यदा प्रेम प्रकटितं न भवति तदा तत् प्रायशो नानुभूयते । समुद्रतीरे भूम्यां च त्वं मया सादरं स्वीकृत्यानीता स्याः । सर्वत्र तव प्रयाणे जनसमूहाभिनन्दनं भवेत् ।

आक्टेविया - प्रभो ! अहं स्वेच्छया एवमागतास्मि । न हि बलादेव प्रेषितास्मि । मम प्रभुर्मार्कः एन्टोनिरशृणोत् त्वं तस्योपरि युद्धसन्नाहान् करोषीति । यदा तेनाहमिदमुक्ता तदा स मयाभ्यर्थितस्त्वया सह मम मेलनम् ।

सीजरः - सपदि तेन त्वमनुमता यतस्त्वं तस्य कामस्यावरोधोऽसि ।

आक्टेविया - प्रभो ! एवं मा वद ।

सीजरः - तस्य चलनं मया परीक्षितम् । सर्वया नावा तस्य प्रवृत्तिरानीयते । त्वं किं चिन्तयसि स कुत्रास्तीदानीमिति ?

आक्टेविया - प्रभो ! स एथेन्सनगरेऽस्ति ।

सीजरः - न । त्वं वञ्चिता । क्लियोपेट्र्या स शिरःकम्पनेनेवाकारितः। सपदि स तत्र गतः । आत्मनो राज्यं स तस्यै कुस्त्रियै अददात् । इदानीं तौ मां प्रति युद्धाय राज्ञः संगृह्णीतः । लिब्याराजः कप्पडोसियाराजः अरेबियाराजः मेडेराजः अन्ये च बहवो राजानः ।

आक्टेविया - हा ! अहं वराकी । द्वयोः प्रिययोरहं विभक्तास्मि यौ

In Public domain. Digitization Muthulakshmi Research Academy

परस्परं हन्तुं कृतनिश्चयौ ।

सीजरः - तवात्र स्वागतमस्ति । मया एन्टोनिना सह संधेर्विच्छेदो न लिखित एतावत् । इदानीं त्वं दृष्टा तेन वञ्चिता । सन्नाहानां विलम्ब इदानीं प्रमादकरः । आत्मानमुपस्थापय । साम्प्रतिकी स्थितिस्त्वां न तुदतु । यद् गतं तद् गतम् । स्वागतं ते रोमनगरे तव गृहे । त्वत्तो मम प्रियतरा व्यक्तिर्नास्ति । तव तावानवमानः कृतो यावान् चिन्तयितुमप्यशक्यः। इदानीं देवा अस्माभिर्न्यायं कारयन्तु । समाश्वसिहि । अत्र सुखं वस ।

अग्रिप्पः - मान्ये ! स्वागतं तव ।

मेसेनसः - आर्ये ! स्वागतम् । रोमनगरे सर्वस्य त्वयि प्रेमास्ति दया च । व्यभिचारी गर्हणीयः स एन्टोनिस्त्वां त्यजति । स आत्मनः प्रभावं व्यभिचारिण्यै अददात् । सा तं प्रभावमस्मासु प्रयुङ्क्ते।

आक्टेविया - (सीजरं प्रति) मान्य ! अपीदं सत्यम् ?

सीजरः - निस्संदेहम् । स्वसः ! तवात्र स्वागतम् । आपतितं सहस्व। त्वमसि मम प्रियतमा स्वसा । (निष्क्रान्ताः ।)

तृतीयः अङ्कः : सप्तमं दृश्यम् ।

(एक्टियम् इति समुद्रतीरे एन्टोनेः युद्धशिबिरम् ।
क्लियोपेट्रा इनोबार्बसश्च प्रविशतः ।)

क्लियो - त्वां ऋजु वदामि निष्ठुरं च ।

इनो - किन्तु । केन हेतुना ?

क्लियो - अहमपि युद्धभूमिं गमिष्यामि । तत् त्वया प्रतिकूलितम् ।

In Public domain. Digitization Muthulakshmi Research Academy

इनो - अनेन हेतुना ?

क्लियो - अथकिम् । इदं युद्धं ममोपरि प्रकटितम् । तस्मादहं तत्र भविष्यामि ।

इनो - यदि त्वं युद्धे स्थास्यसि तर्हि एन्टोनेर्मनस्तदनु बुद्धिश्च सम्यग् युद्धे न लगेताम् । तत्र तस्य कश्चित् कालस्त्वदर्थं गच्छेत् । तथा तेन न कर्तव्यम् । इदानीमेव तस्य चपलप्रवर्तनमुद्दिश्य विमर्शः प्रचलति। रोमनगरे जना वदन्ति तवान्तःपुरजना युद्धं प्रवर्तयन्तीति ।

क्लियो - रोमनगरं समुद्रे पततु । अस्माकं विमर्शकानां जिह्वाश्छिद्यन्ताम् । अस्मिन् युद्धे मम भाराः सन्ति । अहमस्य राज्यस्य समस्तस्य राज्ञी अस्मि । पुरुषवत् मम कर्तव्यानि करिष्यामि । पुनर्मां प्रति विवादं मा कुरु । अहं युद्धमगत्वा न स्थास्यामि ।

इनो - वक्तव्यं मयोक्तम् । एष आयाति राजा ।

(एन्टोनिः केनिडियसश्च प्रविशतः ।)

एन्टोनिः - केनिडियस ! किमिदमाश्चर्यकरं नास्ति स बहुदूरात् शीघ्रमागम्य स्थलमाक्रमतेति ? प्रिये ! अपीदं त्वया श्रुतम् ?

क्लियो - अलसादन्यः कोऽपि वेगं न श्लाघते ।

एन्टोनिः - अयमुपालम्भो युज्यते । श्लाघ्यतमस्यापि पुरुषस्यालसता उपालम्भनीया । केनिडियस ! वयं तं समुद्रे योत्स्यामहे ।

क्लियो - समुद्रे । कः संदेहः ?

केनिडियसः - प्रभो ! किमेवम् ?

एन्टोनिः - स सीजरः अस्मान् समुद्रे आह्वयते ।

इनो - त्वयापि स द्वन्द्वयुद्धायाहूतः ।

In Public domain. Digitization Muthulakshmi Research Academy

केनिडि - अपि च त्वया स फार्सालियायां योद्धुमाहूतो यत्र जूलियसः सीजरो महान्तं पाम्पिमयुध्यत । किन्तु सीजरस्तदाह्वानद्वयं नाङ्गीकृतवान् । यत्र तस्याधिक्यं न भवति तत्र स युद्धं न स्वीकरोति । एवं त्वया च कर्तव्यम् ।

इनो - तव नाविका असमर्थाः । ते अश्वतरचालकाः कर्षकाश्च । ते शीघ्रं गृहीता अल्पशिक्षिताश्च । सीजरस्य नौसेना पाम्पिं प्रति युद्धे लब्धानुभवा । तस्य नावः शीघ्राः । तव मन्दाः । समुद्रयुद्धप्रत्याख्यानं तवावमानाय न भवति । भुवि युद्धाय त्वं सन्नद्धोऽसि ।

एन्टोनिः - न । अहं समुद्रे योत्स्ये ।

इनो - परममान्य ! आर्य ! यदि तथा करिष्यसि तर्हि भुवि तव सर्वाणि आधिक्यानि त्यक्ष्यसि । तव सेनां विभजिष्यसि । सा तु कठोरपदातिसमूहः । तव प्रशस्तयुद्धविज्ञानमनुपयुक्तं भविष्यति । निश्चितविजयानि विधानान्युत्सृज्य दैवाधीनान्यनुसरिष्यसि ।

एन्टोनिः - अहं समुद्रे योत्स्ये ।

क्लियो - मम षष्टिर्नावः सन्ति । सीजरस्याधिका न सन्ति ।

एन्टोनिः - अधिका नावो धक्ष्यामः । शिष्टाः पर्याप्तैर्नाविकैः सन्नद्धाः करिष्यामः । एक्टियमात् प्रस्थायागच्छन्तं सीजरं प्रहरिष्यामः । यदि तत्र विफला भविष्यामस्तर्हि पश्चाद् भुवि योत्स्यामहे ।

(दूतः प्रविशति ।)

किं तव कार्यम् ?

दूतः - सा वार्ता सत्या । प्रभो ! सीजरो दृष्टः । तेन टोरैनं वशीकृतम् । (स निष्क्रान्तः ।)

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - इदमसाध्यम् । तस्य सेना तत्रास्तीत्याश्चर्यकरम् । केनिडियस । त्वमूनविंशतिलेजियनान् पदातीन् द्वादश सहस्राणि आश्विकांश्च गृहीत्वा भूम्यां तस्याभियोगं कुरु । वयं नौभिर्गमिष्यामः । क्लियोपेट्रे ! आगच्छ । त्वं समुद्रदेवतासि ।

(सैनिकः प्रविशति ।)

का वार्ता वीर सैनिक !

सैनिकः - मान्य ! राजन् ! समुद्रे मा युध्यस्व । बलहीनानि दारुफलकानि मा विश्वसिहि । किं तव विश्वासो नास्ति अस्मिन् खड्गे आसु क्षतिषु च ? अस्माकमीजिप्टदेशीया फेनीसियादेशीयाश्च ये केचन प्लवनविशारदाः सन्ति ते जले तरन्तो गच्छन्तु । वयं भुवि स्थित्वा विजेष्यामहे यत्र वयमनुभवशालिनः ।

एन्टोनिः - सत्यं सत्यम् । गच्छामः ।

(एन्टोनिः क्लियोपेट्रा इनोबार्बसश्च निष्क्रान्ताः ।)

सैनिकः - सत्यमुक्तं मया ।

केनिडि - सैनिक ! त्वया सत्यमुक्तम् । किन्तु एन्टोनेर्निर्णयाः स्वानुभवेन न क्रियन्ते । अस्माकं नायको नीयते । वयं स्त्रियमनुसरामः।

सैनिकः - भुवि तव पदातय आश्विकाश्च सह भवन्ति । एवं ननु ?

केनिडि - मार्कसः आक्टेवियसः मार्कसः जस्टियसः पब्लिकोलः केलियसश्च समुद्रेण गमिष्यन्ति । अस्माकं भूसेना तु अविभक्ता शत्रुमयुध्यमाना च तिष्ठति । सीजरस्य वेगो विश्वासमतिक्राम्यति ।

सैनिकः - रोमे स्थितः स विविधकपटवेषान् सैनिकान् प्राहिणोत् यैरस्माकं स्पशा वञ्चिताः ।

In Public domain. Digitization Muthulakshmi Research Academy

केनिडि - कस्तस्य सेनापतिः ?

सैनिकः - टारसनामा कश्चित् ।

केनिडि - अहं तं बाढं जानामि ।

(दूतः प्रविशति ।)

दूतः - महाराजः केनिडियसमाकारयति ।

केनिडि - साम्प्रतिकः कालः प्रसवसमये स्त्रीवदस्ति । क्षणे क्षणे काचिन्नूतना वार्ता भवति । (निष्क्रान्ताः ।)

तृतीयः अङ्कः अष्टमं दृश्यम् ।

(एक्टियमसमीपे समभूमिः । सीजरः टारसश्च प्रविशतः पदक्रमेण चलन्त्या सेनया सह ।)

सीजरः - टारस !

टारसः - प्रभो !

सीजरः - भूम्यामभियोगं मा कुरु । सर्वां सेनां संघटितां स्थापय । समुद्रयुद्धं प्रथमं समाप्तं भवतु । ततः पूर्वं भूयुद्धं मा प्रेरय। अत्र लिखितं ममादेशं मा अतिक्रमस्व । (तस्मै एकं पत्रं यच्छति । अस्माकं भाग्यमस्मिन् भवति । (निष्क्रान्तौ)

तृतीयः अङ्कः नवमं दृश्यम् ।

(तत्रैवान्यस्थले । एन्टोनिः इनोबार्बसश्च प्रविशतः ।)

एन्टोनिः - अस्य पर्वतस्यापरपार्श्वे अस्मत्सैन्यानि स्थापय यतः सीजरस्य नौसेना दृश्येत । तस्मात् प्रदेशात् सीजरस्य नौसंख्यां ज्ञास्यामः तदनुगुणमस्माकं कल्पयामः (निष्क्रान्तौ ।)

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयः अङ्कः : दशमं दृश्यम् ।

(सेनासहितः केनिडियसो रङ्गभूम्यामेकस्मिन् मार्गे प्रचलति। एवं सीजरस्य सेनापतिः टारसस्तदभिमुखमन्यमार्गे प्रचलति। एवं तेषां निर्गमनानन्तरं समुद्रे युद्धस्य शब्दः श्रूयते । तूर्यध्वनिः । इनोबार्बसः प्रविशति ।)

इनो - वयं विध्वस्ताः ! विध्वस्ताः ! विध्वस्ताः ! अतः परमहं द्रष्टुमशक्तोऽस्मि । ईजिप्टदेशध्वजयुता एन्टोनियडनामा नौः षष्ट्या ईजिप्टनौभिः सह परिवृत्य पलायिता । तत् पश्यतो मम नेत्रे विनष्टे ।

(स्कारसः प्रविशति ।)

स्कारसः - बत बत । हे सर्वाः पुरुषदेवताः स्त्रीदेवताश्च !

इनो - का तव बाधा ?

स्कारसः - प्रपञ्चे अस्माकमधिकभागो नष्टो महता मूढत्वेन । उद्वेगेनास्माभिः राज्ये अधिकभागाः क्षिप्ताः ।

इनो - कथं दृश्यते प्रवर्तमानं युद्धम् ?

स्कारसः - युद्धे तीव्रं प्रचलति कतरस्यापि पक्षस्य जये अनिश्चिते अस्माकमीषदाधिक्यतायां सत्याम् अकस्माद् भीता स्वस्या नावं परावर्त्य पलायिता सा स्त्री ।

इनो - अहं तदपश्यम् । मम नेत्रे तद् द्रष्टुमशक्ते जाते ।

स्कारसः - यदा सा परावृत्ता स वीर एन्टोनिः प्रेम्णा ध्वस्तः स्वस्य च नावं परावर्त्य तामनुसृतः कामातुरः कुक्कुटः कुक्कुटीमिव । युद्धे महातीव्रस्थित्यां सति स तद् विसृज्य गतः । तादृशं लज्जाकरं कार्यं न मया दृष्टपूर्वम् । स आत्मन एवानुभवं पराक्रमं मान्यतां चादूषयत् । तदा

In Public domain. Digitization Muthulakshmi Research Academy

सर्वा नावः परावृत्य पलायिताः ।

इनो - बत बत । ततः परं मया न दृष्टम् ।

(केनिडियसः प्रविशति ।)

केनिडि - समुद्रयुद्धे वयं नष्टाः । यद्यस्मन्नायकः पूर्ववत् प्रावर्तत अस्माभिर्जितं स्यात् । यत् स युद्धं त्यक्त्वा गतस्तदस्माकमप्युदाहरणं भवति ।

इनो - किं त्वमितः अपगमनं चिन्तयसि ?

केनिडि - ते पलायिताः पेलोपोन्नेससं प्रति ।

स्कारसः - स मार्गः सुगमः । तत्र गत्वा तेषामनन्तरकार्यं निरूपयिष्यामि । (निष्क्रान्तः ।)

केनिडि - मम पदातिसेनाविभागान् आश्विकसैन्यं च सीजरायार्पयिष्यामि । षड् राजानः सीजरस्याधीना अभवन् पूर्वमेव । अहंताननुसरामि। (निष्क्रान्तः ।)

इनो - अहमेन्टोनिमनुसरन्नेव भवामि यद्यपि तस्य स्थितिर्हीना विवेकश्च मामन्यथा कर्तुं वदति । (निष्क्रान्तः)

तृतीयः अङ्कः एकादशं दृश्यम् ।

(अलेग्जेन्ड्रियायां क्लियोपेट्रायाः सौधम् ।

परिजनसहित एन्टोनिः प्रविशति ।)

एन्टोनिः - शृणुत ! इयं भूमिर्मामादिशति ममोपरि मा चलेति । मम पदन्यासं वोढुं सा लज्जते । सुहृदः ! इत आगच्छत । अहं पूर्णरूपेण नष्टोऽस्मि। ममैका नौरस्ति कोशपूर्णा । तं गृहीत्वा विभजत । इतः

In Public domain. Digitization Muthulakshmi Research Academy

पलायध्वं सीजरं शरणं गच्छत ।

सर्वे - पलायनम् ? न वयम् ।

एन्टोनिः - अहमेव पलायितोऽस्मि । भीरूणामहमुदाहरणमभवं पलायने। सुहृदः ! गच्छत । मयैकं विधानं निश्चितं यत् युष्माकं सहायतां नापेक्षते। मां विसृजत । मम निधिरस्ति नौकाश्रये। तं गृह्णीत । हा हा । मया तद् विधानमनुसृतं यत् स्मृत्वेदानीं मम लज्जा जायते । मम केशा अपि तस्मिन् विषये परस्परं कुप्यन्ति । मम श्वेतकेशा धूसरकेशान् निन्दन्ति अनवधानतायाः कृते । धूसरकेशाः श्वेतकेशान् निन्दन्ति भीरुत्वान्मूढत्वाच्च। सुहृदः ! इतो गच्छत । अहं लेखान् ददामि युष्माकं कृते येन मम सुहृदः सहायतां कुर्युः । शोकं मा कुरुत अनिष्टतां मा वदत । मम नैराश्यात् स्थितिमवगच्छत । त्यजत तं येन स्वयं स एव त्यक्तः । शीघ्रं नौकाश्रयं गच्छत । तत्र कोशं गृह्णीत । क्षणं मां विसृजत । क्षणकालमेव । पुनर्युष्मान् द्रक्ष्यामि । (उपविशति ।)

(छार्मियाना ऐरासा ताभ्यामवलम्बिता क्लियोपेट्रा ताः अनुसरन् ईरासश्च प्रविशन्ति ।)

ईरासः - आर्ये ! सान्त्वय तम् ।

ऐरासा - देवि ! एवं कुरु ।

छार्मि - त्वया तस्य सान्त्वनं कार्यम् । किमन्यत् ?

क्लियो - उपविशामि । हतविधे ! (उपविशति ।)

एन्टोनिः - न न न न ।

ईरासः - आर्य ! किमिमां पश्यसि ?

एन्टोनिः - बत बत लज्जावहम् ।

In Public domain, Digitization Muthulakshmi Research Academy

छार्मि - आर्ये !

ऐरासा - आर्ये ! देवि !

ईरासः - आर्य ! आर्य !

एन्टोनिः - (स्वगतम्) एवं खलु । सत्यं तत् । फिलिप्पियुद्धे सीजरः खड्गं कोशे न्यधात् नर्तक इव । मया सैन्यानि चालितानि । कृशो वलिनमुखः केशियसः उन्मादी ब्रूटसश्च मया खण्डितौ । एष सीजरो युद्धे सेनानायकानाश्रयत् । सेनाचालने युद्धनिर्वहणे च तस्यानुभवो नासीत्। इदानीं तु..... भवतु भवतु ।

क्लियो - मां गृह्णीत ।

ईरासः - प्रभो ! पश्य देवीम् ।

ऐरासा - देवि ! उपगच्छ । तं वद । स लज्जया व्याकुलः ।

क्लियो - मां गृह्णीत ।

ईरासः - आर्य ! उत्तिष्ठ । देवी उपगच्छति । सा सान्त्वयितव्या ।

एन्टोनिः - मया मम यशो विनाशितम् । लज्जावहो दोषो मया कृतः।

ईरासः - आर्य ! एषा राज्ञी ।

एन्टोनिः - बत बत ईजिप्ट ! कुत्राहं त्वया नीतः ? पश्य । त्वामहम् ऋजु द्रष्टुं न शक्नोमि लज्जया । पश्चाद् दृष्ट्वाहं मम गतं पश्यामि इदानीं मत्कृतेनावमानकरकार्येण विनाशितम् ।

क्लियो - प्रभो । मम प्रभो ! क्षमस्व नावं विसृज्य भयेन मम पलायनम्। मया न चिन्तितं त्वं मामनुसरिष्यसीति ।

एन्टोनिः - देवि ! त्वं जानासि मम मनस्तव नावि बद्धमिति । त्वया सह मामपि कर्षेरिति । त्वं जानासि मम सर्वा चेतना तवाधीनास्ति तव

In Public domain. Digitization Muthulakshmi Research Academy

संज्ञामात्रेण देवानामप्यादेशं न गणयामीति ।

क्लियो - हा हा । क्षमस्व ।

एन्टोनिः - इदानीं मया शान्तिप्रस्तावः कार्यस्तेन यूना सीजरेण सह। मया सर्वविधानि विनम्रवचनान्युपयोज्यानि । पतितभाग्येनोपयोज्याः सर्वाः प्रक्रिया उपयोज्याः । मया प्रपञ्चस्यार्धेन यथेच्छं क्रीडितम् । मया जनाः स्थानेषु स्थापिताः पातिताश्च यथेच्छम् । त्वं जानासि मम सर्वं चिन्तनं त्वया प्रभावितमिति । जानासि च त्वं त्वयि प्रेम्णा दुर्बलीकृतो मम खड्गस्तव प्रेम्ण एव विधेयो भवति यद् भवेत् तद् भवेन्नाम ।

क्लियो - क्षमस्व क्षमस्व ।

एन्टोनिः - अश्रु न मुञ्च । एकमपि न मुञ्च । एकस्तव नेत्राद् बाष्पः सर्वस्य विभवस्य नष्टस्य जितस्य वा समो भवति । एकं चुम्बनं प्रयच्छ। तदेव मम पर्याप्तं भवति । अस्मत्पुत्राणामध्यापको मया प्रेषितः सीजरसकाशम् । अपि स प्रत्यागतः? प्रिये! अहं दुःखेन भरितोऽस्मि । हे परिचारकाः ! मद्यमानीयतां भोज्यं च । भाग्यं जानाति यदा तदस्मान् पीडयति तदा तदस्माभिर्भृशं निन्द्यते इति । (निष्क्रान्ताः ।)

तृतीयः अङ्कः द्वादशं दृश्यम् ।

(ईजिप्टे सीजरस्य शिबिरम् । सीजरः अग्रिप्पः डोलबेल्लः थैरियसः अन्ये च प्रविशन्ति ।)

सीजरः - एन्टोनिना प्रेषितो दूत आगच्छतु । अपि त्वं तं जानासि?

डोलेबेल्लः - स तस्य पुत्राणामध्यापकः । यत् तादृशः अल्पो दूतः प्रेषितस्तज्ज्ञायते वैभवात् तस्य पतनम् । नातिदीर्घः कालो गतस्तस्य

In Public domain, Digitization Muthulakshmi Research Academy

सकाशे राजान आसन् । राजसदृशा दौत्येषु प्रेषिताः ।

(यूफ्रोनियसः एन्टोनेर्दूतः प्रविशति ।)

सीजरः - पुरस्तादागच्छ वद च ।

दूतः - अहमल्प एन्टोनिना प्रेषितः । नाचिरात् प्रागहं व्यवहारेषु तृणप्रायः अल्प आसम् ।

सीजरः - एवमस्तु । वद तव दौत्यम् ।

दूतः - विधेय एन्टोनिर्विज्ञापयति भवान् तस्य भाग्यस्य प्रभुरिति। ईजिप्टे निवस्तुं तवानुज्ञामर्थयते । यदीदं निराक्रियते तर्हि सः अभ्यर्थयते एथेन्से साधारणपौरवद् जीवितुमनुज्ञाम् । इयमेव तस्याभ्यर्थना । क्लियोपेट्रा तव महत्त्वमङ्गीकरोति तवाधिपत्यं च । सा अर्थयति ईजिप्टराज्याधिकारो य इदानीं तवाधीनोऽस्ति स आत्मनः पुत्रेषु कृपया स्थाप्यतामिति ।

सीजरः - एन्टोनेरभ्यर्थनं मया निराक्रियते । राज्ञ्या अभ्यर्थनं परि-शील्यते यदि सा नीचं तं सखायम् ईजिप्टान्निष्कासयति हन्ति वा । यदि तत् सा करिष्यति तर्हि तस्या अभ्यर्थनं श्रोष्यामि । एवं ममोत्तरं तौ शृणुताम् ।

दूतः - सदा तव सुभाग्यमस्तु ।

सीजरः - रक्षक ! एष शिबिरात् क्षेमं नीयताम् ।

(रक्षकैः सह दूतो निष्क्रान्तः ।)

(थैरियसं प्रति) इदानीं समयस्तव वाक्चातुर्यप्रयोगस्य । शीघ्रं गच्छ। क्लियोपेट्राम् एन्टोनितः पृथक् कुरु । सर्वास्तस्या अभ्यर्थना अहं निर्वर्तयिष्यामि । यथावश्यकं तथा कानिचनाधिकप्रदानानि च सूचय स्वबुद्ध्या विचिन्त्य । सुकृते एतस्मिन् कार्ये तव महत् पारितोषिकं

Public domain. Digitization Muthulakshmi Research Academy

भविष्यति ।

थैरियसः - सीजर ! अहं गच्छामि ।

सीजरः - एन्टोनिं परिशीलय । पराजयेन तस्य का स्थितिः ? किं स चिकीर्षतीति ।

थैरियसः - सीजर ! एवं करिष्यामि । (निष्क्रान्ताः ।)

तृतीयः अङ्कः त्रयोदशं दृश्यम् ।

(अलेग्जेन्ड्रियायां क्लियोपेट्राया भवनम् । क्लियोपेट्रा इनोबार्बसः छार्मियाना ऐरासा च प्रविशन्ति ।)

क्लियो - इनोबार्बस ! इदानीं वयं किं कुर्मः ?

इनो - नैराश्येन मरिष्यामः ।

क्लियो - कस्यायं दोषः ? एन्टोनेरुत मम ?

इनो - एन्टोनेरेव । उद्वेगेन तस्य विवेक आक्रान्तः । अस्माकं नावः शत्रोश्च नावः परस्परं भयंकरप्रहारानकुर्वन् । तदा त्वया भयंकराद् युद्धाद् द्रुतम् । किमर्थं स त्वामन्वसरत्? अस्तु त्वयि तस्य प्रेम । किन्तु तदर्थं स तत्र नायकस्थानमजहात् । प्रपञ्चस्यार्धभागः अन्यार्धभागेन युध्यते स्म तदा । स तदा स्थानं त्यक्त्वा पलायमानां तव नावमनुसृत्य गतः सर्वैर्निरीक्ष्यमाणः ।

क्लियो - अथ तूष्णीं भव । इयं ममाभ्यर्थना ।

(अध्यापको दूतः एन्टोनिश्च प्रविशतः ।)

एन्टोनिः - तत् तस्य प्रतिवचनम् ?

दूतः - प्रभो ! एवम् ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - राज्ञीं प्रति तस्य समुचितं प्रवर्तनं भविष्यति मयि समर्पिते?

दूतः - तत् तस्य वचनम् ।

एन्टोनिः - इदं राज्ञी उच्यताम् । (क्लियोपेट्रां प्रति) तस्मै दारकाय मम वयोऽतिगं शिरः प्रेषय स च तवाभ्यर्थितानि राज्यानि दास्यति ।

क्लियो - प्रभो । किं वदसि ?

एन्टोनिः - (दूतं प्रति) पुनस्त्वं गच्छ । वद च । तव कपोलयोर्यौवनस्यारुणिमा शिष्यते । लोकस्तव सकाशात् किमपि व्यक्तिगतं विशेषकार्यमपेक्षते। सा संपत् तन्नौकाबलं ताः सेनाश्च यदि कस्यापि कातरस्य स्युस्तस्य मन्त्रिणो विजयं प्राप्नुयुः स्यात् तेषां नायकः कश्चिद् बालः सीजरवत् । सर्वमिदं पार्श्वे स्थाप्यताम् । भवान् गतवयसा भाग्यहीनेन मया द्वन्द्वयुद्धं करोतु। आवां द्वावेव खड्गः खड्गं प्रति । इमां युद्धाकारणां लिखामि । आगच्छ ।

(एन्टोनिर्दूतश्च निष्क्रान्तौ ।)

इनो - (स्वगतम्) सीजरः अज्ञानी नास्ति सर्वं स्थितिबलं त्यक्त्वा खड्गहस्तो द्वन्द्वयुद्धं गन्तुम् । दशामनुसृत्य मनुष्यस्य चिन्तनविवेकः प्रभावितो भवति । भाग्यैः सह प्रवर्तनविधानमपि परिवर्तते । एन्टोनिर्यत् सीजरं द्वन्द्वयुद्धायाह्वयति स तस्याविवेकः । सीजर ! त्वया एन्टोनेर्न केवलं सैन्यं विवेकश्च पराजितः ।

(सेवकः प्रविशति ।)

सेवकः - सीजराद् दूतः ।

क्लियो - किं न जानासि सगौरवमिदं वक्तव्यमिति ? भोः स्त्रियः । सभाग्यां मां प्रति कथमासीत् तेषां प्रवर्तनम् इदानीं पतितभाग्यां मां प्रति

 In Public domain. Digitization Muthulakshmi Research Academy

कथमस्ति । नूतनं जपापुष्पं सर्वः सानन्दं जिघ्रति । तदेव म्लानं परिहरति। दूत आगच्छतु ।

(सेवको निष्क्रान्तः ।)

इनो - (स्वगतम्) मम सेवाधर्मः आकाङ्क्षाश्च परस्परं विरुन्धन्तीदानीम् । यो मूर्खान् भक्त्या सेवते स सेवां मूर्खां करोति । तथापि गतभाग्यं स्वामिनं यः सानुरागं सेवते स श्लाघ्यो भवति चरित्रे सगौरवं कथ्यते ।

(थैरियसः प्रविशति ।)

क्लियो - कः सीजरस्य निर्णयः ?

थैरियसः - अहं भवतीमेव वक्तुमिच्छामि ।

क्लियो - अत्र सर्वे सुहृदः सन्ति । स्वैरं वद ।

थैरि - किन्तु ते एन्टोनेरपि सुहृदो भवेयुः ।

इनो - सम्प्रति एन्टोनिर्बहून् सुहृदः अपेक्षते । यावन्तः सीजरस्य सुहृदः सन्ति तावत एन्टोनिरप्यपेक्षते । अथ वा दुःस्थितो पतितस्य तस्य मित्रैः प्रयोजनं न भवेत् । यदि सीजरो न प्रत्याख्याति तर्हि एन्टोनिस्तस्य मैत्रीमपेक्षते । वयं तु एन्टोनेरनुचराः स्मः यस्य प्रभुरस्ति सीजरः । तस्मात् सीजरः अस्माकं प्रभुरस्ति ।

थैरि - अस्तु । एष सीजरस्य संदेशः । मान्ये राज्ञि । साम्प्रतिकीं स्थितिं प्रति तव चिन्ता मास्तु । नाहमाक्रमणकर्ता । उदारः सीजरोऽहम्। एवं जानीहि ।

क्लियो - महाराजः स उदारभाषी च । उच्यतां तस्याभिप्रायः ।

थैरि - स जानाति त्वया एन्टोनिर्भयादेव सह कृतो न प्रेम्णा ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - अहो !

थैरि - अतस्तेन खिद्यते त्वया कृतान्यकार्याणि बलात् कृतानि न तु स्वेच्छया ।

क्लियो - सीजरो देवतुल्यः । स सत्यं जानाति । मया एन्टोनेः कृतः सम्मानः स्वेच्छया न कृतः । बलाद् भयाच्च कृतः ।

इनो - (स्वगतम्) इदमेन्टोनिं पृष्ट्वा निर्धारणं करिष्यामि । मान्य ! मान्य ! त्वमिदानीं सरन्ध्रा नौरिवासि । तव प्रियतमास्त्वां त्यजन्ति । अस्माभिरपि त्वं त्याज्यः । (बहिर्गच्छति ।)

थैरि - अप्यहं सीजरं वदामि भवती यदिच्छति ? तव सहायतां कर्तुमवसरं सः अभ्यर्थयते । यदि त्वं तस्य प्रभुत्वं तवावलम्बनार्थमाधारं मन्यसे तर्हि तस्य प्रीतिर्भवति । तस्य हर्षो भवति यदि त्वं वदसि अहमेन्टोनिमत्यजं सीजरस्य रक्षणे अस्मीति । प्रपञ्चप्रभोः सीजरस्य ।

क्लियो - किं तव नाम ?

थैरि - मम नाम थैरियसः ।

क्लियो - हे कारुणिक दूत ! त्वां मध्यवर्तिनं कृत्वा सीजरमहमिदं वदामि । विजयिनस्तस्य हस्तमहं चुम्बामि । अहं मम किरीटं तस्य पादयोरर्पयित्वा नता भवितुं सम्मतास्मि । तस्य वचनं श्रोतुमहं निरीक्षे । यस्य वचसः सर्वे विधेयाः सन्ति तस्याज्ञाया अहं विधेयास्मि मम भाग्यं प्रति ।

थैरि - तत् तवोचितं प्रवर्तनम् । यदा भाग्यं प्रतिकूलं भवेत् यदि तदा विवेकः उपयुज्यते तर्हि तस्य क्षयो न भवति । तव पाणिचुम्बनेन त्वां मानयितुं मामनुजानीहि ।

 In Public domain. Digitization Muthulakshmi Research Academy

(स तस्याः पाणिं चुम्बति ।)

क्लियो - तव आक्टेवियसस्य सीजरस्य पिता यदा राज्यान्याक्रमितुमैच्छत् तदा स ममानर्हपाणौ चुम्बनान्यवर्षत् ।

(एन्टोनिः इनोबार्बसश्च पुनः प्रविशतः ।)

एन्टोनिः - (इनोबार्बसं प्रति) किं सा तं बहुधा अनुगृह्णाति ? (थैरियसं प्रति) कस्त्वम् ?

थैरि - भुवि महाशक्तिशालिनो महाभाग्यशालिन आज्ञाकरोऽहम्। अहमस्मि सेवकस्तस्य योग्यतमस्याप्रतिहताज्ञस्य सीजरस्य ।

इनो - (स्वगतम्) त्वं वेत्रप्रहारान् प्राप्स्यसि ।

एन्टोनिः - मम सेवकाः ! इत आगच्छत । हे नीच ! देवैः पिशाचैश्चाहं शपामि । मम प्रभावो नश्यति । अतिनिकटभूतेऽपि काले यदा मया भोः इति उच्चैरुक्तं तदा मम वचनं प्रतीक्षमाणा इव राजानः सत्वरमागच्छन् का तवेच्छेति उच्चैर्वदन्तः । (सेवकान् प्रति) किं यूयं न शृणुथ ? अहमिदानीमप्येन्टोनिरस्मि ।

(सेवकः प्रविशति अन्यैरनुसृतः ।)

इमं गर्वितं नीचं नयत वेत्रेण प्रहरत च ।

इनो - (स्वगतम्) सिंहशिशुना क्रीडितुं शक्यते न तु म्रियमाणेन वृद्धसिंहेन ।

एन्टोनिः - इयं ममाज्ञा । इमं वेत्रेण प्रहरत । भवत्वेष सीजरं प्रणतेषु विंशत्यां महाराजेषु अन्यतमः । इमं वेत्रेण प्रहरत । एष मया दृष्टस्तस्याः पाणिं प्रति यथेच्छं प्रवर्तमानः । किं तस्या नामेदानीम् ? एषा पुरा क्लियोपेट्रा आसीत् । इदानीमेषा अन्यास्ति यतः अन्यथा प्रवर्तते । वेत्रेण

In Public domain. Digitization Muthulakshmi Research Academy

तं प्रहरत। शिशुवद् रोदितु दयां कुरुत इत्याक्रोशतु। तावत् तं प्रहरत। नयत एनम्।

थैरि - मार्क ! एन्टोने !

एन्टोनिः - तं बलात् कर्षत। वेत्रेण प्रहृत्य पुनरानयत। एष नीचो मम संदेशं सीजरं नेष्यति। (सेवकाः थैरियसं नयन्ति।) क्लियोपेट्रे ! यदा मम तव परिचयोऽभवत् तदा तव सम्मानस्यार्धं नष्टपूर्वमेव। बत ! अहं मम धर्मपत्नीं रोमनगरे अत्यजम्। औरसपुत्रप्राप्तिं व्यनाशयं तामपि तस्मिन् स्त्रीरत्ने। सर्वमिदं मया कृतं त्वदर्थम्।

क्लियो - हे प्रभो !

एन्टोनिः - त्वमसि सर्वदा असत्यभाषिणी। यदास्माकं दुर्गुणा अस्माकमाचारा भवन्ति हा एतत् शोचनीयं सत्यं विवेकिनो देवा अस्मानन्धान् कुर्वन्ति विचारणशक्तिमाच्छादयन्ति च। तदा वयमस्माभिः कृतैः कुकर्मभिरेव प्रीता भवामः। तदा ते अस्मान् विनश्यतः समोदमपहसन्ति।

क्लियो - बत ! एवं वदसि।

एन्टोनि - त्वं मया प्रथममासादिता जूलियसस्य सीजरस्य कामिनी। स मृतः। तदा त्वं पात्रे केनापि त्यक्त आहारलेशवदासीः। पश्चात् त्वं नेयसस्य पाम्पेर्भुक्तत्यक्ता चासीः। केषाञ्चनान्येषां च येषां नामानि न कथितानि। को नामेन्द्रियसंयम इति त्वया श्रुत एव स्यात् न तु अनुभूतः।

क्लियो - किमिदं सर्वम् ?

एन्टोनिः - तव पाणिर्मयोपयुक्तो बहुभी राजभिश्च। तं त्वमददास्तस्मै अधमाय सेवकाय।

(सेवकास्थैरियसश्च पुनः प्रविशन्ति।)

In Public domain. Digitization Muthulakshmi Research Academy

अपि स वेत्रेण प्रहृतः ?

प्रथमःसेवकः - प्रभो ! सुष्ठु ताडितः ।

एन्टोनिः - अपि तेन रुदितं दयां प्रार्थयमानेन ?

प्रथमः सेवकः - सः अरोदीत् दयां च प्रार्थयत ।

एन्टोनिः - (थैरियसं प्रति ।) यदि तव पिता अद्य जीवति स त्वदर्थं दुःखितो भवतु यदि पुत्री अभवः तर्हि एषः अवमानः तव प्राप्तो न स्यादिति । सीजरस्य विजययात्रायां तमनुसर्तुं त्वं दुःखितो भवेर्यतस्त्वं वेत्रेण प्रहृतस्तस्यानुसरणेन । अद्य प्रभृति मान्यस्त्रीणां श्वेतपाणिं यदैव पश्येस्तदैव भयकम्पितो ज्वरित इव भवेः । सीजरं प्रतिगच्छ । वद अस्माभिस्तव क आचारः कृतः । इदमवश्यं तं वद । गर्वितः स मामवजानाति । स ममेमां स्थितिं पश्यति । पूर्वं तेन सह स्थितं मां न गणयति । स मां कोपयति । सम्प्रति मम प्रकोपनं सुलभं यतो मम भाग्यतारा मां व्यसृजन्। यदि मम वचनैः कार्यैश्च सः अप्रीतो भवेत् तर्हि तं ज्ञापय तस्य सकाशे अस्ति हिप्पार्खसः जन्मदासो मया मोचितः । स कशया ताड्यतां पीड्यतां च । कण्ठबन्धनेन हन्यतां वा यथा स इच्छेत् तथा । इदं सर्वं वद । गच्छ । तव कशाघाताङ्कान् सह नय ।

(थैरियसो निष्क्रान्तः ।)

क्लियो - अपि तव कोपभाषणमवसितम् ?

एन्टोनिः - अस्माकं सुभाग्यचन्द्र इदानीमुपरक्तः । इदं भविष्यं वदति एन्टोनेर्मरणम् ।

क्लियो - (स्वगतम्) अस्य कोपवचसामवसानं भवतु । तावदहं प्रतीक्षे।

एन्टोनि - सीजरं प्रीणयितुं किं त्वं तस्य सेवकेनापि सह प्रियभाषणं

In Public domain- Digitization Muthulakshmi Research Academy

कुर्याः ?

क्लियो - किं त्वं मां न जानासि ?

एन्टोनिः - किं त्वं मां प्रति उदासीनासि ?

क्लियो - यद्येवं स्यात् तर्हि ममोदासीनहृदयात् शिलावृष्टिर्निपततु । प्रथमा शिला मम कण्ठे पततु । तया शिलया सह मम जीवितमपि द्रवीभवतु । अनन्तरशिला मम पुत्रे सिजेरियने पततु । एकैकशः शिला मम पुत्रेषु मम ईजिप्टजनेषु च पतन्तु । तस्मिन् शिलावर्षे सर्वा मम प्रजा हन्यन्तां मशकमक्षिकादिभिराव्रियन्तां च ।

एन्टोनिः - अलमलम् । अनेनाहं शान्तः । सीजरः अलेग्जान्ड्रियायां शिबिराण्यकल्पयत् । तं तत्राहं योत्स्ये । अस्माकं भूसेना वीरसम्पन्ना सुस्थिता च । नौसेना पुनः संघटिता समुद्रवद् भीषणा च । मम पराक्रमो मां पुनरागतः । क्लियोपेट्रे । शृणु मम वचनम् । यद्यहं युद्धरङ्गात् प्रत्यागमिष्यामि तवौष्ठौ च चुम्बिष्यामि तदा शत्रुरक्तेनाच्छादितो भविष्यामि। मम खड्गः अहं च चरित्रे स्थानं प्राप्स्यावः । इदानीमप्याशा अस्ति ।

क्लियो - इमानि वीरस्य मम प्रभोर्वचनानि ।

एन्टोनिः - अहं त्रिगुणः सैनिको भविष्यामि । बलेन विक्रमेण धैर्येण च। अहं क्रूरयुद्धं करिष्ये । तेषु दिनेषु यदा दैवं मया सह स्थितं युद्धे मया बद्धानां मोचनं दत्तं प्रीतिवचनैः । इदानीं तु यो यो मां प्रति आगमिष्यति तं तं हनिष्यामि । आगच्छ । अद्य नक्तं विनोदोऽस्तु । सर्वान् विषण्णान् मम नायकानाह्वय । मद्यपात्राणि पूर्यन्ताम् । पानं प्रचलतु मध्यरात्रं यावत् ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - अद्य मम जन्मदिनम् । तत् प्रशान्तं गमयितुं मया चिन्तितम्। मम प्रभुरिदानीं यथापूर्वं संजातः । अहमपि पूर्ववद् भविष्यामि ।

एन्टोनिः - अस्यामपि स्थितौ वयं जेष्यामः ।

क्लियो - (इनोबार्बसं प्रति) मम प्रभोः सर्वान् मान्यान् नायकानाह्वय।

एन्टोनिः - एवं कुरु । तानहं वक्ष्यामि । तान् तथा मद्यं पाययिष्यामि यथा ते सर्वं गतं विस्मरेयुः । आगम्यतां राज्ञि । इदानीमप्यस्मासु शक्तिरस्ति । श्वस्तथा योत्स्ये यथा मृत्युर्मां प्रशंसिष्यति । मया हतास्तथा पतिष्यन्ति यथा जना महामार्या ।

(इनोबार्बसं विहाय सर्वे निष्क्रान्ताः ।)

इनो - (स्वगतम्) इदानीं स कोपाविष्टः । कोपो मनुष्याद् भयमपनयति। तादृश्यां स्थित्यां चटको गृध्रं प्रति अभियोगं कुर्यात् । मया सदा लक्षितं यदा मम नायकस्य विवेको ह्रियते तदा तस्य शौर्यं वर्धते । यदा शौर्यं विवेकमतिक्राम्यति तदा तस्यायुधं व्यर्थं भवति । अहमस्य सेवां त्यक्तुं कमपि मार्गं द्रक्ष्यामि । (निष्क्रान्तः ।)

चतुर्थः अङ्कः प्रथमं दृश्यम् ।

(अलेग्जेण्ड्रियायाः पुरोभागे सीजरस्य शिबिरम् । सीजरः अग्रिप्पः सेनासहितो मेसिनसश्च प्रविशन्ति । सीजरो लेखं पठति ।)

सीजरः - स मां बालं वदति उपालभते च ईजिप्टान्मां निष्कासयितुं समर्थ इव । स मम दूतं वेत्रैः प्राहरत् । स मां द्वन्द्वयुद्धायाकारयति । सीजरः एन्टोनिं प्रति । वृद्धः स घातक उच्यतां मर्तुं मम तस्य चान्ये

In Public domain. Digitization Muthulakshmi Research Academy

बहवो मार्गाः सन्ति । सम्प्रति तस्य द्वन्द्वयुद्धाह्वानं प्रति हसामः ।

मेसेनसः - सीजरो जानातु यदि एन्टोनिवत् शक्तिमान् पुरुषो महाकोपे पतति तर्हि स पतनस्थितिं प्राप्तः । तस्य प्रशान्तचिन्तनाय व्यवधिं मा देहि । तस्य कोपोद्रेकः अस्मल्लाभाय भवतु । कोपः कुपितं सम्यङ् न रक्षति ।

सीजरः - अस्माकं मुख्यान् सेनान्यो वद अहमिच्छामि श्वस्तनं युद्धमस्माकं चरमं युद्धं भवतु इति । मार्कस्य एन्टोनेर्बहवः पूर्वसैनिका अस्मत्पक्षं प्रविष्टाः । ते तं ग्रहीतुमलम् । तत् तथा भवतु भवद्भिः पर्यवेक्षितम् । सैनिकानां भोजनोत्सवं परिकल्पय । पर्याप्तानि वस्तूनि सन्त्यस्माकम् । तेषां विनोदं कल्पयामः । वराक एन्टोनिः ।

(निष्क्रान्ताः ।)

चतुर्थः अङ्कः द्वितीयं दृश्यम् ।

(अलेग्जेन्ड्रियायां क्लियोपेट्रायाः सौधम् । एन्टोनिः क्लियोपेट्रा इनोबार्बसः छार्मियाना ऐरासा च प्रविशन्ति परिजनेन सह ।)

एन्टोनिः - स मां प्रति द्वन्द्वयुद्धं न करिष्यति । एवं नु डोमिषियस् !

इनो - न करिष्यति ।

एन्टोनिः - केन कारणेन ?

इनो - स चिन्तयति इदानीं स त्वत्तो विंशतिगुणैरधिकः । त्वां प्रति द्वन्द्वयुद्धं तस्य स्थितेरवरम् ।

एन्टोनिः - हे योध ! श्वोऽहं समुद्रे भूम्यां च योत्स्ये । अन्तेऽहं जीवितो

 In Public domain. Digitization Muthulakshmi Research Academy

भविष्यामि रक्तं समर्प्य मम गौरवं वा रक्षिष्यामि। अपि त्वं सुयुद्धं करिष्यसि ?

इनो - युद्धेऽहमन्तं द्रक्ष्यामि। विजयी सर्वं गृह्णातु।

एन्टोनिः - वीरोचितं भाषणम्। गृहदासानाकारय।

(त्रिचतुराः सेवकाः प्रविशन्ति।)

अद्य नक्तं संपन्नं भोजनमस्तु।

(स तानेकैकमभिनन्दति।)

गृहाण हस्तम्। त्वया विश्वासेन मम सेवा कृता। त्वया त्वया त्वया च। सर्वे यूयं मम सेवां सम्यगकुर्वन्। युष्माभिः सह राजानश्च मम सेवामकुर्वन्।

क्लियो - (इनोबार्बसं प्रति) किमिदम् ?

इनो - (क्लियोपेट्रां प्रति) गतवैभवं स्मरतो दुःखितस्याक्रोशः।

एन्टोनिः - (अन्यस्मै सेवकाय) त्वमपि मम सेवामकरोः। अहमिच्छामि मम विभागो भवतु। विभक्तोऽहमेकैको युष्माकमेकैकस्य सेवां कुर्याम्।

सर्वे सेवकाः - तद् भगवान् परिहरतु।

एन्टोनिः - हे सुसेवकाः इमां रात्रिं मम सेवां कुरुत। मम पात्राणि मद्येन पूरयत। यदा मम राज्यं विस्तीर्णमासीत् तदा या सेवा भवद्भिः कृता सैवाद्य क्रियताम्।

क्लियो - (इनोबार्बसं प्रति) किमेष एवं प्रवर्तते ?

इनो - (क्लियोपेट्रां प्रति) स सेवकान् दुःखितान् कर्तुमिच्छति।

एन्टोनिः - (सेवकान् प्रति) अद्य नक्तं मम सेवां कुरुत। संभवतः अद्य युष्माकं सेवा अवसिता भविष्यति। संभाव्यं यूयं मां पुनर्न द्रक्ष्यथ।

In Public domain, Digitization Muthulakshmi Research Academy

यदि द्रक्ष्यथ मम खण्डितं देहम् । संभाव्यं श्वो यूयमन्यं स्वामिनं सेविष्यध्वे। मम भाति भवन्त इदानीं मां चरमं पश्यन्ति । मम सुसुहृदः ! यूयं मया न प्रत्याख्याताः । अहं युष्माभिः सह स्थास्यामि मरणेनास्माकं विभागं यावत् । अद्य नक्तं होराद्वयं मम सेवां कुरुत । नाहमधिकमर्थये । तदर्थं देवो युष्माकं मङ्गलं करोतु ।

इनो - किमिदमुच्यते प्रभो ! तान् व्याकुलयसि । पश्य ते विलपन्ति। ममापि अश्रूणि निपतन्ति । अस्मान् स्त्रियो न कुरु ।

एन्टोनिः - अहो ! मम तथा नोद्दिष्टम् । तान्यश्रूणि देवानामाशिष आनयन्ति । मम वचनानि शोकवचनतया भवता गृहीतानि । तानि प्रोत्साहवचनानीति मया उक्तानि । अद्य नक्तं विनोदमयं भवतु इति मयोक्तम् । सुहृदः ! इदं ज्ञायताम् । श्वो मम सुपरिणाममाशंसे । युष्मान् नेष्यामि विजयं प्रति न तु गौरवयुतं मरणं प्रति इति । इदानीं रात्रिभोजनाय गच्छामः । शोकं विस्मरामः । (निष्क्रान्ताः ।)

चतुर्थः अङ्कः तृतीयं दृश्यम् ।

(तत्रैव सौधस्य पुरस्ताद् बहिर्देशः ।
द्वौ सैनिकौ प्रविशतः रक्षणकार्यं कुर्वन्तौ ।)

प्रथमः सैनिकः - शुभं भवतु । श्वो मुख्यं दिनं भविष्यति ।

द्वितीयः - तद् युद्धमन्ततो विजयिनं निर्दिशति । आत्मानं रक्ष । नगरे वीथीषु विशेषाः संभवन्ति । अपि श्रुतं भवता ?

प्रथमः - न श्रुतम् । किं तत् ?

द्वितीयः - केवला किंवदन्ती सा । शुभास्तु तवेयं रात्रिः ।

 In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः - शुभास्तु तवैषा रात्रिः ।

(द्वावन्यौ सैनिकौ प्रविशतः ।)

द्वितीयः सैनिकः - सैनिकाः । निपुणं रक्षत ।

तृतीयः सैनिकः - त्वमपि । शुभास्तु तव रात्रिः ।

(सर्वः सैनिको वेदिकाया एकैकस्मिन् कोणे तिष्ठति ।)

द्वितीयः - इदमस्माकं स्थानम् । यद्यस्माकं नौकाबलं श्वो जेष्यति तर्हि संदेहो नास्ति अस्माकं सेना स्वभागं सामर्थ्येन करिष्यति ।

प्रथमः - अस्माकं सेना सुप्रसिद्धा कृतनिश्चया च ।

(वेदिकाया अधोभागात् नालिकासंगीतं श्रूयते ।)

द्वितीयः - तूष्णीमास्व । कः स शब्दः ?

प्रथमः - शृणु ।

द्वितीयः - शृणु ।

प्रथमः - संगीतमायाति विरलाद् वायोः ।

तृतीयः - भूमेरधोभागात् ।

चतुर्थः - इदं शुभचिह्नम् ।

द्वितीयः - न ।

प्रथमः - तूष्णीमास्व । किं सूचयति संगीतम् ?

द्वितीयः - इदं संगीतं सूचयति एन्टोनेः कुलदैवं हेर्कुलसः यस्मिन् एन्टोनेर्भक्तिरस्ति प्रेम च तमिदानीं त्यजति ।

प्रथमः - वयमितश्चलामः । पश्यामश्च यदि अन्यैः सैनिकैरिदं श्रुतम्।

(ते परिक्रम्यान्यकोणं गच्छन्ति ।)

द्वितीयः - भो भो मान्याः ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वे सह - किं किम् ? अपि श्रुतं भवता ? अपि श्रुतम् ?

प्रथमः - इदं स्थानमत्यजन्तो वयमितस्ततो गत्वा संगीतं शृणुमः । अपि तद् विरमति न वा ज्ञास्यामः ।

सर्वे - एवं कुर्मः । इदमद्भुतम् ।

(ते निष्क्रान्ताः ।)

चतुर्थः अङ्कः : चतुर्थं दृश्यम् ।

(तत्रैव राजसौधे कोष्ठः । एन्टोनिः क्लियोपेट्रा छार्मियाना परिजनश्च प्रविशन्ति ।)

एन्टोनिः - (आकारयन्) ईरास मम कवचमानय ।

क्लियो - किञ्चित् स्वपिहि ।

एन्टोनिः - प्रिये न । ईरास आगच्छ । मम कवचमानय ।

(कवचं गृहीत्वा ईरासः प्रविशति ।)

इत आगच्छ । सौम्य कवचधारणे मम सहायो भव । यदि सुभाग्यमद्यास्मान् त्यजति तत्र कारणमस्माकं तस्मिन्ननादरः ।

क्लियो - अहमपि सहायतां कुर्याम् । एष भागः कुत्र ?

(सा कवचस्य एकं भागं गृह्णाति ।

एन्टोनिः - त्यज त्यज । त्वं मम हृदयं दृढं कुरु न शरीरम् । इदमत्र न बन्धव्यम् । एवं कर्तव्यम् ।

क्लियो - अहं करोमि । एवं कर्तव्यम् ।

एन्टोनिः - सम्यक् कृतम् । अहं सन्नद्धोऽस्मि । ईरास ! गच्छ । त्वमपि सन्नद्धो भव ।

In Public domain. Digitization Muthulakshmi Research Academy

ईरासः - आर्य ! क्षणे आगच्छामि । (स निष्क्रान्तः ।)

क्लियो - कथं मया कृतम् ?

एन्टोनिः - नैपुण्येन कृतम् । प्रिये ! युध्यमानोऽहं त्वयाद्य द्रष्टव्यः । युद्धं नाम राजक्रीडा । तस्यां मम नैपुण्यं पश्येः ।

(धृतकवच ईरासः प्रविशति । सायुधः सैनिकः प्रविशति ।)

शोभनमिदं प्रातस्तव । स्वागतम् । त्वं युद्धे अनुभवशाली दृश्यसे ।

यदा किञ्चन कार्यं प्रेम्णा कुर्मस्तदा प्रातरेव शीघ्रमुत्थाय

सप्रमोदं तत् कर्तुं गच्छामः ।

सैनिकः - अस्मिन्नपि प्रातःकाले धृतकवचाः सहस्रं सैनिका नौकाश्रये त्वां प्रतीक्षन्ते ।

(कलकलः । तूर्यध्वनिः । नायकाः सैनिकाश्च प्रविशन्ति ।)

नायकः - इदं प्रभातं शोभनमस्ति । प्रभो ! सुप्रभातं तव ।

सर्वे - प्रभो ! सुप्रभातम् ।

एन्टोनिः - तूर्याणि सुष्ठु नाद्यन्ते । इदं प्रभातं कान्यपि महाकार्याणि कर्तुमुत्साहवान् युवेव शीघ्रं प्रारब्धम् । (क्लियोपेट्रामुद्दिश्य) अत्रभवति ! स्वस्ति । (तां चुम्बति) किमपि भवतु अद्य । इदं परिमितमामन्त्रणम् । इतो दीर्घमामन्त्रणं मास्तु । इतो गच्छामि लोहनिर्मितः सैनिक इव । ये युद्धरङ्गमागच्छेयुस्ते मामनुसरन्तु । युद्धं नयामि ।

(एन्टोनिः ईरासः नायकाः सैनिकाश्च निष्क्रान्ताः ।)

छार्मि - देवि ! तव कोष्ठं प्रवेष्टुं प्रसीद ।

क्लियो - मां तत्र नय । शौर्येणोत्साहेन च स युद्धं गच्छति । यदि स सीजरश्च द्वन्द्वयुद्धेनास्य संग्रामस्य निर्णयं कुर्याताम् ! तदा एन्टोनिः ...

In Public domain Digitization Muthulakshmi Research Academy

किन्तु इदानीम् । भवतु । गच्छावः । (निष्क्रान्ते ।)

चतुर्थः अङ्कः : पञ्चमं दृश्यम् ।

(अलेग्जेन्ड्रियायाम् एन्टोनेः शिबिरम् । तूर्यध्वनिः । एन्टोनिः ईरासश्च प्रविशतः । अभिमुखमागच्छन् एकः सैनिकस्तावासादयति ।)

सैनिकः - देवा अद्य एन्टोनेः शुभं कुर्वन्तु ।

एन्टोनिः - तव देहे पूर्वयुद्धेषु प्राप्तानां क्षतानामङ्काः सन्ति । अनुभवशालिना त्वया यदि पूर्वयुद्धे प्रबला सुमतिर्दत्ता स्यात् भूम्यामेव योद्धव्यमिति तदा ममेदानीं सुस्थितिः स्यात् ।

सैनिकः - यदि त्वया तत् कृतं स्यात् तर्हि ये राजानस्तव पक्षादपगतास्ते यश्च सैनिकः अद्य प्रातस्त्वामत्यजत् स चाद्य त्वया सहैव स्युः।

एन्टोनिः - कः अद्य गतः ?

सैनिकः - कः ? यः सदा तव सन्निहित आसीत् सः । इदानीं यदि त्वम् इनोबार्बसमाह्वयसि स न शृणोति । सीजरस्य शिबिराद् वा प्रतिवचनं कुर्यादहं तव पक्षे नास्मीति ।

एन्टोनिः - किमिदमुच्यते त्वया ?

सैनिकः - आर्य ! इनोबार्बसः सीजरेण सहास्ति ।

ईरासः - आर्य ! स स्वस्य पेटिकाः संपदश्च अत्रैवात्यजत् ।

एन्टोनिः - अपि सत्यमिदम् ? किं स गतः ?

सैनिकः - निस्संशयं सत्यम् ।

एन्टोनिः - गच्छ ईरास। तस्य सर्वाः संपदस्तस्य प्रेषय । किमपि न

 In Public domain. Digitization Muthulakshmi Research Academy

स्थापय । लेखं लिख । अहं हस्ताक्षराङ्कितं करिष्यामि । अहं तमामन्त्रयिष्ये । अभिनन्दामि च । तस्य पुनरपि नूतनाधिपतेरन्वेषणं मास्तु । बत मम दुर्भाग्यम् । निर्व्याजा अपि पुरुषा द्रोहिणः परिवर्तिताः ।

(निष्क्रान्ताः ।)

चतुर्थः अङ्कः षष्ठं दृश्यम् ।

(अलेग्जेन्ड्रियायाम् सीजरस्य शिबिरम् । तूर्यध्वनिः । सीजरः अग्रिप्पः इनोबार्बसः डोलबेल्लश्च प्रविशन्ति ।)

सीजरः - अग्रिप्प ! गच्छ ! युद्धं प्रारभस्व । वयमिच्छामः एन्टोनिं जीवग्राहं गृहीतम् । सर्वेषामिदं ज्ञातं कुरु ।

अग्रिप्पः - सीजर ! एवं करोमि । (निष्क्रान्तः ।)

सीजरः - विश्वशान्तेः काल आसाद्यते । यदीदं युद्धमस्माकमनुकूलं भविष्यति तर्हि प्रपञ्चस्य त्रिषु च भागेषु शान्तिर्भविष्यति ।

(दूतः प्रविशति ।)

दूतः - एन्टोनिः रणभूमिमागतः ।

सीजरः - गच्छ । अग्रिप्पं ममादेशं वद । एन्टोनेः पक्षं त्यक्त्वा ये ये अस्मत्पक्षमागतास्तान् पुरस्तात् स्थापय । जानातु एन्टोनिः स स्वजनान् प्रति युध्यते इति ।

(इनोबार्बसं विहायान्ये सर्वे निष्क्रान्ताः ।)

इनो - (स्वगतम्) अलेक्सासः एन्टोनेः पृथग्भूतः । एन्टोनेः कार्येणेव स जूडियां गतः किन्तु राजानं हेरोडं प्राचोदयत् एन्टोनिं विहाय सीजरस्य

In Public domain. Digitization Muthulakshmi Research Academy

पक्षं गन्तुम् । परन्तु सीजरेण अलेक्ससो हतः कण्ठबन्धनेन । केनिडियसः अन्ये च ये एन्टोनिमत्यजन् तान् सीजरः अगृह्णात् परन्तु तेषां समुचितस्थानानि न दत्तानि । मया दुष्कार्यं कृतम् । अहमात्मानं निन्दामि। मम मनसः शान्तिर्न भविष्यति ।

(सीजरस्य सैनिकः प्रविशति ।)

सैनिकः - इनोबार्बस ! एन्टोनिस्तव संपदं प्रैषयदुपहारैः सह । दूत आगतस्तव शिबिरसकाशे अश्वतरेभ्यस्तानि वस्तुनि अवतारयति ।

इनो - सर्वाणि तानि त्वं गृहाण ।

सैनिकः - हास्यं मा वद इनोबार्बस । अहं सत्यं वदामि । त्वमेव गत्वा तं सक्षेममस्माकं शिबिरेभ्यो बहिर्नय । मया तत् कृतं स्यात् किन्तु मम स्थानादहं गन्तुं न शक्नोमि । पूर्वस्तव राजा अद्यापि महावदान्यः ।

(निष्क्रान्तः ।)

इनो - (स्वगतम्) लोकेऽहमस्मि सुमहान् द्रोही । इदमहं जानाामि। एन्टोने ! भवान् महोदारः । दुष्टस्य ममेमे उपहारास्त्वया दत्ताः । विश्वासेन सेवां कुर्वतो मम कति दत्ताः स्युः ? मम हृदयं विदीर्यते । यदि मम शोको मां न हन्यात् तदर्थमन्यविधमहं करिष्यामि । केवलः शोकश्च मां हनिष्यति । किमहमेन्टोनिं प्रति योत्स्ये ? न न । मर्तुमहं काञ्चन उपकुल्यामन्विष्यामि । मलिना उपकुल्या मम जीवितान्तस्य युक्तं स्थानम्। (निष्क्रान्तः ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः अङ्कः सप्तमं दृश्यम् ।

(युद्धशब्दः । तूर्यभेरीशब्दः । अग्रिप्पः सीजरस्यान्यसैनिकाश्च प्रविशन्ति ।)

अग्रिप्पः - अस्माभिरपक्रमितव्यम् । वयं सुदूरं पुरस्तादागताः स्मः । सीजरश्च क्लेशेऽस्ति । विरोधः अस्मदुदीक्षितमतिक्रम्यावर्तत ।

(ते निष्क्रान्ताः । युद्धशब्दः । एन्टोनिः प्रविशति क्षतेन स्कारसेन सह ।)

स्कारसः - हे शूर राजन् ! अद्यास्माभिः सुयुद्धं कृतम् । यदि पूर्वमपि अस्माभिरेवं युद्धं कृतं स्यात् तर्हि पटबद्धमस्तका अस्माभिर्निष्कासिताः शत्रवः पलायिताः स्युर्गृहम् ।

एन्टोनिः - तव बहुः रक्तस्रावोऽस्ति ।

स्कारसः - मम पूर्वव्रणाङ्क आसीत् र आकारेण । स इदानीं रव आकारेण परिणतः ।

(तूर्यध्वनिः । सेनानामपक्रमणशब्दश्च ।)

एन्टोनिः - ते अपक्राम्यन्ति ।

स्कारसः - वयं तान् घातयिष्यामो गृहपर्यन्तम् । मम देहे स्थलमस्ति षण्णामधिकक्षतीनाम् ।

(ईरासः प्रविशति ।)

ईरासः - ते अपक्राम्यन्ति । अस्माकमाधिक्यं विजयं सूचयति ।

स्कारसः - वयंताननुद्रुत्य पश्चाद्भागेषु प्रहरिष्यामः । स महान् विनोदो भविष्यति ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः - त्वां द्विधा सम्मानयामि । सकृत् तव हास्याय । दश वारान् तव शौर्याय ।

स्कारसः - खञ्जवदहं त्वामनुसरामि । (निष्क्रान्ताः ।)

चतुर्थः अङ्कः अष्टमं दृश्यम् ।

(अलेग्जेन्ड्रियाबहिर्भूमिः । युद्धध्वनिः । एन्टोनिः पुरस्तात् प्रचलति । स्कारसः अन्ये च अनुसरन्ति ।)

एन्टोनिः - शिबिरपर्यन्तं ते विद्राविताः । कश्चित् शीघ्रं गच्छतु राज्ञीमिमां वार्तां वदतु ।

(एकः सैनिको निष्क्रान्तः ।)

श्वः सूर्योदयात् पूर्वं सर्वं तं हन्मः योऽद्य हननान्मुक्तः । सर्वान् युष्मानभिनन्दामि । सर्वे यूयं भीषणाः । भवद्भिर्युद्धं कृतमात्मार्थमिव न तु ममार्थमिव । सर्वे यूयं ट्रोजनवीरस्य हेक्टरस्य सदृशाः । पुरं गच्छत । भार्या मित्राणि चाश्लिष्यत । युष्माकं वीरकार्याणि तेषां वर्णयत । ते हर्षेण उच्चैराक्रोशन्तु । तेषामश्रूणि युष्माकं क्षतिषु घनीभूतं रक्तं क्षालयन्तु तथा क्षतयश्च शाम्यन्तु ।

(सपरिवारा क्लियोपेट्रा प्रविशति ।)

(स्कारसं प्रति) तव पाणिर्दीयताम् । तव कार्याण्यहं प्रशंसामि अस्या विमोहिकायाः पुरस्तात् । सा त्वां शुभाशीर्भिः सहाभिनन्दति । (क्लियोपेट्रां प्रति) हे लोकप्रभे ! मम कण्ठं परितस्तव हस्तौ प्रसारय । मम कवचं प्रविश । हृदयं प्राप्नुहि । तत्र मम हृदयस्पन्दनैः सह प्रचल मम विजयं चानुभव ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - प्रभूणां प्रभो ! सुगुणराशे ! अपि त्वं महायुद्धादक्षतो मन्दहासेन प्रत्यागतोऽसि ?

एन्टोनिः - हे मम गानकोकिल ! ते अस्माभिर्विद्रावितास्तेषां शय्यानां निकटम् । मम शिरसि केचन श्वेतकेशाः सन्ति । तथापि मम बलमस्ति युद्धनैपुण्यमस्ति । अवरवयोभिरहं स्पर्धितुं शक्नोमि । इमं वीरं पश्य । स तव पाणिं चुम्बतु । सः अनुग्रहस्तस्मै दीयताम् । (स्कारसं प्रति) मम वीर ! क्रियतां चुम्बनम् ।

(स्कारसः क्लियोपेट्रायाः पाणिं चुम्बति ।)

अद्य एष एवमयुध्यत कोऽपि देवः केनापि कारणेन मानवजातिं प्रति कुपितो भूत्वा तां विनाशयतीव ।

क्लियो - मित्र ! तव स्वर्णनिर्मितं कवचं दास्यामि । तत् कस्यचिद् राज्ञ आसीत् ।

एन्टोनिः - एष तदर्हति । यदि तत् सूर्यरथवन्मणिभिरावृतं तदापि तदर्हति । इतस्तव हस्तं प्रसारय । वयमलेग्जेन्ड्रियानगरवीथीषु हर्षेण प्रगच्छामः प्रहारचिह्नितफलकहस्ताः । यद्यस्मद्भवने सर्वस्य सैन्यस्य स्थानं भवेत् तर्हि सर्वे सह भोक्ष्यामहे । श्वः कृते शुभमाशास्महे । अस्तु तूर्यध्वनिर्भेरीध्वनिश्च । (सर्वे निष्क्रान्ताः ।)

चतुर्थः अङ्कः नवमं दृश्यम् ।

(सीजरस्य शिबिरम् । रक्षकाः प्रविशन्ति ।
इनोबार्बसः अनुसरति ।)

प्रथमो रक्षकः - यदि एकहोरायामस्माकं कार्यान्मुक्तिर्न स्यात् तर्हि

In Public domain. Digitization Muthulakshmi Research Academy

बिश्रान्तिस्थानं गच्छामः । रात्रिर्विंशदास्ति । उच्यते प्रातर्द्विवादनसमये युद्धं गमिष्यन्ति ।

द्वितीयो रक्षकः - ह्यः अस्माकं क्लेशोऽभवत् ।

इनो - इयं रात्रिर्मम साक्षिणी भवतु ।

द्वितीयो रक्षकः - क एषः ?

प्रथमो रक्षकः - निलीय शृणुवः ।

इनो - हे चन्द्र ! मम साक्षी भव । यदा चरित्रपुस्तकेषु राजद्रोहिणां नामानि निन्दापूर्वकाणि स्थाप्यन्ते तदा त्वं साक्षी भव इनोबार्बसः पश्चात्तापं प्राप्त इति ।

प्रथमो रक्षक - एष इनोबार्बसः ।

द्वितीयो रक्षकः - तूष्णीं तिष्ठ । शृणु ।

इनो - हे चन्द्र ! त्वं दुःखस्य देवतासि । मयि विषमयं तुषारं विकिर येन मम जीवितं समाप्तिं गच्छति यदिदानीमस्ति ममेच्छाविरुद्धम् । गृहाण मम हृदयं क्षिप च तत् मम पापकठिनशिलायाम् । शोकशुष्कं मम हृदयं नूनं भिद्यते चूर्णीभवति च । एवं मम गर्ह्यं मनो नश्यति । भो एन्टोने! यावानहं द्रोही अस्मि ततोऽधिको भवानुदारोऽस्ति । त्वां प्रति ममापराधानां क्षमां कुरु । चरित्रे मम नाम भवतु एष पलायितो द्रोहीति। हे एन्टोने ! एन्टोने ! (स म्रियते ।)

प्रथमो रक्षकः - तं वदामः ।

द्वितीयो रक्षकः - शृणुमः । सीजरमुद्दिश्य किमपि वदेत् ।

तृतीयो रक्षकः - एवं कुर्मः । किन्तु स्वपिति एषः ।

प्रथमो रक्षकः - मूर्छितो दृश्यते । इयं साधारणनिद्रा नास्ति ।

 In Public domain. Digitization Muthulakshmi Research Academy

निद्रायाः पूर्वमेतावती प्रार्थना केनापि न कृता ।

द्वितीयो रक्षकः - तमुपसर्पामः ।

तृतीयो रक्षकः - जागृहि जागृहि मान्य ! किञ्चिद् भाषस्व ।

प्रथमो रक्षकः - अपि शृणोषि मान्य ।

द्वितीयो रक्षकः - एष मृत्युना गृहीतः ।

(दूराद् भेरीशब्दः ।)

शृणु । भेरीध्वनिर्निद्रितान् प्रबोधयति । इममस्माकं विश्रान्तिभवनं नयामः । एष मुख्यः पुरुषः । अस्माकं रक्षणकालः अवसितः ।

तृतीयो रक्षकः - तर्हि आगम्यताम् । इदानीमपि एष चेतनां प्राप्नुयात्।

(ते निष्क्रान्ता इनोबार्बसस्य देहं वहन्तः ।)

चतुर्थः अङ्कः : दशमं दृश्यम् ।

(एन्टोनिः स्कारसश्च प्रविशतः सैन्येन सह ।)

एन्टोनिः - अद्य ते तेषामुद्यमं समुद्रात् कर्तुमिच्छन्ति । भूम्यामस्माभिस्तेषां प्रीतिर्नाभवत् ।

स्कारसः - प्रभो ! भूम्यां समुद्रे उभयत्र च ।

एन्टोनिः - ते अग्नौ वायौ वा युध्यन्ताम् । तत्र च तैर्वयं युध्यामहे । मम संविधानमेवं भवति । अस्माकं भूसैन्यमस्मत्समीपे भवति नगरपार्श्व-पर्वतेषु । नौकायोद्धार आदिष्टा नौकास्थानात् ते निर्गताश्च । पर्वतेभ्यो वयं युद्धं सम्यग् विश्लेषयामः प्रवर्तयामश्च । (निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थः अङ्कः एकादशं दृश्यम् ।

(तत्रैवान्यस्थलम् । सीजरः प्रविशति सैन्यं च ।)

सीजरः - यदि ते अभियोगं कुर्युस्तदैव वयमस्माकं भूसेनया सह किमपि करिष्यामः । तदनावश्यकमपि स्याद् यतः एन्टोनिरद्य नौसेनां चालयन् दृश्यते । वयं पर्वतोपत्यकासु स्थानं ग्रहीष्यामः यदनुकूलं भविष्यति । (निष्क्रान्ताः ।)

चतुर्थः अङ्कः द्वादशं दृश्यम् ।

(तत्रैवान्यः प्रदेशः । एन्टोनिः स्कारसश्च प्रविशतः ।)

एन्टोनिः - युद्धं न प्रारब्धम् । तत्र देवदारुवृक्षोऽस्ति । तस्माद् युद्धं सुदृश्यतरं भवेत् । कथं प्रवर्तते तत् त्वां वक्ष्यामि ।

(स निष्क्रान्तः । दूरात् समुद्रयुद्धशब्दः श्रूयते ।)

स्कारसः - पक्षिणः क्लियोपेट्राया नौवसनेषु कुलायान् निर्ममुः । तत् सुचिह्नमुत दुश्चिह्नं दैवज्ञा न वदन्ति । ते गभीरं पश्यन्ति स्म ज्ञातं वक्तुमनिच्छन्त इव । एन्टोनिः शूरोऽस्ति किन्तु मध्ये मध्ये निरुत्साहः। अकस्मात् तस्य मनोदशा परिवर्तते । आशाभययोः जयपराजययोश्च मध्ये तस्य चञ्चलभाग्यं संचलति ।

(दूरात् समुद्राद् युद्धध्वनिः एन्टोनिः पुनः प्रविशति ।)

एन्टोनिः - सर्वं नष्टम् । सा विश्वासघातिनी मामवञ्चयत् । मम नौसेना शत्रोर्वशीभूता । इतस्त्वं द्रष्टुं शक्नोषि शिरोवेष्टनानि वायावुत्क्षिपन्ति सह पिबन्ति च बहुकालानन्तरं मिलिताश्चिरसुहृद इव।

In Public domain. Digitization Muthulakshmi Research Academy

हे महाचपले ! क्लियोपेट्रे ! त्वयैवाहं यूने सीजराय विक्रीतः । इदानीं मम युद्धं त्वां प्रत्येव भविष्यति । स्कारस ! सेनां वद पलायध्वमिति । ते आत्मानं रक्षन्तु । क्लियोपेट्रां प्रति प्रतिकारो ममात्यन्तं कार्यं भवति ।

(स्कारसो निष्क्रान्तः ।)

(स्वगतम्) हे सूर्य ! तवान्यमुदयमहं न द्रक्ष्यामि । सुभाग्यम् एन्टोनिश्चाद्य पृथग्भवतः । आमन्त्रये त्वां सुभाग्य ! बत ! इदं पर्यवसानम्। वीरा मामन्वसरन् बहुविश्वासेनोत्तमजातिश्वान इव । तेषां पारितोषिकाणि मया दत्तानि । ते मामद्य व्यसृजन् वर्धमानं सीजरमन्वसरन् । मम सर्वं नष्टमहं वञ्चितश्च । सा कुटिला मनोहारिणी । तस्याः प्रेरणया मया युद्धानि कृतानि विरतानि च । ममैकमेव परमकर्तव्यमभवत् तस्याः प्रीणनम् । सा मां व्यलोभयत् पूर्णपराजयाय । (आकारयन्) ईरास ! ईरास ! क्वासि ?

(क्लियोपेट्रा प्रविशति ।)

हे मायाविनि ! गच्छेतः ।

क्लियो - किमर्थं मम प्रभुः कुपितः प्रियायाम् ?

एन्टोनिः - मम सकाशादपसर । नो चेत् यत् त्वमर्हसि तत् ते दास्यामि सीजरस्य विजयं व्यर्थं करिष्यामि । स त्वामुच्चैरुत्क्रोशतां जनानां पुरस्तात् प्रदर्शयतु । तस्य रथमनुसर समस्तस्त्रीजातेरवमानं कुर्वती । आक्टेविया तव मुखं नखैर्विदारयतु ।

(क्लियोपेट्रा निष्क्रान्ता ।)

त्वं गता । तत् त्वया सुकार्यं कृतम् । यतस्त्वं जीवितुमपेक्षसे । इतः पूर्वे यदि त्वं मया हता अभविष्यस्तर्हि सुकार्यं कृतमभविष्यत् । एकेन

In Public domain. Digitization Muthulakshmi Research Academy

मृत्युना बहवो मृत्यवो निवारिताः स्युः । सा मां तस्मै रोमदारकाय व्यक्रीणात् । अहं ध्वस्तः । ईरास! (निष्क्रान्तः ।)

चतुर्थः अङ्कः त्रयोदशं दृश्यम् ।

(क्लियोपेट्रायाः सौधम् । क्लियोपेट्रा छार्मियाना ऐरासा मर्डियाना च प्रविशन्ति ।)

क्लियो - मम परिजनाः ! मम सहायतां कुरुत । एन्टोनिर्महाकोपाविष्टोऽस्ति । चक्रवाते समुद्र इव नर्दति ।

छार्मि - गच्छ तव प्रार्थनाकोष्ठम् । आत्मानं तालबद्धं कुरुष्व । तस्मै वार्ता प्रेषय आत्मानं मृतम् । बहुकालस्थितमहत्त्वात् पतनं मरणादपि बाधाकरं भवति ।

क्लियो - एवं करोमि । प्रार्थनाकोष्ठं गच्छामि । मर्डियाने ! गच्छ । वद तं मया आत्मघातः कृतः । अन्त्यं वचनं मयोक्तम् एन्टोने इति । दुःखेन वद तां वार्ताम् । मर्डियाने ! गच्छ । मम मरणं तेन कथं गृहीतं वद । अहं प्रार्थनाकोष्ठं प्रविशामि ।

(सर्वा निष्क्रान्ताः ।)

चतुर्थः अङ्कः चतुर्दशं दृश्यम् ।

(तत्रैवान्यकोष्ठे । एन्टोनिः ईरासश्च प्रविशतः ।)

एन्टोनिः - ईरास ! अपि त्वं मां पश्यसि ?

ईरासः - प्रभो ! पश्यामि ।

एन्टोनिः - कदाचिद् वयं सर्पाकारं मेघं पश्यामः । कदाचिद्

In Public domain. Digitization Muthulakshmi Research Academy

ऋक्षाकारं सिंहाकारं पर्वताकारं दुर्गाकारं च मेघं पश्यामः । ते आकारा अस्माकं नेत्राणि प्रतारयन्ति बहुधा दृश्यमानाः किन्तु ते वायुमात्राः । तानि मिथ्यादृश्यानि गगने सूर्यास्तमयसमये दृश्यन्ते ।

ईरासः - एवं खलु प्रभो !

एन्टोनिः - यो दृश्यते अश्ववत् क्षणेन स वायुना निराकारः क्रियते जले मिश्रितं जलमिव पृथक्कर्तुं न शक्यते ।

ईरासः - सत्यं प्रभो ।

एन्टोनिः - ईरास । मम युवमित्र । तव प्रभुरिदानीं स मेघ इवास्ति । अत्राहम् एन्टोनिवद् दृश्ये परन्तु ममाकारं रक्षितुमहं न शक्नोमि । क्लियोपेट्रायाः कृतेऽहं युद्धं गतोऽस्मि । तस्या मयि प्रेमास्तीत्यचिन्तयं यतो मम तस्यां प्रेमासीत् । मया सह बहुसहस्रसैनिकाश्चासन् ये इदानीं नष्टाः । राज्ञी सीजरेण सह कूटरचनामकरोत् मम विजयं विनाश्य तस्य विजयं निश्चितमकरोत् । ईरास ! मा रुदिहि । इदमस्मासु शिष्यते अस्मज्जीवितं स्वयं समापयितुं शक्यते ।

(मर्डियाना प्रविशति ।)

हे ! दुष्टा तव राज्ञी मम वीरगौरवं व्यनाशयत् ।

मर्डियाना - न न एन्टोने ! अस्माकं राज्ञी त्वयि प्रेमाकरोत् । तस्याः सर्वं जीवितवृत्तं त्वयि संबद्धमभवत् ।

एन्टोनिः - अपसर गर्वित षण्ड ! निश्शब्दं तिष्ठ । सा मामवञ्चयत् तस्मान्मरिष्यति च ।

मर्डियाना - कस्यापि मरणं सकृदेव भवति । तत् तस्या वृत्तम् । यत् त्वं कर्तुमिच्छसि तत् तस्याः कृतम् । तस्या अन्त्यं वचनम् एन्टोने

In Public domain. Digitization Muthulakshmi Research Academy

मान्यतम एन्टोने इति । यदा सा तव नाम उच्चरति स्म आर्तिस्तदा तामाक्रमत । आर्त्या सा सम्यग् वक्तुं नाशक्नोत् । आर्त्या तव नाम द्विधा विभक्तम् । अर्धं तस्या मनसि स्थितम् अर्धमोष्ठयोरागतम् । सा जीवितमजहात् मनसि स्थिते तव नाम्नः अर्धे ।

एन्टोनिः - किं वदसि ? सा मृता ?

मर्डियाना - मृता ।

एन्टोनिः - ईरास ! तव कवचं मुञ्च । दीर्घस्य दिनस्य कार्यं समाप्तम् । अयं कालो निद्रायाः । (मर्डियानां प्रति) त्वं गन्तुमनुमता । तव हिंसा न क्रियते । तदेव तव वार्तायाः पारितोषिकम् । गच्छ ।

(मर्डियाना निष्क्रान्ता ।)

ईरास ! मम कवचं मोचय । मम हृदयं बलवत् स्पन्दति । अपि तत् कवचं भिनत्ति ? ईरास ! शीघ्रं कुरु । अहमिदानीं सैनिको नास्मि । हे शकलितकवच ! गच्छ ! त्वं मया सगर्वं धृतः । गच्छेदानीम् । ईरास ! इदानीं मां त्यज ।

(ईरासः निष्क्रान्तः ।)

क्लियोपेट्रे ! अहं तव सकाशमागच्छामि । तव क्षमां याचमानो विलपिष्यामि । इदमेवेदानीं कर्तव्यम् । अतः परं जीवितं पीडाकरम् । मम जीवितप्रकाशो नष्टः । अहं व्यर्थसंचरणं न करिष्यामि । मम राज्ञि! अहमागच्छामि । किञ्चित् तिष्ठ । इतो गता मृतानामात्मानो यत्र शेरते पुष्पशय्यासु तत्रावामन्योऽन्यगृहीतहस्तौ संचरिष्यावः । इतः पूर्वं तत्र गतान् प्रेयसीप्रिययुगलसमूहान् विहाय सर्वे आवां पश्यन्तु । तत्र सर्वमस्मदासक्तं भवतु । ईरास ! ईरास ! आगच्छ ।

In Public domain. Digitization Muthulakshmi Research Academy

(ईरासः पुनः प्रविशति ।)

ईरासः - प्रभो ! किं कुर्यामहम् ?

एन्टोनिः - क्लियोपेट्रा मृता । अथ जीवन्तं मां देवा निन्दन्ति । मया जगतः चतुर्षु कोणेषु आक्रमणानि कृतानि । प्लवमाननगरसदृशीषु नौषु प्रयाणानि कृतानि । परन्तु मम तावद् धैर्यं नास्ति यावदस्ति तस्याः स्त्रियाः । ममौदार्यं तस्या औदार्यात् हीयते । सा सीजरमवदत् क्लियोपेट्रा एव क्लियोपेट्रां पराजयते इति । ईरास ! त्वया मम प्रतिश्रुतम् । यदि अन्त्यः क्षण आपतेत् य इदानीमापतितः यदा अवमानः शोकाद् विरागश्चानिवार्यौ भवतस्तदा ममादेशेन मां हन्या इति । तत् कुरु । अयं स कालः । प्रहारेण त्वं मां न पातयसि सीजरं पराजयसे । विवर्णमुखो न भव । धैर्यं वह ।

ईरासः - देवाः प्रत्यादिशन्तु । शत्रूणां बाणा यन्नाकुर्वन् किमहं तत् कर्तुं शक्नोमि ?

एन्टोनिः - ईरास ! किं त्वं रोमनगरे वातायनाद् द्रष्टुमिच्छसि सीजरस्य विजययात्रायां तस्य रथे पुरस्ताद् गच्छति मां तव प्रभुं वशीकृतं नतशिरसं पद्भ्यां गच्छन्तं । वक्रीकृतबद्धहस्तयुगलं लज्जया रक्तमुखं प्राप्तसंपूर्णावमानम् ?

ईरासः - न द्रष्टुमिच्छामि ।

एन्टोनिः - तर्हि इत आगच्छ । अस्यावमानस्य चिकित्सा भवति मृत्यु-करेण घातेनैव । उद्धर तव विश्वसनीयं खड्गं यो देशसेवायां त्वयोपयुक्तः।

ईरासः - आर्य ! क्षमस्व मामनिच्छन्तम् ।

एन्टोनिः - यदा त्वं मया दास्यान्मुक्तः किं त्वया न प्रतिश्रुतम् इदं

In Public domain. Digitization Muthulakshmi Research Academy

करिष्यामि अभ्यर्थित इति ? तस्मादिदं कुरु तत्क्षणम् । नो चेत् सर्वा तव पूर्वसेवा व्यर्था भवेत् । खड्गं गृहाण आगच्छ ।

ईरासः - तर्हि तव पूज्यं मुखं मत्तः परावर्तय । तत् तव मुखं समस्त-लोकेनाराधितम् ।

एन्टोनिः - पश्य । (स परावर्तते ।)

ईरासः - मया खड्गो गृहीतः ।

एन्टोनिः - स तत्क्षणं कर्तव्यं करोतु ।

ईरासः - प्रिय प्रभो ! मम नायक ! मम राजन् ! घातकप्रहारात् पूर्व स्वस्ति इति मम वचनं स्वीकुरु ।

एन्टोनिः - त्वयोक्तम् । मयाप्युच्यते । स्वस्ति ।

ईरासः - महानायक ! अपीदानीं कुर्याम् ?

एन्टोनिः - ईरास ! तत्क्षणम् ।

ईरासः - बाढम् । एष प्रहरामि । अनेन कार्येण एन्टोनिमरणदुःखं परिहरामि । (स आत्मानं हन्ति ।)

एन्टोनिः - त्रिवारानधिकमान्य मदपेक्षया वीर ईरास ! इदं ममैव कर्तव्यं परन्तु कर्तुमशक्त आसम् । त्वं मामुपदिशसि । मम राज्ञी ईरासश्च तयोर्वीर्योदाहरणाभ्यामुदात्तकार्यचरित्रपुस्तकेषु मामतिरिच्य स्थितौ । वरो वधूमिव मृत्युमहं परिष्वजे । प्रियायाः शय्यायामिव सत्वरं मरणे पतेयम् । ईरास ! तव गुरुरिदानीं तव शिष्यः संवृत्तः । त्वयैवाहं शिक्षितः । क्षणं तिष्ठ । एष आगच्छामि । (स स्वखड्गस्योपरि पतति।) किं वृत्तम् ? नाहं मृतः ? हे रक्षक ! मां जहि ।

(त्रिभिः रक्षकैः सह डेर्सिटासः प्रविशति ।)

 In Public domain. Digitization Muthulakshmi Research Academy

प्रथमो रक्षकः - कः शब्दः ?

एन्टोनिः - सुहृदः ! मया सम्यङ् न कृतम् । मयोपक्रान्तं कार्यं पूरयत ।

द्वितीयो रक्षकः - लोकनक्षत्रं पतितम् ।

प्रथमो - इदं कालस्यैवावसानम् ।

सर्वे - महदिदं दुःखम् ।

एन्टोनिः - यस्य मयि प्रीतिरस्ति स मां प्रहरतु मारयतु च ।

प्रथमो - नाहम् ।

द्वितीयो - नाहमपि ।

तृतीयो - न कोऽप्यस्माकम् । (रक्षका निष्क्रान्ताः ।)

डेर्सिटासः - (स्वगतम्) तव मरणं भाग्यात् पतनं च तवानुचरानितोऽपगन्तुं प्रेरयति । (एन्टोनेः खड्गं गृह्णाति ।) अहमिमं खड्गं दर्शयित्वा सीजरं तव मरणं कथयामि तस्यानुग्रहं च प्राप्स्यामि ।

(डयोमेडिसः प्रविशति ।)

डयो - कुत्रास्ति एन्टोनिः ?

डेसि - डयोमेडिस ! तत्रास्ति ।

डयो - किं स जीवति ? कथं न वदसि ?

(डेर्सिटासो निष्क्रान्तः ।)

एन्टोनिः - कस्त्वम् ? डयोमेडिस ? तव खड्गं गृहीत्वा मां प्रहर जहि च ।

डयो - महाप्रभाव ! प्रभो ! मम स्वामिनी क्लियोपेट्रा मां तव सकाशं

In Public domain: Digitization Muthulakshmi Research Academy

प्राहिणोत् ।

एन्टोनिः - कदा प्राहिणोत् ?

डयो - प्रभो ! इदानीमेव ।

एन्टोनिः - कुत्र सा ?

डयो - स्वस्याः प्रार्थनाकोष्ठे । तस्या ऊहो जातो भीतिश्च । तव शङ्का जाता सा सीजरेण संधिं करोतीति । तत् कदापि सत्यं न भवति । सा भीता तव कोपो नैव शाम्यतीति । तस्मात् सा तव वार्ता प्रैषयत् राज्ञी मृतेति । पश्चात् तस्या भयं जातम् । तस्या वार्तायास्त्वयि कः प्रभावो भवेदिति । तस्मात् सा मां तव सकाशं प्रैषयत् सत्यं वक्तुम् । व्यग्रोऽस्मि विलम्बेनागतोऽस्मीति ।

एन्टोनिः - साधो ! डयोमेडिस ! गते काले आगतोऽसि । मम रक्षका आहूयन्ताम् ।

डयो - हे रक्षकाः ! केऽत्र ? आगच्छत । प्रभुराकारयति ।

(चत्वारो रक्षकाः प्रविशन्ति ।)

एन्टोनिः - सुजनाः सुहृदः ! मां वहत यत्रास्ति क्लियोपेट्रा । इयं भवत्सु मम चरमा सेवाज्ञा भवति ।

प्रथमो - प्रभो ! अस्माकं दुःखं भवति त्वमस्मान् कृतादेशान् द्रष्टुं न जीविष्यसीति ।

सर्वे - महद् दुःखमस्मिन् दिने ।

एन्टोनिः - भोः ! सुजना मित्राणि ! क्रूरं दुर्भाग्यं मा प्रीणीत भवतां च दुःखेन । यद् दण्डनमस्माकं जीविते प्राप्यते तत् मोदेन ग्राह्यम् । तदा

In Public domain. Digitization Muthulakshmi Research Academy

तद् दण्डनमेव दण्ड्यते । मां वहत । बहुवारान् यूयं मया नीताः । इदानीं यूयं मां वहत । सर्वस्य कृते मम कृतज्ञतावचनं स्वीकुरुत ।

(ते निष्क्रान्ता एन्टोनिम् ईरासं च वहन्तः ।)

चतुर्थः अङ्कः पञ्चदशं दृश्यम् ।

(क्लियोपेट्रायाः प्रार्थनाकोष्ठः । क्लियोपेट्रा छार्मियाना ऐरासा परिचारिकाश्च प्रविशन्ति वेदिकायाः पश्चात् किञ्चिदुपरिभागे ।)

क्लियो - छार्मियाने ! अहमिदं स्थानं नैव जहामि ।

छार्मि - देवि ! शान्तिं कुरु ।

क्लियो - न । न करोमि । विचित्राणि घोराणि वृत्तानि मयि संभवन्तु। तान्यहं स्वीकरिष्यामि । आश्वासनं मास्तु । यावन्मम दुःखस्य कारणं तावता मम दुःखेन भवितव्यम् ।

(वेदिकाया अधोभागे डयोमेडिसः प्रविशति ।)

का वार्ता ? किं स मृतः ?

डयो - स मरणसमीपेऽस्ति न तु मृतः । तव कोष्ठादन्यत्र बहिः पश्य। रक्षकास्तमत्रानयन् ।

(रक्षकाः प्रविशन्ति एन्टोनिं वहन्तः ।)

क्लियो - हे सूर्य ! यस्मिन् मण्डले त्वं परिभ्रमसि तद् दह । तदा सर्वो लोकः शश्वदन्धकारमयो भविष्यति । बत ! एन्टोने ! छार्मियाने ! ऐरासे! अधस्ताद् वर्तमानाः सुहृदः ! कुरुत सहायताम् । तमत्रोद्धरत।

एन्टोनिः - उपशाम्य । सीजरस्य शौर्यमेन्टोनिं नाजयत् । एन्टोनेरेव

In Public domain. Digitization Muthulakshmi Research Academy

शौर्यमेन्टोनिं व्यजयत ।

क्लियो - तेनैवमेव भवितव्यम् । एन्टोनिरेवैन्टोनिं विजयताम् । परन्तु यद् वृत्तं तद् दारुणम् ।

एन्टोनिः - अहं म्रिये । ईजिप्टस्य राज्ञि ! अहं म्रिये । इदमेव मरणमभ्यर्थये। क्षणं निरीक्षस्व । यावदहमन्यत् चुम्बनं तवोष्ठयोर्न्यस्यामि यच्च भविष्यति बहुसहस्रचुम्बनानामन्त्यम् ।

क्लियो - तत्रागन्तुमहं साहसं न कुर्याम् । प्रिय ! मां क्षमस्व । भीतास्मि बन्दी गृहीता भवेयम् । सर्वविजयिनः सीजरस्यायं विजयो मया बन्द्या नालंकरिष्येत यदि छुरिकास्तीक्ष्णाः स्युर्विषाणि शक्तिमन्ति सर्पा दशेयुस्तर्ह्यहं मृत्यो रक्षामधिगमिष्यामि च । तव पत्नी आक्टेविया मामवज्ञया न निरीक्षेत । किन्तु एन्टोने ! आगच्छ । मम परिजनाः ! सहायतां कुरुत । त्वमुद्धर्तव्यः । सुहृदः ! मम सहाया भवत ।

(ते तमुद्धर्तुं प्रारभन्ते ।)

एन्टोनिः - त्वरां कुरुत । मरणात् पूर्वं मामुद्धरत ।

क्लियो - अतिभारः मम प्रभुः । अस्माकं शक्तिः शोकः परिवर्तितः। तस्मादयं भारः अनुभूयते । आगच्छ आगच्छ ।

(उद्धृत एन्टोनिः क्लियोपेट्रासमीपे स्थापितः ।)

स्वागतम् स्वागतम् । यत्र मया सहितस्य तव जीवितमभवत् तत्रैवेह तव मरणं भवतु । यदि मम ओष्ठयोर्जीवनदानप्रभावोऽस्ति तर्हि मम चुम्बनैश्चिरं जीव ।

सर्वे - बहुदुःखकरमिदम् ।

एन्टोनिः - अहं म्रिये । ईजिप्टराज्ञि ! अहं म्रिये । किञ्चिन्मद्यं

In Public domain. Digitization Muthulakshmi Research Academy

प्रयच्छ । मया किञ्चिदुक्तं भवतु ।

क्लियो - मनुष्याणां भाग्यदायिनी काचिद् दुष्टदेवता भवेत् । सा मयि कुपिता ।

एन्टोनिः - प्रिये ! राज्ञि ! सीजरस्याभ्यर्थनां कुरु गौरवस्य रक्षायाश्चोभयस्य कृते ।

क्लियो - गौरवं रक्षा च सह न भवतः ।

एन्टोनिः - प्रिये ! शृणु माम् । सीजरस्य जनेषु कमपि न विश्वसिहि प्रोक्युलियसं विना ।

क्लियो - अहं मम निश्चयं मम हस्तावेव विश्वसिमि । न सीजरस्य जनान् ।

एन्टोनिः - जीवितान्ते ममेमं विपर्ययं प्रति मा रुदिहि । मम पूर्वस्थितिं स्मर यदाहं प्रपञ्चे महत्तमो महोदारो राजा आसम् । नाहं म्रिये लज्जया भीरुवत् सीजरस्यावनतशिरा भूत्वा । प्रत्युत विक्रमेण विजितो रोमदेशीयेन रोमदेशीयोऽहं सगौरवं म्रिये । ममात्मा मां त्यजति । अतः परं वक्तुं न शक्नोमि ।

क्लियो - महोदार ! किं त्वं मरिष्यसि ? किं तव मयि अपेक्षा नास्ति? किमहं त्वां विनास्मिन् हीनप्रपञ्चे जीविष्यामि यो मरुस्थलतुल्यः ? पश्यत । लोके महत्तम इदानीमचेतनो भवति । पश्यत । हे प्रभो (एन्टोनिर्मृतः ।) युद्धयशोमयपुष्पहारो म्लानः । सैनिकानां महान् मार्गदर्शकः पतितः । दारका दारिकाश्चेदानीं पुरुषसदृशा भविष्यन्ति । विभेदो नष्टः। गगने चन्द्र आगच्छतु निर्गच्छतु च । तदधस्ताद् भुवि न कोऽपि विशेषो भविष्यति भाविनि काले ।

In Public domain, Digitization Muthulakshmi Research Academy

छार्मि - मान्ये ! उपशाम्य उपशाम्य ।

(क्लियोपेट्रा मूर्छिता ।)

ऐरासा - अस्माकं राज्ञी च मृता ।

छार्मि - देवि !

ऐरासा - आर्ये !

छार्मि - आर्ये ! आर्ये ! आर्ये !

ऐरासा - मान्ये ! ईजिप्टस्य राज्ञि !

(क्लियोपेट्रा प्रतिबुद्ध्यते ।)

छार्मि - मा कापि किमपि वदतु ।

क्लियो - अहमिदानीं राज्ञी नास्मि । गृहदासीसदृशी भवामि । अहमिदानीं मम किरीटं प्रतिकूलदैवानां सकाशे पातयेयं वदेयं च एष लोको युष्मल्लोकसदृश आसीत् अनघे एन्टोनावत्र सति युष्माभिरपहरणात् पूर्वम्। संपूर्ण यत् पुरासीत् तदिदानीं शून्यं संजातम् । अहं धैर्येणाज्ञातमृत्युलोकं प्रविशामि मृत्योरागमनमाकारणं च न निरीक्षे । छार्मियाने! ऐरासे ! अन्याश्च । पश्यत । अस्माकं जीवितस्य कान्तिर्नष्टा मृता च। सुजनाः पुरुषाः ! धैर्यं वहत । तस्य निखननं करिष्यामः । पश्चाद् वीरोचितमुदात्तं चात्मविनाशं करिष्यामः उन्नतरोमसंप्रदायानुसारेण। मृत्युः सगर्वो भवतु अस्मानादातुम् । इदं भौतिकशरीरं यस्मिन् एन्टोनेर्महानात्मा धृतः तदिदानीं शीतलम् । आगच्छत। आगच्छत । अस्माकमत्र मित्रं नास्ति । अस्माकं धैर्यमेवास्ति मित्रं शीघ्रमरणं च ।

(एन्टोनेः शरीरं वहन्तो निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमः अङ्कः प्रथमं दृश्यम् ।

(अलेक्जेन्ड्रियायां सीजरस्य शिबिरम् । सीजरः प्रविशति युद्धसभायाम् । अग्रिप्पः डोलबेल्लः मेसिनसः गेल्लसः प्रोक्युलियसश्च तत्र सन्ति ।)

सीजरः - डोलबेल्ल ! गच्छ । वद एन्टोनिम् आत्मसमर्पणं कुरु इति । तस्य स्थितिः सुतरामाशाशून्यास्ति । विलम्बो हास्यास्पदं भवति।

डोलबेल्लः - एष गच्छामि । (निष्क्रान्तः ।)

(एन्टोनेः खड्गं गृहीत्वा डेर्सिटासः प्रविशति ।)

सीजरः - कस्त्वम् ? कथमेवमागतोऽसि ?

डेर्सिटासः - मम नाम डेर्सिटासः । मया मार्कः एन्टोनिः सेवितः । सः अस्माकं महतीं सेवामर्हति स्म तस्य जीवितकाले । तदा मया तस्य सेवा कृता तस्य शत्रूणां विरोधश्च । यदि त्वं स्वीकुर्यास्तर्हि त्वां तथा सेविष्ये। नो चेद् भवान् मां हन्तु ।

सीजरः - किं वदसि ?

डेर्सिटासः - सीजर । अहं त्वां वदामि एन्टोनिर्मृत इति ।

सीजरः - किम् एन्टोनिर्मृतः ? यदा तादृशो महान् म्रियते अशनिपातेन भवितव्यम् । तदायं प्रपञ्चो विदीर्णो व्याकुलो भवेत् । सिंहान् नगरवीथीषु प्रेषयेत् मनुष्यांश्च द्रावयेत् सिंहगुहासु निवस्तुम् । इदं मरणमेकस्य मरणं नास्ति । प्रपञ्चार्धस्येदं मरणम् ।

डेर्सिटासः - सीजर ! स मृतः । न केनापि दण्डनेन न च घातकस्य छुरिकया । स आत्मघातमकरोत् । येन हस्तेन महान्ति वीरकार्याणि

In Public domain. Digitization Muthulakshmi Research Academy

कृतानि तेन हस्तेन स आत्मघातमकरोत् । तस्य हृदयं हस्ताय धैर्यमददात्। स हस्तो हृदयं व्यदारयत् । एष स खड्गः । तस्य क्षतेर्मयोद्धृतः । पश्य। तस्य माननीयं रक्तं तस्मिन्नस्ति ।

सीजरः - मित्राणि शृणुत । देवा मामुपालभेरन् यदीयं वार्ता राज्ञो न रोदयिष्यति ।

अग्रिप्पः - विचित्रमिदम् । यत् प्राप्तुमस्माभिर्महान् प्रयत्नः कृतस्तस्यैव प्राप्तस्य कृतेऽस्माकमिदानीं दुःखं भवति । एष मानवस्वभावः।

मेसिनसः - तस्मिन् दोषा गुणाश्च समा आसन् ।

अग्रिप्पः - तस्य सदृशः श्रेष्ठः परिपालको नास्ति । किन्तु हे देवाः ! यूयमस्माकं दोषान् दत्थ येन वयं न्यूनगुणा मानवास्तिष्ठामः। सीजरः खिन्नः ।

मेसेनसः - एन्टोनेर्महत्त्वं पश्यन् सीजर आत्मानमपि तस्मिन् पश्यति।

सीजरः - हे एन्टोने ! मया त्वमिमां स्थितिं नीतः । शरीरनाशको व्याधिरपनेतव्य एव । मया त्वं नाशयितव्य आसीः । नो चेत् त्वयाहं नाशितः स्याम् । एष प्रपञ्चो विशालः । तथापि सा विशालता पर्याप्ता नासीत् आवयोः सह स्थितेः । तथाप्यहं तव कृते विलपामि । ममावुत्तः मम प्रतिस्पर्धी परिपालने मम सहभागी मम सुहृत् युद्धरङ्गे मम सहचरः मम शरीरस्य हस्त इव भागश्चासीस्त्वम् । तव मनसि मम मनस्तव चिन्तनेषु मम चिन्तनानि च सम्मिलितान्यासन् । परन्तु आवयोर्जीविते परस्परानुकूले नास्तां येनावयोर्विरोधो जातः। सुहृदः ! मां शृणुत ।

(कश्चित् ईजिप्टदेशीयः प्रविशति ।)

नेदानीम् । अन्यदा वक्ष्यामि । एष आवश्यककार्येणागत इव दृश्यते !

 In Public domain. Digitization Muthulakshmi Research Academy

शृणुयामस्तस्य वचनम् । (ईजिप्टदेशीयं प्रति) कुतस्त्वमागतः ?

ईजिप्टदेशीयः - अहं वराक ईजिप्टदेशीयः । मम स्वामिनी क्लियोपेट्रा ज्ञातुमिच्छति तां प्रति भवतः के संकल्पा इति ।ताननुसृत्य सा च स्वकरणीयान्युपक्रमिष्यते । सम्प्रति सा प्रार्थनाकोष्ठे स्वयमात्मानमबध्नात्।

सीजरः - सा उच्यतां मनसि व्याकुलता मास्तु शान्तिरस्तु इति । अचिरेण सा अस्मद्दूतमुखेन ज्ञास्यति तस्यामस्माकं को व्यवहारो भविष्यति । तस्यामस्माकं सम्मानं दयां च ज्ञास्यति । असौम्यं किमपि सीजरो न करिष्यति ।

ईजिप्टदेशीयः - देवास्तवाशिषो ददतु । (स निष्क्रान्तः ।)

सीजरः - प्रोक्युलियस ! इत आगच्छ । सा उच्यतां वयं तस्याः किमप्यगौरवं न चिन्तयामः । तदर्थं यं प्रत्ययं तयापेक्ष्यमाणं त्वं चिन्तयेस्तं तस्या देहि येन सा आत्मघातं न कुर्यात् । तां जीवन्तीमहमपेक्षे । मम विजययात्रायां तां प्रदर्श्य शश्वत्कीर्तिं प्राप्तुमिच्छामि । गच्छ शीघ्रम् । प्रत्यागच्छ तस्या उत्तरेण सह । तस्या मनःस्थितिः कीदृशी इति च मां वक्ष्यसि ।

प्रोक्यु - सीजर ! एवं करिष्यामि । (स निष्क्रान्तः ।)

सीजरः - गेल्लस ! त्वं तेन सह गच्छ ।

(गेल्लसो निष्क्रान्तः ।) डोलबेल्लोऽपि गच्छतु । न न । स कार्यान्तरेण गतः । अग्रिप्प ! मेसिनस ! मामनुसरतम् । युवां दर्शयामि कियती ममानिच्छा आसीदस्मिन् युद्धे । बलादहमिदमकरवम्। एन्टोनेर्मया प्रेषिता लेखाः कियन्तः शान्ताः सौम्या इति दर्शयामि । आगच्छतमस्य निरूपणं पश्यतम् । (निष्क्रान्ताः।)

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमः अङ्कः द्वितीयं दृश्यम् ।

(क्लियोपेट्रायाः सौधे प्रार्थनाकोष्ठः । क्लियोपेट्रा छार्मियाना ऐरासा च प्रविशन्ति ।)

क्लियो - एकाकिन्याः स्थिताया मम स्वजीवितं सम्यगवगतम् । सीजरः क्षुद्रः । सौभाग्येनानुगृहीतः कश्चिदल्पः । इदानीं ममात्महत्या महत् कार्यं भवति । तेन सर्वाण्यन्यकार्याण्यवसितानि भविष्यन्ति । आकस्मिकघटनाः परिणामाश्च स्थगिता भविष्यन्ति । सा अस्मान् स्वापयति भूगतविचारेभ्योऽपनयति च ।

(प्रार्थनाकोष्ठद्वारे प्रोक्युलियसः गेल्लसः सैनिकाश्च प्रविशन्ति ।)

प्रोक्यु - सीजर ईजिप्टदेशराज्ञीमभिवादयते । स ज्ञातुमिच्छति कीदृशानात्माधिकारान् भवती अभिलषति यान् सः अनुजानीयात् ।

क्लियो - किं नाम तव ?

प्रोक्यु - मम नाम प्रोक्युलियसः ।

क्लियो - एन्टोनिर्मामवदत् त्वामुद्दिश्य । सोऽवदत् त्वं विश्वसनीय इति । परन्तु इदानीमहं विश्वसनीयतां नापेक्षे यतो वञ्चना मां न बाधेत। यदि तव स्वामी अभिलषति राज्ञी मां याचतामिति तदा स त्वया वक्तव्यः राज्यादवरं किमपि राज्ञी न याचते इति । यदि स आक्रान्तम् ईजिप्टं मे प्रयच्छति यन्ममैव तर्हि तदहं मम पुत्राय दद्यां नता तं नमस्कुर्यां कृतज्ञतया ।

प्रोक्यु - गतचिन्ता भव । त्वमुदारस्य वशेऽसि । कस्मिन्नपि विषये तव भीतिर्मास्तु । त्वं तं किमप्यपेक्षितमभ्यर्थयेः । तस्यौदार्यं प्रसरति यं

In Public domain. Digitization Muthulakshmi Research Academy

कमपि समुचितमर्थिनं प्रति । यद्यहं तं वक्तुं शक्नोमि त्वं तस्याधीनासि सामोदं तर्हि स तव सहायतामर्थयते च त्वत्कृते करणीयानि सहायताविधानानि च निश्चेतुम् ।

क्लियो - कृपया स उच्यतां भाग्यशालिने तस्मै अहमात्मार्पणमकरवम्। तेन विजितस्य यशसः कृते तमभिनन्दामि । होरायां होरायामहं विधेयतामधीये । तेन सह समावेशमभिलषामि ।

प्रोक्यु - मान्ये सर्वमिदं तं वक्ष्यामि । स्वस्था भव । तव स्थितिं प्रति स विषीदति । विशेषतः सा तेन कृतेति ।

गेल्लसः - असावधाना सा ग्रहीतव्या ।

(प्रोक्युलियसो द्वौ सैनिकौ च निश्रेणीमधिरुह्य पश्चादागम्य क्लियोपेट्रां गृह्णन्ति ।)

गेल्लसः - (प्रोक्युलियसं सैनिकौ च प्रति)

गृह्यतामेषा यावत् सीजर आयाति । (निष्क्रान्तः ।)

ऐरासा - देवि !

छार्मि - राज्ञि ! बन्दीकृतासि ।

(क्लियोपेट्रा छुरिकामुद्धरति ।)

क्लियो - मम हस्तौ । त्वरा क्रियताम् ।

(प्रोक्युलियसस्तस्या हस्तं गृहीत्वा छुरिकामपनयति ।)

प्रोक्यु - वीरवनिते ! इदं मा कुरु । त्वमस्माभिः रक्षिता नैव वञ्चिता।

क्लियो - किं मम मरणमपि निराक्रियते ?

प्रोक्यु - मम स्वामिन औदार्यं मा अवमन्यस्वात्मघातेन । लोको द्रक्ष्यति त्वां प्रति तस्य सुप्रवर्तनम् । तव मृत्युस्तन्निरुणद्धि ।

In Public domain. Digitization Muthulakshmi Research Academy

क्लियो - हे मरण ! क्वासि ? इत आगच्छ । राज्ञीं गृहाण । बहूनां याचकानां शिशूनां च ग्रहणेन किम् ?

प्रोक्यु - उपशाम्य मान्ये ! उपशाम्य ।

क्लियो - अहं न खादामि न च पिबामि । किमर्थं वृथाभाषणम् ? न चाहं स्वपिमि । मरणशीलमिदं शरीरं विनाशयामि । यदिच्छति तत् करोतु सीजरः । इदं जानीहि तव स्वामिनः सभायामहं शृङ्खलाबद्धा न स्थास्यामि । सकृदपि तस्या मन्दाया आक्टेवियाया आक्रोशानां मां भाजनं न करिष्यामि। अहं रोमनगरं न गमिष्यामि आक्रोशतां जनानां मम प्रदर्शनार्थम् । अहमीजिप्टे मलिनजलकुल्यायां मरिष्यामि नैलनद्यां पतित्वा मशकमक्षिकापरिवृता मरिष्यामि ।

प्रोक्यु - त्वमेभिर्घोरैरूहैरात्मानमुद्वेजयसि । एवं कर्तुं सीजरस्तव किमपि कारणं न दास्यति ।

(डोलबेल्लः प्रविशति ।)

डोल - प्रोक्युलियस ! सीजरेण श्रुतं तवात्र कृतम् । त्वां प्रेषयितुं सीजरो मां प्रैषयत् । राज्ञीमहं ममाधीनां करोमि ।

प्रोक्यु - एवमस्तु डोलबेल्ल । सीजरस्याभिनन्दनं ममोत्तमं पारितोषिकम् । अनया सह सौम्यं प्रवर्तस्व (क्लियोपेट्रामुद्दिश्य) कामपि तवाभ्यर्थनामहं सीजरं वक्ष्यामि ।

क्लियो - अहं मर्तुमिच्छामीति तं वद ।

(प्रोक्युलियसो निष्क्रान्तः ।)

डोलबेल्लः- परममान्ये ! राज्ञि ! अप्यहं श्रुतस्त्वया ?

क्लियो - न स्मरामि ।

 In Public domain. Digitization Muthulakshmi Research Academy

डोल - नूनं त्वं मां जानासि।

क्लियो - यन्मम श्रुतं ज्ञातं वा तदस्तु मास्तु। त्वं तादृशो भवेर्यो बालानां स्त्रीणां च स्वप्नान् कथयतां कथयन्तीनां च हसेत्। किमयं तव स्वभावो नास्ति ?

डोल - नाहमवगच्छामि तवाभिप्रायमार्ये।

क्लियो - कश्चिन्महाराज एन्टोनिर्मया स्वप्ने दृष्टः। तस्मात् पुनः स्वप्तुमिच्छामि येन पुनस्तादृशं स्वप्नं पश्येयम्।

डोल - यदि राज्ञी इच्छति.....

क्लियो - तस्य मुखमाकाश इवास्ति। नेत्रे सूर्यचन्द्राविव याविमं भूगोलं प्रकाशयत आकाशे प्रयाणं कुर्वन्तौ।

डोल - राज्ञि।

क्लियो - तस्य प्रभावः समुद्रस्य एकस्मात् तीरादन्यतीरं व्याप्तः। तदा किमेष समुद्रं पद्भ्यामाक्राम्यन् गत इत्याभात्। यदा स आज्ञापयन् हस्तमूर्ध्वं प्रासारयत् तदा प्रपञ्चः अकम्पत। मित्रैः सह स मनोज्ञमभाषत। यदा तु स प्रपञ्चं त्रासयितुमैच्छत् तदा तस्य कण्ठध्वनिरशनिपातवद-भवत्। तस्यौदार्यस्य निष्फलः कालो नासीत्। अधिकं दददधिकतरं दातुं स ऐच्छत्। तस्य विनोदास्तमन्यादृशं प्रादर्शयन् लोके भारेभ्यः कर्तव्येभ्यश्च दूरे स्थितम्। राजानो राजबन्धवश्च तमसेवन्त। तस्य धृतवस्त्रकोषाद् राज्यानि राष्ट्रणि च नाणकानीवापतन्।

डोल - क्लियोपेट्रे !

क्लियो - किं त्वं चिन्तयसि तेन तुल्यः अन्य आसीदस्ति भविष्यति वा यो मया स्वप्ने दृष्टः ?

 In Public domain. Digitization Muthulakshmi Research Academy

डोल - आर्ये ! न ।

क्लियो - तादृशः केवलमूहनीयः ।

डोल - आर्ये मम वचनं शृणु । त्वं विशिष्टासि । यत् तव नष्टं तदपि विशिष्टतरम् । यत् तव नष्टं तस्य महत्त्वस्यानुरूपं तव वचनं प्रवर्तते । यदि तव दुःखस्य कृते ममापि दुःखं न भवति तर्हि अहं लोके कस्मिन्नपि विषये गणनां न प्राप्नुयाम् ।

क्लियो - कृतज्ञास्मि । अपि जानासि सीजरो मम विषये किं चिकीर्षति?

डोल - यद् भवती ज्ञातुमिच्छति तद् वक्तुं ममेच्छा न भवति ।

क्लियो - कृपया उच्यताम् ।

डोल - कामं सीजरो माननीयः -

क्लियो - तथापि मां विजययात्रायां प्रदर्शयितुमिच्छति ।

डोल - मान्ये ! स तत् करिष्यति । अहं जानामि ।

(बहिस्तूर्यध्वनिः । कलकलः । अपसरत अपसरत । सीजर आयातीति भटानामाक्रोशः श्रूयते । सीजरः गेल्लसः प्रोक्युलियसः मेसिनसः अन्ये च प्रविशन्ति ।)

सीजरः - ईजिप्टस्य राज्ञी का ?

डोल - मान्ये ! एष महाराजः ।

(क्लियोपेट्रा नता भवति ।)

सीजरः - उत्थिता भव । त्वया प्रणामो न कार्यः । ईजिप्टस्य राज्ञि! उतिष्ठ ।

(क्लियोपेट्रा उत्तिष्ठति ।)

क्लियो - दैवैरिदमेवं निश्चितम् । भवान् मम प्रभुः । मया तवादेशः

In Public domain. Digitization Muthulakshmi Research Academy

कार्यः ।

सीजरः - बाधाकरचिन्ततनं मा कुरु । युद्धे मया क्षतयः प्राप्ताः । ता यदृच्छाप्राप्ता अहं मन्ये ।

क्लियो - प्रपञ्चप्रभो ! मम विषयं स्पष्टरूपेण त्वां वक्तुं न शक्नोमि। अहमभ्युपगच्छामि मयि कानिचन दुर्बललक्षणान्यासन् यानि कासुचित् स्त्रीषु भवन्ति ।

सीजरः - इदं ज्ञायतां क्लियोपेट्रे ! वयं तव दोषान् लघूकर्तुमिच्छामो न तु गुरूकर्तुं यदि त्वमस्माकमभिप्रायाननुकूलयसि । ते अभिप्रायास्त्वां प्रति कोमला भवन्ति । तवानुकूलता तव लाभाय भवति । यदि त्वमेन्टोनिवत् आत्मघातं कुर्या मां च क्रूरं प्रदर्शयेस्तर्हि त्वां प्रति मम सुकार्याणि नश्येयुः । तव पुत्राणां विनाशो भविष्यति । यदि त्वमनुकूला भवेस्तेषां रक्षा भविष्यति । इदानीमहं त्वामामन्त्रये ।

क्लियो - त्वं लोके किमपि कुर्याः । एष प्रपञ्चस्तव । वयं तव विजयचिह्नानि । प्रभो ! इदं दृश्यताम् । इयं मम सकाशे स्थितानां सर्वधनानां वस्तूनां च नामपट्टिका । सेल्यूकसः कुत्र ?

सेल्यूकसः - (प्रविश्य) आर्ये ! एषोऽस्मि ।

क्लियो - इदं मम सर्वस्वम् । एष मम कोशाध्यक्षः । सेल्यूकस ! सत्यं वद । मया सर्वं प्रकटितम् । किमपि न गुप्तम् ।

सेल्यूकसः - (पट्टिकां परिशील्य) मान्ये ! सत्यम् । सर्वं प्रकटितम्।

सीजरः - क्लियोपेट्रे ! इयं पट्टिका मम मास्तु । सर्वमिदं तवैव धनं भवति । सीजर आपणिको नास्ति । समाश्वसिहि । निर्वृता भव । भुङ्क्ष्व। विश्राम्य । निद्रां गच्छ । अस्माकं मैत्री संजाता तव रक्षणं च भवति ।

In Public domain. Digitization Muthulakshmi Research Academy

सम्प्रति त्वामामन्त्रये ।

क्लियो - मम प्रभो !

सीजरः - एवं मां न व्याहर । स्वस्ति ।

(तूर्यध्वनिः । परिजनसहितः सीजरो निष्क्रान्तः । सेल्यूकसो निष्क्रान्तः।)

क्लियो - स मां तथा वदति यथा मया राज्ञीवन्न प्रवर्तितव्यम् । किन्तु । छार्मियाने ! शृणु । (सा छार्मियानायाः कर्णे उपांशु वदति ।)

ऐरासा - मान्ये ! अस्य समाप्तेरयं कालः । अस्माकं जीवितानां कान्तिमद् दिनं गतम् । अधुना अन्धकार एव भवति ।

क्लियो - (छार्मियानां प्रति) पुनर्गच्छ । मया आदेशो दत्तः । तत् सिद्धं कर्तुं त्वरां कुरु ।

छार्मि - एषा करोमि ।

(डोलबेल्लः पुनः प्रविशति)

डोल - राज्ञी कुत्र ?

छार्मि - इतः पश्य । (सा निष्क्रान्ता ।)

क्लियो - डोलबेल्ल !

डोल - मान्ये ! त्वां प्रति ममादरोऽस्ति । अतस्ते वदामि । सीजरः सिरियामन्तरेण प्रयाति । दिनत्रयान्तरे त्वं तव पुत्राश्च पुरस्तात् प्रेषयिष्यन्ते । इयं वार्ता त्वयोपयुज्यतां यथा शक्यं तथा ।

क्लियो - डोलबेल्ल ! अहं शश्वत्तवाधमर्णा भवामि एतत्कृते ।

डोल - अहं तव सेवकः । देवि ! आमन्त्रये । मया सीजरः सेव्यः ।

क्लियो - स्वस्ति । कृतज्ञतावचनं च ।

 In Public domain. Digitization Muthulakshmi Research Academy

(डोलबेल्लो निष्क्रान्तः ।)

ऐरासे इदानीं किं चिन्तयसि ? मया सह त्वमपि रोमनगरे प्रदर्शिता भविष्यसि । ईजिप्टयान्त्रिकपाञ्चालिकावत् । अनागरिका मलिनवस्त्रधारिण आजन्मदासा विविधकर्मकरा मां त्वां च जनानां प्रदर्शयिष्यन्ति । तेषां दुर्गन्धनिःश्वाससमूहो मेघवदावां परितो भविष्यति । आवाभ्यां स उच्छ्वसितव्यो भविष्यति ।

ऐरासा - देवास्तत् परिहरन्तु ।

क्लियो - ऐरासे अवश्यं तद् भविष्यति । कुपिताः कार्यकर्तारः आवां वेश्या इव नोत्स्यन्ति । नीचा गेयकर्तार आवां प्रति नीचगीतानि रचयिष्यन्ति। धूर्ता विदूषका आवयोरनुकरणं करिष्यन्तः अत्रत्यानस्माकमुत्सवान् प्रदर्शयिष्यन्ति । एन्टोनिं मद्यपानमत्तं प्रदर्शयिष्यन्ति । कश्चिद् बालो हीनकण्ठो मम पात्रं नटिष्यति वेश्यावन्मां प्रदर्शयन् ।

ऐरासा - हे भगवन् ।

क्लियो - सत्यं तत् ।

ऐरासा - अहं तन्नैव द्रक्ष्यामि । अहं जानामि मम नखा नेत्राभ्यां शक्तिमत्तराः । नखैर्नेत्रे विदारयिष्यामि ।

क्लियो - तेषां दुष्टसंकल्पान् पराजेतुं तदेव विधानम् ।

(छार्मियाना पुनः प्रविशति ।)

छार्मियाने ! अन्याश्च मम परिचारिकाः ! राज्ञ्या ममालंकरणं कुरुत । ममोत्तमानि वस्त्राण्यानयत । अहं पुनस्तथा भवेयं यथाहं गता सिड्नसनदीं मार्कम् एन्टोनिं प्रथममुपगन्तुम् । ऐरासे ! गच्छ । छार्मियाने! त्वरावहै । मामलंकृत्य पश्चाद् यूयं यावज्जीवं क्रीडत । (ऐरासां प्रति)

In Public domain. Digitization Muthulakshmi Research Academy

मम किरीटं राज्ञीचिह्नानि चानय ।

(ऐरासा निष्क्रान्ता । नेपथ्ये कलकलः ।)

कः स शब्दः ?

(रक्षक एकः प्रविशति ।)

रक्षकः - कश्चिज्जानपद आगतः । अवश्यं मया राज्ञी द्रष्टव्या इति स वदति । स तव कृते उदुम्बरफलान्यानयत् ।

क्लियो - स प्रविशतु ।

(रक्षको निष्क्रान्तः ।)

बह्वल्पमिदं साधनं किन्तु महत् कर्म करिष्यति । मम स्वेच्छां प्रयच्छति। मम मनो निश्चितम् । इदानीं मयि दुर्बला स्त्री नास्ति । आपादमस्तकमहं शिलाकठिनास्मि । परिणामशीलश्चन्द्र इदानीं न मम सदृशः ।

(रक्षकः पुनः प्रविशति गृहीतकरण्डेन ग्राम्यजनेन सह ।)

रक्षकः - एष सः ।

क्लियो - गम्यताम् । (रक्षको निष्क्रान्तः ।) अपि तव करण्डे स स्वल्पो नैलनदीसर्पोऽस्ति यः पीडां विना हन्ति ?

ग्राम्यः - आर्ये ! अस्ति स मम सकाशे । परन्तु मा तं स्पृश । तस्य दंशनं प्राणान्तकम् । तेन दष्टाः प्रायेण म्रियन्ते ।

क्लियो - अपि जानासि कमपि तथा मृतम् ?

ग्राम्यः - बहून् जानामि पुरुषान् स्त्रियश्च । ह्य एव काञ्चित् स्त्रियं तथा मृतां जानामि । सा ऋजुस्वभावा आसीत् परन्तु कदाचिदसत्यभाषिणी। स्त्री कदाप्यसत्यं मा वदतु आत्मगौरवरक्षणार्थं विना । अहं जानामि कथं सा मृता कियती च बाधा तयानुभूता । सा नूनमस्य सर्पस्य प्रभावस्य

In Public domain. Digitization Muthulakshmi Research Academy

निरूपणमस्ति ।

क्लियो - इदानीं त्वं गन्तुं शक्नोषि । स्वस्ति ।

ग्राम्यः - एष सर्पस्तव श्लाघां प्राप्नोतु ।

(स करण्डकमधस्तान्न्यस्यति ।)

क्लियो - तव शुभमस्तु ।

ग्राम्यः - इदं जानीहि । सर्पः स्वस्य स्वभावमनुसृत्य प्रवर्तते ।

क्लियो - जानामि । स्वस्ति ।

ग्राम्यः - श्रूयताम् । सर्पो महापायकरः । अनुभवशालिनैव स स्प्रष्टव्यः। सर्पे कापि दया न भवति ।

क्लियो - मास्तु चिन्ता । तवापायसूचनानि स्मरामः । इदानीं गन्तुं शक्नोषि । स्वस्ति ।

ग्राम्यः - सर्पेण सह तव शुभमस्तु ।

(ग्राम्यो निष्क्रान्तः । ऐरासा प्रविशति क्लियोपेट्राया राज्ञीवस्त्रालंकारान् गृहीत्वा ।)

क्लियो - ममालंकारं कुरु । किरीटं स्थापय । अहममरा भवितुमिच्छामि । अतः परम् ईजिप्टदेशीयं मद्यमहं न पास्यामि ।

(छार्मियाना ऐरासा च तामलंकुरुतः ।)

शीघ्रं शीघ्रम् । ऐरासे ! त्वरां कुरु । शृणोमि एन्टोनिर्मामाह्वयति । तमहं पश्यामि पुनर्जीवितं ममेदं कार्यं प्रशंसन्तम् । अहं शृणोमि तं सीजरस्य सुभाग्यमपहसन्तम् । देवा जनेषु क्लेशान् ददति सुभाग्यानि च । हे मम भर्तः! एषा आगच्छामि । सम्प्रति मम धैर्यं निरूपयति अहं तस्य पत्नीति । इदानीं मरणशीलजीविते मया सह अग्निर्वायुश्च भवतः

In Public domain. Digitization Muthulakshmi Research Academy

भूमिर्जलं च त्यज्येते। अपि ममालंकरणं कृतम्? इत आगच्छतम्। मां चुम्बतम्। ममोष्टयोर्मार्दवं गृह्णीतम्। साधुशीले! छार्मियाने! ऐरासे! स्वस्ति। स्वस्ति। (सा ते चुम्बति। ऐरासा पतति म्रियते च।) किं ममोष्ठे विषमस्ति? यदि त्वमेवमनायासेन शरीरं त्यक्तुं शक्नोषि तर्हि मृत्युसर्पः प्रियस्य पीडेव भवति या इष्यते। यदि त्वमेवमस्मान् विसृजसि तर्हि त्वं लोकं वदसि आमन्त्रणमनावश्यकमिति।

छार्मि - हे मेघाः! जलीभूय पतत। तदाहं वदामि देवा एव विलपन्तीति।

क्लियो - ऐरासा गता। किं मया स्थीयते? शीघ्रं गच्छामि। एन्टोनिर्मां प्रतीक्षते। आगच्छ मारक सर्प!

(सा सर्पं वक्षसि स्थापयति।)

तव निशितैर्दन्तैर्मां जीवितात् पृथक् कुरु। कोपेन दश। यदि त्वं भाषणसमर्थः स्यास्तर्हि त्वां वदन्तमहं शृणुयां सीजरं मतिहीनमनागरिकम्।

छार्मि - हे प्राग्दिशाराज्ञि!

क्लियो - मा खलु मा खलूक्त्वा। किं त्वं नापश्यो मम शिशुं स्तनं पिबन्तं येन तस्य माता निद्रां गता?

छार्मि - मम हृदय। किं न भिद्यसे?

क्लियो - विषमस्ति मृदु। हे एन्टोने! क्षणेनागच्छामि।

(सा द्वितीयं सर्पं हस्ते स्थापयति।)

किमिदानीमपि मया स्थीयते? (सा म्रियते।)

छार्मि - अस्मिन् कुजगति? सुखं गच्छ। हे मृत्यो! त्वमिदानीं सगर्वं वदेरिदानीं ममाधीनेऽस्ति काचिदसदृशी वनितेति। मृदुनी नेत्रे संवृते

 In Public domain. Digitization Muthulakshmi Research Academy

भवताम् । (सा क्लियोपेट्राया नेत्रे संवृणोति ।) आभ्यां राजनेत्राभ्यां सूर्यः पुनर्न द्रक्ष्यते । तव किरीटं पार्श्वतः स्रस्तम् । सम्यक् स्थापयामि । पश्चात् क्रीडिष्यामि ।

(रक्षिणः सशब्दं प्रविशन्ति ।)

प्रथमो रक्षकः - कुत्रास्ति राज्ञी ?

छार्मि - मन्दं वद । तां न प्रतिबोधय ।

प्रथमो - सीजरेण प्रेषितोऽस्मि ।

छार्मि - त्वं मन्दगमनो दूतः । (सा सर्पं स्वदेहे प्रयुङ्क्ते ।) हे ! कुरु शीघ्रम् । सम्यग् दश ।

प्रथमो - आगच्छत । आगच्छत । अत्र सर्वं दुष्परिणतम् । सीजरो वञ्चितः ।

द्वितीयो - अत्रागतो डोलबेल्लः सीजरेण प्रेषितः । स आकार्यताम् ।

प्रथमो - किमहमत्र पश्यामि ? छार्मियाने ! किमेवं कृतम् ?

छार्मि - सुकृतम् । राजवंशे उद्भूताया राज्ञ्या इदं सुकृत्यम् ।

(सा मृता । डोलबेल्लः पुनः प्रविशति ।)

डोल - किमत्र प्रवर्तते ?

द्वितीयो - सर्वा मृताः ।

डोल - सीजर ! एवं भविष्यतीति त्वया चिन्तितम् । इदं निवारयितुं त्वया प्रयत्नः कृतः । किन्तु तद् घोरकार्यं कृतं द्रष्टुमिदानीमागच्छसि ।

(सपरिवारः सीजरः पुनः प्रविशति ।)

सर्वे - उत्सरत उत्सरत । सीजर आयाति ।

डोल - मान्य ! अनागतं सम्यगूहितं त्वया । यत् त्वया शङ्कितं तद्

In Public domain, Digitization Muthulakshmi Research Academy

वृत्तम् ।

सीजरः- सान्तं सा वीरतमासीत् । सा अजानात् तया सहाहं किं कर्तुमिच्छामि । राज्ञी सा आत्मानमपानयत् । कथमेता मृताः ? अत्राहं रक्तं न पश्यामि ।

डोल - क आसीदत्र ताभिः सहान्त्यसमये ?

प्रथमो - कश्चिज्जानपदः । स उदुम्बरफलान्यानयत् । अयं करण्डः।

सीजरः - किं तानि फलानि विषलिप्तानि ?

प्रथमो - सीजर ! मया दृष्टा छार्मियाना राज्ञ्याः किरीटं सम्यक् कुर्वती । तत् कृत्वा सा पतिता मृता च ।

सीजरः - विषप्रयोगचिह्नानि न दृश्यन्ते । शरीरेषु कोऽपि विकारो न दृश्यते । निद्रिता इव सन्ति एताः ।

डोल - अत्रास्या वक्षसि रक्ताङ्कोऽस्ति । अन्यो हस्ते च ।

प्रथमो - नूनमेता नैलनदीपरिसरेषु प्रवर्तमानैः सर्पैर्दष्टा मृताश्च ।

सीजरः - तथा सा मृता स्यात् । तस्या वैद्यो मामवदत् सा पृच्छति स्म सुलभमरणविधानानीति । इमाः स्त्रियः पूजाकोष्ठाद् बहिर्नयत । तस्या निखननम् एन्टोनेः पार्श्वे भवतु । प्रपञ्चे कस्मिन्नपि समाधौ स्त्रीपुरुषौ सह न भवतः यथेमौ । मम विजया वैभवोपेताः सन्ति एन्टोनिक्लियोपेट्र्योः कथा तु शोकमयी । अस्मत्सैन्यं सविषादं निखननमुपस्थितं भवतु पश्चाद् रोमं गच्छतु । डोलबेल्ल ! आगच्छ । पश्यात्र सर्वं कार्यं यथाविधि क्रियते सवैभवं च ।

(सर्वे निष्क्रान्ताः ।)

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्या

मेक्बेतः

I 1. धूसराखुभुक् - मित्रं संबोध्य वदति । सा मार्जालाकृतिर्धूसरवर्णा च । मण्डूकी - सा मण्डूकाकृतिः ।

2. Thane = प्रभुः । थेनः । नार्वेराजः स्वीनः । Sweno इति इङ्ग्लीषभाषायाम् । तस्मिन् काले डालराणि नासन् किल ।

3. डाकिन्यः सूकरान् द्विषन्तीति मायामन्त्रप्रयोगेण तान् घ्नन्तीति च विश्वासः । डाकिन्यश्चालनीनौषु प्रयान्तीति विश्वासः ।

एकाशीतिसप्ताहान् = 81 weeks.

दुष्टं तत् शिष्टमभवत् । अजानन् मेक्बेतो डाकिनीवचनं वदति। इतः फोर्रेसः कियति दूरे ? तस्मिन् काले मार्गेषु दूरसूचिकाः शिला नासन् ।

ग्लेमिसस्य थेनः । थेनः इति साधिकारबिरुदम् । ग्लेमिस् इति कश्चित्प्रदेशः । काडरः इति अन्यः प्रदेशः । तत्र प्रभुः । एवंविधैर्वचनैर्डाकिन्यो मानवान् कुपथं नयन्तीति मत्वा बेङ्कस्तानि वचांसि मनसि नाकरोत् । राजत्वगाढाकाङ्क्षी मेक्बेतो डाकिनीवचांसि मनसि स्थापयामास ।

तथापि तदेव चिन्तयामि । मेक्बेतस्य मनसि ततः पूर्वमेव राजत्वाकाङ्क्षा आसीत् । डाकिनीभिस्तस्या आशायाः सिद्धिः

In Public domain. Digitization Muthulakshmi Research Academy

कथिता । किन्तु तदर्थं राज्ञो डङ्कनस्य हत्या कार्या । अतो मेक्बेतश्चिन्तयति ।

अपायः= Danger, dangerous situation. एवमुक्त्वा धृतराष्ट्रो मनीषी हितान्वेषी बान्धवानामपायात् । महाभारतम्. भण्डार्कर. सभा. 63.26

अपायो मस्तकस्थो हि विषयग्रस्तचेतसाम् । सुभाषितरत्न-भाण्डागारम् । Page 395. बहुदुःखेषु क्षणदुःखप्रदोऽपायः अनुग्रह एव । नीतिवाक्यामृतम् । सोमदेवः मन्त्रिसमुद्देशः । 160. बहुकष्टेषु सत्सु क्षणकालदुःखकरोऽपायः अनुग्रह एव । बहुदुःखेषु सत्सु केनाप्यपायजनितेन क्षणदुःखेन मरणं वरमित्यभिप्रायः। अहो प्रमादः । मृच्छकटिकम् - 2

4.अनर्घबन्धो मेक्बेत। राज्ञो डङ्कनस्य मेक्बेतः समीपबन्धुरासीत् ।

इन्वर्नेसं गमिष्यामः । अयं मेक्बेतस्य दुर्गः ।

7 न तु निश्चितमपूरयित्वा विसृजेयम् । इयं धीरता तस्या वचनेष्वेव। प्रकृत्या सा न धीरा । इदमग्रे प्रकटितं भवति ।

II 1.मम दुश्चिन्तनानि निवारयत । डाकिन्यः अवदन् बेङ्कस्य पुत्रा राजानो भविष्यन्तीति । तानि वचनानि चिन्तयन् बेन्को व्यग्रः संजातः । तथापि तस्य मनसि कुचिन्तनं नासीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

2. तन्मद्यं यत् सेवकाभ्यां पीतं मां धीरामकरोत् । श्रीमती मेक्बेतः मद्यमपिबत् स्वोद्वेगशमनाय । तदेव मद्यमौषधमिश्रितं सेवकाभ्यां पीतम् ।

3. अत्र मेक्डफद्वारपालकयोर्हास्यसंभाषणं प्रवर्तते हास्ययुतम् । तन्मया त्यक्तम् । नाटकरचनायां षेकस्पियरेण जनाकर्षणविधानमनुसृतम् । विषादनाटकं यदि साकल्येन विषादभरितं भवेत् तर्हि साधारणप्रेक्षकाणामरुचिर्भवेत् । तस्मात् गम्भीरस्थितिषु च तेन क्वचित् हास्यं प्रयुक्तम् । पश्चात् षेक्स्पियरस्य मरणानन्तरं नटैः कानिचित् प्रक्षिप्तानीति च विमर्शकानां कश्चिदभिप्रायः । इमानि कानिचिद् वाक्यानि केषुचिदद्यतनप्रकाशनेषु त्यक्तानि । दृश्यताम् एन्टोनिः क्लियोपेट्रा च । II. 2 व्याख्या ।

3. शीघ्रं मां बहिर्नयत । श्रीमती मेक्बेतः शोकोद्वेगौ नटति । मेक्बेतश्च मानसिकोद्वेगं विसृज्य समयानुकूलं प्रवर्तते भाषते चेदानीम् ।

भ्रातः किमिदं प्रवर्तितम् । अत्र किञ्चित् परिवर्तितम् ।

4. गतानि सप्ततिं वर्षाण्यहं सुस्मरामि । सुशिक्षते 1.7.3 नैषधम् पाठान्तरम् । सुग्रहीतुं कुशलो देवदत्तः शास्त्रार्थम् । व्याकरणचन्द्रोदय । चारुदेवशास्त्री । II 132 सुधास्यति । महाभारतम् भण्डा, आदि 114.31. सुप्रशंस्य । शिवमहापुराणम् 2.30.17.

In Public domain. Digitization Muthulakshmi Research Academy

एवं क्वचित् क्वचित् ।

स्कोनम् - स्कोन्पत्तनं प्राचीनम् । तस्मिन् काले स्काट्लन्डराजास्तत्राभिषिक्ताः ।

न न । मम गृहं फैफषैरं गच्छामि । यद्यपि राज्ञो हत्यां प्रति जनवाक्यं मेक्डफो रासं कथयति तथापि तस्य मेक्बेते संदेहोऽस्ति । आगामिनि मेक्बेतस्य राजत्वकाले जनानां स्थितौ च तस्य महान् संदेहः ।

III 1. यथा श्रूयते मार्कस्य एन्टोनेः सीजरात् । एष आक्टेवियसः सीजरः । दृश्यताम् एन्टोनिः क्लियोपेट्रा च । II. 3

3. त्रयो घातकाः प्रविशन्ति । मेक्बेतः द्वाभ्यां घातकाभ्यां सहाभाषत । पश्चात् तृतीयेन च रहसि भाषित्वा तमपि प्रैषयदित्यूह्यम् । तस्मात् तस्य तयोर्द्वयोर्घातकयोः पूर्णो विश्वासो नासीदित्यूह्यम् ।

4. राज्ञी स्वस्याः आसने । स्वकान्तिः । नैष 1.42., स्वस्याः कान्तिः । नारायणः । स्वस्याः दमयन्त्याः ।

बेन्कस्य भूतं प्रविशति । भूतवेषेण बेन्कवेषधारी प्रविश्योपविशति। तं मेक्बेत एव पश्यति नान्यः । तथा तत्र नटनं कर्तव्यम् । सहजकवचवान् । खड्गमृगस्य चर्म कठिनं भवति ।

5. इदं दृश्यं षेक्स्पियरविरचितं नास्ति प्रक्षिप्तमिति एकः अभिप्रायः।

In Public domain. Digitization Muthulakshmi Research Academy

6. अस्मिन् दृश्ये लेन्नक्सस्य वचनानि निन्दागर्भितानि । यदि डङ्केनस्य पुत्रौ मेक्बेतस्याधीनौ स्यातां तर्हि पितृहत्यापराधं तयोरारोप्य तयोर्मरणदण्डनं मेक्बेतेन कृतं स्यात् यतस्तयो राजाधिकारो भवति ।

IV 1. इदं दृश्यं मूलात् संक्षिप्तं तत्र तत्र किञ्चित् परिवर्तितं च । इदं च दृश्यं पूर्णरूपेण षेक्स्पियररचितं नास्तीति कश्चिदभिप्रायः।

2. तव पिता त्वां त्यक्त्वा गतः । मम पिता शीघ्रं पुनरागमिष्यति। अत्र मूलं संक्षिप्तं परिवर्तितं च ।

3. तव विवेकयुतं कार्यं स्यात् । माल्कमः संदेग्धि मेक्डफं किमर्थं स तत्रागत इति । नाहं द्रोही दुर्वृत्तो वा । मेक्डफोऽजानात् मेक्बेत एव डङ्केनमहन्निति । यत्किमपि कारणं प्रकल्प्यात्मानमपि स घातयेदिति च । तस्मात् स रहसि शीघ्रं पलाय्य इङ्ग्लन्डं गतः। तेन न चिन्तितं स्यात् मेक्बेतस्तस्य भार्यां पुत्रांश्च हन्यादिति । भार्यापुत्रैः सह रहसि पलायनमसाध्यमिति तेन चिन्तितं स्यात् ।

निराशया - निर्गता आशा निराशा । आशाया अभावः । प्रादिसमासः । शब्दापशब्दविवेकः 42.258 व्या चं II .64

V 1. ज्वलितदीपिका = candle - द्वितीया होरा । मेक्बेतेन डङ्कनस्य हत्यासमयं नक्तं द्विवादनसमयं सा वदति ।

In Public domain. Digitization Muthulakshmi Research Academy

3 Senna, Rhubarb, इमे विरेचनकर्यावौषधी ।

आङ्ग्लेयपुरुषान् = Englishmen.

7 बद्धो भल्लूकः श्वभिः। पुरा तत्र क्रूरा क्रीडा आसीत् । तस्यां क्रीडायां दारुस्तम्भे बद्धस्य भल्लूकस्य तस्मिन् मुक्तैः श्वभिः सह युद्धमभवत् यस्मिन् बहवः श्वानो हन्यन्ते स्म ।

8 युद्धे पराजिता रोमनदेशनायकाः तदा आत्मघातमकुर्वन् । केशियसः ब्रूटसश्च Julius caesar नाटके । एन्टोनिः Antony and Cleopatra नाटके ।

एर्लपदवी । Earl काचिद् गौरवयुता पदवी ।

In Public domain. Digitization Muthulakshmi Research Academy

हेम्लेटः

I 1. दीर्घायुरस्तु राजा । इदमभिज्ञानवचनम् ।

त्वं महान् विद्वानसि । विद्वान् होरेषियो लेटिन्भाषां जानाति। अतिमानुषाणि देवताभूतादीनि लेटिन्भाषया वक्तव्यानीति तदा विश्वासः । होरेषियो लेटिन्भाषया भूतेन सह संभाषणमकरोदिति ऊहनीयम् । किन्तु नाटके होरेषियो भूतं प्रति इङ्गलीषभाषयावदत् । नाटकमिङ्गलीष्भाषया रचितम् । तस्मात् सर्वैरिङ्गलीष्भाषया भाषितम् । यथार्थतस्ते इङ्गलीषभाषामपि न जानन्ति । डेनिष् भाषां जानन्ति । इदानीं नाटकं संस्कृतभाषया रच्यते । तस्मात् संस्कृतमजानन्तोऽपि ते संस्कृतेन भाषन्तेऽस्मिन् नाटके । आन्ध्र्यां रचिते रामायणकाव्ये नाटके वा रामादयः सर्वे आन्ध्र्यां भाषन्ते यद्यपि ते आन्ध्रीं भाषां न जानन्ति । प्राचीनसंस्कृतनाटकेषु तु नायकादयः संस्कृतं भाषन्ते नायिकादयस्तु प्राकृतम् । भरतेन तथा निर्दिष्टम्। तस्मिन् काले जनभाषा प्राकृतमभवत् तत एवं कृतम् । परं तु इदं भृशमसमीचीनं प्रावर्तत । यया भाषया नाटकं काव्यं वा क्रियते तया भाषया तत्रत्यैः सर्वैर्भाषितव्यम् ।

किमपि वक्तव्यमावाभ्यामिति तदिच्छति । तस्मिन् काले विश्वासः भूतं प्रथमं न भाषते । केनापि प्रथमं भूतं प्रति भाषणीयम् । पश्चात् तद् भाषते ।

In Public domain. Digitization Muthulakshmi Research Academy

कुक्कुटेन विरावे कृते तद् भूतमन्तर्हितम् । पुरातनविश्वास आसीत् भूतप्रेतपिशाचादयो बद्धास्तिष्ठन्ति । अर्धरात्रे मुच्यन्ते स्वेच्छया संचरितुम् । प्रातः कुक्कुटरवे श्रुते तैः प्रत्यागन्तव्यं बन्धनेषु ।

2. भ्रात्रे हेम्लेटाय - क्लाडियसस्य ज्येष्ठो भ्राता राजा हेम्लेटः यो हतः । तस्य राज्ञो हेम्लेटस्य पुत्रो युवा हेम्लेटः ।

3. बन्धोः । Nephew इति मूले । मम हेर्कुलसस्य च । हेर्कुलसो ग्रीकपुराणेषु महाबलवान् महाधैर्यवांश्च वीरः । विवाहभोजने शीतं परिवेषितम् । इयमतिशयोक्तिः । हेम्लेटस्य पितुर्मरणाद् बहुदिनानन्तरं मातुः पुनर्विवाहोऽभवत् ।

4. समाधिः - Tomb

5. अग्निमयनरके दिवा उपवासः कर्तव्यः । केथोलिकमतानुसारेण मृतानामात्मान एवं दण्ड्यन्ते तेषां पापानां कृते । तत् स्थानं पर्गेटरी कथ्यते । पश्चात् ते स्वर्गं गमिष्यन्ति । सा आत्मन्येव पीडामनुभवतु । नाटकव्याख्यातॄणामभिप्रायेण हेम्लेटस्य माता पत्युर्भ्रात्रा क्लाडियसेन सह व्यभिचारं चकार । अत एव पत्युर्मरणानन्तरमेकस्मिन्नेव मासे सा क्लाडियसं पर्यणयत् । मुनिना पेट्रिकेनाहं शपे । एष केथलिकमुनिः ।
मम प्रवर्तनं विलक्षणं विचित्रं च भवतु । पश्चात् हेम्लेट उन्मादं नटति । स मनागुन्मादी परिणत इति च दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

II 1. प्रथमाङ्कद्वितीयाङ्कयोर्मध्ये कश्चन कालो गतः । तस्मिन् काले हेम्लेट उन्मादनटनमकरोत् । पितुर्वचनेन ओफीलिया हेम्लेटं पर्यहरत् । स्यात् तेन स मनागुन्मादी अभवच्च ।

2. दूतान् प्रैषयद् भ्रात्रीयस्य । स्वस्रीयस्य वा । Nephew.

पितृव्यसकाशे । मातुलसकाशे वा । Uncle

त्रिसहस्रक्रौनानाम् । Crown तत्र प्राचीनरजतनाणकम् ।

दर्शने दर्शने। अत्र मूलं परिवर्तितम् ।

तस्या धवलक्रोडे । इदं तत्कालप्रणयिनां प्रेमलेखानामनुकरणम्। प्रणयी कानिचन पद्यानि विरच्य प्रियायाः प्रेषयति स्म । सा तेषां गुणज्ञा तानि पुनः पुनः पठति मनसि स्थापयतीत्याशया।

संचलत्यर्यमेति । सूर्यश्चलतीति भूमिः स्थिरेति तस्मिन् काले कश्चिदभिप्रायः ।

अस्मिन् दृश्ये नाटकप्रयोगचर्चाभागो मया त्यक्तः । अन्यश्च भागः संक्षिप्तः ।

स्त्रीवेषेण स्थितं नटं प्रति । तस्मिन् काले नाटकेषु स्त्रीवेषान् पुरुषा (बालाः) नटा धरन्ति स्म ।

हेकूवा । प्रियामस्य पत्नी ट्रोयस्य राज्ञी । हेम्लेटस्य स्वगतं संक्षिप्तम् ।

III 1. आवश्यककार्येषु आपतितो विलम्बः । इदं मूलात् परिवर्तितम्। तानि प्रतिसमर्पयितुं चिन्तयामि । विवाहप्रस्तावे भग्ने पूर्वं

In Public domain. Digitization Muthulakshmi Research Academy

तेन प्रेमिकेण दत्तानि बहुमानवस्तूनि स्त्री प्रतिनिवर्तयति । एष आचारः ।

2. समकालिकनाटकप्रयोगानाक्षिपता षेक्स्पियरेणात्र बहु रचितम्। तत् सर्वमिदानीमनावश्यकमिति इदं दृश्यं संक्षिप्तम् । किञ्चित् परिवर्तितं च ।

नगराक्रोशकाः । नगरेषु प्रकटनकर्तारः ।

अप्यहं तवाङ्के उपविशेयम् ? अङ्कशव्दस्य उत्संग इति पार्श्व इति चार्थौ । सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपम् । भर्तुहरिः । नीति. 30

किरीटमपनयति । अत्र संदेहो भवति । इदं पश्यन्नेव राजा उद्विग्नः प्रदर्शनादुत्थाय किं न गत इति । राज्ञ्या पोलोनियसेन वा भाषमाणेन राज्ञा इदं दृश्यं सम्यङ् न दृष्टं स्यात् । इति कथञ्चित् समाधेयम् । अयं व्याख्यातॄणां कश्चिदभिप्रायः ।

गच्छतु विलपतु मृगः क्षतः । किञ्चित् परिवर्तितम् । तथापि भावो न ज्ञायते ।

समाजे अर्ध भागमपि - तस्मिन् काले नटादीनां वेतनं नासीत्। लाभा विभक्ताः । मुख्यानामधिकभागा अमुख्यानामल्प-भागाश्च प्राप्ताः ।

नीरो राजस्यात्मा मां न प्रविशतु । नीरो इति क्रूरो रोमस्य राजा येन माता एग्रिपीना हता ।

In Public domain. Digitization Muthulakshmi Research Academy

3. भ्रातुः प्रथमा हत्या कृतासीत् । एडमीवयोः (Adam and Eve) द्वौ पुत्रौ कैनः एबेलश्च । कैनः एबेलं जघान । तस्मात् स शप्तः कान्दिशीकः अज्ञातश्च परिभ्रमिष्यसीति । Genesis 4-10-12

मम कृपाणः पुनः कोशं प्रविशतु । किमिदं हेम्लेटस्य मतविश्वास-जातभावना उत कार्यनिर्वहणे प्रवर्तनाभावः ? उभे च स्याताम्। किन्तु पश्चात् स पोलोनियसं राजानं मत्वा सपदि हन्ति ।

4. विस्मृतः । कर्तरि क्तः । मधुकर विस्मृतोऽस्येनां कथम् । शाकुन्तलम् 5.1

पोलोनियसं हन्ति च । हेम्लेटः अचिन्तयत् राजा तत्र निलीन इति ।

राज्ञो हननम् ? हेम्लेटस्य दोषारोपणवचनं राज्ञ्या न प्रत्याख्यातम् । अतः पत्युर्हत्या तस्याः सम्मत्या तस्य भ्रात्रा कृता स्यात् ।

इतः पश्येमे चित्रे । हेम्लेटो दर्शयति स्वस्य कण्ठे धृतं पितुश्चित्रं मातुः कण्ठे धृतं क्लाडियसस्य चित्रं च । अथवा भित्तौ स्थापिते भ्रात्रोः हेम्लेट (एष यूनो हेम्लेटस्य पिता गेर्ट्रूडायाः प्रथमः पतिः) क्लाडियसयोश्चित्रे । क्लाडियसस्तस्याः साम्प्रतिकः पतिः ।

बद्धा लेखाः There are letters sealed.

In Public domain. Digitization Muthulakshmi Research Academy

IV 2. यतः स धूल्या निर्मितः । Dust thou art, and unto dust thou shalt return. Genesis 3.19

4. क्रमचलनम् Marching

5. कथं विभेदं - इमानि प्राचीनगीतखण्डानि । तीर्थयात्रां कृत्वा प्रत्यागतो निर्दिष्टं शिरोवेष्टनं हस्तेन दण्डं च धरति स्म । चैत्यं समाधिशिला । Tomb Stone. मृतस्य छदनं - इङ्ग्लीषगीतमस्पष्टम् । मया किञ्चित् परिवर्तितम् ।

कस्यचित् पुत्री । इयं प्राचीना कथा । ओफीलियायाः वचनानि असंबद्धानि । सा उन्मादिनी अभवत् । हेम्लेटस्योन्मादः पूर्णतया वा प्रायेण वा नटना ।

उक्त्वा बहूनि - इङ्ग्लीष्पद्यस्याभिप्राय उक्तः । ओफीलियायाः संगमोऽभवत् हेम्लेटेन सह पश्चात् पितुर्भ्रातुश्च वचनैः सा तस्य निराकरणमकरोत् येन कारणेन च उभयोश्च मनोवैकल्यम् कश्चिदभिप्रायः ।

जपापुष्पं = rose.

7 हस्तलेखः = Signature. प्राचीनव्यवहारः स्वहस्तः । स्वहस्तो दत्तः ।

लघ्वीं कृपाणिकाक्रीडास्पर्धां कुर्याः । आवृतधाराकृपाणैः सा क्रीडास्पर्धा क्रियते स्म । किन्तु क्लाडियसः अनावृतधाराकृपाणं लेर्टेसाय दातुमचिन्तयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

देवालये तस्य कण्ठं खण्डयिष्यामि । देवालये (Church) कस्यापि हननं महापापम् । चोरो घातकोऽपि देवालयान्तर्भागे यदि स्यात् स न वध्यः किल तदा । प्रार्थनां कुर्वन्तं पितृव्यं हन्तुं हेम्लेटो नेयेष । लेर्टेसस्य स नैतिकभावो नास्ति ।

तदहं करिष्यामि । कृपाणक्रीडास्पर्धायामुपयुक्ताः कृपाणाः आवृतधारा भवन्ति । किन्तु क्लाडियसो लेर्टेसाय अनावृतधारा-कृपाणं दातुमसूचयत् । तस्य सम्मत आसीत् लेर्टेसः ।

V 1. व्याख्यातारो लिखन्ति षेकस्पियरस्य काले आत्मघातिनां जनानां ख्रैष्टीयं निखननं न दत्तमिति ।

तस्मिन् दिने हेम्लेटो युवा जातः । हेम्लेटस्य तस्य पितुर्मरणानन्तरं माता मासद्वयान्तरे पत्युर्भ्रातरं द्वितीयं पतिमकरोत् । तदा हेम्लेटो युवा । तस्य पितुर्हेम्लेटस्य मरणदिवसो यूनः पुत्रस्य हेम्लटस्य जन्मदिवसः । स तस्य विंशतितमो वा एकविंशतितमो वा जन्मदिवसः ।

कस्मिन् विषये ? अत्र श्लेषः । निखननं किञ्चिद् धार्यताम् । ओफीलियाया देहो गर्ते स्थापित इत्यूह्यम् ।

आत्मानं विदारयिष्यामि । तस्मिन् काले युवानः प्रिययुवतीनां कृते एवंविधानि विलक्षणानि कार्याणि करिष्याम इति वदन्ति स्म कानिचित् कुर्वन्ति स्म च ।

इदं दृश्यं संक्षिप्तम् ।

In Public domain. Digitization Muthulakshmi Research Academy

2. शिरोवेष्टनं शिरसि स्थापयति । मूलं परिवर्तितम् ।

कृपाणः छुरिका च । कृपाणः प्रत्यर्थिनि स्पर्शं करोति ।

छुरिकया प्रत्यर्थिकृतः प्रहारो निरुध्यते ।

तस्य फ्रान्सगमनात् पश्चादहमभ्यासं कुर्वन्नासम् । तदा हेम्लेट उन्मादं नटन्नासीत् । तथापि तेन कृपाणप्रयोगाभ्यासश्च कृतः स्यात् ।

युवयोः कृपाणचालनस्पर्धायाम् ।

The king sir, hath laid that in a dozen passes between yourself and him he shall not exceed you three hits. He hath laid on twelve for nine.

द्वादश द्वादश प्रहारप्रयत्नेषु अर्थात् यावता लेर्टेसो हेम्लेटे द्वादश प्रहारान् कुर्यात् तावता हेम्लेटेन लेर्टेसे नव प्रहाराः कर्तव्याः । तदा स्पर्धा समा भवति । यदि हेम्लेटो नवभ्यो न्यूनान् प्रहारान् कुर्यात् तदा स पराजीयते । लेर्टेसः अनुभवशाली निपुणः । तस्मात् स्पर्धा तथा निर्णीता ।

In Public domain. Digitization Muthulakshmi Research Academy

एन्टोनिः क्लियोपेट्रा च

I 1. अल्पश्मश्रुमुखेन यूना सीजरेण । अस्मिन् काले आक्टेवियसः सीजरः युवा भवेत् । एन्टोनेः स बहुभिर्वर्षैरवरः। मृन्मयीयं भूमिः । णत्वं न भवति नकारस्यासिद्धत्वात् ।

2. महाराजो हेरोडः । हेरोडो जीससस्य ख्रैस्टस्य समकालिकः किञ्चित् पूर्वः इस्रेलस्य पालकः क्रूरश्च ।

वयं तमिदानीं न द्रक्ष्यामः । राज्ञी क्लियोपेट्रा आत्मानमुद्दिश्य वयमित्यवदत् । महतः पाम्पेरुत्कर्षम् । The greatness of Pompey The Great. एष महान् पाम्पिः जूलियसस्य सीजरस्य समकालिकः। अयं पाम्पिः जूलियसः सीजरः मार्कः क्रेसश्च रोमस्य परिपालका आसन् । पश्चात् जूलियसस्य सीजरस्य तस्य महतः पाम्पेश्च विरोधो जातः । सीजरेण स पाम्पिः पराजितः । पश्चात् स पाम्पिः ईजिप्टे हतः । तस्य द्वौ पुत्रौ । प्रथमः पुत्रः नेयसः पाम्पिः Gneuis Pompey. जूलियसः सीजरः क्लियोपेट्रायाः प्रथमः प्रिय आसीत् । तयोरेकः पुत्र आसीत् सीजरियन्नामा । जूलियसस्य सीजरस्य मरणानन्तरं नेयसः पाम्पिः क्लियोपेट्रायाः प्रिय आसीत् कञ्चित् कालम् । स मृतः । पश्चात् मार्कः एन्टोनिः क्लियोपेट्रायाः प्रियोऽभवत् बहुकालम् । सेक्स्टसः पाम्पिः महतः पाम्पेः द्वितीयः पुत्रः । सः I. 4 दृश्ये दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

3. त्वं तदा असत्यवचनाग्रणीरासीः । रोमनगराद् दूता आगता इति एन्टोनिः रोमं गन्तुमिच्छतीति क्लियोपेट्राया ज्ञातं स्यात्।

4. आक्टेवियसः सीजरः । एष जूलियसस्य सीजरस्य भ्रातुः पुत्रः । जूलियसेन सीजरेण पुत्रवद् गृहीतः । आक्टेवियसः सीजरः लेपिडसः मार्कः एन्टोनिश्च एते त्रयः संघटिता भूत्वा जूलियसस्य सीजरस्य हन्तॄन् ब्रूटसादीन् पराजित्य रोमन-साम्राज्यमस्थापयन् । अयम् आक्टेवियसः सीजरः पश्चात् अगस्टसः सीजरः अभवत् ।

स मृतस्य टालेमेः पत्न्यां कामी अस्ति । टालेमेः त्रयोदशस्य (ptolemy XIII. संख्या संदेहास्पदा ।) पुत्री क्लियोपेट्रा । अस्या अनुजः कनीयान् टोलेमिः चतुर्दशः Ptolemy XIV. तेषामाचारेण तयोर्विवाहः कृतः । तस्य विवाहस्याभिप्रायः राज्याधिकारः अन्यसात् न भवतु इति । स विवाहः केवलः शब्दमात्रः किल । पश्चात् तस्याः स शब्दपतिर्मृतः । क्लियोपेट्राया जीवितकालः 69 B.C. - 30 B.C.

5. इदानीं तव गानं न शृणोमि । षेक्स्पियरस्य काले षण्डाः प्रार्थनामन्दिरेषु (Churches) गातुं नियुज्यन्ते स्म । Mardian मर्डियाना इति मया लिखितम् । महाभारतविराटपर्वणि अर्जुनः बृहन्नला इति कथितः ।

II 2. उपविशतु भवान् । किन्तु तेषु तव कोपकारणं न पश्यामि ।

In Public domain. Digitization Muthulakshmi Research Academy

भवत् त्वत् शब्दौ समौ । भवच्छब्दे गौरवं त्वच्छब्दे अगौरवं नास्ति । राजा विदूषकं प्रति । स भवान् प्रत्यादेशवेलायां मत्समीपगतो नासीत् । पूर्वमपि न त्वया कदाचित् .... । शाकुन्तलम् 6. शिष्यः अगस्त्यं प्रति -

द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिन्दमौ ।

यदत्रानन्तरं तत् त्वमाज्ञापयितुमर्हसि ।। रामा बरोडा अर.11.8.

भृत्यं स्वामी वदति । भवान् वस्त्रं क्षालयेत् । पाणिनिसूत्रम् । 3-3-161 सि.कौ. 2208 बा.म. दृश्यतां मम निबन्धः शब्दप्रयोग -चर्चा । सीताहरणम् अन्याश्च रचनाः ।

पार्थियां प्रति । पार्थियाराज्यं प्रति ।

सीजरः मेसेनसेन सह कमपि विषयं भाषमाणः प्रविशति ।

तथास्तु - आङ्गलभाषायां happily Amen इति । Amen इति ओम् शब्दतुल्यमिति Turner.

मिसेनपर्वतसमीपे - रोमनगरदक्षिणेन ।

मन्मथाविव - Cupids.

वीनसचित्रमतिशयाना । Venus प्रेमदेवता । Goddess of Love.

राज्ञी सा तरुणी - Royal wench !

She made great Caesar lay his sword to bed;

He ploughed her and she cropped.

In Public domain. Digitization Muthulakshmi Research Academy

राज्ञी सा तरुणी

तया महान् सीजरः मुक्तखड्गः शय्यायां कृतः ।

स तया सह मैथुनमकरोत् तयोः पुत्रश्च जातः ।

इमाः पङ्क्तयः केषुचिदाधुनिकप्रकाशनेषु लुप्ताः । केषुचित्तु दृश्यन्ते ।

3 इदानीं दोषस्तत आगमनम् । इदं मम संयोजनम् ।

5 सीजरो निन्दितः । तस्याः प्रथमः प्रियो जूलियसः सीजरः ।

6 मया केचिद् युष्मन्मुख्यजनाः स्थापिताः । उभयपक्षयोश्चर्चायाः पूर्वं चर्चायाः सम्यक्प्रवर्तनाय उभयपक्षयोः केचिन्मुख्यजनाः स्थाप्यन्ते । Hostages.

नामोद्ग्रहणेन - Drawing lot.

एपोल्लोडोरसः काञ्चन राज्ञीम् । कस्याप्यज्ञाता क्लियोपेट्रा आस्तरणावृता एपोल्लोडोरोसेन सीजरसकाशं नीता । पश्चात् सीजरक्लियोपेट्र्योः प्रणयसंबन्धो बभूव ।

इनोबार्बसः (स्वगतम्) - इदं मूले इनोबार्बसमेनसयोः संभाषणरूपेणास्ति । किन्तु नूतनपरिचितस्य पुरस्तात् स्वस्य प्रभोः शीलं प्रवर्तनं च न युज्यते प्रकटयितुम् इनोबार्बसस्य । तस्मादिदं तस्य स्वगतं मया कृतम् ।

7 यदा चत्वारः अंशास्तं त्यजन्ति । अग्निर्वायुर्भूमिर्जलमिति

In Public domain. Digitization Muthulakshmi Research Academy

चत्वारि मूलवस्तूनि भवन्ति प्राणस्य इति विश्वासः । एषः अभिप्रायः मेक्बेतनाटके चास्ति ।

III 1. मार्कसस्य क्रेससस्य मृतेः प्रतिकारो विहितः । जूलियसः सीजरः महान् पाम्पिः मार्कसः क्रेससश्च रोमनगरे प्रथमास्त्रयो नायका आसन् । मार्कसः क्रेससः पार्थियाराजेन ओरोडेसेन हतः । ओरोडेसस्य पुत्रः पोकोरस इदानीं रोमसेनानायकेन वेन्टिडियसेन हतः ।

2. एते त्रयः । आक्टेवियसः सीजरः एन्टोनिः लेपिडसश्च । मम पूर्वस्य पत्युर्गृहमवेक्षस्व । पूर्वः पतिः । Caius Marcellus. अत्र कश्चिद् भागस्त्यक्तः ।

4 द्वितीयचतुर्थदृश्ययोर्मध्ये कश्चित् कालो गतः । तदपि कुपितो मा भव । तदपि तथापि । नैषधम् 16.71.

5 यः पाम्पिमहन् । महान् पाम्पिः टिषयसेन हतः । परन्तु चारित्रिका वदन्ति स टिषियसः एन्टोनेः सेनानीरिति । डोमिषियसः । इदम् इनोबार्बसस्य व्यक्तिनाम ।

6 सीजेरियनः । क्लियोपेट्रायां जूलियसस्य सीजरस्य पुत्रः । एन्टोनेः क्लियोपेट्रायां द्वौ पुत्रावेका पुत्री च । Alexander Elios पुत्रः । Cleopatra Selene पुत्री । यमौ । Ptolemy पुत्रः ।

7 एक्टियम् Actium ग्रीसदेशपश्चिमप्रदेशे समुद्रतीरे स्थलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

यदि त्वं युद्धे स्थास्यसि । राज्ञीं प्रति त्वंशव्दप्रयोगः अगौरवं न सूचयति । दृश्यतां II 2.

लजियन Legion = 4500

11 फिलिप्पियुद्धे सीजरः खड्गं कोशे निहितवान् नर्तक इव । षेक्स्पियरस्य काले पुरुषा नर्तकाः कट्यां सकोशं खड्गं धरन्ति स्म ।

13 जपापुष्पम् Rose.

मया एन्टोनेः कृतः सम्मानः स्वेच्छया न कृतः । बलादेव कृतः। अस्मिन् असत्यवचने क्लियोपेट्रा राजकीयनैपुण्यं प्रदर्शयति । केवलमेवमुक्त्वा तस्य वचनस्य सीजरस्य प्रतिवचनं ज्ञातुमिच्छति ।

IV.1 मर्तुं मम तस्य चान्ये बहवो मार्गाः सन्ति । मूले I have other ways at my disposal of dying इति । व्याख्याता Turner रचयति तत्र चरित्रमस्पष्टमर्थमेवमपि स्यादिति । Antony who had many other ways to die इति । अतो मया उभयथा रचितम् ।

3.ते एन्टोनेः सैनिकाः । हेर्कुलसः । एन्टोनेः कुटुम्बस्याद्यपुरुषः हेर्कुलस इति तेषां विश्वासः ।

6 प्रपञ्चस्य त्रिषु भागेषु शान्तिर्भविष्यति । रोमनसाम्राज्यम् आक्टेवियसस्य सीजरस्य मार्कस्य एन्टोनेः लेपिडसस्य चाधीने

In Public domain. Digitization Muthulakshmi Research Academy

आसीत् । अनेन युद्धेन ते त्रयो भागा एकीभूय आत्मनः (अगस्टस्य सीजरस्य) परिपालने आगमिष्यन्तीति आक्टेवियसस्य सीजरस्याशयः ।

सर्वाणि तानि त्वं गृहाण । सैनिको मृषा हास्यं वदतीति मत्वा इनोबार्बसेन एवमुक्तम् ।

8 गानकोकिल । गाने पुंस्कोकिलः प्रसिद्धः । सूर्यरथवत् - शोभनसूर्यदेवो (Phoebus) (Apollo) रथेन आकाशे प्रयाति।

13. प्रार्थनाकोष्ठम् । मूले Monument इत्यस्ति । तदेवं रचितम्।

14 हे शकलितकवच । गच्छ । ईरासः एन्टोनेः कवचं मोचयतीति ऊह्यम् ।

15 हे सूर्य ! यस्मिन् मण्डले त्वं भ्रमसि । भूमिं परितः सूर्यचन्द्रादयो भ्रमन्तीति पूर्वविश्वासः ।

V.2 क्लियोपेट्रायाः कोशाध्यक्षः पट्टिकां परिशील्य सत्यम् । सर्वं प्रकटितम् इति वदति । किन्तु षेक्स्पियरेण चरित्रमनुसृत्य रचितं तया कानिचन बहुमूल्यानि वस्तूनि न प्रकटितानि सेल्यूकसेन स विषयः प्रकटितः तेन क्लियोपेट्रायास्तस्मिन् कोपो जात इति च । स प्रसङ्गो नाटकगाम्भीर्यं न पुष्णातीति मया त्यक्तः । पुत्रानपि विसृज्यात्मघातं करिष्यति क्लियोपेट्रा। तस्मात् षेक्स्पियररचितमपि मया त्यक्तम् ।

कश्चिद् बालो हीनकण्ठो मम पात्रं नटिष्यति । षेक्स्पियरस्य

In Public domain. Digitization Muthulakshmi Research Academy

काले नाटकेषु स्त्रीपात्राणि पुरुषैर्बालैर्नटितानि ।

परिणामशीलश्चन्द्र इदानीं न मम सदृशः । चन्द्रस्याकारः परिमाणं च दिने दिने अन्यथा भवतः । चन्द्र इन्गलीषभाषायां स्त्री । The moon is down and she goes down at twelve. Macbeth. II.1. तस्या दिनदिनपरिणामः स्त्रिया-श्चञ्चलतायाः प्रतिरूपं कथितम् ।

ग्राम्यो निष्क्रान्तः । ग्राम्यस्य संभाषणं संक्षिप्तम् ।

इदानीं मयि अग्निर्वायुश्च भवतः भूमिर्जलं च त्यक्ते मरणशील-जीविते । दृश्यताम् II.7.

ऐरासा पतति म्रियते च । यदा क्लियोपेट्रा स्वालंकारं पश्यन्ती आसीत् तदा ऐरासया स्वहस्ते सर्पः स्थापित इत्यूह्यम् ।

मा खलु मा खलूक्त्वा । मा खलु मा खलु साहसं कृत्वा प्रवेष्टुम् । बालचरितम् 4.

आक्टेवियसः सीजरो निपुणः । मार्कः एन्टोनिः समर्थः । सत्स्वपि व्यक्तिदोषेषु अन्ते एन्टोनिः क्लियोपेट्रा च उन्नतौ संजातौ । तौ सीजरस्य वशौ न बभूवतुः। स्वतन्त्रौ परस्परप्रियौ मृतौ ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN: 978-81-975732-6-2

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024